In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'अर्वाचीनसंस्कृत'-काव्यसङ्ग्रहः

(प्रथमः खण्डः)

डॉ. रमाकान्त शुक्लः

देववाणी-परिषद्, दिल्ली

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

॥ श्रीहरिः ॥

13.12.2021

(मुरलीमनोहरपाठकः)

13.12.2021

13/12/2021

13.12.2021

Partha Konar Rout
13-12-21

13.12.2021

13.12.2021

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'देववाणी-परिषद्, दिल्ली'-ग्रन्थाङ्कः - १४६

'अर्वाचीनसंस्कृत'-काव्यसङ्ग्रहः

(प्रथमः खण्डः)

सङ्कलयिता सम्पादकश्च
डॉ. रमाकान्त शुक्लः
प्रधानसम्पादकः
'अर्वाचीनसंस्कृतम्'
(त्रैमासिकं संस्कृतपत्रम्)

देववाणी-परिषद्, दिल्ली
आर ६, वाणी-विहारः,
नवी दिल्ली ११००५९ (भारतम्)

Padma Shri Ramakant Shukla Collection at Devavani Parishad, Uttam Nagar, New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'अर्वाचीनसंस्कृत'-काव्यसङ्ग्रहः (प्रथमः खण्डः)

संपादकः : डॉ. रमाकान्त शुक्लः
प्रकाशकः : देववाणी-परिषद्, दिल्ली
आर-६, वाणी विहारः,
नयी दिल्ली-११००५९ (भारतम्)
मुद्रकः : मयूर प्रिंटर्स एण्ड पब्लिशर्स,
डब्ल्यू एच-२६, प्रथम तल, फेज-१,
मायापुरी इंडस्ट्रियल एरिया, नई दिल्ली-११००६४
संस्करणम् : प्रथमम्, २०२१ ई.
मूल्यम् : सहस्रद्वयं रूप्यकाणि (रु. २०००.००)

© लेखकः

ISBN - 978-81-85924-42-7

'Arvacheenasanskrita' Kavyasangrahah (First Volume)

Editor : Dr. Ramakant Shukla
Publisher : Devavani Parishad, Delhi
R-6, Vani Vihar, New Delhi-110059
(India). Phone : 011-28561846
Printer : Mayur Printers & Publishers,
WH-26, First Floor, Phase-I, Mayapuri,
I.A., New Delhi-110064
Edition : First 2021
Price : Rs. Two thousand only,
Rs. 2000.00

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रास्ताविकम्

'अर्वाचीनसंस्कृत'-काव्यसङ्ग्रहस्य प्रथमे खण्डे 'अर्वाचीनसंस्कृत' मित्याख्ये त्रैमासिकपत्रे समये समये प्रकाशितानां रचनानां सङ्कलनं कृतमस्ति। १९८०-२०२१ ई. कालावधौ प्रकाशिता १२२ रचना अत्र सङ्कलिताः सन्ति। अर्वाचीनसंस्कृस्य लेखकाः सादरमभिनन्द्यन्ते। विषयसूच्यां कोष्ठान्तर्गतं पूर्वं वर्षसंख्या तदनु चाङ्कसंख्या दीयते। आगामिष्वङ्केष्वन्यासां रचनानां प्रकाशनं कर्तुं यतिष्यते।

पाठका भाषा-भाव-लिपि-गतान् दोषान् कृपया संशोध्य पठन्त्विति तान् सादरं याचे।

अनेन ग्रन्थेन 'अर्वाचीनसंस्कृत'स्य साहित्यिकं वैभवं पाठकान् यदि प्रीणाति तदास्माकं श्रमः साफल्यमवाप्स्यति।

दि. २७.५.२०२१

विदुषामाश्रवः



(रमाकान्तशुक्लः)
प्रधानसम्पादकः
'अर्वाचीनसंस्कृतम्'
'रमालयः', आर-६,
वाणी विहारः, नयी दिल्ली-११००५९

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विषय-सूची

क्रमः	विषयः	लेखकः	पृष्ठाङ्कः
	प्रास्ताविकम्		*iii*
१.	'भूतले भाति मेऽनारतं भारतम्' (२/४)	*डॉ. रमाकान्तशुक्लः*	१
२.	दूरदर्शने प्रस्तुतं भाति मे भारतम् (१२/१)	" "	२०
३.	अहं स्वतन्त्रता भणामि (९/१)	" "	३०
४.	रौति ते भारतम्! (९/२)	" "	३५
५.	भारतजनताऽहम् (८/३)	" "	३९
६.	उत्तरमंगलम् (१२/१)	" "	४४
७.	वदत नेतारो मनाक्! (१२/४)	" "	५२
८.	किं जीवनं ते! (१३/२)	" "	५८
९.	वन्दनीयास्ते (१५/१)	" "	६२
१०.	मदीयकविते! कुरुष्व गानम् (१६/१)	" "	६७
११.	भारतस्य विजयोऽयम् (२१/३)	" "	७०
१२.	लोकतन्त्रेऽस्मिन् (२०/१)	" "	७२
१३.	किं कुर्यात् (१) (२४/१)	" "	७७
१४.	किं कुर्यात्! (२) (२६/१)	" "	७९
१५.	यानावरोधो दुस्त्यजः, शकटावरोधो दुरत्यजः (२६/१)	" "	८१
१६.	निर्वाचने प्राप्ते (१) (२६/२-२९/४)	" "	८२
१७.	निर्वाचने प्राप्ते (२)	" "	८३
१८.	आक्रमणं कुरु (अतिरिक्ताङ्कः १५९)	" "	८५
१९.	शोभनं कृतम् "	" "	९२
२०.	दशमगुरुवरं नमामि "	" "	९५
२१.	विमर्दीकरण-प्रश्नोत्तरम् "	" "	९६

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

२२.	राजकवित्वाकांक्षा (अतिरिक्ताङ्कः १५९)	डॉ. रमाकान्तशुक्लः	९७
२३.	राष्ट्रभाषा संस्कृतम् (अतिरिक्ताङ्कः १५९)	डॉ. रमाकान्तशुक्लः	९९
२४.	सुन्दरी सा "	डॉ. ऋषिराजपाठकः	१०३
२५.	कुण्डलियैकादशी "	डॉ. देवीसहाय पाण्डेय 'दीपः'	१०४
२६.	चन्द्रिका "	जि.एस्. श्रीनिवासमूर्तिः	१०७
२७.	उपालम्भशतकम् (३२/२-४)	'अभिराज' राजेन्द्रमिश्रः	१२८
२८.	इदं विश्वम् (संस्कृतगजलम्) (३२/२-४)	प्रो. (डॉ.) महेश झा	१३८
२९.	आशा (३२/२-४)	डॉ. रमाकान्तशुक्लः	१३९
३०.	राष्ट्रमेतत्सदा वर्धतां भारतम् (३२/२-४)	डॉ. बलदेवानन्द सागरः	१५१
३१.	मे वारो जयतेतराम् (३२/२-४)	बन्धकारः-शैतलः सङ्घसेनः	१५२
३२.	स्त्री (३२/२-४)	डॉ. बनमाली बिश्वालः	१५५
३३.	जीवन-रहस्यम् (३२/२-४)	प्रो. सुधीकान्त भारद्वाजः	१५७
३४.	पारसीकाव्यानुवादः (३२/२-४)	डॉ. बलराम शुक्लः	१५९
३५.	अभिनन्दनपद्यानि (३२/२-४)	श्री श्री. सुन्दरराजः	१६०
३६.	मकरसङ्क्रान्तिः (४१/१)	रमाकान्तशुक्लः	१६२
३७.	शब्दमन्दाकिनी (४१/२)		१६४
३८.	अनुच्छेदोच्छेदने शुभकामना अभिनन्दनम्! (४१/३)	रमाकान्तशुक्लः	१७३
३९.	आर्योपवनम् (पूर्वार्धः) (४१/१)	जि.एस्. श्रीनिवासमूर्तिः	१७६
४०.	आर्योपवनम् (उत्तरभागः) (४१/३)	" "	१८१
४१.	समीहा!! (४१/३)	प्रो. जनार्दनप्रसादपाण्डेयमणि	१८५
४२.	चन्द्रोऽहम् (४१/३)	ऋषिराजपाठकः	१८६
४२.	श्रीकृष्णाष्टकम् (४१/३)	अरविन्दतिवारी	१८७
	(४२/१-४)		
४४.	प्राच्यविद्याधिवेशनम्	डॉ. रमाकान्तशुक्लः	१८९
४५.	कोरोनाशतकम्	'अभिराज' राजेन्द्र मिश्रः	२३४
४६.	कोरोनोत्सादनस्तोत्रम्	" "	२४५
४७.	कोरोना-विडम्बन-शतकम्	डॉ. माधव देशपांडे	२४७
४८.	कोरोना	डॉ. महेश झा	२६६

CC-0. Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar, New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४२/१-४)

४९.	जय जय चीनसुते	*डॉ. निरञ्जन मिश्रः*	२६८
५०.	प्रीतो भव महेश	" "	२६९
५१.	दिव्या करोना	*डॉ. निरञ्जन मिश्रः*	२७०
५२.	त्वं कथं शिवगामिनी	" "	२७१
५३.	करोनाषट्कम्	*जि.एस्. श्रीनिवासमूर्तिः*	२७३
५४.	कोरोने!तव कारणात्प्रियतमादूरङ्गतोऽयं शशी	*डॉ. शशिकान्त तिवारी 'शशिधरः'*	२७४
५५.	कोरोना विषाणुर्वा जैविकं शस्त्रं वा	" " "	२७५
५६.	कोरोना-कविसम्वादः	" " "	२७७
५७.	कोरोणाऽऽवलिः!	*डॉ. चन्द्रगुप्त वर्णेकरः*	२७८
५८.	दम्पत्योः संवादः	*डॉ. अरविन्दकुमारतिवारी*	२७९
५९.	अरविन्दविरचितं कोरोनादण्डकम्	" "	२८०
६०.	प्रयाहीतो निजं चीनम्	" "	२८२
६१.	को वेत्ति कस्य हृदये रमते करोना?	" "	२८३
६२.	भवानीसंस्तवः	" "	२८४
६३.	कॅरोना-गलज्जलिके	*डॉ. राम विनय सिंहः*	२८६
६४.	करोणामवश्यं जयेद्भारतम्	*डॉ. रमाकान्तशुक्लः*	२८८
६५.	कोरोनाष्टकम्	*डॉ. श्रेयांशद्विवेदी*	२९०
६६.	कोरोना किं करिष्यति?	*डॉ. अम्बालाल प्रजापतिः*	२९२
६७.	कोरोनानिरोधकाव्यम्	" "	२९२
६८.	संचलनम्	*डॉ. अरविन्दकुमारतिवारी*	२९३
६९.	श्रुत्वा भारतमातुरार्तवचनम्	*डॉ. कमलापाण्डेयः*	२९४
७०.	कोरोना	*डॉ. लक्ष्मीनारायण पाण्डेयः*	२९६
७१.	दर्शय भगवन् द्वारम्!!!	*डॉ. अरविन्दकुमारतिवारी*	२९८
७२.	कोरोनोन्मूलनक्रतुः	*डॉ. नवलता*	३००
७३.	कोरोनासंक्रमणम्	*डॉ. राजेन्द्र त्रिपाठी 'रसराजः'*	३०२
७४.	वैश्विकचिन्तनम्	" " "	३०३
७५.	करोनापञ्चदशी-करोनाषट्कम् (१)	*डॉ. जयानन्द बिजयन्*	३०४

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४२/१-४)

७६.	करोनाषट्कम् (२)	*डॉ. जयानन्द बिजयन्*	३०६
७७.	'करोनात्रिकम्' (३)	" "	३०८
७८.	कोरोना कोविदः	*प्रो. चौडूरि उपेन्द्र रावेण*	३०८
७९.	"कोरोना विषाणुः"	*डॉ. राजेन्द्र त्रिपाठी 'रसराजः'*	३१०
८०.	एते!	*डॉ. सचिनकुमारत्रिपाठी*	३११
८१.	महामारी कोरोनेयं, कोरोनेयं महामारी	*डॉ. धनञ्जयमिश्रः*	३१२
८२.	कोरोनारक्षास्तोत्रम्	*डॉ. अरविन्दकुमारतिवारी*	३१३
८३.	न हस्तमेलनं वरं न सज्जनैश्च मेलनम्	*आ. मिथिलाप्रसादत्रिपाठी*	३१४
८४.	अभिनवनीतिसारम्	*मुत्तलपुरं मोहन्दास्*	३१५
८५.	कोरोनामेवाभिलक्ष्य कतिपयान्यभिनवानि पद्यानि	*डॉ. रामविनय सिंहः*	३२०
८६.	कोरोने! धन्यवादार्हे!	*डॉ. पुष्कर आनन्दः*	३२४
८७.	कोरोनासन्देशम्	*डॉ. अरविन्द तिवारीः*	३२५
८८.	अरविन्दोपज्ञम् ईशदण्डकम्	" "	३६३
८९.	नवीनसूर्यः	*डॉ. प्रीतिः पुजारा*	३६४
९०.	सप्तकसप्तकम्	*डॉ. बुद्धेश्वर षडंगी*	३६७
	प्रथमं वृद्धसेवासप्तकम्	" "	३६७
	द्वितीयं मुखावरणसप्तकम्	" "	३६८
	तृतीयं गात्रावनसप्तकम्	" "	३६९
	चतुर्थम् आरोग्यसेतुसप्तकम्	" "	३७०
	पञ्चमं दरिद्रान्नसेवासप्तकम्	" "	३७१
	षष्ठं वृत्तिरक्षासप्तकम्	" "	३७२
	सप्तपदीसप्तकम्	" "	३७३
९१.	करोणा मायेयम्	" "	३७४
९२.	हटे करोना विषकीट राष्ट्र से	*डॉ. युवराजभट्टराई*	३७६
९३.	कोरोना	*डॉ. जनार्दन प्रसाद पाण्डेय 'मणिः'*	३७७

(४३/१-४)

९४.	कामयेऽहम्	*डॉ. कृष्णकान्तशुक्लः*	३७९
९५.	मुक्तानि मणिकाः	*डॉ. [illegible]*	३८३

CC-0. Padmashri Rama Kant Shukla Collection at Deva Vani Parishad, Qutab Garden, New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४३/१-४)

९६.	मुक्ता-कणिकाः	*डॉ. कृष्णकान्तशुक्लः*	३८५
९७.	कोऽहम्	" "	३९२
९८.	कदा?	" "	३९७
९९.	ते के न जानीमहे!	" "	४००
१००.	जीवनं सारभूतम्	" "	४०३
१०१.	सुधा	" "	४०५
१०२.	जीवनं तस्य जीवनम्।	" "	४०६
१०३.	हा हन्त!	" "	४०९
१०४.	साहित्य-सुधा	" "	४१२
१०५.	स्त्रीशक्तिशतकम् (४३/१-४)	*डॉ. रमाकान्तशुक्लः*	४१४
१०६.	प्रकृतिः सुरम्या	*हरिदत्तशर्मा*	४२४
१०७.	श्रीनटराज-शिवाष्टकम्	*आ.पं. नथमल शास्त्री दाधीचः*	४२५
१०८.	सरस्वतीद्वादशनाममाला	*डॉ. बुद्धेश्वरषडङ्गी*	४२७
१०९.	मनोहरपद्यानि	*डॉ. मनोहर लाल आर्य*	४२९
११०.	गुजरातदेशः	*अंबालाल प्रजापतिः*	४३२
१११.	सहकारं विना बन्धो! कथं कोविदमर्दनम्?	" "	४३३
११२.	केयं हि लोकविडम्बना	*डॉ. राधावल्लभशर्मा*	४३४
११३.	घोरकालेऽस्मिन्	" "	४३४
११४.	मानवता	*म.म. डॉ. कैलाशनाथ द्विवेदी*	४३६
११५.	पं. प्रेम नारायण द्विवेदी-प्रणीता पद्य-कादम्बरी	*सम्पादकः-डॉ. रमाकान्तशुक्लः, अन्वेषणकर्ता-पं. सूर्यकान्तद्विवेदी*	४३७
११६.	प्राज्वलयमहमपेक्षादीपम्	*डॉ. पुष्पा झा*	४६८
११७.	राजमणीयम्	*डॉ. विमल ढौंडियालः*	४६९
११८.	व्हर्जिनिया-विपिनानि	*पत्तरकिने नंदकिशोरः*	४८६
११९.	'विश्वभारत'-दर्शनम्	*डॉ. रमाकान्तशुक्लः*	४८७
१२०.	सदा वन्दनीया सभा रासभानाम्	*निरञ्जन मिश्रः*	५०७
१२१.	हिमाचल-प्रदेशः	*आचार्य सुरेश शर्मा भारद्वाजः*	५०९
१२२.	एकं गज़लम्	*डॉ. महाराजदीन पाण्डेयो 'विभाष्ः'*	५१२

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'भूतले भाति मेऽनारतं भारतम्'

रमाकान्तशुक्ल–प्रणीतं संस्कृतकाव्यम्

भाति मे भारतम्, भाति मे भारतम् ।
भूतले भाति मेऽनारतं भारतम् ॥ध्रुवकम्॥

विश्वबन्धुत्वमुद्घोषयत्पावनं
विश्ववन्द्यैश्चरित्रैर्जगत्पावयत् ।
विश्वमेकं कुटुम्बं समालोकयद्
भूतले भाति मेऽनारतं भारतम् ॥१॥

'क्रुद्धहिंसाबले क्वास्त्यहिंसाजयः?
कुत्र मुच्येत बद्धश्च मामन्तरा ?'
प्रश्नमित्थं जगत्सम्मुखे स्थापयद्
भूतले भाति मेऽनारतं भारतम् ॥२॥

मानवामानितं दानवाबाधितं
निर्जराराधितं सज्जनासाधितम्।
पण्डितैः पूजितं पक्षिभिः कूजितं
भूतले भाति मेऽनारतं भारतम् ॥३॥

मानवैर्दानवैस्सज्जनैर्दुर्जनै-
स्सद्धनैर्निर्धनैस्सद्बलैर्निर्बलैः ।
निर्जरैर्योगिभिर्भोगिभिश्चार्थितं
भूतले भाति मेऽनारतं भारतम् ॥४॥

वेशभूषाशनोपासनापद्धति-
क्रीडनामोद-संस्कार-वृत्त्यादिषु ।
यद्धि भिन्नं सदप्यस्त्यभिन्नं सदा
भूतले भाति तन्मामकं भारतम् ॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वेदभाभासितं सत्कलालासितं
रम्यसङ्गीत-साहित्य-सौहित्य-भूः ।
भारती-वल्लकी-झङ्कृतैर्झङ्कृतं
भूतले भाति मेऽनारतं भारतम् ॥६॥

यत्त्रयीसाङ्ख्ययोगादिमार्गैर्युतं
जीवनं मुक्तमाकर्तुमाकाङ्क्षति ।
शीलसन्तोषसत्यादिभी रक्षितं
भूतले भाति तन्मामकं भारतम् ॥७॥

दर्शनज्ञानचारित्र्यसम्मेलनं
यत्र मोक्षस्य मार्गं भणन्त्यागमाः ।
ज्ञानमास्ते च भारः क्रियां वै विना
भूतले भाति तन्मामकं भारतम् ॥८॥

जाह्नवी-चन्द्रभागा-जलैः पावितं
भानुजा-नर्मदा-वीचिभिर्लालितम् ।
तुङ्गभद्रा-विपाशादिभिर्भावितं
भूतले भाति मेऽनारतं भारतम् ॥९॥

विन्ध्य-सह्याद्रि-नीलाद्रिमालान्वितं
शुभ्रहैमाद्रि-हासप्रभापूरितम् ।
अर्बुदारावलीश्रेणि-सम्पूजितं
भूतले भाति मेऽनारतं भारतम् ॥१०॥

भाखडाबन्ध-दामोदरीयोजना -
बाणगङ्गा-फरक्कादिसिक्तोर्जितम् ।
ब्रह्मपुत्रादिसन्दर्शिताम्बुच्छटं
भूतले भाति मेऽनारतं भारतम् ॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विद्युदुत्पादने तैलसंशोधने,
इन्धनान्वेषणे लौहनिष्पादने ।
यन्त्रनिर्माणकार्ये समर्थं च सद्
भूतले भाति मेऽनारतं भारतम् ॥१२॥

रोगजालं चिकित्सालयस्थापनै-
रोषधोत्पादनैः शल्यशोधैस्तथा ।
नूतनाभिश्चिकित्साभिरुन्मूलयद्
भूतले भाति मेऽनारतं भारतम् ॥१३॥

आर्यभट्टं वियन्मण्डले स्थापयत्
पोखरण्-भूमिगर्भेऽणुशक्तिं किरत् ।
शान्तिकार्येष्वणुं प्रेरयत्सन्ततं
भूतले भाति मेऽनारतं भारतम् ॥१४॥

अग्निमूर्जस्वलं स्वत्वरक्षाकृते
साधनैरात्मनीनैः सुसंसाधयत् ।
युद्धपोताँश्च सिन्धूरसि स्थापयद्
भूतले भाति मेऽनारतं भारतम् ॥१५॥

रेल-नौका-विमानैस्तथा गन्त्रिभि-
र्यानकैस्तैश्च तैश्च प्रवेगान्वितैः ।
य"च्चरैवेति" नित्यं समुद्घोषयद्
भूतले भाति तन्मामकं भारतम् ॥१६॥

यद्बरौनी-भिलाई-बुकारो-स्वनैः
स्वोन्नतिस्यन्दनोत्थं शुभं घर्घरम् ।
दिक्षु विस्तारयद् वीक्ष्यते सर्वदा
भूतले भाति तन्मामकं भारतम् ॥१७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कर्दमाक्रान्तवीथिषु सौधेषु वा
यस्य पादातमार्गेषु गेहेषु वा ।
जीवनं लोकसेवापरं लक्ष्यते
भूतले भाति तन्मामकं भारतम् ॥१८॥

व्यावृतास्याः समस्याः समाधाय यत्
स्वावलम्बं समालब्धुमाकाङ्क्षति ।
मार्गमुच्चावचं लङ्घयित्वा चलद्
भूतले भाति तन्मामकं भारतम् ॥१९॥

विश्वनाथं महाकालमाराधयद्
एकलिङ्गं भजद् वेङ्कटेशं स्मरत् ।
कालिकां पूजयद् वैष्णवीं च स्तुवद्
भूतले भाति मेऽनारतं भारतम् ॥२०॥

शम्प्रदं शङ्करं माधवं राघवं
पार्वतीं राधिकां जानकीं च स्तुवत् ।
विट्ठलं बुद्धदेवं जिनं च स्मरद्
भूतले भाति मेऽनारतं भारतम् ॥२१॥

अर्थकामान्वितं धर्ममोक्षान्वितं
भक्तिभावान्वितं ज्ञानकर्मान्वितम् ।
नैकमार्गैः प्रभुं चैकमाराधयद्
भूतले भाति मेऽनारतं भारतम् ॥२२॥

संस्कृतं प्राकृतं तामिलं तेलुगुं
कन्नडं कैरलीं बाङ्गलामाङ्गलाम् ।
वाचमन्यां च तां तां ब्रुवद् वर्धते
राष्ट्रभाषायुतं मामकं भारतम् ॥२३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

व्यासवाल्मीकिरत्नाकरैरुज्ज्वलं
स्वादुकादम्बरीपानलुब्धं सदा ।
कालिदासेन भासेन संद्योतितं
भूतले भाति मेऽनारतं भारतम् ॥२४॥

मूलरामायणं पम्परामायणं
कम्बरामयणं जैनरामायणम् ।
कृत्तिवासादिरामायणं श्रावयद्
भूतले भाति मेऽनारतं भारतम् ॥२५॥

योगवासिष्ठगीतामहाभारतै-
र्ग्रन्थरत्नैश्च तैस्तैः प्रबुद्धं तथा ।
मानसं बीजकं सूरसिन्धुं दधद्
भूतले भाति मेऽनारतं भारतम् ॥२६॥

गद्यपद्याञ्जितं श्रव्यदृश्याञ्जितं
गीतनृत्याञ्जितं लोकवेदाञ्जितम् ।
सप्रसादं समाधुर्यमोजोन्वितम्
भूतले भाति मेऽनारतं भारतम् ॥२७॥

यच्च तीर्थैः पवित्रैर्व्रतैरुत्सवैः
पर्वभिर्दर्शनीयैः स्थलैः शोभितम् ।
यच्च नानाजयन्तीगणै राजितं
भूतले भाति तन्मामकं भारतम् ॥२८॥

द्वारकां सेतुबन्धं पुरीं बदरिकां
तिरुपतिं मधुपुरीं चाजमेरं दधत् ।
पुष्करामृतसरस्तीर्थराजैर्युतं
भूतले भाति मेऽनारतं भारतम् ॥२९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कुम्भसिंहस्थवैशाखिमुक्तेश्वर-
सोनपूरादिमेलापकै रञ्जितम् ।
रासलीलायुतं रामलीलायुतं
भूतले भाति मेऽनारतं भारतम् ॥३०॥

हस्तिगुम्फामजन्तामलौरां दधत्
खर्जुराहो-गया-सारनाथैर्लसत् ।
ताज-कोणार्क-विष्णुध्वजैर्मण्डितं
भूतले भाति मेऽनारतं भारतम् ॥३१॥

होलिका-दशहरा-पर्वकोजागरी-
पोङ्गल-श्रावणी-दीपमालामयम् ।
लोहडीदौणमाद्युत्सवैः पूरितं
भूतले भाति मेऽनारतं भारतम् ॥३२॥

ओडिसीं मणिपुरीं कथक-गर्बादिकं
कूचिपूडिं च गिद्दां छऊं भङ्गडाम् ।
कथकलीं डाण्डियां भरतनाट्यं दधद्
भूतले भाति मेऽनारतं भारतम् ॥३३॥

मन्दिरैर्मस्जिदैश्चैत्य-गिर्जागृहै-
रार्यगेहैर्गुरुद्वारकैर्भ्राजितम् ।
कर्मभूः शर्मभूर्धर्मभूर्मर्मभूः
भूतले भाति मेऽनारतं भारतम् ॥३४॥

यत्र मन्दाकिनी पापसंहारिणी
यत्र गोदावरी चारुसञ्चारिणी ।
देववाणी च यत्रास्ति मोदाकुला
भूतले भाति तन्नामकं भारतम् ॥३५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कृष्णलीलायुतं वेणुसन्नादितम्
पावनं भावनं यत्र वृन्दावनम् ।
शम्भुशूलस्थिता यत्र वाराणसी
भूतले भाति तन्मामकं भारतम् ॥३६॥

यत्र वृन्दावने गोधनं चारयन्
स्वीयमन्दस्मितैः पापमुन्मूलयन् ।
चारुकादम्बिनीनीलगोपालको
भूतले भाति तन्मामकं भारतम् ॥३७॥

भूधराकाशतोयेषु रक्षापरो
यत्र शत्रून् भटो हेलया नाशयेत् ।
यत्र वीराङ्गना युद्धभूमिं गता
भूतले भाति तन्मामकं भारतम् ॥३८॥

प्रेरणादायकं सत्कथागायकं
ज्ञानविज्ञानतेजोबलाधायकम् ।
दुःखदारिद्र्य-दग्धान् सदा पालय-
न्मोदते मे सदा पावनं भारतम् ॥३९॥

कोकिलैः कूजितं षट्पदैर्गुञ्जितं
केकिभिर्नृत्यपारङ्गतैर्नादितम् ।
सारिका-कीर-वादप्रवादैर्युतं
भूतले भाति मेऽनारतं भारतम् ॥४०॥

कुंकुमैश्चन्दनैः पुष्करैः पाटलैः
सर्वगं सच्चिदानन्दमाराधयत् ।
सर्वभूतेषु दृष्टिं समां धारयद्
भूतले भाति मेऽनारतं भारतम् ॥४१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मेघमालाकुलं विद्युदुद्द्योतकं
काशहासान्वितं सर्षपश्रीयुतम् ।
पक्वगोधूमसस्यैश्च सम्पूरितं
भूतले भाति मेऽनारतं भारतम् ॥४२॥

श्यामलानोकहश्रीसमृद्धान्तरं
पद्मनेत्रैस्सरोभिस्समालोकितम् ।
निर्झरैः श्वेतफैनैस्समृद्धाञ्चलं
भूतले भाति मेऽनारतं भारतम् ॥४३॥

हंस-कारण्डवैस्सारसैर्वर्तकैः
क्रौञ्चकाकैः पिकैः खञ्जरीटैः शुकैः।
तित्तिरैष्टिट्टिभैः श्येनगृध्रैश्चितं
भूतले भाति मेऽनारतं भारतम् ॥४४॥

पण्डितैर्योद्धृभिर्वाणिजैः कार्मिकैः
शस्त्रिभिः शास्त्रिभिर्वर्णिभिर्गेहिभिः ।
वानप्रस्थैश्च सन्न्यासिभिर्मण्डितं
भूतले भाति मेऽनारतं भारतम् ॥४५॥

यत्र हूणास्तुरुष्काः शका बर्बरा
म्लेच्छका यावना एत्य याता लयम् ।
यत्र चार्या अनार्या मुदैकत्रिता
भूतले भाति तन्मामकं भारतम् ॥४६॥

क्षारमम्भोधिमापीय यस्मिन् स्थितै-
र्नारिकेलैः सुधोद्गारिभिः श्यामलः ।
शङ्कराचार्यदः केरलो राजते
भूतले भाति तन्मामकं भारतम् ॥४७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

गोस्तनी-सेवपूर्णं मधुप्लावितं
देवदारूद्वहं नौगृहैः रञ्जितम् ।
सुन्दरं यस्य काश्मीरकं राजते
भूतले भाति तन्मामकं भारतम् ॥४८॥

रामकृष्णावतारस्थले विश्रुते
नेहरू-मालवीयादि-रत्नोज्ज्वले ।
उत्तरे यस्य देशेऽस्ति तीर्थाधिपो
भूतले भाति तन्मामकं भारतम् ॥४९॥

गण्डकी-शोण-गंगा-युता पाटली
लिच्छिवी-सेविता चापि वैशालिका ।
भूषयामासतुर्यस्य पूर्वाञ्चलं
भूतले भाति तन्मामकं भारतम् ॥५०॥

श्रीदयानन्द-गान्ध्युज्ज्वलं गुर्जरं
स्वर्णबङ्गं विवेकारविन्दोज्ज्वलम् ।
नानकाद्युज्ज्वलं पञ्चतोयं दधद्
भूतले भाति मेऽनारतं भारतम् ॥५१॥

गोखले-बालगङ्गाधराराधितं
श्रीशिवाजी-तुकाराम-सम्बोधितम् ।
यन्महाराष्ट्रकं सह्यशृङ्गोच्छ्रितं
भूतले भाति तन्मामकं भारतम् ॥५२॥

त्यागराजस्वरैर्मोहितं तामिलं
मध्यदेशं तथा चम्बलालङ्कृतम् ।
यच्च सोल्लासमासाममङ्के दधद्
भूतले भाति तन्मामकं भारतम् ॥५३॥

Pandit Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

गोम्मटेशानुभावप्रभापूरितं
यस्य कर्णाटकं चन्दनामोदितम् ।
यस्य राजस्थलं वीरागाथाङ्कितं
भूतले भाति तन्मामकं भारतम् ॥५४॥

आन्ध्रनागारुणादिप्रदेशेषु यत्
स्वीयभूतिं तनोति प्रभूतां सदा ।
यस्य सर्वस्थलेष्वस्ति प्रत्यग्रता
भूतले भाति तन्मामकं भारतम् ॥५५॥

विक्रमादित्यवेतालगाथाङ्किते
मालवे रेजतुर्यस्य लोकश्रुतौ ।
भर्तृपूर्वो हरिश्चाथ सान्दीपनि-
र्भूतले भाति तन्मामकं भारतम् ॥५६॥

यत्कुरुक्षेत्रमध्ये स्वयं श्रीहरि-
र्निष्क्रियं पार्थमाश्वासयद् गीतया ।
स्वीयरूपेण तं च व्यधात्कर्मठं
भूतले भाति तन्मामकं भारतम् ॥५७॥

शुक्रतालास्पदे यत्र वैयासकिः
पापहन्त्रीं कथामाह साप्ताहिकीम् ।
यत्र चाद्याप्यवृद्धो वटो राजते
भूतले भाति तन्मामकं भारतम् ॥५८॥

जन्वरीमासषड्विंशके वासरे
इण्डियागेट-पार्श्वस्थितो दर्शकः ।
यस्य शोभाप्रवाहे मुदा मज्जति,
भूतले भाति तन्मामकं भारतम् ॥५९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यस्य दिल्लीस्थिते रक्तदुर्गे शुभे
संसदश्चोत्तमाङ्गे त्रिरङ्गध्वजः ।
सार्वभौमीं स्वसत्तां वदत्युल्लसन्
भूतले भाति तन्मामकं भारतम् ॥६०॥

यन्मुनीनां तपस्यास्थली कथ्यते
यत्परब्रह्मलीलास्थली विद्यते ।
यच्च नानाकथानां निधी राजते
भूतले भाति तन्मामकं भारतम् ॥६१॥

यस्य वैदेशिकैर्यात्रिभिः कीर्तिता
चारुकीर्तिः ककुब्व्यापिनी प्रोज्ज्वला ।
यस्य धर्मो विदेशैस्समालिङ्गितो
भूतले भाति तन्मामकं भारतम् ॥६२॥

यद्दरिद्रव्यथां हर्तुमाकाङ्क्षति
यच्च वैज्ञानिकीमुन्नतिं वाञ्छति ।
यन्निजाध्यात्मरत्नप्रभालोकितं
भूतले भाति तन्मामकं भारतम् ॥६३॥

वह्निभूकम्पझञ्झाजलप्लावनै-
र्भीषितं चापि यत्साहसं न त्यजेत् ।
ईतिभीतिप्रभावांस्तथा तर्जयेत्
भूतले भाति तन्मामकं भारतम् ॥६४॥

यस्य विश्वे समस्तेऽपि विद्योतते
पावनं नाम दिव्यं यशश्चोज्ज्वलम् ।
प्राणिसङ्घं च प्रीणाति यद्दर्शनं
भूतले भाति तन्मामकं भारतम् ॥६५॥

Padma Shri Rama Kant Shukla Collection at Desh Yash Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यन्मया गीयते यद्भभजामि प्रियं
येन मह्यं प्रदत्ताः शुभाः प्रेरणाः ।
किञ्च यस्मै नमो मेऽस्ति यस्माद्बलं
भूतले भाति तन्मामकं भारतम् ॥६६॥

यस्य संदृश्य संदृश्य शोभा नवा
यस्य संस्मृत्य संस्मृत्य गाथा शुभाः ।
रोमहर्षो नृणां जायते वै सतां
भूतले भाति तन्मामकं भारतम् ॥६७॥

यत्र सत्यं शिवं सुन्दरं राजते
रामराज्यं च यत्राभवत्पावनम् ।
यस्य ताटस्थ्यनीतिः प्रसिद्धिं गता
भूतले भाति तन्मामकं भारतम् ॥६८॥

वाजिराजिं गजालिञ्च न्यक्कुर्वता
पण्डितेन्द्रेण यस्मिंल्लवङ्गी वृता ।
सुस्तनी मस्तकन्यस्तकुम्भा प्रिया
भूतले भाति तन्मामकं भारतम् ॥६९॥

साधकैस्सद्भिरध्यात्मचिन्तापरै-
र्देशभक्तैर्विपश्चिद्भिरापूरितम् ।
कर्षकैः कार्मिकैः स्विन्नगात्रैर्युतं
भूतले भाति मेऽनारतं भारतम् ॥७०॥

मातृभूमेर्विपज्जालमुच्छेदयन्
मृत्युपाशं च कण्ठे सहर्षं धरन् ।
भक्तसिंहोऽस्ति यत्रामरत्वं गतो
भूतले भाति तन्मामकं भारतम् ॥७१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'डोगराई' स्थले राम आशायुतः
शत्रुटैङ्कान् विभिन्दन् खलाँस्तर्जयन् ।
मातृपूजापरो यत्र नाकं गतो
भूतले भाति तन्मामकं भारतम् ॥७२॥

घर्घरस्वानपूर्वं पुरः प्रस्थितान्
शत्रुटैटङ्कान् करीन्द्रानिव ध्वंसयन् ।
श्रीहमीदो बभौ केसरी यत्र तद्
भूतले भाति मेऽनारतं भारतम् ॥७३॥

रक्तपातं विना शस्त्रपातं विना
यत्र सङ्क्रान्तिरायाति मन्दस्मिता ।
येन विश्वं सदा शिक्ष्यते प्रेर्यते
भूतले भाति तन्मामकं भारतम् ॥७४॥

यत्र हिंस्त्रः स्वपापैः स्वयं हिंस्यते
यत्र साधुः समत्वाद्भयान्मुच्यते ।
यत्र सत्यं जयं याति नैवानृतं
भूतले भाति तन्मामकं भारतम् ॥७५॥

यत्प्रजातन्त्ररक्षापरैर्मानवै-
र्नास्ति हीनं कदापि प्रभाभासुरम् ।
आत्मतेजोमयं तद्ध्यहिंसामयं
भूतले भाति मेऽनारतं भारतम् ॥७६॥

यत्र सर्वंसहा मेदिनी राजते
यत्र शीलं परं भूषणं भण्यते ।
यत्र मौनं चकास्ति व्रतेषूत्तमं
भूतले भाति तन्मामकं भारतम् ॥७७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सज्जनान् दुर्गतान् दुर्जनान् सद्गतान्
मानिता वारनारीर्विपन्ना वधूः ।
वीक्ष्य चित्तं कवेर्दूयते यत्र तद्
भूतले भाति मेऽनारतं भारतम् ॥७८॥

दुःखदावानलैर्दग्धदेहान्नरान्
क्षुत्पिपासाकुलान् वृत्तिकष्टार्दितान् ।
वीक्ष्य कारुण्यपूर्णा नरा यत्र तद्
भूतले भाति मेऽनारतं भारतम् ॥७९॥

चञ्चलां राजलक्ष्मीमुलूकश्रितां
सर्वशुक्लां च वाणीं मरालस्थिताम् ।
यत्र लोको यथेष्टं मुदा वन्दते
भूतले भाति तन्मामकं भारतम् ॥८०॥

लोकगीतेषु चित्तं यदीयं रतं
लोकनृत्येषु चित्तं यदीयं रतम् ।
लोककृत्येषु चित्तं यदीयं रतं
भूतले भाति तन्मामकं भारतम् ॥८१॥

यत्र पुण्याः सरित्सङ्गमा राजिता
यत्र पाषाणतश्चामृतं स्यन्दते ।
भावना यत्र बोधेन सङ्गच्छते
भूतले भाति तन्मामकं भारतम् ॥८२॥

अन्धकारात्प्रकाशं तथाज्ञानतो
ज्ञानमभ्येति मृत्योस्तथा चामृतम् ।
यत्र जीवः स्वरूपावबोधस्थितो
भूतले भाति तन्मामकं भारतम् ॥८३॥

CC-0. Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शासकानां मदं हेलयैव प्रजा
यत्र हन्ति प्रजातन्त्ररक्षापरा ।
त्यागिनो यत्र नैव म्रियन्ते क्वचिद्
भूतले भाति तन्मामकं भारतम् ॥८४॥

यत्र नग्नाः क्षुधार्ता अगेहा अपि
स्वाभिमानं जहत्येव नो मानवाः ।
यत्र दृप्तं निरीहस्तृणं मन्यते
भूतले भाति तन्मामकं भारतम् ॥८५॥

शासनासन्दिकाराधनैकव्रतं
नेतृवृन्दं समालोक्य छद्मावृतम् ।
यत्र नित्यं हसन्ति प्रजानां गणाः
भूतले भाति तन्मामकं भारतम् ॥८६॥

यत्र नास्त्यङ्कुशो वाचि कस्यापि वै
यत्र नास्त्यङ्कुशो मानसे कस्यचित् ।
यत्र नास्त्यङ्कुशः कर्मणि क्वापि वै
भूतले भाति तन्मामकं भारतम् ॥८७॥

दुःखपूर्णं जगत्सौख्यपूर्णं भवेद्
यस्य रम्योपदेशैः सुधापूरितैः ।
जङ्गले मङ्गलं यच्च कर्तुं क्षमं
भूतले भाति तन्मामकं भारतम् ॥८८॥

आर्षवृन्देषु शान्तिप्रधानेषु वै
यत्र गूढं हि तेजः प्रदाहात्मकम् ।
साध्यते यत्र योगो मुदा साधकै-
भूतले भाति तन्मामकं भारतम् ॥८९॥

Padmashri Ranka Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यस्य दिल्लीस्थिते पण्डितैर्मण्डिते
भव्यवाणीविहारे मुदा तन्यते ।
श्रीरमाकान्तशुक्लेन काव्यप्रभा
भूतले भाति तन्मामकं भारतम् ॥९०॥

मोदमानैः क्वचिद् वर्धमानैः क्वचिद्
वन्द्यमानैः क्वचिच्छोच्यमानैः क्वचित् ।
बाध्यमानैर्नरैः क्वापि सम्पूरितं
भूतले भाति मेऽनारतं भारतम् ॥९१॥

चीयमानैः क्वचिद् वर्धमानैः क्वचित्
सेच्यमानैः क्वचित्पात्यमानैः क्वचित् ।
छेद्यमानैः क्वचित्पादपैः शोभितं
भूतले भाति मेऽनारतं भारतम् ॥९२॥

जन्मजातैः क्वचित् कर्मजातैः क्वचिद्
दण्ड्यमानैः क्वचिन्मण्ड्यमानैः क्वचित्।
नेतृवर्गैः समाकीर्णमत्यद्भुतं
भूतले भाति मेऽनारतं भारतम् ॥९३॥

बुद्बुदाभा नृपा यत्र याता लयं
यत्र विद्वान् कविश्चामरो राजते ।
यत्र चेष्टं यशो नैव देहप्रभा
भूतले भाति तन्मामकं भारतम् ॥९४॥

यस्य कीर्तिं प्रतिष्ठां च शोभां मुदा
गायति क्रान्तदर्शी कवीनां चयः ।
यस्य वाणी-विहारोऽतुलो राजते
भूतले भाति तन्मामकं भारतम् ॥९५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यस्य वात्सल्यभावेन पूर्णं शुभं
दिव्यमुत्सङ्गमाश्रित्य वैदेशिकैः ।
शान्तिराध्यात्मिकी निर्भयैः पीयते
भूतले भाति तन्मामकं भारतम् ॥९६॥

यस्य तिष्ठन्ति गेया अनेके गुणा
यस्य तिष्ठन्ति गेया अनेकाः क्रियाः ।
अस्ति यस्मिन्ननेकत्व एकस्थिति-
र्भूतले भाति तन्मामकं भारतम् ॥९७॥

मामकीना गिरः शक्तिमत्योऽपि नो
वर्णनं पूर्णतो यस्य कर्तुं क्षमाः ।
वर्णनातीतमेवानुभूयेत यद्
भूतले भाति तन्मामकं भारतम् ॥९८॥

यस्य गेहेषु सत्यः स्त्रियः प्रत्यहं
दीपमुज्ज्वाल्य नीराजनं कुर्वते ।
स्वीयभक्त्या तथा तोषयन्ति प्रभुं
भूतले भाति तन्मामकं भारतम् ॥९९॥

प्रस्तरे शङ्करं मृत्तिकालोष्टके
विघ्नराजं गणेशं हृदा भावयत् ।
जीवनं कष्टजुष्टं मुदा यापयद्
भूतले भाति मेऽनारतं भारतम् ॥१००॥

यत्र देशान्तरं प्रस्थिते वल्लभे
ऊर्मिलेव व्यथापूरिता भामिनी ।
विप्रलम्भाम्बुधिं सश्रमं पारयेद्
भूतले भाति तन्मामकं भारतम् ॥१०१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वञ्चकैस्तस्करैर्भञ्जकैः स्वार्थिभि-
र्वञ्चितं लुञ्चितं खण्डितं दण्डितम् ।
किन्तु नैजैरमेयैर्बलैर्वर्द्धितं
भूतले भाति मेऽनारतं भारतम् ॥१०२॥

जीवदास्ते न जानामि कस्माद्युगात्
साम्प्रतं निर्धनत्वेऽपि सञ्जीवति ।
मृत्युहीनं जराहीनमाशान्वितं
भूतले भाति मेऽनारतं भारतम् ॥१०३॥

तिष्ठतोत्तिष्ठता गच्छता क्रीडता
कुर्वतानेककर्माणि मे जीवने ।
गीयतां गीयतां सप्रमोदं मया
भूतले भाति मेऽनारतं भारतम् ॥१०४॥

कुत्र सीमातिगा अस्य दिव्या गुणाः ?
कुत्र सीमागतः शब्दराशिश्च मे ?
पारयेऽहं न हीतः परं भाषितुं,
भूतले भाति मेऽनारतं भारतम् ॥१०५॥

निर्बलं निर्धनं कैश्चिदुक्तं सद-
प्यस्ति यत्स्वाभिमानेन पूर्णं सदा ।
इन्दिराशारदासाधनामन्दिरं
भूतले भाति तन्मामकं भारतम् ॥१०६॥

सन्तु दोषा अनेकेऽत्र कैश्चिन्मताः
किन्तु नाहं प्रपश्यामि तान् मन्दधीः ।
वन्दनीयं मया कीर्तनीयं मया
मोदतां वर्धतां राजतां भारतम् ॥१०७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शोषितो नात्र कश्चिद्भवेत्केनचिद्
व्याधिना पीडितो नो भवेत्कश्चन ।
नात्र कोऽपि व्रजेद्दीनतां हीनतां
मोदतां मे सदा पावनं भारतम् ॥१०८॥

आर-६, वाणी विहारः,
नयी दिल्ली-११००५९

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दूरदर्शने प्रस्तुतं भाति मे भारतम्

प्रणेता, निर्देष्टा-डॉ. रमाकान्त शुक्लः

भाति मे भारतम्, भाति मे भारतम् ।
भूतले भाति मेऽनारतं भारतम् ॥ध्रुवपदम्॥

प्रथमो भागः

विश्वबन्धुत्वमुद्घोषयत्पावनं विश्ववन्द्यैश्चरित्रैर्जगत्पावयत् ।
विश्वमेकं कुटुम्बं समालोकयद् भूतले भाति मेऽनारतं भारतम् ॥
'क्रुद्धहिंसाबले क्वास्त्यहिंसाजयः? कुत्र मुच्येत बद्धश्च मामन्तरा ?'
प्रश्नमित्थं जगत्सम्मुखे स्थापयद् भूतले भाति मेऽनारतं भारतम् ॥
वेशभूषाशनोपासनापद्धति - क्रीडनामोद - संस्कार - वृत्त्यादिषु ।
यद्धि भिन्नं सदप्यस्त्यभिन्नं सदा भूतले भाति तन्मामकं भारतम् ॥
दुःखपूर्णं जगत्सौख्यपूर्णं भवेद् यस्य रम्योपदेशैः सुधापूरितैः ।
जग्ले मग्लं यच्च कर्तुं क्षमं भूतले भाति तन्मामकं भारतम् ॥
यत्र पुण्याय मान्यं परेषां हितं यत्र पापाय पीडा परेषां मता ॥
यत्र सत्यं जयं याति नैवानृतं भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥

द्वितीयो भागः

जाह्नवी-चन्द्रभागा-जलैः पावितं भानुजा-नर्मदा-वीचिभिर्लालितम् ।
तुग्भद्रा-विपाशादिभिर्भावितं भूतले भाति मेऽनारतं भारतम् ॥ध्रुव.॥
विन्ध्य-सह्याद्रि-नीलाद्रिमालान्वितं शुभ्रहैमाद्रि-हासप्रभापूरितम् ।
अर्बुदारावलीश्रेणि-सम्पूजितम् भूतले भाति मेऽनारतं भारतम् ॥
यत्र मन्दाकिनी पापसंहारिणी यत्र गोदावरी चारुसञ्चारिणी ।
देववाणी च यत्रास्ति मोदाकुला भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥
यत्प्रकृत्याः सुलीलास्थलं राजते पक्षिणां यद्विहारस्थलं विद्यते ।
यच्च षण्णामृतूणां विलासैर्युतं भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥

CC-0. Padmashri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi.

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तृतीयो भागः

गोस्तनी-सेवपूर्णं मधुप्लावितं देवदारूद्वहं नौगृहैः रञ्जितम् ।
सुन्दरं यस्य काश्मीरकं राजते भूतले भाति तन्मामकं भारतम् ॥
क्षारमम्भोधिमापीय यस्मिन् स्थितैर्नारिकेलैः सुधोद्गारिभिः श्यामलः ।
शटराचार्यदः केरलो राजते भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥
गण्डकी-शोण-गग-युता पाटली लिच्छिवी-सेविता चापि वैशालिका ।
भूषयामासतुर्यस्य पूर्वाञ्चलं भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥
श्रीदयानन्द-गान्ध्युज्ज्वलं गुर्जरं स्वर्णबरं विवेकारविन्दोज्ज्वलम् ।
नानकाद्युज्ज्वलं पञ्चतोयं दधद् भूतले भाति मेऽनारतं भारतम् ॥ध्रुव.॥

चतुर्थो भागः

रामकृष्णावतारस्थले विश्रुते नेहरू-मालवीयादि-रत्नोज्ज्वले ।
उत्तरे यस्य देशेऽस्ति तीर्थाधिपो भूतले भाति तन्मामकं भारतम् ॥
गोखले-बालगंगाधराराधितं श्रीशिवाजी-तुकाराम-सम्बोधितम् ।
यन्महाराष्ट्रकं सह्यशृगेच्छ्रितं भूतले भाति तन्मामकं भारतम् ॥
आलवारस्वरैर्मोहितं तामिलं मध्यदेशं तथा चम्बलाद्युज्ज्वलम् ।
यच्च सोल्लासमासाममङ्के दधद् भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥
गोम्मटेशानुभावप्रभापूरितम् यस्य कर्णाटकं चन्दनामोदितम् ।
यस्य राजस्थलं वीरागाथांकितं भूतले भाति तन्मामकं भारतम् ॥
आन्ध्रनागारुणादिप्रदेशेषु यत् स्वीयभूतिं तनोति प्रभूतां सदा ।
यस्य सर्वस्थलेष्वस्ति प्रत्यग्रता भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥

पञ्चमो भागः

भाखडाबन्ध-दामोदरीयोजना - बाणगग-फरक्कादिसिक्तोर्जितम् ।
ब्रह्मपुत्रादिसन्दर्शिताम्बुच्छटं भूतले भाति मेऽनारतं भारतम् ॥ध्रुव.॥
विद्युदुत्पादने तैलसंशोधने, इन्धनान्वेषणे लौहनिष्पादने ।
यन्त्रनिर्माणकार्ये समर्थं च सद् भूतले भाति मेऽनारतं भारतम् ॥
यद्बरौनी-भिलाई-बुकारो-स्वनैः स्वोन्नतिस्यन्दनोत्थं शुभं घर्घरम् ।
दिक्षु विस्तारयद् वीक्ष्यते सर्वदा भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar, New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आर्यभट्टं वियन्मण्डले स्थापयत् पोखरण्-भूमिगर्भेऽणुशक्तिं किरत् ।
शान्तिकार्येष्वणुं प्रेरयत्सन्ततं भूतले भाति मेऽनारतं भारतम् ॥
यद्दरिद्रव्यथां हर्तुमाकाङ्क्षति यच्च वैज्ञानिकीमुन्नतिं वाञ्छति ।
यन्निजाध्यात्मरत्नप्रभालोकितं भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥

षष्ठो भागः

एशियाडं सुभव्यं समायोजयद् अन्तरिक्षे नरान् निर्भयान् प्रेषयत् ।
निर्गुटं राष्ट्रसम्मेलनं योजयत् भूतले भाति मेऽनारतं भारतम् ॥
रोगजालं चिकित्सालयस्थापनैरोषधोत्पादनैः शल्यशोधैस्तथा ।
नूतनाभिश्चिकित्साभिरुन्मूलयद् भूतले भाति मेऽनारतं भारतम् ॥ध्रुव.॥
अग्निमूर्जस्वलं स्वत्वरक्षाकृते साधनैरात्मनीनैः सुसंसाधयत् ।
युद्धापोतांश्च सिन्धूरसि स्थापयद् भूतले भाति मेऽनारतं भारतम् ॥ध्रुव.॥
रेल-नौका-विमानैस्तथा गन्त्रिभिर्यानकैस्तैश्च तैश्च प्रवेगान्वितैः ।
य"च्चरैवे" ति नित्यं समुद्घोषयद् भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥

सप्तमो भागः

मेघमालाकुलं विद्युदुद्द्योतकं काशहासान्वितं सर्षपश्रीयुतम् ।
पक्वगोधूमसस्यैश्च सम्पूरितं भूतले भाति मेऽनारतं भारतम् ॥ध्रुव.॥
कोकिलैः कूजितं षट्पदैर्गुञ्जितं केकिभिर्नृत्यपारग्तैर्नादितम् ।
सारिका-कीर-वादप्रवादैर्युतं भूतले भाति मेऽनारतं भारतम् ॥ध्रुव.॥
हंस-कारण्डवैस्सारसैर्वर्तकैः कौञ्चकाकैः पिकैः खञ्जरीटैः शुकैः।
तित्तिरैष्टिट्टिभैः श्येनगृध्रैश्चितं भूतले भाति मेऽनारतं भारतम् ॥ध्रुव.॥
श्यामलानोकहश्रीसमृद्धान्तरं पद्मनेत्रैस्सरोभिस्समालोकितम् ।
निर्झरैः श्वेतफैनैस्समृद्धाञ्चलं भूतले भाति मेऽनारतं भारतम् ॥ध्रुव.॥

अष्टमो भागः

द्वारकां सेतुबन्धं पुरीं बदरिकां तिरुपतिं मधुपुरीं चाजमेरं दधत् ।
पुष्करामृतसरस्तीर्थराजैर्युतं भूतले भाति मेऽनारतं भारतम् ॥
हस्तिगुम्फामजन्तामलौरां दधत् खर्जुराहो-गया-सारनाथैर्लसत् ।
ताज-कोणार्क-विष्णुध्वजैर्मण्डितं भूतले भाति मेऽनारतं भारतम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

होलिका-दशहरा-पर्वकोजागरी-पोग्ल-श्रावणी-दीपमालामयम् ।
लोहडीदौणमाद्युत्सवैः पूरितं भूतले भाति मेऽनारतं भारतम् ॥ध्रुव.॥
ओडिसीं मणिपुरीं कथक-गर्बादिकं कूचिपूडिं च गिद्दां छऊं भग्डाम् ।
कथकलीं डाण्डियां भरतनाट्यं दधद् भूतले भाति मेऽनारतं भारतम् ॥
मन्दिरैर्मस्जिदैश्चैत्य- गिर्जागृहै- रार्यगेहैर्गुरुद्वारकैर्भ्राजितम् ।
कर्मभूः शर्मभूर्धर्मभूर्मर्मभूः भूतले भाति मेऽनारतं भारतम् ॥ध्रुव.॥

नवमो भागः

वेदभाभासितं सत्कलालासितं रम्यसगीत-साहित्य-सौहित्य-भूः ।
भारती-वल्लकी-झङ्कृतैझङ्कृतं भूतले भाति मेऽनारतं भारतम् ॥ध्रुव.॥
संस्कृतं प्राकृतं तामिलं तेलुगुं कन्नडं कैरलीं बाग्लामाग्लाम् ।
वाचमन्यां च तां तां ब्रुवद् वर्धते राष्ट्रभाषायुतं मामकं भारतम् ॥
यत्र पुण्याः सरित्सग्मा राजिता यत्र पाषाणतश्चामृतं स्यन्दते ।
भावना यत्र बोधेन सग्च्छते भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥
आर्षवृन्देषु शान्तिप्रधानेषु वै यत्र गूढं हि तेजः प्रदाहात्मकम् ।
साध्यते यत्र योगो मुदा साधकैर्भूतले भाति तन्मामकं भारतम् ॥
यस्य वात्सल्यभावेन पूर्णं शुभं दिव्यमुत्सग्माश्रित्य वैदेशिकैः ।
शान्तिराध्यात्मिकी निर्भयैः पीयते भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥

दशमो भागः

भूधराकाशतोयेषु रक्षापरो यत्र शत्रून् भटो हेलया नाशयेत् ।
यत्र वीराग्ना युद्धभूमिं गता भूतले भाति तन्मामकं भारतम् ॥
यत्प्रजातन्त्ररक्षापरैर्मानवैर्नास्ति हीनं कदापि प्रभाभासुरम् ।
आत्मतेजोमयं तद्धयहिंसामयं भूतले भाति मेऽनारतं भारतम् ॥ध्रुव.॥
साधवैस्सद्भिरध्यात्मचिन्तापरैर्देशभक्तैर्विपश्चिद्भिरापूरितम् ।
कर्षकैः कार्मिकैः स्विन्नगात्रैर्युतं भूतले भाति मेऽनारतं भारतम् ॥ध्रुव.॥
प्रेरणादायकं सत्कथागायकं ज्ञानविज्ञानतेजोबलाधायकम् ।
दुःखदारिद्र्य-दग्धान् सदा पालयन्मोदते मे सदा पावनं भारतम् ॥ध्रुव.॥
यत्र नास्त्यङ्कुशो वाचि कस्यापि वै यत्र नास्त्यङ्कुशो मानसे कस्यचित् ।
यत्र नास्त्यङ्कुशः कर्मणि क्वापि वै भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जीवदास्ते न जानामि कस्माद्युगात् साम्प्रतं निर्धनत्वेऽपि सञ्जीवति ।
मृत्युहीनं जराहीनमाशान्वितं भूतले भाति मेऽनारतं भारतम् ॥ध्रुव.॥

एकादशो भागः

मानवामानितं दानवाबाधितं निर्जराराधितं सज्जनासाधितम् ।
पण्डितैः पूजितं पक्षिभिः कूजितं भूतले भाति मेऽनारतं भारतम् ॥
यस्य संदृश्य संदृश्य शोभा नवा यस्य संस्मृत्य संस्मृत्य गाथा शुभा ।
रोमहर्षो नृणां जायते वै सतां भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥
यच्च विश्रामभूमिर्मतं प्राणिनां यस्य चित्ते प्रभूतोऽवकाशस्तथा ।
यत्र चागत्य गन्तुं न कोऽपीच्छुको भूतले भाति तन्मामकं भारतम् ॥
पण्डितैर्योद्धृभिर्वाणिजैः कार्मिकैः शस्त्रिभिः शास्त्रिभिर्वर्णिभिर्गेहिभिः ।
वानप्रस्थैश्च सन्न्यासिभिर्मण्डितं भूतले भाति मेऽनारतं भारतम् ॥ध्रुव.॥
यस्य चेतोहरा भान्ति लोके कला यस्य शिल्पान्यपूर्वाणि चैवासते ।
यत्पुराणैर्नवैर्वैभवैः पूरितं भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥

द्वादशो भागः

यत्त्रयीसाङ्ख्ययोगादिमार्गैर्युतं जीवनं मुक्तमाकर्तुमाकाङ्क्षति ।
शीलसन्तोषसत्यादिभी रक्षितं भूतले भाति तन्मामकं भारतम् ॥
दर्शनज्ञानचारित्र्यसम्मेलनं यत्र मोक्षस्य मार्गं भणन्त्यागमाः ।
ज्ञानमास्ते च भारः क्रियां वै विना भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥
व्यासवाल्मीकिरत्नाकरैरुज्ज्वलं स्वादुकादम्बरीपानलुब्धं सदा ।
कालिदासेन भासेन संद्योतितं भूतले भाति मेऽनारतं भारतम् ॥
योगवासिष्ठगीतामहाभारतैर्ग्रन्थरत्नैश्च तैस्तैः प्रबुद्धं तथा ।
मानसं बीजकं सूरसिन्धुं दधद् भूतले भाति मेऽनारतं भारतम् ॥
यत्र माता पिताचार्य आराध्यते देवतेव प्रधीभिर्जनैस्सादरम् ।
यत्र दुःखी दरिद्रोऽस्ति नारायणो भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥
यस्य विश्वे समस्तेऽपि विद्योतते पावनं नाम दिव्यं यशश्चोज्ज्वलम् ।
प्राणिसङ्घं च प्रीणाति यद्दर्शनं भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥

Padma Shri Rama Kant Shukla Collection at Devra Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

त्रयोदशो भागः

यत्स्वतन्त्रं विधातुं हुतं जीवनं देशभक्तैरसङ्ख्यैर्विलम्बं विना ।
यस्य सौख्यं समृद्धिश्च साध्ये सदा भूतले भाति तन्मामकं भारतम् ॥
यत्र झञ्झेव झांसीश्वरी कुर्वती क्रूरदुर्नीतिदुष्टैः सहायोधनम् ।
कर्तुमैच्छत्स्वदेशं स्वतन्त्रं द्रुतं भूतले भाति तन्मामकं भारतम् ॥
'जन्मसिद्धाधिकारः स्वराज्यं हि मे तं गृहीत्वैव तुष्टिं गमिष्याम्यहम् ।'
बालगगधरो यत्र घोषं ददौ भूतले भाति तन्मामकं भारतम् ॥
'दीयतां मे स्वरक्तं भवद्भिस्समैरात्मतन्त्र्यं भवद्भ्यो मया दास्यते ।'
घोषमित्थं सुभाषस्य संश्रावयत् भूतले भाति मेऽनारतं भारतम्॥ध्रुव.॥
स्वीयदाढ्र्येन कार्यैस्तथा नीतिभिर्लौहवीरः पटेलः सदा धीरधीः ।
एकतां रक्षितुं यस्य संस्मर्यते भूतले भाति तन्मामकं भारतम् ॥
'सैनिकाः कर्षकाश्चाप्नुयुर्वै जयम्' इत्थमुद्घोषयन् शास्त्रिवर्यः प्रधीः ।
यत्र चक्रे समुत्साहदीप्तान् जनान् भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥
नायकाश्चापरे नूतनैर्नूतनैर्यैश्च घोषैर्जनान्दोलनं चक्रिरे ।
स्मारयत्तान् यथाकालमाशाप्रदान् भूतले भाति मेऽनारतं भारतम् ॥ध्रुव.॥

चतुर्दशो भागः

मातृभूमेर्विपज्जालमुच्छेदयन् मृत्युपाशं च कण्ठे सहर्षं धरन् ।
भक्तसिंहोऽस्ति यत्रामरत्वं गतो भूतले भाति तन्मामकं भारतम् ॥
'स्मो नु विक्रेतुकामा वयं स्वं शिरः, दर्शनीयं बलं किं नु हन्तुः करे' ।
इत्थमाभाषते बिस्मिलो यत्र तद् भूतले भाति मेऽनारतं भारतम्॥ध्रुव.॥
शेखरश्चन्द्रपूर्वोऽशफाकस्तथाऽन्येप्यनेके हुतात्मान उत्साहिनः ।
जीवनं स्वं यदर्थं बलिं चक्रिरे भूतले भाति तन्मामकं भारतम् ॥
घर्घरस्वानपूर्वं पुरः प्रस्थितान् शत्रुटैङ्कान् करीन्द्रानिव ध्वंसयन् ।
श्रीहमीदो बभौ केसरी यत्र तद् भूतले भाति मेऽनारतं भारतम् ॥
'डोगराई' स्थले राम आशायुतः शत्रुटैटान् विभिन्दन् खलांस्तर्जयन् ।
मातृपूजापरो यत्र नाकं गतो भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥
देशभक्तान् प्रति स्वादरं व्यञ्जयद् भीषणं युद्धदावानलं वारयत् ।
कालकूटं पिबञ्जापि मोदं वहद् भूतले भाति मेऽनारतं भारतम्॥ध्रुव.॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri and Sarayu Trust. Funding by MoE-IKS

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पञ्चदशो भागः

देहली राजधानी यदीया प्रिया नूतना नूतना प्रत्यहं स्पन्दते ।
स्वाटमाप्तान् जनान् पालयन्ती सदा भूतले भाति तन्मामकं भारतम् ॥
जन्वरीमासषड्विंवशके वासरे इण्डियागेट-पार्श्वस्थितो दर्शकः ।
यस्य शोभाप्रवाहे मुदा मज्जति, भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥
यस्य दिल्लीस्थिते रक्तदुर्गे शुभे संसदश्चोत्तमाङ्गे त्रिरग्ध्वजः ।
सार्वभौमीं स्वसत्तां वदत्युल्लसन् भूतले भाति तन्मामकं भारतम् ॥
वाजिराजिं गजालिं च न्यक्कुर्वता पण्डितेन्द्रेण यस्मिल्लवगी वृता ।
सुस्तनी मस्तकन्यस्तकुम्भा प्रिया भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥
यस्य दिल्लीस्थिते पण्डितैर्मण्डिते भव्यवाणीविहारे मुदा तन्यते ।
श्रीरमाकान्तशुक्लेन काव्यप्रभा भूतले भाति तन्मामकं भारतम् ॥
यस्य वैदेशिकैर्यात्रिभिः कीर्तिता चारुकीर्तिः ककुब्व्यापिनी प्रोज्ज्वला ।
यस्य धर्मो विदेशैस्समालिग्तिो भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥

षोडशो भागः

यच्च तीर्थैः पवित्रैर्व्रतैरुत्सवैः पर्वभिर्दर्शनीयैः स्थलैः शोभितम् ।
यच्च नानाजयन्तीगणै राजितं भूतले भाति तन्मामकं भारतम् ॥
प्राच्यपाश्चात्त्यशिक्षाप्रणालीयुतैर्बालबालायुवप्रौढविद्यालयैः ।
विश्वविद्यालयैः शोधगेहैर्युतं भूतले भाति मेऽनारतं भारतम् ॥
यद्रसालं रसालैस्तथान्यैः फलैः षड्रसैर्भोजनैर्लोकतृप्तिप्रदम् ।
यत्र पूज्या लताः पादपा देववद् भूतले भाति तन्मामकं भारतम् ॥
यत्र दृश्या वनानी (वनाली) मनोमोहिनी यत्र दृश्या हिमानी मनोमोहिनी।
वाटिकोद्यानसत्क्षेत्रशोभावहं भूतले भाति मेऽनारतं भारतम् ॥
सागरीयैस्तटैर्गोचरैः प्राञ्जलैः पक्षिणां वा पशूनां विहारस्थलैः ।
सौम्यरौद्रस्वरूपैः प्रकृत्याः युतं भूतले भाति मेऽनारतं भारतम् ॥
पर्वतीयान् प्रदेशान् जगन्मोहनान् यत्र पर्यट्य यात्रिव्रजो मोदते ।
पर्वतारोहिणां यच्छरण्यस्थलं भूतले भाति तन्मामकं भारतम्॥ध्रुव.॥
आहिमाद्रेस्तथैवा च कन्याकुमार्यन्तरीपाद्यदास्ते जनानां तपः ।
तेन विश्वस्य सौख्यं सदा साधयद् भूतले भाति मेऽनारतं भारतम्॥ध्रुव.॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सप्तदशो भागः

अर्थकामान्वितं धर्ममोक्षान्वितं भक्तिभावान्वितं ज्ञानकर्मान्वितम् ।
नैकमार्गैः प्रभुं चैकमाराधयद् भूतले भाति मेऽनारतं भारतम् ॥
शम्प्रदं शटरं माधवं राघवं पार्वतीं राधिकां जानकीं च स्तुवत् ।
विट्ठलं बुद्धदेवं जिनं च स्मरद् भूतले भाति मेऽनारतं भारतम् ॥
विश्वनाथं महाकालमाराधयद् एकलिंग भजद् वेटटेशं स्मरत् ।
कालिकां पूजयद् वैष्णवीं च स्तुवद् भूतले भाति मेऽनारतं भारतम् ॥
कुंकुमैश्चन्दनैः पुष्करैः पाटलैः सर्वगं सच्चिदानन्दमाराधयत् ।
सर्वभूतेषु दृष्टिं समां धारयद् भूतले भाति मेऽनारतं भारतम् ॥
कृष्णलीलायुतं वेणुसन्नादितम् पावनं भावनं यत्र वृन्दावनम् ।
शम्भुशूलस्थिता यत्र वाराणसी भूतले भाति तन्मामकं भारतम् ॥
यन्मुनीनां तपस्यास्थली कथ्यते यत्परब्रह्मलीलास्थली विद्यते ।
यच्च नानाकथानां निधी राजते भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥
मामकीना गिरः शक्तिमत्योऽपि नो वर्णनं पूर्णतो यस्य कर्तुं क्षमाः ।
वर्णनातीतमेवानुभूयेत यद् भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥

अष्टादशो भागः

लोकगीतेषु चित्तं यदीयं रतं लोकनृत्येषु चित्तं यदीयं रतम् ।
लोककृत्येषु चित्तं यदीयं रतं भूतले भाति तन्मामकं भारतम् ॥
कुम्भसिंहस्थवैशाखिमुक्तेश्वर-सोनपूरादिमेलापकै रञ्जितम् ।
रासलीलायुतं रामलीलायुतं भूतले भाति मेऽनारतं भारतम्॥ध्रुव.॥
यत्कुरुक्षेत्रमध्ये स्वयं श्रीहरिर्निष्क्रियं पार्थमाश्वासयद् गीतया ।
स्वीयरूपेण तं च व्यधात्कर्मठं भूतले भाति तन्मामकं भारतम् ॥
शुक्रतालास्पदे यत्र वैयासकिः पापहन्त्रीं कथामाह साप्ताहिकीम् ।
यत्र चाद्याप्यवृद्धो वटो राजते भूतले भाति तन्मामकं भारतम् ॥
यत्कवीनां गणैरस्ति संशोभितं यच्च वैज्ञानिकानां गणैः राजितम् ।
यस्य सगीतकारा जगद्विश्रुता भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥
यस्य शिष्यास्तथाध्यापका विश्रुताः यस्य विद्याप्रशाखाश्च विश्वश्रुताः ।
संस्कृतं संस्कृतिर्यस्य विश्वश्रुते भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar, New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तिष्ठतोत्तिष्ठता गच्छता क्रीडता कुर्वतानेककर्माणि मे जीवने ।
गीयतां गीयतां सप्रमोदं मया 'भूतले भाति मेऽनारतं भारतम्' ॥ध्रुव.॥

एकोनविंशो भागः

कर्दमाक्रान्तवीथिषु सौधेषु वा यस्य पादातमार्गेषु गेहेषु वा ।
जीवनं लोकसेवापरं लक्ष्यते भूतले भाति तन्मामकं भारतम् ॥
वह्निभूकम्पझञ्झाजलप्लावनैर्भीषितं चापि यत्साहसं न त्यजेत् ।
ईतिभीतिप्रभावांस्तथा तर्जयेत् भूतले भाति तन्मामकं भारतम्॥ध्रुव.॥
वञ्चकैस्तस्करैर्भञ्जकैः स्वार्थिभिर्वञ्चितं लुञ्चितं खण्डितं दण्डितम् ।
किन्तु नैजैरमेयैर्बलैर्वर्द्धितं भूतले भाति मेऽनारतं भारतम् ॥
शासनासन्दिकाराधनैकव्रतं नेतृवृन्दं समालोक्य छद्मावृतम् ।
यत्र नित्यं हसन्ति प्रजानां गणाः भूतले भाति तन्मामकं भारतम् ॥
व्यावृतास्याः समस्याः समाधाय यत् स्वावलम्बं समालब्धुमाकाङ्क्षति ।
मार्गमुच्चावचं लङ्घयित्वा चलद् भूतले भाति तन्मामकं भारतम् ॥
यत्र हत्याबलात्कारसम्पीडिता दस्युतोत्कोचमाहार्ध्यसंशोषिताः ।
नो हताशा जना आयतिप्रेक्षका भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥
आर्तरक्षार्थमस्त्राणि शस्त्राण्यथो यत्र मान्यानि हन्तुं न चानागसः ।
जागरूका यदीयाः सदा सैनिका भूतले भाति तन्मामकं भारतम् ॥
यत्र नग्नाः क्षुधार्ता अगेहा अपि स्वाभिमानं जहत्येव नो मानवाः ।
यत्र दृप्तं निरीहस्तृणं मन्यते भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥

विंशो भागः

रक्तपातं विना शस्त्रपातं विना यत्र सङ्क्रान्तिरायाति मन्दस्मिता ।
येन विश्वं सदा शिक्ष्यते प्रेर्यते भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥
शासकानां मदं हेलयैव प्रजा यत्र हन्ति प्रजातन्त्ररक्षापरा ।
त्यागिनो यत्र नैव म्रियन्ते क्वचिद् भूतले भाति तन्मामकं भारतम् ॥
निर्बलं निर्धनं कैश्चिदुक्तं सदप्यस्ति यत्स्वाभिमानेन पूर्णं सदा ।
शारदाश्रीसपर्यापरं पावनं भूतले भाति तन्मामकं भारतम् ॥ध्रुव.॥
यस्य तिष्ठन्ति गेया अनेके गुणा यस्य तिष्ठन्ति गेया अनेकाः क्रियाः ।
अस्ति यस्मिन्ननेकत्व एकस्थितिर्भूतले भाति तन्मामकं भारतम् ॥

CC-0. Padmabhushan Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सन्तु दोषा अनेकेऽत्र कैश्चिन्मताः किन्तु नाहं प्रपश्यामि तान् मन्दधीः ।
वन्दनीयं मया कीर्तनीयं मया मोदतां वर्धतां राजतां भारतम् ॥
शोषितो नात्र कश्चिद्भवेत्केनचिद् व्याधिना पीडितो नो भवेत्कश्चन ।
नात्र कोऽपि व्रजेहीनतां हीनतां मोदतां से सदा पावनं भारतम् ॥
एत बालाः किशोर्यो युवत्यस्समा एत बालाः किशोरा युवानस्तथा ।
प्रौढवृद्धाः ! समैः गीयतां गीयतां 'भूतले भाति मेऽनारतं भारतम्' ॥ध्रुव.॥

(१-१० भागानां प्रथमं प्रसारणं २१-१-१९९० तः २१-४-१९९० यावत् प्रातः ८-३६ वादनवेलायां जातम्। ११-२० भागानां प्रथमं प्रसारणं दिल्लीदूरदर्शनकेन्द्रात् २३-१-१९९२ तः ३-२-१९९२ यावत् रविवारवर्जं ३१-१-१९९२ तमतारिकावर्जं च प्रतिदिनं प्रातःकालीनराष्ट्रियकार्यक्रमे ७-१५ वादनवेलायां जातम्। पुनःप्रसारणमनेकधा जातम्)

'भाति मे भारतं' काव्यं राष्ट्रप्रगतिहेतवे ।
श्रीरमाकान्तशुक्लस्य नवला जपमालिका ॥
दूरदर्शनसश्रीका सूरिसंसद्बहुश्रुता ।
सेयं कवयितुर्जीयात् कविताकल्पवल्लरी ॥

—त्रिपाठिनो भास्कराचार्यस्य

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अहं स्वतन्त्रता भणामि

(मैं स्वतन्त्रता बोल रही हूँ)

अहं स्वतन्त्रता भणामि मद्वचो निशम्यताम्।
निधाय मानसे च तद् यथोचितं विधीयताम्॥
अहं स्वतन्त्रता भणामि.....॥

(१)

मदर्चनाकृते शिरांस्युपायनीकृतानि यैः,
धनं वपुस्तथा मनः सहर्षमर्पितानि यैः।
अवापुरात्मवक्षसि ज्वलद्भुशुण्डिगोलिकाः,
गतास्त एव मे जना सदैव वन्दनीयताम्॥
अहं स्वतन्त्रता भणामि.....॥

(२)

भवद्भिरन्तरिक्षगा जनाः स्वदेश ईक्षिताः,
भवद्भिराततायिनाशकारिणोऽपि दीक्षिताः।
कृतं भवद्भिरेशियाद्व्यशीतिखेलयोजनम्,
तदेतदर्थमद्य मे शुभेहितं प्रगृह्यताम्॥
अहं स्वतन्त्रता भणामि.....॥

(३)

भवद्भिरद्य दृश्यते यथार्थिकी समुन्नतिः,
भवद्भिरद्य दृश्यते नवा च या विनिर्मितिः।
भवद्भिरद्य यः स्वतन्त्रतारसो निपीयते,
तदेतदात्मजीवने चिरं चिराय धार्यताम्॥
अहं स्वतन्त्रता भणामि.....॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(४)

शुभाः हि कामनाः भवत्कृते समर्पयाम्यहम्,
समुन्नतिं सुखं च वः सदैव चिन्तयाम्यहम्।
परन्तु वर्तमानया विचित्रकाललीलया,
मनाग् विचिन्तिता यदेव वच्मि तन्निशम्यताम्॥,
अहं स्वतन्त्रता भणामि.....॥

(५)

मया न कल्पितं कदापि दुर्बलाभिशोषणं
मया न कल्पितं कदापि दुर्जनाभिपोषणम्।
मया न कल्पितं कदापि सज्जनावमाननम्
सहेऽखिलं च च तद् यथा सहै न तद्विधीयताम्॥
अहं स्वतन्त्रता भणामि.....॥

(६)

विलोकयामि वृत्तिहीनतामहं यदा यदा,
विलोकयामि नीतिहीनतामहं यदा यदा।
नतानना गतासुका भवाम्यहं तदा तदा,
इयं दशा न मेऽस्तु येन तत्सदा विधीयताम्॥
अहं स्वतन्त्रता भणामि.....॥

(७)

यदा यदा शृणोम्यहं वधूविदाहपातकम्,
यद यदा शृणोम्यहं बलात्कृतिं विहिंसनम्।
तदा तदा भवाम्यरुन्तुदव्यथाप्रपीडिता,
इयं व्यथा प्रणाशमेतु येन, तद्विधीयताम्॥
अहं स्वतन्त्रता भणामि.....॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(८)

स्वदेशवासिभिः स्वदेशवासिनां विहिंसनम्,
पृथक्त्वभावपोषणं स्वदेशदेहदारणम्।
अधीतिपण्यविक्रयं करप्रदातृनिःस्वतां,
विलोक्य यां शुचं गतास्मि सा द्रुतं विलोप्यताम्॥
अहं स्वतन्त्रता भणामि.....॥

(९)

जलं न लभ्यते तथा, यथा सुरा पदे-पदे,
वचांसि सन्ति भूरिशो न हि क्रियाः पदे-पदे।
पुनश्च भेदभावना प्रवर्त्यते पदे-पदे,
इदं दशा समर्थनं किमर्हतीति चिन्त्यताम्॥
अहं स्वतन्त्रता भणामि.....॥

(१०)

दलाद् दले पलायनं, प्रवञ्चनां क्षणे क्षणे
प्रतारणं जने जने, विहिंसनं पणे पणे।
विलोक्य रोगदायकं विमिश्रणं कणे कणे,
गतास्मि यां शुचं हि सा द्रुतं द्रुतं विलोप्यताम्॥
अहं स्वतन्त्रता भणामि.....॥

(११)

अयोग्यता पदोन्नता, सुयोग्यता पदच्युता,
अमोघलाभकारिणी मता च चाटुकारिता।
इयं स्थितिर्विलोक्यते यदा, तदा मम स्थितिः,
सुपुष्टतां भजेत्कथं? भवद्भिरेव कथ्यताम्॥
अहं स्वतन्त्रता भणामि.....॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१२)

क्वचिद्विलाससाधनैर्विमण्डिता विलासिनः,
क्वचित्क्षुधाप्रपीडिता वसन्ति देशवासिनः।
क्वचित्पयस्विनी धनस्य कुत्रचिच्च निःस्वता,
इयं दशा विलोपमेतु येन तद्विधीयताम्॥

अहं स्वतन्त्रता भणामि.....॥

(१३)

कथं पदातिमार्ग एव शेरते हि कार्मिकाः,
कथं च धर्मनाम्नि सर्वमाचरन्ति धार्मिकाः।
कथं च देहविक्रयो विधीयते सुयोजितम्
इदं निरीक्ष्य मानसे समीक्षणं विधीयताम्॥

अहं स्वतन्त्रता भणामि.....॥

(१४)

अहं स्मरामि कष्टपद्धतिं पुरानृणां यदा,
अहं भवामि गद्गदाभिमानसंयुता तदा।
विलोक्य किन्तु वर्तमाननेतृलाभकाङ्क्षितां,
व्रजान्यहं मुदं ह्यथो शुचं? स्वयं विचार्यताम्॥,

अहं स्वतन्त्रता भणामि.....॥

(१५)

धनस्य वा श्रमस्य वा न कृच्छ्रतास्ति भारते
समस्तधातवो मिलन्ति भारते प्रभारते।
उदेति या यदा-कदा तथापि बुद्धिहीनता
न सा कदाप्युदेतु येन तत्सदा विधीयताम्॥

अहं स्वतन्त्रता भणामि.....॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१६)

न निर्धनो न निर्बलो जनोऽत्र कोऽपि जायताम्,
न कस्यचित्समादरो विखण्डितश्च जायताम्।
निजावलम्बनं जने जने सदा प्रवर्धताम्,
जनो जनोऽस्य भारतस्य मोदताम्, प्रमोदताम्॥
अहं स्वतन्त्रता भणामि.....॥

(रचनातिथिः १५-८-१९८३)

(आकाशवाणीतः ३, ६, ११, १३, ४ संख्याकानि पद्यानि न प्रासार्यन्त। इयं कविता इत पूर्वम् अर्वाचीनसंस्कृतस्य पञ्चमवर्षीये चतुर्थेऽङ्केऽपि प्रकाशिता बभूव किन्तु २, १३ संख्याके पद्ये तत्र न आस्ताम्।)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रौति ते भारतम्!

(तेरा भारत चीख रहा है!)

कश्चिदुवाच–

किं रमाकान्त! नित्यं त्वया भण्यते
'भाति मे भारतं भाति मे भारतम्।'
किं न पश्यस्यनेकैरभावैर्युतं
रौति ते भारतं रौति ते भारतम्॥१॥

कुत्रचिद्दीर्घपङ्क्तिस्थिता मानवाः
यापयन्ति स्वकालं प्रतीक्षापराः।
मोचयन्ति स्वनिःश्वासराशीनहो!
यैर्व्यथामाप्नुवद् रौति ते भारतम्॥२॥

रेलयानेषु भिक्षापरान् बालकान्
अङ्गहीनानवस्त्रान् दयोत्पादकान्।
गालिभिः पोषितान् न्यक्कृतैस्तोषितान्
वीक्ष्य चिन्तामयं रौति ते भारतम्॥३॥

वृत्तपत्रेषु नित्यं बलात्कारिणां
निन्द्यपैशाचकृत्यानि पश्यत् पठत्।
किञ्च हत्यापहारादिगाथा वहत्
रौति ते भारतं रौति ते भारतम्॥४॥

क्वाप्यशिक्षातमोभिर्वृतं कष्टदैः
क्वापि रोगैः परीतं महादारुणैः।
नित्यमुत्कोचलीलाविलासैर्युतं
रौति ते भारतं रौति ते भारतम्॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यौतुकप्रेप्सुभिर्लोलुपैर्निन्दितै-
र्मर्त्यरूपे स्थितै राक्षसैः कौटिकैः।
दह्यमाना वधूर्वीक्ष्य दुःखेन हा
रौति ते भारतं रौति ते भारतम्॥६॥

देहपण्याजिरे नूपुराकर्णनैः
पारवश्याङ्कितैर्नृत्यकृत्यैस्तथा।
येन दारिद्र्यगाथोच्चकैर्गीयते
तद् व्यथापूरितं रौति ते भारतम्॥७॥

यत्र रक्षाभटैः रक्षणीयो हतो
यत्र गोप्ता न गोप्यं क्षमो रक्षितुम्।
यत्र सन्तो मता दस्यवो हिंसका
रौति तद् भारतं रौति तद् भारतम्॥८॥

उच्चशिक्षां समाप्यापि वृत्त्यर्जने
न क्षमो जायते यत्र यूनां गणः।
यत्र कुत्रापि वृत्त्यर्थमाहिण्डते
रौति तद् भारतं रौति तद् भारतम्॥९॥

हा कराधानकर्ताधिकारी स्वयं
यत्र धत्ते स्वगेहे विना सूचनाम्।
कृष्णवित्तं तथा स्वर्णभाण्डं महद्
रौति तद् भारतं रौति तद् भारतम्॥१०॥

कार्यरोधैस्तथा हिंसकान्दोलनैः
चाटुकारप्रणीतैर्वृथा भाषणैः।
ईश्वरम्मन्यमानैरहो दम्भिभी
रौति ते भारतं रौति ते भारतम्॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उग्रकृत्यैर्नरैर्यत्र मध्येपथं
पूर्वसेनापतिर्हन्यते गोलिभिः।
यत्र चार्ता भिषग्भिर्बलाद्दूष्यते
निन्द्यकृत्यान्वितं रौति तद् भारतम्॥१२॥

यत्र यूनां नवैर्मादकैर्वस्तुभिः
क्षीयते शक्तिरोजस्तथा लुप्यते?
यत्र दृश्या युवानो जराजर्जरा
रौति तद् भारतं रौति तद् भारतम्॥१३॥

कर्हिचिद्विश्वबन्धुत्वमुद्घोषयत्
पावयद्विश्ववन्द्यैश्चरित्रैर्जगत्।
यत्तदेवाद्य विद्वेषहिंसाप्लुतं
रौति ते भारतं रौति ते भारतम्॥१४॥

कर्षकेभ्यो यदान्नं भवेद् दुर्लभं
कार्मिकेभ्यश्च गेहं यदा दुर्लभम्।
वस्त्रकृद्भ्यश्च वस्त्रं यदा दुर्लभं
तर्हि नूनं हहा! रौति ते भारतम्॥१५॥

कर्गले राष्ट्रभाषास्ति नो भाषणे
संस्कृतं स्तूयते, नैव तत्सेव्यते।
स्वीयपादे कुठारः स्वयं पात्यते
वीक्ष्य सर्वं ध्रुवं रौति ते भारतम्॥१६॥

रमाकान्त उवाच–

यत्त्वया कीर्त्यते दोषजातं सखे!
तन्मया सूचितं ह्येकपद्ये पुरा।
दोषवर्जं मया सद्गुणाः सञ्चिता-
स्तेन प्रोक्तं मया 'भाति मे भारतम्'॥१७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कीर्तनेनैव वा क्रन्दनेनैव वा
लोपमेष्यन्ति दोषा न देशस्य वै।
तेन सर्वै क्रियन्तां सदा सुक्रियाः
येन भातु प्रसन्नं सदा भारतम्॥१८॥

लोलुपा नायका नैव सन्त्वत्र भोः
सन्तु कर्तव्यशून्या न चापि प्रजाः।
देशसेवां मिलित्वा कुरुध्वं समे
येन भूयोऽपि भासेत नो भारतम्॥१९॥

(रचनातिथिः १२-१०-१९८५)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारतजनताऽहम्

(मैं भारत की जनता हूँ)

अभिमानधना विनयोपेता शालीना भारतजनताहम्।
कुलिशादपि कठिना कुसुमादपि सुकुमारा भारतजनताहम्॥१॥

निवसामि समस्ते संसारे मन्ये च कुटुम्बं वसुन्धराम्।
प्रेयः श्रेयश्च चिनोम्युभयं सुविवेका भारतजनताहम्॥२॥

विज्ञानधनाहं ज्ञानधना साहित्यकला-सङ्गीतपरा।
अध्यात्मसुधातटिनी-स्नानैः परिपूता भारतजनताहम्॥३॥

प्रस्तरखण्डेषु मयोत्कीर्णा मूर्तयः सजीवा भाषन्ते।
दिग्विजयिन्यो मे कलाः सन्ति सहृदयास्मि भारतजनताहम्॥४॥

मम गीतैर्मुग्धं समं जगत् मम नृत्यैर्मुग्धं समं जगत्।
मम काव्यैर्मुग्धं समं जगद् रसभरिता भारतजनताहम्॥५॥

उत्सवप्रियाहं श्रमप्रिया पदयात्रा - देशाटन - प्रिया।
लोकक्रीडासक्ता वर्षेऽतिथिदेवा भारतजनताहम्॥६॥

कल्पनातीतदुःखानां वा सौख्यानां वापि पराः काष्ठाः।
समभावतया सोढुं शक्ता समबुद्धिर्भारतजनताहम्॥७॥

कृत्वा भूमण्डलपर्यटनं यं देशं स्वर्गं मनुते ना।
तस्यैव नृपस्तस्यैव प्रजा ऋजुचरिता भारतजनताहम्॥८॥

नाहं भ्रमेऽस्मि नाहं मोहे विश्वं भ्रान्त्वा तथ्यं वदामि।
प्रेरणां जगन्मत्तो लभते धृतिशीला भारतजनताहम्॥९॥

विश्वस्मिन् जगति गताहमस्मि विश्वस्मिन् जगति सदा दृश्ये।
विश्वस्मिन् जगति करोमि कर्म, कर्मण्या भारतजनताहम्॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

लङ्घिताः पर्वता अवरुद्धा नद्यः प्रपूरिता जलाशयाः।
सिक्ता मरवश्च यया बहुधा महिता सा भारतजनताहम्॥११॥

किं किं न तपस्तप्तं हि मया स्वातन्त्र्यदेवताराधनाय? ।
किं किं न सहे तद्रक्षार्थं श्रमशीला भारतजनताहम्॥१२॥

ये मह्यं गालीर्ददुस्तथाऽकुर्वन्नपकारं मम नित्यम्।
जितवती तानहं तपोबलैर्गम्भीरा भारतजनताहम्॥१३॥

दारिद्र्यदुःखदावाग्निदग्धदेहापि नो म्रिये ह्यद्यावधि।
साहस-जिजीविषा-कर्मठतापुत्तलिका भारतजनताहम्॥१४॥

दम्भोलिसन्निभा अपि विपदोऽनायासमेव सर्वा हि सहे।
विषपानपरापि स्मितवदना सर्वंसहभारतजनताहम्॥१५॥

आयातु यातु लक्ष्मीः स्तुवन्तु निन्दन्तु नीतिनिपुणाः कामम्।
उच्चावचमार्गे गच्छन्ती सोत्साहा भारतजनताहम्॥१६॥

अण्वस्त्रनिर्मितिर्नो कठिना मम कृते तथापि न तामीहे।
वास्तविकी हेतिरहिंसा मे निर्भीका भारतजनताहम्॥१७॥

सङ्गणकयन्त्रजालोऽपि मेऽस्तु भौतिक्युन्नतिरपि मे तथास्तु।
जीवनरसश्च मा शुष्को भू-दितिकामा भारतजनताहम्॥१८॥

आक्रमणं नैव करोमि कदाप्याक्रमणं नैव कदापि सहे।
आर्जवं न मे मूर्खत्वमस्ति दृढकवचा भारतजनताहम्॥१९॥

मैत्री मे सहजा प्रकृतिरस्ति नो दुर्बलतायाः पर्यायः।
मित्रस्य चक्षुषा संसारं पश्यन्ती भारतजनताहम्॥२०॥

ज्वालामुखिनं गिरिमारूढं परमाणुदैत्यविकलितचित्तम्।
अधुनापि जगच्छान्तिं ब्रूते या सैवा भारतजनताहम्॥२१॥

Digitized by Shri Kapil Kumar Mishra, Secretariat Deendayal Parisar, Bharatiya Vidya Bhavan, New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विद्वांसो वीराः शिल्पकराः श्रमिणः सन्तः किं किं न मेऽस्ति।
स्यादत्र न गृहभेदनपापमितिकामा भारतजनताहम्॥२२॥

नो सहे बलात्कारान् हत्या अपहृतीस्तथा तस्करवृत्तीः।
नो सहे स्वीयदेशस्य भङ्गमुन्निद्रा भारतजनताहम्॥२३॥

नग्ना बुभुक्षिता निर्गेहा सत्यपि जीवामि बहोः कालात्।
जीविष्यामि च कल्पान्तमहं मृत्युञ्जय -भारतजनताहम्॥२४॥

जिह्वां मे कीलयितुं शक्तः कः कोऽत्र जगति मातुर्जातः।
वाणी विहरति मे सदोज्ज्वला गर्जन्ती भारतजनताहम्॥२५॥

नक्राश्रुजलं जाने सम्यग् जाने च गृध्रगोमायुगिरम्।
जाने करटक-दमनक-चरितं हृदयज्ञा भारतजनताहम्॥२६॥

तस्करा हिंसका गेहभिदो मूढाश्च सन्तु मयि यदा कदा।
ते किन्तु नैव परिभाषा मे समुदारा भारतजनताहम्॥२७॥

दृप्तानामङ्कुशतां भजामि, नम्राणां रक्षकतां भजामि।
दुष्टानां शिक्षकतां भजामि लोकज्ञा भारतजनताहम्॥२८॥

शासनासन्दिकामधिरोढुं प्रतिनिधयो मे कुर्वन्ति न किम्?
तां प्राप्य केऽपि यां विस्मरन्ति मुग्धा सा भारतजनताहम्॥२९॥

मुग्धा त्वहमस्मि परं दृप्तान् लेहयामि धूलिं निजौजसा।
जनतन्त्रपद्धतेर्गुडाकेश- गोप्त्री खलु भारतजनताहम्॥३०॥

भारतभूमेरुत्पन्नाह-मस्याञ्च विलीये सामोदम्।
सेविष्ये ह्येनामाजीवन-मतिहृष्टा भारतजनताहम्॥३१॥

मोदे प्रगतिं दर्शं दर्शं वैज्ञानिकीं च भौतिकीं, परम्।
दूयेऽद्यत्वे लोकं लोकं शठचरितं भारतजनताहम्॥३२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar, New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दारिद्र्यं वृत्तेर्न्यूनत्वं सर्वमप्युपेक्षे काममहम्।
नोपेक्षे किन्तु सतां पीडां करुणार्द्रा भारतजनताहम्॥३३॥

आचरति दुर्जनो नीचकर्म यत्तसर्वं जाने, जाने।
प्राप्नोमि तथापि न निष्ठुरतां करुणार्द्रा भारतजनताहम्॥३४॥

देशे निरागसां संहारं, लुण्ठनं सतां च वधूदाहान्।
श्रावं श्रावं दर्शं दर्शं व्यथमाना भारतजनताहम्॥३५॥

पश्यामि यदा कुटिलैः क्लृप्तां मूढैश्च कृतां विघटनसरणिम्।
विलपामि तदा खिन्ना खिन्ना, चिन्ताकुलभारतजनताहम्॥३६॥

अभिसन्धि-धार्मिकोन्माद-भैक्ष्य-शारीरपण्य-मिश्रणदोषैः।
अस्वास्थ्यकरैश्च प्रदूषणै-रतिविकला भारतजनताहम्॥३७॥

पश्यामि यदा मलिनां गङ्गां सरितोऽन्या अग्निमथोद्गिरतीः।
तासां पवित्रतां शीतलतां चेच्छन्ती भारतजनताहम्॥३८॥

स्वीयैरपराधैः ह्रीणाहं स्वीयैर्दोषैरतिखिन्नाहम् ।
एकतां कामये नित्यं स्वां जगदीश्वर! भारतजनताहम्॥३९॥

युवकात्मघात - मादकपदार्थ-सेवनोत्कोच - दुर्बलघाताः ।
नो सन्तु मदीये देशेऽस्मि - न्नितिकामा भारतजनताहम्॥४०॥

अविरुद्धान् वापि विरुद्धान् वा-प्येकस्मिन् सूत्रे स्थापयितुम्।
किं किं न मया क्रियते लोके यत्नस्था भारतजनताहम्॥४१॥

ये दृश्या मयि दोषा नैकेऽ-रुन्तुदा अवाच्याः कष्टकराः।
कामये विलोपं वै तेषा-मतिशीघ्रं भारतजनताहम्॥४२॥

आक्रमिणो लुण्ठक-सङ्घाता आगता येऽपि मयि गता लयम्।
विविधाप्येका विलसामि सदा बहुवर्णा भारतजनताहम्॥४३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अभितः परितः समया निकषा मां यद्घटते तत्प्रेक्षेऽहम्।
सर्वस्य कृते खलु सज्जा या-सावहिता भारतजनताहम्॥४४॥

सागरे वियति धरणीपृष्ठे भूधरशृङ्गेषु वनेषु मरौ ।
निजमातृभूमिरक्षणदक्षा जितनिद्रा भारतजनताहम्॥४५॥

क्षेत्रेषु खलेषु तथा चैवम् उद्योगगृहेषु कुटीरेषु ।
नित्यं समृद्धिमुत्पादयामि निस्तन्द्रा भारतजनताहम्॥४६॥

नेतॄणां वार्तां नो करोमि निजवार्तामेव परं भणामि।
आराध्यदैवतं मे भारत-माराधक - भारतजनताहम्॥४७॥

किं किं स्मरामि किं विस्मरामि, किं किं लिखामि किं किं पठामि!
किं वा गायामि निजां गाथाम् अविकत्थनभारतजनताहम्॥४८॥

जलबुद्बुदसङ्काशाः कति नो संस्कृतयो लुप्ताः संसारे।
गङ्गाप्रवाह इव सनातनी गतिशीला भारतजनताहम्॥४९॥

अथवा किं बहुना रमाकान्त? सङ्क्षिप्ततया तथ्यं भणामि।
हरिमेव जगज्जगदेव हरिं पश्यन्ती भारतजनताहम्॥५०॥

परतन्त्रो मा भूत्क्त्वापि कोऽपि सर्वः सर्वत्र सदा नन्दतु।
जगतः स्वतन्त्रतामिच्छन्ती मोदे खलु भारतजनताहम्॥५१॥

रथ-रमाकान्त-राजेन्द्रमिश्र-कवितालहरीः पायं पायम्।
विस्मरति सुधाधारामपि या रसिका सा भारतजनताहम्॥५२॥

यत्कथितमस्ति तत्सत्यमस्ति अपि कश्चित्तन्मिथ्याकरोति?
श्रद्धेयं वचनं व्याहरामि प्रामाणिकभारतजनताहम्॥५३॥

(रचना तिथिः १५-७-१९८६)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उत्तरमंगलम्

(मंगलकामना का उत्तर)

मित्र! लब्धा मया ते शुभाः कामना-
स्तत्कृतेऽहं कृतज्ञो भवन् भूरिशः।
स्वास्थ्यदं मोददं कीर्तिदं सौख्यदं
नूतनं वत्सरं ते शुभं कामये॥१॥

यत्र गेहे वसेर्यत्र वीथ्यां वसे-
र्ग्रामके वा नगर्यां वसेस्त्वं सखे।
वैमनस्याग्निरुग्रो न तत्र ज्वले-
न्नूतने वत्सरे ते भवेन्मङ्गलम्॥२॥

येन मार्गेण यात्रा भवेत्तावकी
तत्र पुष्पाणि नित्यं हसेयुः सखे!
कण्टकं न स्पृशेत्ते पदं कोमलं
नूतने वत्सरे ते भवेन्मङ्गलम्॥३॥

कुत्र चिन्तात्र लोके न संदृश्यते
कुत्र वा दुःखशोकादयो न स्थिताः?
त्वत्कृते किन्तु तिष्ठन्त्वदृश्या इमे
नूतने वत्सरे ते भवेन्मङ्गलम्॥४॥

यत्र देशेऽस्ति वासः, सखे तावक-
स्तत्र कर्त्तव्यशून्यो न कश्चिद्भवेत्।
स्युः प्रजातन्त्ररक्षापरास्तन्नरा
नूतने वत्सरे ते भवेन्मङ्गलम्॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उष्यते यत्र राष्ट्रे त्वयाहर्निशं
तत्र कार्यं चिकीर्षुर्यदि स्याज्जनः।
प्राप्नुयात् कार्यवृत्तिं तदा स ध्रुवं
नूतने वत्सरे ते भवेन्मङ्गलम्॥६॥

ज्ञातमस्त्येव मे, त्वं हि सामाजिकं
वीक्ष्य वैषम्यमाप्नोषि तापं सखे!
आयतावीदृशी ते दशा नो भवे-
नूतने वत्सरे ते भवेन्मङ्गलम्॥७॥

वृत्तपत्रेषु नित्यं बलात्कारिणां
निन्द्यपैशाचकृत्यानि न त्वं पठेः!
नापि हत्यापहारादि-गाथा नवा
नूतने वत्सरे ते भवेन्मङ्गलम्॥८॥

प्रोन्नतिर्दुजनानां सतां दुर्गति-
र्वृत्तिकष्टार्दितानां च यूनां गतिः।
नो दुनोतु त्वदीयं द्रुतं मानसं
नूतने वत्सरे ते भवेन्मङ्गलम्॥९॥

नैव वध्वाः न पत्युर्न वा कस्यचि-
ज्जीवितप्राणिनो दाहमाकर्णयेः!
नैव दारिद्र्यपीडा जनान् बाधये-
न्नूतने वत्सरे ते भवेन्मङ्गलम्॥१०॥

लोलुपा नायकास्सन्तु देशे नहि
स्वाधिकारात्प्रमता न चापि प्रजाः।
स्वैरिणो नो भवेयुस्तथा शासका
नूतने वत्सरे ते भवेन्मङ्गलम्॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मुग्धलोकं सखे! वञ्चनाचुञ्चवो
गृध्रगोमायवो वञ्चयेयुर्नहि।
क्षेमदे शान्तिदे हर्षदे श्रीप्रदे
नूतने वत्सरे ते भवेन्मङ्गलम्॥१२॥

देववाणीमुपेक्ष्य प्रभाभासुरां
येऽवनत्या गता अन्धकूपे नराः।
तेऽपि गृह्णन्तु शिक्षां सखे! सत्वरं
नूतने वत्सरे ते भवेन्मङ्गलम्॥१३॥

दैन्यहीनं दयापूर्णमाशान्वितं
जीवनं कर्मठं ते सदा राजताम्।
त्वं सुखीः स्याः, लभस्व प्रियं काङ्क्षितं
नूतने वत्सरे ते भवेन्मङ्गलम्॥१४॥

ये जना आसते ते कुटुम्बे सखे!
ते प्रसन्नास्समर्था लसेयुस्सदा।
विश्वमेकं कुटुम्बं च ते राजताम्
नूतने वत्सरे ते भवेन्मङ्गलम्॥१५॥

अत्र लोके सतो रक्षितुं सर्वदा
दुष्कृतीः हर्तुमुत्साहिनस्स्युर्नराः।
निर्मितिर्नूतना स्यात्सदा शङ्करी
नूतने वत्सरे ते भवेन्मङ्गलम्॥१६॥

नैव याचे धनं, स्वर्गमेवाथवै-
काकिनस्ते न सौख्यं सखे! कामये।
सन्तु सर्वत्र सर्वे सदा नन्दिता
नूतने वत्सरे ते भवेन्मङ्गलम्॥१७॥

CC-0. Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सन्तु बाला युवानोऽथ वृद्धास्समे
निर्भयाः कर्मठा लोकसेवापराः।
आदरः कस्यचित्खण्डितो नो भवे-
नूतने वत्सरे ते भवेन्मङ्गलम्॥१८॥

सत्यनिष्ठा जयेल्लेखनी निर्भया
निर्भया वाग् जयेल्लोकसंरक्षिणी।
साधुभावस्तथा ज्ञानपूतो जये-
नूतने वत्सरे ते भवेन्मङ्गलम्॥१९॥

आर्तरक्षार्थमस्त्राणि शस्त्राणि वै
सन्तु, नैव प्रहर्तुं तथानागसि।
कण्टकानां च लोकस्य लोपो भवे-
नूतने वत्सरे ते भवेन्मङ्गलम्॥२०॥

येषु चित्तेषु दावानलो भीषणो
द्वेषभावस्य जागर्ति धूधूत्करः।
जागृयात्तेषु वासन्तिकी श्रीः शुभा
नूतने वत्सरे ते भवेन्मङ्गलम्॥२१॥

नूतना नूतना येऽपराधाः खलै-
र्नित्यमाविष्क्रियन्ते जगद् बाधितुम्।
ते समुन्मूलिताः स्युः समाजाद् द्रुतं
नूतने वत्सरे ते भवेन्मङ्गलम्॥२२॥

वारिवाहः सुकाले समागच्छतात्
सन्तु गावश्च पुष्टाः सवत्साः समाः।
शं स्वकार्येषु लग्नाः समे प्राप्नुयु-
र्नूतने वत्सरे ते भवेन्मङ्गलम्॥२३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

क्षेत्रकेष्वन्नमुत्पादितं स्याद्बहू-
द्योगशालास्वथोत्पादवृद्धिर्भवेत्।
सन्तु सत्यश्रमाभ्यां समाः सिद्धयो
नूतने वत्सरे ते भवेन्मङ्गलम्॥२४॥

नैव पश्येदभद्रं नरश्चक्षुषा
नैव चाकर्णयेद्वाप्यभद्रं क्वचित्।
नैव वाचा भणेद्वाक्यमुद्वेजकं
नूतने वत्सरे ते भवेन्मङ्गलम्॥२५॥

स्वस्थपुष्टं समेषां शरीरं लसे-
न्मानसं शैवसङ्कल्पपूतं भवेत्।
सच्चिदानन्द आत्मा स्वरूपं भजे-
न्नूतने वत्सरे ते भवेन्मङ्गलम्॥२६॥

वाचि विद्या, करे कर्म, दृष्टौ दया
पादयोश्च प्रकृष्टा गती राजतम्।
सुप्रवृत्तेन्द्रियैस्तोषमीयुर्जना
नूतने वत्सरे ते भवेन्मङ्गलम्॥२७॥

ये बुभुक्षाहता वस्त्रहीनाश्च ये
सन्ति पादातमार्गे शयानाश्च ये।
अन्नवस्त्राश्रयान् प्राप्नुयुस्ते द्रुतं
नूतने वत्सरे ते भवेन्मङ्गलम्॥२८॥

धर्मभाषाविवादा लभेरन् शमं
दुष्कृतिर्लुप्यताम् सत्कृतिर्वर्धताम्।
नित्यमौदार्यभावो जयेत्क्षुद्रताम्
नूतने वत्सरे ते भवेन्मङ्गलम्॥२९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आधयो व्याधयोऽकालमृत्युस्तथा
पीडयेयुर्न लोकं श्रमाराधकम्।
कर्म कुर्वञ्छताब्दं नरो जीवता-
न्नूतने वत्सरे ते भवेन्मङ्गलम्॥३०॥

यत्र साहित्य-सङ्गीत-पूजा भवेत्
सत्कलाशिल्पशास्त्रार्चना वा भवेत्।
तत्र विघ्नो न कश्चित्समुत्पाद्यताम्
नूतने वत्सरे ते भवेन्मङ्गलम्॥३१॥

सात्त्विका राजसास्तामसाः प्राणिनोऽ
न्योन्यमाश्रित्य कल्याणिनस्स्युस्सदा।
वाचि चित्ते च कार्ये सदेकं वसे-
न्नूतने वत्सरे ते भवेन्मङ्गलम्॥३२॥

प्रेमभङ्गो न कस्यापि लोके भवेत्
प्रेमिणो विप्रयुक्ता मिलेयुर्मुदा।
स्युः स्मितास्याः समे फुल्लपद्मोपमा
नूतने वत्सरे ते भवेन्मङ्गलम्॥३३॥

पीडिता येऽप्यभावैर्मनःक्लेशिभि-
स्ते जयेयुः समस्तानभावान्नराः।
निष्फला नैव कस्यापि काङ्क्षा भवे-
न्नूतने वत्सरे ते भवेन्मङ्गलम्॥३४॥

शैशवं लालितं वार्धकं पूजितं
यौवनं भोगतृप्तं हसेत्सर्वदा।
त्याग-भोगौ भवेतां सखायौ सदा
नूतने वत्सरे ते भवेन्मङ्गलम्॥३५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

येऽपि चिन्तासहस्रैः परीताः जनाः
सन्ति पीतानना लुप्तहासस्मिताः।
सन्तु रक्तानना: पूर्णकामाश्च ते
नूतने वत्सरे ते भवेन्मङ्गलम्॥३६॥

जीवनं विश्वसम्पद् बुधैरुच्यते
तच्च विश्वस्य सेवार्थमेवार्प्यताम्।
सद्विवेकः क्रियात्तस्य रक्षां सदा
नूतने वत्सरे ते भवेन्मङ्गलम्॥३७॥

पर्वतानां वनानां नदीस्त्रोतसां
निर्झराणामृतूनां दिशां प्राणिनाम्।
वारिधीनीं च चेतः सदा प्रीयताम्
नूतने वत्सरे ते भवेन्मङ्गलम्॥३८॥

खे जले कौ च वायौ तथा तेजसि
स्त्रग्विणी शान्तिराप्नोतु नित्यं जयम्।
क्रान्तिरेयात्परं रक्तपातं विना
नूतने वत्सरे ते भवेन्मङ्गलम्॥३९॥

तावको देश आस्तां सदा रक्षित-
स्तावकं विश्वमास्तां सदा रक्षितम्।
तावकी कीर्तिरास्तां सदा रक्षिता
नूतने वत्सरे ते भवेन्मङ्गलम्॥४०॥

स्वाभिमानोऽस्तु ते सर्वदाः रक्षित-
स्तावकी स्यात्प्रतिज्ञा सदा रक्षिता।
तावकं स्यात्तपो रक्षितं सर्वतो
नूतने वत्सरे ते भवेन्मङ्गलम्॥४१॥

CC-0. Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

त्वं हि विश्वेश्वरं विश्व आलोकये-
र्भूर्भुवः स्वः प्रसन्ना भवेयुश्च ते।
प्रीयतां ते रमाकान्त आजीवनं
नूतने वत्सरे ते भवेन्मङ्गलम्॥४२॥

कामना मे वशे पूरणं तद्वशे
ईह आशायुतः कामनापूरणम्।
शारदाया रमायाः प्रसादोऽस्तु ते
नूतने वत्सरे ते भवेन्मङ्गलम्॥४३॥

नूतनं वत्सरं वीक्ष्य सम्प्रेषिता
यैरनेकैः सुहृद्भिः शुभाः कामनाः।
त्वद्बलेनैव तेषां कृतेऽपि ब्रुवे
'नूतने वत्सरे वो भवेन्मङ्गलम्'॥४४॥

यन्मया नोदितं यच्च काम्यं त्वया
यच्च पथ्यं भवेन्मङ्गलाधायकम्।
तत्सुलभ्यं भवेत्त्वत्कृते सत्वरम्
नूतने वत्सरे ते भवेन्मङ्गलम्॥४५॥

वक्तुमास्ते सखे! भूरि मन्मानसे
किन्तु वीक्ष्य त्वदीयामतिव्यापृतिम्।
पत्रमत्रैव सम्पूर्णतां प्रापये
नूतने वत्सरे ते भवेन्मङ्गलम्॥४६॥

(रचनातिथिः १५-१-१९९०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वदत नेतारो मनाक्!

(नेताओ! ज़रा बोलो तो)

किं कुरुथ किं वा करिष्यथ वदत नेतारो मनाक्।
किं मनसि वो वर्तते भो भणत नेतारो मनाक्॥१॥ध्रु.॥

'अद्य युष्माकं प्रयासैर्देशगौरवमेधते।'
कश्चिदपि वक्तुं किमिच्छति चिन्तयध्वं रे मनाक्॥२॥

धर्मजातिग्रामभाषावर्णभेदोद्दीपनैः।
कीदृशं कृशरं पचध्वे वदत नेतारो मनाक्॥३॥

जनमनस्सु द्वेषवह्निर्वः प्रयासैर्ज्वालितः।
किमुचितं भवदीयकृत्यं वदत नेतारो मनाक्॥४॥

छिन्नमुद्यानं भवद्भिः पुष्पगन्धाढ्यं महत्।
दूयते न च मानसं वो हन्त! नेतारो मनाक्॥५॥

नाशितं जनजीवनं पितृसद्मतां नीताः पुरः।
कारिताः शालाश्च काराः किं न लज्जध्वे मनाक्॥६॥

रेलयानानां निरसनैर्निग्रहैश्च निरागसाम्।
किं भवति किं वा भविष्यति? वदत नेतारो मनाक्॥७॥

यैर्न दीपाली व्यलोकि स्वदितमथ न च यौवनम्।
वैशसात् तेषां न शङ्कध्वे कथं क्रूरा मनाक्॥८॥

यौवनं प्रज्वाल्यते, प्रतिभा सतामवहेल्यते।
जनमतं समुपेक्ष्यते, भद्रा बिभिथ चेतसि मनाक्॥९॥

नैव काशी नैव मथुरा नाप्ययोध्या नो पुरी।
नैव चोज्जयिनी विधत्ते वो भयं चेतसि मनाक्॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar, New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नृषु नृषु च विद्वेषभावो रोपितो निजभाषणैः।
येऽप्यवाच्या भवदुदन्ता नोद्गिरति तान् कापि वाक्॥११॥

सौमनस्याधारभूतां भरतवसुधां नित्यशः।
कालकूटमयीं कुरुध्वे, किं न शङ्कध्वे मनाक्॥१२॥

नित्यमेव क्रूरतानृतछद्मभेदाराधकाः।
कां गतिं यूय गमिष्यथ वदत नेतारो मनाक्॥१३॥

'स्फोटयथ शासथ'-नियमतः खण्डयथ राष्ट्रैकताम्।
कुत्र गच्छथ कुत्र यास्यथ? वदत नेतारो मनाक्॥१४॥

यद्यदाचरथ स्वदेशीये जनेऽत्र प्रत्यहम्।
किं तदाचरितं कदाचित् आङ्ग्लकुटिलैरपि मनाक्॥१५॥

देशसेवां कर्तुमागच्छथ कुरुथ यादृच्छिकम्।
व्यवहृतिः केयं स्फुरति वश्चिन्तयध्वं रे मनाक्॥१६॥

निर्धना निर्धनतरास्तैस्तैरभावैः क्लेशिताः।
आढ्यता नवनूतना वो वन्दनीया किं मनाक्॥१७॥

क्लिश्यते दुष्यति च शुष्यति भिक्षते रोदिति जनः।
अत्थ पिबथ स्वपिथ हृष्यथ! किं न लज्जध्वे मनाक्॥१८॥

वीक्ष्य देशे कुव्यवस्थां वृत्तिकष्टं हिंसनम्।
निस्त्रपाः क्रन्दथ हसथ वा? वदत नेतारो मनाक्॥१९॥

वस्त्रराहित्यं कुपोषणमत्र वापि महार्घता।
नित्यमग्रे किमिति धावति? वदत नेतारो मनाक्॥२०॥

नो कृषध्वे किन्तु कृषकाणां भवन्तो नायकाः।
वीक्ष्य युष्मान् किं प्रसीदति कोऽपि सन्ना भुवि मनाक्॥२१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अर्थयन्तारोऽपि यूयं धर्मगुरुगुरवस्तथा।
काममोक्षविचारका अपि! बिभिथ रे चेतसि मनाक्॥२२॥

उपचिताः खलु यैर्भवन्तस्ते भवद्भिर्लुण्ठिताः।
रे प्रजातन्त्रस्य हन्तारो बिभिथ लोकान्मनाक्॥२३॥

लुञ्चिता न्यायालया जनता वराकी लुञ्चिता।
किमपरं भो लुञ्चयिष्यथ वदत नेतारो मनाक्॥२४॥

अहह! सज्जनता भवद्भिर्लुण्ठिता व्यापादिता!।
लोकयथ ननु लोकयथ कीर्तिं स्वकीयां रे मनाक्॥२५॥

देशसेवा लुण्ठनापर्यायभूता वो मते।
किं न पश्यथ नैजचरितं? वदत नेतारो मनाक्॥२६॥

विश्ववन्द्यं शान्तिदूतं चैकनीडं यत्सताम्।
भारतं तत्कथं लुञ्चथ, वदत नेतारो मनाक्॥२७॥

भङ्क्थ चित्तं भङ्क्थ वित्तं भङ्क्थ विश्वासं नृणाम्।
किं न नैजं भङ्क्थ गर्द्धं वदत नेतारो मनाक्॥२८॥

चोरयथ जनसौमनस्यं चोरयथ जनजीवनम्।
चोरयिष्यध्वे स्वकीयं भ्रष्टकृत्यं किं मनाक्॥२९॥

किन्नु परवञ्चनविधिज्ञा मातृभूपरितापकाः।
नरकरचनापाटवं वो नो दुनोति मनो मनाक्॥३०॥

यत्र यत्रालोक्यते शान्तिर्भवद्भी रक्षिता।
उप्यते कलहस्य बीजं तत्र, जिह्रीथ न मनाक्॥३१॥

गिरथ कोषं गिरथ पदवीं गिरथ सर्वं सुविधया।
किं स्वतृष्णामपि गरिष्यथ? वदत नेतारो मनाक्॥३२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तनुथ देशे सङ्कटं कलहं तथातङ्कं स्वतः।
किं न तनुथ स्वीयचेतसि राष्ट्रभक्तिं रे मनाक्॥३३॥

चिन्तयथ नित्यं स्वकीयं हितमपरिमितमेव रे।
चिन्तयध्वं देशहितमपि लोलुपा यूयं मनाक्॥३४॥

युष्मदीयैर्नित्यकृत्यै राष्ट्रदेवी लज्जिता।
निस्त्रपा जीवथ न मज्जथ चुलुकवारिणि रे मनाक्॥३५॥

हिंसया अनृतेन पैशुन्येन भवतां जीविका।
कोऽपि सम्बन्धोऽस्ति किं सत्यश्रमाभ्यां वो मनाक्॥36॥

सन्ति ये लालाटिका आस्थाननलिनीका बकाः।
कुत्र युष्मान् पातयेयुश्चिन्तयध्वं रे मनाक्॥३७॥

पादयोः प्रणिपत्य घोणाघर्षणं कृत्वा मुहुः।
याचितं यन्मे मतं तस्यादरं रक्षत मनाक्॥३८॥

दूरदर्शनतन्त्रतो लब्ध्वा विभुत्वं प्रत्यहम्।
भाष्यते यदनर्गलं रे वित्थ तस्यार्थं मनाक्॥३९॥

मनसि वचसि च कर्मणि प्रविरुद्ध्यते यैः प्रतिपलम्।
सन्ति सन्तो वै कियन्तो वोऽतिरिच्य वदत मनाक्॥४०॥

नैककविभिर्नवपुराणैर्यस्य महिमा गीयते।
भारतं तत्किं न रक्षथ, वदत नेतारो मनाक्॥४१॥

यस्य रक्षायै भटा उत्साहिनः खे भुवि जले।
यूयमपि तद्देशरक्षार्थं कुरुत यत्नान् मनाक्॥४२॥

येऽप्यपश्यन्नैकतायामेकतां भारतभुवि।
भवत तेष्वपि भो कृपालव आत्मपूर्वजनृषु मनाक्॥४३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'यातु देशो ह्यन्धकूपे रक्षितं स्यान्मे मतम्।'
इति विचारपरम्परां स्वां त्यजत नेतारो मनाक्॥४४॥

चिनुथ यूयं पूर्वजानां दुर्गुणानेव, क्षणम्।
सद्गुणानपि किन्तु तेषां चिनुथ नेतारो मनाक्॥४५॥

किं तुदध्वे राष्ट्रदेवं किं तुदथ देशावनिम्।
संस्कृतिं नः किं तुदध्वे वदत नेतारो मनाक्॥४६॥

किं कृतघ्नैर्लप्स्यते कीर्तिर्यशो वा निस्त्रपैः।
मनसि चिन्तयथ क्वचिद् एकान्त आसीना मनाक्॥४७॥

शासनासन्दीमवाप्य व्रजत नो गर्वं क्षणम्।
आगते विपरीतकाले कोऽपि रक्षति किं मनाक्॥४८॥

ये समागच्छन्ति भङ्क्तुं वोऽभिमानं द्वारि वः।
किं नु शक्ष्यथ रोद्धुमेतान्? वदत नेतारो मनाक्॥४९॥

किरथ जनसम्मर्दं निरागसमात्मनोऽहङ्कारतः।
किमिति तच्छक्तिं करिष्यथ वदत नेतारो मनाक्॥५०॥

ध्वसितुं मे भारतं यूयं स्थिता यदि तत्पराः।
निश्चितं यूयं विनङ्क्ष्यथ, सावधाना रे मनाक्॥५१॥

प्राक्तना नेतार आसंस्त्यागशीलाः प्रायशः।
अद्यतननेतार आध्वे तत्सदृक्षाः किं मनाक्॥५२॥

ते मृता अपि पूजनीया यैर्हि देशः सेवितः।
जीविता अपि किन्तु यूयं पूजनीयाः किं मनाक्॥५३॥

भारभूता मातृभूमेर्यूयमेतन्मे मतम्।
अत्र किं शूले मनो वो वदत नेतारो मनाक्॥५४॥

CC-0. Padmashri Rama Kant Shukla Collection at Devvani Parishad, Uttam Nagar, New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अद्य युष्माकं सुकृत्यैर्नित्यनूतनशोभनैः!
लोक्यते यद्दिग्दिगन्तं तद्यशः पश्यत मनाक्॥५५॥

ये कविम्मन्या यशो वो दूषयन्ति धिगस्तु तान्।
न्याय्यमार्गान्न स्वकीयात् प्रविचलत धीरा मनाक्॥५६॥

उपकृतं बहु तत्र किं कथ्येत जीवत रे चिरम्।
कुत्र वो दिव्यं यशः स्वल्पाक्षरा क्व च मेऽत्र वाक्॥५७॥

(रचनातिथिः २९-१०-१९९०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

किं जीवनं ते!

(तेरा क्या जीवन है!)

मनसि चिन्तय सखे! किं जीवनं ते!
रहसि शीलय सखे! किं जीवनं ते!

न वा स्वार्थः परार्थो नापि बन्धो!
त्वया चेत्साध्यते, किं जीवनं ते! ॥१॥

न साहित्यं, न सङ्गीतं, कला वा
न रासिक्यं च ते, किं जीवनं ते! ॥२॥

न दाक्षिण्यं, न सौशील्यं, न कीर्तिः
न सेवा, नो दया, किं जीवनं ते! ॥३॥

विपदि धैर्यं, तथाभ्युदये क्षमा नो
न वा युधि विक्रमः, किं जीवनं ते! ॥४॥

गुरोः पित्रोर्न चरणा वन्दिताश्चेत्
अहङ्काकारात्त्वया, किं जीवनं ते! ॥५॥

न कश्चित्प्रेमबन्धे त्वामबध्नात्
वृथाजीविन् सखे! किं जीवनं ते! ॥६॥

त्वया यदि शासनासन्दीमवाप्य
न लोको रञ्जितः, किं जीवनं ते! ॥७॥

अहो दैनन्दिनी मतयाचना ते
वनीयक नेतृवर! किं जीवनं ते! ॥८॥

न निःश्वसितं, न रुदितं, मूर्च्छितं नो
प्रियाविरहे त्वया, किं जीवनं ते! ॥९॥

वियोगे ते जनो नो कोऽपि खिन्नः
न योगे प्रीतिमान्, किं जीवनं ते! ॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मनोभावो न निर्द्वन्द्वं प्रकटितः
कपटचारिंस्त्वया, किं जीवनं ते! ॥११॥
विषामृतयोर्विवेकं नैव कर्तुम्
त्वमीशश्चेत्तदा किं जीवनं ते! ॥१२॥
न दुष्टास्तर्जिताः स्वीयेन महसा
न सन्तो मानिताः, किं जीवनं ते! ॥१३॥
करालः काल इव नाभासि चेत्त्वम्
कुकृत्यानां कृते, किं जीवनं ते! ॥१४॥
त्वया स्वान्तःसुखार्थं देववाणी
न पठिता, न श्रुता, किं जीवनं ते! ॥१५॥
प्रभुः कर्ता च भर्ता चैव हर्ता
न चेदाराधितः, किं जीवनं ते! ॥१६॥
निपीतं नैव मधु प्रेम्णः कदाचित्
विरस मृल्लोष्ठ रे! किं जीवनं ते! ॥१७॥
न रसिता रसवशात्त्वत्पार्श्वमाप्ता
रहसि काचित्त्वया, किं जीवनं ते! ॥१८॥
वृथा चन्द्रो वृथा मधुयामिनीयम्
न पार्श्वे ते प्रिया, किं जीवनं ते! ॥१९॥
स्वदेशः सेवितो न प्राणपणतः
विकत्थन धूर्त रे, किं जीवनं ते! ॥२०॥
मुखे मधु ते मनसि ते कालकूटः
तृणावृत कूप रे! किं जीवनं ते! ॥२१॥
कृतघ्नत्वं कदाचारः पिशुनता
इमे त्वद्बान्धवाः, किं जीवनं ते! ॥२२॥
स्वयं नष्टः परान्नाशयसि नित्यम्
व्यसनशतशालिनः किं जीवनं ते! ॥२३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

क्षणे रुष्टः क्षणे तुष्टः सखे! त्वम्
अहो चलचित्त रे! किं जीवनं ते! ॥२४॥

मुखे ते मक्षिकाः कुर्वन्ति भिन्-भिन्
न चोड्डाययसि रे! किं जीवनं ते! ॥२५॥

सुरक्षितमस्ति नो पदमपि पलार्थम्
अहो मन्त्रिप्रवर! किं जीवनं ते! ॥२६॥

प्रदर्शन - गालिका - कार्यावरोधैः
अहो प्राचार्यवर! किं जीवनं ते! ॥२७॥

प्रकृत्यङ्के न ते क्रीडा बभूव
सदा हर्म्यस्थ रे! किं जीवनं ते! ॥२८॥

न दुग्धं माहिषं व्यायामिनस्ते
(पयो गव्यं न चेद् व्यायामिनस्ते)
सुलभमास्तेऽन्वहं! किं जीवनं ते! ॥२९॥

न चेत् पार्श्वे सखे ते स्वास्थ्यवित्तम्
धनैरेतैरलं, किं जीवनं ते! ॥३०॥

उपायैस्तैश्च तैर्धृतमपि मनस्ते
प्रियां नोपैति चेत् किं जीवनं ते! ॥३१॥

उपालम्भो न चानुनयोऽपि तुभ्यं
अहो प्रणयिन् युवक! किं जीवनं ते! ॥३२॥

तवागमने तथा गमने न चर्चा
वराक प्राघुणिक! किं जीवनं ते! ॥३३॥

परोक्षे शत्रुभिर्मित्रैस्तटस्थैः
न चेच्छ्लाघ्योऽसि रे, किं जीवनं ते! ॥३४॥

अयं श्रोता न बोधति भाषणं ते
अनर्गलजल्पिनः किं जीवनं ते! ॥३५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

न दीनाः सेविताः शुद्धेन मनसा
कुनेतृ न्! सेवसे, किं जीवनं ते! ॥३६॥
न माता जन्मभूर्बन्धो! मता चेत्
किमेतेनायुषा, किं जीवनं ते! ॥३७॥
न दृष्टं भारतं स्निग्धेन मनसा।
अहो विश्वभ्रमिन्! किं जीवनं ते! ॥३८॥
कृपेशस्याशिषो यदि वा गुरूणाम्।
न लब्धा जीवने, किं जीवनं ते! ॥३९॥
त्वयार्वाचीनसंस्कृतमपि न पठितम्?
न दूर्वालोकिता? किं जीवनं ते! ॥४०॥
रमाकान्तोऽभिराजो वा रथो वा।
श्रुतो यदि न त्वया, किं जीवनं ते! ॥४१॥

(रचनातिथिः २९-३-१९९१)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वन्दनीयास्ते

(वे वन्दनीय हैं)

इयं स्वर्गाधिका मे मातृभूमिर्वन्दनीयास्ते।
परं यास्या दशाद्यत्वे, कथय किं वन्दनीयास्ते?॥१॥

चतुर्दिक् दृश्यते यासौ प्रगतिरभिनन्दनीयास्ते।
चतुर्दिक् दुःस्थितिर्यालोक्यते, किं वन्दनीयास्ते?॥२॥

जना ये भारतं पुष्णन्ति, नित्यं वन्दनीयास्ते।
अथो तत्पांसुलं कुर्वन्ति ये, किं वन्दनीयास्ते?॥३॥

जना एकत्वसूत्रे यैर्निबद्धा वन्दनीयास्ते।
जनान् ये योधयन्ति प्रत्यहं किं वन्दनीयास्ते॥४॥

अभिघ्नन्तो रिपून् युद्धे चलन्तो वीरगत्याग्रे।
दिवं ये देशरक्षार्थं प्रयाता वन्दनीयास्ते॥५॥

न ये देशस्य किन्तु स्वीयवंशस्यैव दारिद्र्यम्।
अपाकर्तुं यतन्ते नेतृवर्या वन्दनीयास्ते?॥६॥

अतस्मिंस्तस्य बुद्धिं ये दधाना वन्दनीयास्ते।
पुनर्ये तत्र तद्बुद्धिं दधति, नो वन्दनीयास्ते?॥७॥

नहि प्रत्यक्षमनुमानं न शाब्दं नेषदुपमानम्।
प्रमाणं मन्यते या सा मतिः किं वन्दनीयास्ते?॥८॥

चिरान्निटिले य आसीत् स्थापितः केनापि साहङ्कृति।
कलङ्को मार्जितोऽसौ यैर्न केषां वन्दनीयास्ते ॥९॥

करामलकं न पश्यन्ती खपुष्पं चैव पश्यन्ती।
असौ लोकोत्तरा दृष्टिः सखे! ते वन्दनीयास्ते? ॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पुरा दुर्भावनादीप्तिस्ततः सद्भावनायात्रा!
इयं नीतिर्मता येषां जना नो वन्दनीयास्ते ॥११॥

प्रजासु प्रत्यहं कलहं विवर्धयसे स्वपोषार्थम्!
इयं वृत्तिः सखे नेतस्त्वदीया वन्दनीयास्ते ॥१२॥

अहिंसाचत्वरे हिंसा, सहिष्णुत्वाजिरे द्वेषः।
क्वचिद् गृहयुद्धघोषः, किं दशेयं वन्दनीयास्ते? ॥१३॥

अहो राष्ट्रध्वजं गणतन्त्रदिवसं ये बहिष्कुर्युः।
किमेते भारतीयाः? भारतीयैर्वन्दनीयास्ते? ॥१४॥

प्रियं सत्यं हितं सारं वचो या वक्ति सा वाणी।
न ते वन्द्या, परं विपरीतवक्त्री वन्दनीयास्ते? ॥१५॥

यमेवारुह्य यात्रां कुर्वते पारं प्रयातुं तम्।
प्लवं विच्छेत्तुकामा बालिशा ये, वन्दनीयास्ते? ॥१६॥

चतुर्दिक् दन्दशूका निर्भयाः फूत्कुर्वते लोके।
गरुत्मन्! मौनवृत्तिस्ते किमेषा वन्दनीयास्ते? ॥१७॥

परीते वह्निना देशे ज्वलति धूधूधधग्धगिति।
असौं तूष्णीकता ते किं मनागपि वन्दनीयास्ते? ॥१८॥

न जाने केन सन्दीप्तात्र हिंसा ताण्डवं कुरुते।
करे धृत्वा करं ये संस्थिताः, किं वन्दनीयास्ते? ॥१९॥

इयं हिंसासुरी व्याप्नोति हा! देशं समस्तं मे।
इयं दैनन्दिनी शोच्या स्थितिः किं वन्दनीयास्ते? ॥२०॥

उपद्रविणां कृते शस्त्रास्त्रसङ्घातोऽन्यदेशीयः।
कथं देशे प्रविष्टः? किं सुरक्षा वन्दनीयास्ते? ॥२१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उपद्रविभिः कृता निर्दोषनृणां जीवतां दाहाः।
इमे रुधिरप्रवाहाः किं प्रशासक! वन्दनीयास्ते? ॥२२॥

रमन्ते साङ्ख्यपुरुषाभा जनाः स्वासन्दिकायां ये।
अकर्तारश्च पश्यन्तोऽखिलं, नो वन्दनीयास्ते ॥२३॥

जनं विनिपात्य दुर्घोरेऽसुरक्षावह्निकुण्डे ये।
सुरक्षामण्डले गुप्ता रमन्ते, वन्दनीयास्ते? ॥२४॥

क्वचिद्यो धर्मनिरपेक्षाः क्वचिद्धर्मस्य वक्तारः।
क्वचिद्धर्मावतारा नायका नो वन्दनीयास्ते? ॥२५॥

'कथं निर्वाचने भाविन्यहं विजयी भवामी'ति।
इदं येषां परं लक्ष्यं, न केषां वन्दनीयास्ते! ॥२६॥

पदं मद्यं धनं मानं यशो लब्धुं मृषा ब्रुवते।
वराका 'बुद्धिजीवी' सञ्ज्ञका ये, वन्दनीयास्ते! ॥२७॥

तिलं ताडं, समुद्रं गोष्पदं, मेरुं कणं कर्तुम्।
समर्था आसते ये सूचनादाः, वन्दनीयास्ते! ॥२८॥

अहिंसा सत्यमुपकारः श्रमः प्रेमा मतो धर्मः।
अतो ये सन्ति निरपेक्षा इदानीं वन्दनीयास्ते! ॥२९॥

यया नीत्या समे सद्भावसूत्रे गुम्फिता न स्युः।
असौ नीतिः किमस्माकं समेषां वन्दनीयास्ते? ॥३१॥

नरे शठतां दधाना सत्कृतिं दूरे प्रकुर्वाणा।
इयं या राजनीतिर्दूरतो मे वन्दनीयास्ते! ॥३१॥

इमे प्राक्पादयोः पतितास्तदनु ये पृष्ठमांसादाः।
खला मशका इवासक्चूषका नो वन्दनीयास्ते! ॥३२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यदीच्छसि भद्र! भद्रं दुर्जनान् वन्दस्व नित्यं त्वम्।
अरे! ये सज्जनास्ते सज्जनाः, किं वन्दनीयास्ते! ॥३३॥

प्रजाशिक्षासुरक्षाभरणरूपं स्वीयकर्तव्यम्।
न पालयितुं समर्थाः शासकाः, किं वन्दनीयास्ते? ॥३४॥

क्वचिद्वित्तीयघोटालाः, क्वचित्क्रयविक्रयोत्कोचाः।
क्वचिच्चान्ये ह्यवाच्या येऽप्युदन्ता वन्दनीयास्ते? ॥३५॥

कदाचित्खाडकूचर्चा कदाचिज्जङ्गजूचर्चा।
इयं या दुर्दशालोक्या किमेषा वन्दनीयास्ते? ॥३६॥

न यद्दातुं समर्थस्तत्कृते कुरुषे प्रतिज्ञां त्वम्!
अपूर्या किं प्रतिज्ञा तावकीना वन्दनीयास्ते? ॥३७॥

अहो पूजास्थलं निर्मासि, पूजां नैव कुरुषे त्वम्!
कथय भक्तप्रवर! ते भक्तिरेषा वन्दनीयास्ते? ॥३८॥

ययोद्गिरतो विषं स्वस्मिन्निमान् कुम्भीनसान् सहसे!
अये चन्दनतरो! सैषा धृतिस्ते वन्दनीयास्ते। ॥३९॥

अये पञ्चानन! त्वां कुक्कुरोऽयं प्रत्यहं निन्दति।
सहानेन त्वदीया मित्रता किं वन्दनीयास्ते? ॥४०॥

क्वचेर्व्याजोक्तिरन्योक्तिः स्वभावोक्तिश्च वक्रोक्तिः।
अनुक्त्वा किञ्चिदपि सर्वं भणन्ती वन्दनीयास्ते॥ ॥४१॥

जना देशस्य रक्षार्थं तथा विश्वस्य कुशलार्थम्।
यतन्ते ये न निजकृत्यैः, कथय किं वन्दनीयास्ते? ॥४२॥

नरा नार्योऽबलाः सबलाः कनिष्ठा मध्यमा ज्येष्ठाः।
स्वदेशंये न वन्दन्ते मताः किं वन्दनीयास्ते? ॥४३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वदेशं निन्दयन्तो विश्वबन्धुत्वस्य वक्तारः।
फलं काङ्क्षन्ति ये मूलं विना, नो वन्दनीयास्ते! ॥४४॥

यजन्ते ये विधानोक्तैः स्वकर्मभिरात्मजन्मभुवम्।
नराः कुत्रापि निवसन्तो न केषां वन्दनीयास्ते? ॥४५॥

बुधा वीराः कृषाणाः कार्मिका उद्योगिनः कवयः।
कालाकाराः स्वदेशोन्नायका ये वन्दनीयास्ते। ॥४६॥

निबद्धास्ताडिता निहता तथा विकलाङ्गतां याताः।
जना ये देशरक्षार्थं, न केषां वन्दनीयास्ते? ॥४७॥

जना ये मातृभूमेर्वन्दनार्थं वन्दिनो जाताः।
स्मितास्याः कालपाशं ये चुचुम्बुर्वन्दनीयास्ते! ॥४८॥

अये मे मातृभूमे! ते महिम्नो रक्षणार्थं ये।
बलिं चक्रुः स्वसर्वस्वं, न केषां वन्दनीयास्ते? ॥४९॥

जननि! ये त्वां नराः क्षतविक्षतां कर्तुं समीहन्ते।
कृतघ्नाः कस्य वा पापीयसो वद वन्दनीयास्ते? ॥५०॥

अयं स्वातन्त्र्यसहकारः सदा सफलः समृद्धः स्यात्!
स्वरक्तैः सेचितोऽयं यैर्न केषां वन्दनीयास्ते? ॥५१॥

रमाकान्त! व्यथां देशस्य विश्वस्याथ निजकृत्यैः।
जना ये वर्धयन्ति प्रत्यहं किं वन्दनीयास्ते? ॥५२॥

न शब्दो नैव चार्थो न ध्वनिर्नैवास्त्वलङ्कारः।
तथापीयं कवे! कविता त्वदीया वन्दनीयास्ते! ॥५३॥

(रचनापूर्तितिथिः १४.१.१९९३ ई.)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मदीयकविते! कुरुष्व गानम्

(मेरी कविते! गीत गा)

सरस्वतीपादपद्मसेवा यदीयमास्ते परं हि लक्ष्यम्।
बुधाग्रगाणामतन्द्रितानां मदीयकविते! कुरुष्व गानम्॥१॥

कदापि वागर्थनाम येषां प्रयुक्तमस्त्रं वृथा न हि स्यात्।
अलोकसामान्यसत्कवीनां मदीयकविते! कुरुष्व गानम्॥२॥

स्वरश्रुतिग्रामरागबन्धै- रपूर्वसृष्टेः सुसर्जकाणाम्।
शुभाय सङ्गीतसाधकानां मदीयकविते! कुरुष्व गानम्॥३॥

मृदाश्मना काष्ठखण्डकैर्वा सृजन्ति ये नूतनां स्वजगतीम्।
यशस्विनां शिल्पिनां हि तेषां मदीयकविते! कुरुष्व गानम्॥४॥

सुखं धनं स्नेहबन्धनानि स्वदेशसौख्याय ये त्यजन्ति।
हुतात्मनां नित्यमेव तेषां मदीयकविते! कुरुष्व गानम्॥५॥

परोपकारव्रतं पवित्रं सदैव ये पालयन्ति हृष्टाः।
सुपूजितानां नृणां हि तेषां मदीयकविते! कुरुष्व गानम्॥६॥

निजोपदेशैर्मनोऽन्धकारं विधूय ये शिष्यसन्ततीनाम्।
जयन्ति, तेषां मुदा गुरूणां मदीयकविते! कुरुष्व गानम्॥७॥

स्वतन्त्रतायज्ञदीक्षितानां चिराय कारासु पीडितानाम्।
मृतिंवराणां नरोत्तमानां मदीयकविते! कुरुष्व गानम्॥८॥

रिपोः करान्मोचयाम्बभूवुः स्वमातरं भारतावनिं ये।
विशिष्य तेषां नृणां समेषां मदीयकविते! कुरुष्व गानम्॥९॥

मनुष्यतां रक्षितुं स्वयत्नै- रनुक्षणं शोधतत्पराणाम्।
प्रबुद्धवैज्ञानिकव्रजाणां मदीयकविते! कुरुष्व गानम्॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सहर्षस्त्रशीर्षं सहस्त्रहस्तं सहस्त्रपादं जनं भजन्तः।
समुद्यमा ये लसन्ति तेषां मदीयकविते! कुरुष्व गानम्।।११।।

विषह्य शीतोष्णवर्षकष्ट- प्रकोपमप्यन्नदायकानाम्।
तपस्विनां क्षेत्रकर्षकाणां मदीयकविते! कुरुष्व गानम्।।१२।।

उदन्वदाकाशपर्वतेषु स्वदेशरक्षाव्रतस्थितानाम्।
रणोद्भटानां मुदा भटानां मदीयकविते! कुरुष्व गानम्।।१३।।

विभिन्नखेलासु कीर्तिमानैः स्वदेशसम्मानवर्धकाणाम्।
जितेन्द्रियाणां प्रशस्ययूनां मदीयकविते! कुरुष्व गानम्।।१४।।

प्रसन्नवक्त्राः सदासते ये दरिद्रतायामपि प्रकामम्।
विशिष्य तेषां श्रमव्रतानां मदीयकविते! कुरुष्व गानम्।।१५।।

स्वकीयचरितैर्मनस्सु पित्रोः प्रकामसन्तोषदायका ये।
सुता जगद्भूषणानि, तेषां मदीयकविते! कुरुष्व गानम्।।१६।।

असज्जनानां कुनायकानां कृतघ्न - दुर्वृत्त - वञ्चकानाम्।
विहाय चर्चां, मनस्विनां त्वं मदीयकविते! कुरुष्व गानम्।।१७।।

सदा प्रजातन्त्ररक्षकाणां स्वकार्यनिर्वाहतत्पराणाम्।
प्रदर्शकाणां सृतेरभीते- मदीयकविते! कुरुष्व गानम्।।१८।।

स्वपाणिपल्लवमुदारकल्पं न कुत्रचिद् ये प्रसारयन्ति।
नृणां सदायाचितव्रताणां मदीयकविते! कुरुष्व गानम्।।१९।।

कुरीतयो वा कुनीतयो वा जगत्यनिष्टं प्रपूरयन्त्यः।
विलोपिता यैः, सभक्ति तेषां मदीयकविते! कुरुष्व गानम्।।२०।।

स्वकीयवर्णं स्वरं भविष्णुं विधातुकामासि? तर्हि नूनम्।
तपोधनानां जगद्गुरूणां मदीयकविते! कुरुष्व गानम्।।२१।।

CC-0. Padma Shri Rama Kant Shukla Collection at Devavani Parishad, Uttam Nagar, New Delhi.

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'सदैव सर्वे भवन्तु सुखिनः सदैव सर्वे निरामयाः स्युः।'
मनोरथस्यास्य पोषकाणां मदीयकविते! कुरुष्व गानम्॥२२॥

कुटुम्बमेकं जगद्विधातुं जनाः सदा ये प्रयत्नशीलाः।
प्रहृष्य तेषां महात्मनां त्वं मदीयकविते! कुरुष्व गानम्॥२३॥

यदीच्छसि त्वं जनिं स्वकीयां सदर्थितां कर्तुमार्यशीले!
तदा महिम्नां स्वमातृभूमे- र्मदीयकविते! कुरुष्व गानम्॥२४॥

अमन्दमानन्दमाप्तुकामा परेशलीलाब्धिमौक्तिकानाम्।
कदाचिदेकान्तवासमाप्ता मदीयकविते! कुरुष्व गानम्॥२५॥

(रचनातिथिः २६-१२-१९९३)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारतस्य विजयोऽयम्

(यह भारत की विजय है)

"क्रुद्धं हिंसाबलं जितं किल सत्याहिंसाबलतः।
आङ्ग्लशासनं खलूच्चाटितं भारतस्य विजयोऽयम्॥१॥

पञ्चषष्टितम (१९६५) वर्षेऽस्माकं पश्चिमोत्तरे वीराः।
पदचर्यया गता लाहौरं, भारतस्य विजयोऽयम्॥२॥

एकसप्ततौ दिसम्बरे किलं नवतिसहस्त्रं पाकाः।
बद्धा निरागसां हन्तारो, भारतस्य विजयोऽयम्॥३॥

वारद्वयं पोखरणगर्भे ह्यणुविस्फोटपरीक्षा।
स्वीयसाधनैः सफला जाता, भारतस्य विजयोऽयम्॥४॥

अग्निनागप्रभृतीन्यस्त्राणि प्रोद्भासन्तेऽस्माकम्।
तर्जयन्ति वैरिणः प्रतिपलं, भारतस्य विजयोऽयम्॥५॥

अवतारिता युद्धपोताः सागरवक्षसि सोत्साहम्।
आत्मरक्षणं विदधति वीराः, भारतस्य विजयोऽयम्॥६॥

मा चिन्तां कुरु रमाकान्त! सागरे वियति भूपृष्ठे।
निस्तन्द्रा जाग्रति वीरास्ते, भारतस्य विजयोऽयम्'॥७॥

'द्रासबटालिककसरमश्कोभागा अस्मद्वीरैः।
यथा रक्षिता शत्रोर्हस्तात्, भारतस्य विजयोऽयम्॥८॥

भातृभूमिरक्षार्थं वीराः वीरगतिं लब्ध्वा यत्।
रविमण्डलभेदनं चक्रिरे भारतस्य विजयोऽयम्॥९॥

वायुसैनिका धरासैनिका सन्नायका भटानाम्।
स्थास्यन्तीमे सदा प्रणम्या भारतस्य विजयोऽयम्॥१०॥"

CC-0. Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar, New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

"भ्रातश्चिन्तां नो कुर्वेऽहं किन्तु कामयेऽप्यन्यत्।
पश्य कीदृशो मया काम्यते भारतस्य विजयोऽयम्॥११॥

भ्रष्टाचारो महार्घता आतङ्कवाद उत्कोचः।
निर्धनता यदि पराजिताः स्युर्भारतस्य विजयोऽयम्॥१२॥

वृत्तिहीनता विघटनवृत्तिर्जनतामूढीकारः।
जिताः पूर्णतो यदि, पूर्णः स्याद्भारतस्य विजयोऽयम्॥१३॥

यदि च विदूषकनिभा नायका जनतां नो लुण्ठेयुः।
धर्मजातिभाषाविभेदतो भारतस्य विजयोऽयम्॥१४॥

बाह्यमान्तरं प्रदूषणं नो नागरिकान् बाधेत।
अभयं यदि तेषां हृदि विलसेद्भारतस्य विजयोऽयम्॥१५॥

शिक्षा स्वास्थ्यं क्रीडाभ्यासो देशभक्तिरविचलिता।
सम्पूर्णेषु जनेषु भवेद्यदि भारतस्य विजयोऽयम्॥१६॥

क्षेत्रेषु स्यात्सस्यबहुलता कारक्षेषूत्पादः।
प्रतिहस्तं स्याद्वृत्तियुक्तता, भारतस्य विजयोऽयम्॥१७॥

पठतु जनो यां कामपि भाषां किन्तु राष्ट्रभाषां प्रति।
नैवोपेक्षां यदा धारयेत्, भारतस्य विजयोऽयम्॥१८॥

विज्ञानं साहित्यं वाणिज्यं कृषिशिल्पोद्योगाः।
आध्यात्म्यं कलाश्च जृम्भन्ताम्, भारतस्य विजयोऽयम्॥१९॥

वेषभूषयोपासनपद्धत्याशनेन संस्कारैः।
भिन्ना अप्येकतां भजेयुर्भारतस्य विजयोऽयम्॥२०॥

स्वतन्त्रतां यः कामयते सम्पूर्णजगद्देशानाम्।
सदा वर्धताम् सदा राजताम् भारतस्य विजयोऽयम्॥२१॥

(रचनातिथिः १६-१२-१९९८, ८-१० पद्यानि ४.७.१९९९)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

लोकतन्त्रेऽस्मिन्

(इस लोकतन्त्र में)

अकल्प्यं किं न घटते, भावगम्ये लोकतन्त्रेऽस्मिन्।
भवति किं, किं भविष्यति वा, न जाने लोकतन्त्रेऽस्मिन्॥१॥

महामात्यत्रयं दृष्टम्, मुहुर्निर्वाचनं घुष्टम्।
अहो स्वातन्त्र्यहेमाब्दे, किमेतल्लोकतन्त्रेऽस्मिन्॥२॥

मयूरव्यालशालूराः, स्वकीयं काङ्क्षितं लब्धुम्।
स्थिता एकत्र गतवैरा, महिष्ठे लोकतन्त्रेऽस्मिन्॥३॥

विडाला मूषकैस्साकं, वृका हरिणैस्समं मैत्रीम्।
प्रकुर्वाणा विलोक्यन्ते, पदार्थं लोकतन्त्रेऽस्मिन्॥४॥

समीहितसिद्धये श्लिष्टाः, सुताः कुन्त्याश्च गान्धार्याः।
महाभारतकथेयं, काप्यपूर्वा लोकतन्त्रेऽस्मिन्॥५॥

अहो हैयङ्गवीनं सख्यमिच्छत्यग्निना साकम्।
कदल्या मित्रता दृष्टा, बदर्या लोकतन्त्रेऽस्मिन्॥६॥

इमे काका उलूकैः सार्धमिच्छन्ति स्वसम्बन्धम्।
तितउना वारिमैत्रीं पश्य, बन्धो! लोकतन्त्रेऽस्मिन्॥७॥

तमस्तेजश्च मित्रे स्तः, हयानां सैरिभैः सख्यम्।
अजव्याघ्रौ सखायौ स्तः, प्रकृष्टे लोकतन्त्रेऽस्मिन्॥८॥

विधुन्तुदचन्द्रयोः प्रीतिः, पयोजम्बीरयोः प्रीतिः।
अजानां कौटिकैः प्रीतिर्विलोक्या लोकतन्त्रेऽस्मिन्॥९॥

तमस्तेजो दिनं रात्रिः, सुधा विषमन्धता दृष्टिः।
अहो पर्यायतां प्राप्ता, विरुद्धा लोकतन्त्रेऽस्मिन्॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शृणुध्वं रे सुबद्धं, भक्ष्यभक्षकसख्यमिह लोके।
विपत्तेः कारणं नास्ते, सुपूज्ये लोकतन्त्रेऽस्मिन्॥११॥

अयं योऽस्त्यस्मदाशानां, प्रतीकः प्रतिनिधिः सदने।
स आशामस्मदीयां, पूरयति नो लोकतन्त्रेऽस्मिन्॥१२॥

किमपि कर्तुं तथाऽकर्तुं, तथा चैवान्यथा कर्तुम्।
विदूषकसन्निभो नेता, प्रभुर्वै लोकतन्त्रेऽस्मिन्॥१३॥

मतं यल्लोकतन्त्रं, शासनं नृणां नृभिर्नृभ्यः।
विलीनं तत्क्व सञ्जातं, प्रचण्डे लोकतन्त्रेऽस्मिन्॥१४॥

क्वचिच्चास्त्रीभवति सदने, ध्वनेर्विस्तारकं यन्त्रम्।
सदस्याः कान्दिशीका हन्त!, दृष्टा लोकतन्त्रेऽस्मिन्॥१५॥

अहो! युद्धाजिरं जातं, सभाभवनं तु नेतृणाम्।
विधायक एव पण्याश्वीभवति हा! लोकतन्त्रेऽस्मिन्॥१६॥

कदाचिद्धावनं दलतः, कदाचिन्नूत्नदलघटनम्।
कदाप्यपवञ्चनाकाण्डं, विलोकय लोकतन्त्रेऽस्मिन्॥१७॥

करौ बद्ध्वा मुखे दत्वा, तृणं नत्वा शिरः स्वीयम्।
वृकाः काङ्क्षन्ति मेषाणां, मतं बत लोकतन्त्रेऽस्मिन्॥१८॥

क्षणे रोषः क्षणे तोषः, क्षणे त्यागः क्षणे ग्रहणम्।
क्षणे निन्दा क्षणे स्तुतयो, मतार्थं लोकतन्त्रेऽस्मिन्॥१९॥

न कश्चित्कस्यचिन्मित्रं, न कश्चित्कस्यचिच्छत्रुः।
मतार्थं शात्रवं मैत्री, भवति भो! लोकतन्त्रेऽस्मिन्॥२०॥

क्वचिद्दानी क्वचिद्भिक्षुः, क्वचिच्छिष्टः क्वचिद्धृष्टः।
क्वचिद् ह्रीणोऽथ निर्लज्जो, मतार्थी लोकतन्त्रेऽस्मिन्॥२१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जनैर्दत्तं मतं यस्मै, प्रतार्यास्तेन ते जाताः।
स्वतन्त्रं भारतं किं किं, न पश्यति लोकतन्त्रेऽस्मिन्॥२२॥

अहो जनताजनार्दनपूजनं यस्यास्ति कर्तव्यम्।
स नेता वञ्चनं कुरुते, जनानां लोकतन्त्रेऽस्मिन्॥२३॥

अये म्याऊंकरोत्येषा, कथं मामेव मार्जारी।
मदीया पालिता यास्ते, कृतघ्ना लोकतन्त्रेऽस्मिन्॥२४॥

कलासाहित्यसङ्गीतप्रहीणो ना तृणं खादति।
पशूनां भागधेयं यद्, हरे! शृणु लोकतन्त्रेऽस्मिन्॥२५॥

वहन्तः स्वं ध्वजं चिह्नं, करौ बद्ध्वा मतं लब्धुम्।
वनीयक-कर्मनिष्णाता, भ्रमन्ते लोकतन्त्रेऽस्मिन्॥२६॥

कथं बन्धो मतं दास्यसि, भयं त्यक्त्वा स्वके क्षेत्रे।
वृतः पाटच्चरैर्मतदानकेन्द्रे लोकतन्त्रेऽस्मिन्॥२७॥

विकासोऽप्यद्भुतो जातोऽ विनाशोऽप्यद्भुतो जातः।
प्रकाण्डा काण्डसन्ततिरीक्ष्यते बत लोकतन्त्रेऽस्मिन्॥२८॥

अयोग्याः प्रोन्नतिं प्राप्ताः, सुयोग्या अवनतिं नीताः।
सतामपवञ्चनं प्रायो, विलोक्यं लोकतन्त्रेऽस्मिन्॥२९॥

कथं भो मन्यसे देशं, धनं पित्र्यं विभज्याद्यम्।
त्वया नेतः! कृता का वास्य, सेवा लोकतन्त्रेऽस्मिन्॥३०॥

मनस्यन्यद् वचस्यन्यत्, तथान्यत्कर्मणि स्वीये।
दधानः प्रायशो लोकस्य, नेता लोकतन्त्रेऽस्मिन्॥३१॥

कुतो निजसंस्कृतेश्चिन्ता, कुतो देशस्य वा चिन्ता।
पदस्थाश्चिन्तयन्ति स्वां, समृद्धिं लोकतन्त्रेऽस्मिन्॥३२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विदूषककर्म कुर्वाणा, जनान् ये वञ्चयन्त्यनिशम्।
त एवाद्यासते मान्यास्तथाप्ता लोकतन्त्रेऽस्मिन्॥३३॥

'जयो मे दक्षिणे हस्ते, जयो मे वामहस्ते च।'
दलं हित्वा भणति चतुरः, प्रवीरो लोकतन्त्रेऽस्मिन्॥३४॥

सरस्वत्या मरालो, लुञ्च्यते लक्ष्म्या उलूकेन।
पिका मौनं भजन्ते, काकभीता लोकतन्त्रेऽस्मिन्॥३५॥

बलात्कारा नृहत्या, बम्बविस्फोटास्तथा दाहाः।
अहो दैनन्दिनी वार्ताऽस्मदीये लोकतन्त्रेऽस्मिन्॥३६॥

इयं देवी प्रतारण-चातुरी, भ्रष्टावने दक्षा।
मता नृपनीतिसञ्ज्ञा, वन्दनीया लोकतन्त्रेऽस्मिन्॥३७॥

पुनस्ते मे मतं काङ्क्षन्ति, यैरेवास्मि परिमुषितः।
अहो! निर्लज्जतेयं कीदृशी, ननु लोकतन्त्रेऽस्मिन्॥३८॥

मतं मे काङ्क्षमाणा ये, पुनर्मे द्वारि सम्प्राप्ताः।
कथं तेषां प्रियं कुर्याम्, न जाने लोकतन्त्रेऽस्मिन्॥३९॥

शकाराणां विकारा, जृम्भमाणा नित्यमीक्ष्यन्ते।
विपन्नाश्चारुदत्ताः, किञ्च धूता लोकतन्त्रेऽस्मिन्॥४०॥

महर्घत्वं निधायाङ्के, सरत्यग्रे नवं वर्षम्।
शुभेच्छा मामकीनाः स्युर्भवद्भ्यो लोकतन्त्रेऽस्मिन्॥४१॥

कटूक्तीः प्रत्यहं कुर्वे, समीक्षाः प्रत्यहं कुर्वे।
न रिङ्गति कस्यचित्कर्णेऽपि यूका लोकतन्त्रेऽस्मिन्॥४२॥

महाकाव्यान्यपेक्ष्यन्ते, यदीयं सद्यशो गातुम्।
मदीयैः सीमितैः शब्दैर्भवति किं लोकतन्त्रेऽस्मिन्॥४३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रसिद्धिं लम्भिताः खलनायकाः खलु नायकत्वेन।
विपर्ययमीदृशं त्वं, पश्य बन्धो! लोकतन्त्रेऽस्मिन्॥४४॥

इदं दाहात्मकं तेजः, सुगूढं यन्नृणामन्तः।
मदान्धाः! किं न पश्यत रे? वदत भो लोकतन्त्रेऽस्मिन्॥४५॥

(रचनातिथिः २०.१.१९९८)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

किं कुर्यात् (१)

(क्या करे!) (१)

कृते यत्नेऽपि नो सिद्धिर्भवति चेत्कोऽत्र किं कुर्यात्।
विरुद्धे भागधेये कर्म कुर्वाणोऽपि किं कुर्यात्?॥१॥

'विलिण्टाइन' दिने छात्राः कुसुमहस्ता गताः पार्के।
वराकोऽध्यापको गत्वापि कक्षे ब्रूहि किं कुर्यात्॥२॥

गृहादचलं भवन्तं द्रष्टुकामोऽहं यथाकालम्।
परं मार्गेऽमिलज्जामो विलम्बे कोऽत्र किं कुर्यात्॥३॥

गृहाच्चलितः समयतोऽहं परं मध्येपथं रुद्धः।
'विलम्बादागतोऽस्मी'ति क्षमायाच्चापि किं कुर्यात्॥४॥

उपस्थितिपञ्जिकास्ते द्वारि चारक्षी लगुडहस्तः।
तथापि त्वं त्वदीयैस्ताड्यसे चेत्कोऽत्र किं कुर्यात्॥५॥

भवति साक्षात्कृतिर्विद्यागृहे त्वं चोत्तमश्रेणिः।
न पूर्वेद्युस्त्वया दृष्टो विशेषज्ञोऽपि किं कुर्यात्॥६॥

श्रुतो धर्मः, कृता सन्ध्या, श्रिते चाभ्यासवैराग्ये।
जहाति च नैव चाञ्चल्यं मनः किल कोऽत्र किं कुर्यात्॥७॥

अहं यां चिन्तयाम्यनिशं विना यां नो लभे निद्राम्।
न सा दूरध्वनौ सुलभा, जनोऽयं मित्र! किं कुर्यात्॥८॥

प्रिया भार्या त्वमसि, वदसि प्रियं प्रियमण्डने, पत्यै।
न चेत्समयेऽशनं दत्से पतिस्ते ब्रूहि किं कुर्यात्॥९॥

त्वया विषभक्षणं कृत्वा कृतायामात्महत्यायाम्।
प्रियस्त्वां नैति चेद् द्रष्टुं तवेदं कर्म किं कुर्यात्॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वधूः श्वसुरालयादपमानिता गच्छति पितुर्गेहे।
पितुर्गेहेऽपि नो सौख्यं भजति चेत्सात्र किं कुर्यात्?॥११॥

महामात्योऽटलोऽध्यक्षो मुशर्रफ् चागरानगरे।
शिखरवार्तावसाने निष्फलौ! कः कोऽत्र किं कुर्यात्?॥१२॥

'मृतो वा जीवितो वापेक्ष्यते न्यायाय लादेनः।'
प्रतिज्ञायापि नो लभते बुशस्तं चेत्स किं कुर्यात्!॥१३॥

कृते विविधे प्रपञ्चेऽपि प्रकामं बहुमतं नाप्तम्।
इदानीं वञ्चनाचुञ्चुर्दलाध्यक्षोऽपि किं कुर्यात्!॥१४॥

इमे प्रतिपक्षिणो भूत्वा समायाता वृकाः सदने।
परं तत्रैकतां प्राप्ता ऋजुर्मेषोऽत्र किं कुर्यात्!॥१५॥

इमे बहुनायका रथिनो रथं विमता यदारूढाः।
निनीषुस्तं प्रमुखसारथिरयं विवशो नु किं कुर्यात्?॥१६॥

मतं दत्तं त्वया किल यत्तु तद्युक्तं परं भ्रातः।
ददासि न चेत्त्वमुत्कोचं तदा नेतापि किं कुर्यात्?॥१७॥

अरण्ये रोदनं कुरुषे बधिरकर्णे जपसि बन्धो!
पठितवानसि बहून् ग्रन्थान्, त्वदर्थं कोऽपि किं कुर्यात्!॥१८॥

गृहीत्वा पाटलं पुष्पं वसन्तो द्वारि सम्प्राप्तः।
मनसि किल पत्रशातनमस्ति, मधुमासोऽत्र किं कुर्यात्!॥१९॥

कवी रात्रौ लिखति कवितामरकोशं मुहुः पश्यन्।
न च श्रोतास्य शृणुते पद्यबन्धं सोऽत्र किं कुर्यात्!॥२०॥

कृते यत्नेऽपि मुद्रणदोषतो मुक्तिर्न यदि लभ्या।
तदाक्षरयोजकः सम्पादको वा मित्र! किं कुर्यात्!॥२१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अहं शस्त्रास्त्रसम्पन्नो भटः सीमासु तिष्ठामि।
न चादेशं लभे युद्धस्य, शौर्यं मेऽत्र किं कुर्यात्?॥२२॥

मदीयौ द्वौ सखायौ हस्तमेलनमद्य नो कुरुतः।
तयोर्मैत्रीं दिदृक्षुश्चेज्जनोऽयं ब्रूहि किं कुर्यात्?॥२३॥

ययोरशनं कुलं शीलं तथा कर्माणि भिद्यन्ते।
तयोर्मैत्रीं विवाहं चेच्छसि त्वं? कोऽत्र किं कुर्यात्॥२४॥

स्वराष्ट्रस्य प्रगतिमिच्छन्ति कवयोऽध्यापका वीराः।
भटा उद्योगिनः श्रमिणः, कुनेता किन्तु किं कुर्यात्!॥२५॥

यदास्माभिश्चिताः प्रभवो मलीमसकर्म कुर्वाणाः।
मुहुर्गायन् 'स्वभारतभां' रमाकान्तोऽपि किं कुर्यात्॥२६॥

(रचनातिथिः १६.२.२००२)

किं कुर्यात्! (२)
(क्या करे कोई!)

न विद्युन्नो हसन्ती भामिनी नापि प्रिया पार्श्वे।
तुषारेऽयं जनः शून्ये च तापे मित्र! किं कुर्यात्॥१॥

'मयेयं चालिता मेट्रो-सुगन्त्री जनमनोहर्त्री।
हसति नेतुर्वचः श्रुत्वा जनो, नेताऽत्र किं कुर्यात्॥२॥

न युद्धं नापि शान्तिर्नैव मैत्री नापि शत्रुत्वम्।
न संवादो न मौनं चावयोः कः कोऽत्र किं कुर्यात्॥३॥

अहो ग्रीष्मे न पेयं शीतलं त्वयका सुलभ्येत।
न चोष्णं भोजनं शिशिरे धनं ते ब्रूहि किं कुर्यात्॥४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

त्वया नेतृब्रुवाः संसेविताः स्वीयाध्ययनकाले।
तृतीयश्रेणिमापन्नस्य ते वद कोऽत्र किं कुर्यात्॥५॥

न शौचं नापि चाचारो न सत्यं येषु विद्येत।
सखे! तेषां सपर्या मे व्रतम्, मे कोऽपि किं कुर्यात्॥६॥

इदं निर्वाचनं प्राप्तं पुनष्टिकटेच्छवोऽद्यत्वे।
दलाद्दलमाविशन्त्येते, अमीषां कोऽत्र किं कुर्यात्॥७॥

'धनाद्धर्मं ततः सुख' मित्ययं सिद्धान्त उच्छिन्नः।
'धनाट्टिकटं ततः सत्ता' धुना मे कोऽपि किं कुर्यात्॥८॥

अयं सद्दाम आस्ते पञ्जरे बद्धो यथा सिंहः।
प्रवर्धन्तेऽस्य रिपवो तांश्च पश्यन्नेष किं कुर्यात्॥९॥

सदा यो वर्धयन्नातंकवादं शासनं ह्यकरोत्।
शरव्यः सोऽद्य जातस्तस्य रोदिति, कोऽस्य किं कुर्यात्॥१०॥

(रचनातिथिः १७.१.२००३, १४.१.२००४)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यानावरोधो दुस्त्यजः, शकटावरोधो दुरत्यजः

(जाम लाज़मी है)

लाजवन्तीगार्डनं स्यात्स्यादथो धौलाकुआँ।
स्याच्च वा मायापुरी यानावरोधो दुस्त्यजः॥१॥
शकटावरोधो दुस्त्यजः॥

आइ.टी.ओ. स्यादथो शाहेदरा वाथो भवेत्।
शक्तिनगरं वा भवेन् यानावरोधो दुस्त्यजः॥२॥

कारारूढो वा भवेत् स्कूटरसुरूढो वा भवेत्।
स्याच्च वा वाहनपटुः, यानावरोधो दुस्त्यजः॥३॥

जनपथो वा स्यादथो राज्ञां पथो वा स्यादयम्।
अस्तु सी.पी. चक्रकं यानावरोधो दुस्त्यजः॥४॥

भानुजासेतुर्भवेद्वा नौइडामार्गोऽथवा।
मालचामार्गोऽथवा यानावरोधो दुस्त्यजः॥५॥

रा.म.लो. चक्रं भवतु वा स्यादथोऽप्याश्रमधरा।
स्याच्च दिल्लीस्टेशनं यानावरोधो दुस्त्यजः॥६॥

रक्तचापचिकित्सया को लाभ आस्ते मित्र ते।
लभ्यते स्वप्नेऽपि यदि यानावरोधो दुस्त्यजः॥७॥

मेटरोमार्गेषु भवताद्वा न वा जामस्थितिः।
किन्तु पर्वतगंजके यानावरोधो दुस्त्यजः॥

ब्रूहि गत्वा प्रेयसीं त्वं क्रोधरक्तेक्षणमुखीम्।
'मां क्षमस्व विलम्बिनं यानावरोधो दुस्त्यजः॥८॥

भोः प्रियामिलनोत्सुका नीत्वा करे चलभाषकम्।
सत्वरं पद्भ्यां ब्रजत, यानावराधो दुस्त्यजः॥९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

साम्प्रतं निश्चीयते मयका विना भ्रान्तिं सखे।
यामि पदभ्यामेव यदि यानावरोधो दुस्त्यजः॥१०॥

(रचनातिथिः १५.१.२००४)

निर्वाचने प्राप्ते (१)

(चुनाव आने पर)

अपूर्वं पश्य दृश्यं हे सखे निर्वाचने प्राप्ते।
सहजशत्रुः परं मित्रं भवति निर्वाचने प्राप्ते॥१॥

विरुद्धानां सुमैत्री जायते निर्वाचने प्राप्ते।
समीकरणं नवं नूत्नं भवति निर्वाचने प्राप्ते॥२॥

नमुचिशक्रौ तथा सुन्दोपसुन्दौ वज्रभूमिधरौ।
अजाकण्ठीरवौ सुहृदौ सखे! निर्वाचने प्राप्ते॥३॥

मयूरव्यालशालूरा गले लग्नाः प्रसीदन्ति।
समेषां लाभ आयत्यां ध्रुवो निर्वाचने प्राप्ते॥४॥

'न वैरं शाम्यते वैरेण' 'मैत्री सन्नृणां पुण्या'।
भवति सत्त्वावतरणं मानसे निर्वाचने प्राप्ते॥५॥

इयं जनतास्ति पाञ्चाली विवस्त्रैषा भवेन्नूनम्।
अतो दुःशासना ऐक्यं गता निर्वाचने प्राप्ते॥६॥

अहं गोमायुरस्मि त्वं च गृध्रो दूरदृष्टिरसि।
अयं भक्ष्योऽस्ति बालो नः सखे निर्वाचने प्राप्ते॥७॥

सदा वातानुकूलितसौधभवनैः परिचिताः सर्वे।
वयं मार्गे भ्रमामो हे प्रभो! निर्वाचने प्राप्ते॥८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अये कवयः! कुरुध्वं काव्यमिह किन्तु क्षमध्वं नः।
वयं वै व्यापृता मतयाचने निर्वाचने प्राप्ते॥९॥

इमे दर्शकसमूहाः लोभनीया नूनमस्माभिः।
वयं पारंगता नाट्ये सखे। निर्वाचने प्राप्ते॥१०॥

पशुभ्यो दीयतां किञ्चित्तृणं पूर्वं विना शंकाम्।
इम बलिकर्मयोग्या वै मखे निर्वाचने प्राप्ते॥११॥

निर्वाचने प्राप्ते (२)

(चुनाव आने पर)

चलच्चित्राभिनेतारोऽभिनेत्र्यो बहुमतं लब्धुं
दलाध्यक्षैः सबहुमानं सदस्यत्वेन गृह्यन्ते।
शिखण्डी भीष्मजयहेतो दलैरन्विष्यते यत्नात्
अघट्यं घटयितुं शक्यं सखे निर्वाचने प्राप्ते॥१॥

इमे श्याला असौ भ्राता पितृव्या मातुला एते
निशीथे कुर्वते सम्मिल्य सन्धिं ये सपीतिं वा।
त एवाहि प्रतारयितुं जनान् निजभाषणैर्धूर्ता
इमे परिपन्थिनो जाता सखे निर्वाचने प्राप्ते॥२॥

कदाचिद् ये सहजरिपवो ह्यभूवन् तेऽद्य सानन्दं
गले लग्नाः सहजमित्रत्वमाप्ता गद्गदायन्ते।
कथंकारं भवेदस्मज्जयो ध्रुवमित्यमुं स्वार्थं
प्रपूरयितुं भवति यत्नः परो निर्वाचने प्राप्ते॥३॥

इयं नेत्री पदारूढा जनान् पृच्छति सुखं दुःखम्
अयं नेता रथारूढः प्रयातो दिग्विजयकामः।
तयोल्का पातितानेनापि वज्रः पातितो वाग्भिः
अहो वाचां विलासो दृश्यते निर्वाचने प्राप्ते॥४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

न जाने को जितः स्यात्कोऽथवा विजितो भवेन्नेता
न जाने कः स्थितः स्याच्छासनासन्द्यां सुपुण्यात्मा।
इयं चिन्ता विधेया नैव सम्प्रति हे सखे! त्वयका
तवाधिकृतिस्तु कर्मणि नो फले निर्वाचने प्राप्ते॥५॥

(रचनातिथिः १३.३.२००४)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आक्रमणं कुरु

—डॉ. रमाकान्तशुक्लः

उत्तिष्ठ वीर भारत सत्वर -
मातंकवादराक्षसवधाय ।
हन्तरि निर्दोषजनानां त्वम्
आक्रमणं कुरु, आक्रमणं कुरु॥१॥

येनोर्याक्रमणव्याजेना -
मन्त्रितमास्ते निजदौर्भाग्यम्।
अविलम्बं निर्लज्जे तस्मिन्
आक्रमणं कुरु, आक्रमणं कुरु॥२॥

इदमुर्याक्रमणस्यामन्त्रण -
मास्ते तव रणप्रयाणार्थम्।
दण्डनं दण्डनीयस्यास्ताम्
आक्रमणं कुरु, आक्रमणं कुरु॥३॥

आक्रमणं न कुरु त्वं पूर्वम्
किन्त्वाक्रमणं त्वं नो सहस्व।
त्वययाऽक्रमणं जातं सम्प्रति
आक्रमणं कुरु, आक्रमणं कुरु॥४॥

ऋजुतां यो मनुते मूर्खत्वम्
मैत्रीप्रस्तावं दुर्बलताम्।
पातकिनि कृतघ्ने धृष्टेऽस्मिन्
आक्रमणं कुरु, आक्रमणं कुरु॥५॥

यः सारमेय इव सिंहे त्वयि
धृष्टतां प्रदर्श्य मनोमुग्धः।
तस्याहङ्कारनिरासार्थम्,
आक्रमणं कुरु, आक्रमणं कुरु॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वार्ताः सञ्जाताः बहुवारं
हस्तमेलनं बहुधा जातम्।
दुर्जनकृत्यं दृष्ट्वा तस्मिन्
आक्रमणं कुरु, आक्रमणं कुरु॥७॥

अलमलं हस्तमेलनैरलं
वार्ताभिरलं भाषणैरलम्।
अवशिष्टो नास्तेऽपर उपाय
आक्रमणं कुरु, आक्रमणं कुरु॥८॥

दुर्जन उपकारान्नो शाम्यति
प्रत्यपकारात्तस्य चिकित्सा।
प्रतिवेशिविषस्य विनाशार्थं
आक्रमणं कुरु, आक्रमणं कुरु॥९॥

आस्ते य आततायी स रिपु-
स्तत्संरक्षकोऽपि भवति रिपुः।
जृम्भस्व वीर रिपुनाशार्थम्
आक्रमणं कुरु, आक्रमणं कुरु॥१०॥

शिशुपालो गालीं दत्तवान्
शतमीं ते कृष्ण सभामध्ये।
अरिणारिमस्तकं पातय भुवि
आक्रमणं कुरु, आक्रमणं कुरु॥११॥

सेनाया मनोबलं रक्ष्यं
तस्याः सम्मानोऽथो रक्ष्यः।
आचर शठेषु शाठ्ययं धीमन्
आक्रमणं कुरु, आक्रमणं कुरु॥१२॥

शस्त्रेण रक्षिते राष्ट्र एव
जीवन्ति शास्त्रसाहित्यकलाः।
बलहीनाद्रिपवो नो बिभ्यति
आक्रमणं कुरु, आक्रमणं कुरु॥१३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

साहाय्यकारिणः शत्रूणाम्
आक्रामकशक्तिं सम्परीक्ष्य।
अवलम्बन्तेऽन्ते ताटस्थ्यम्
आक्रमणं कुरु, आक्रमणं कुरु॥१४॥

शोभते क्षमाऽथो कूटनीति-
रिह बलशालिने न निर्बलाय।
ख्यापय निजबलं प्रचण्डं त्वम्
आक्रमणं कुरु, आक्रमणं कुरु॥१५॥

सोढापमानततिरनेकधा,
दर्शितमातिथ्यं बहुवारम्।
मैत्रीप्रस्तावो वृथा कृतः
आक्रमणं कुरु, आक्रमणं कुरु॥१६॥

अपहृतं विमानं भटशिरांसि
छिन्नानि येन तस्मिन् दुष्टे।
प्रस्थानकोट-मुम्बइ-दोषिणि,
आक्रमणं कुरु, आक्रमणं कुरु॥१७॥

त्वं शान्तस्तिष्ठसि सम्प्रति यदि
कोटिशो जनानामपमानम्।
जागृहि जागृहि रे सुप्त सिंह
आक्रमणं कुरु, आक्रमणं कुरु॥१८॥

पूरितो घटः पापानां वै
नैव प्रमाणमधुनाऽपेक्ष्यम्।
अवलोक्य पुरो विजयादशमीम्
आक्रमणं कुरु, आक्रमणं कुरु॥१९॥

दुर्दृष्ट्या पश्येद्यदि राष्ट्रं
कुत्रापि कश्चिदप्यस्माकम्।
तत्कृते भव त्वं वज्रपात
आक्रमणं कुरु, आक्रमणं कुरु॥२०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ऋणशेषं रिपुशेषं पावक-
शेषञ्च न कुर्यादिति श्रुतिः।
मा त्वय्याक्रमणं रिपुः क्रियात्
त्वं पूर्वं तत्राक्रमणं कुरु॥२१॥

सत्याहिंसाकरुणामैत्री -
रक्षार्थमुपाया अवलम्ब्याः।
अनिवार्या चेद्धिंसालम्ब्या
आक्रमणं कुरु, आक्रमणं कुरु॥२२॥

सिन्धुजा बलोचाः स्वातन्त्र्यं
प्राप्नुयुराप्त्वा ते साहाय्यम्।
नाशय नाशय देशकण्टकान्
आक्रमणं कुरु, आक्रमणं कुरु॥२३॥

अग्नित्रिशूलनागादीनां -
द्रष्टुं शक्तिं क्षण उपस्थितः ।
शान्तिं स्थापय हत्वा शत्रून्
आक्रमणं कुरु, आक्रमणं कुरु॥२४॥

अस्त्र-प्रहार-तेजस्-सुखाइ -
ब्रह्मोसादीनां परिचयाय।
अवसर आस्ते समुपस्थितोऽयम्
आक्रमणं कुरु, आक्रमणं कुरु॥२५॥

अक्रमणं त्वया कृतं न पूर्व-
माक्रमणं त्वयि जातं सुधीर!
क्षमयालमस्तु दर्शय शौर्यम्
आक्रमणं कुरु, आक्रमणं कुरु॥२६॥

भारतस्य सर्वे नागरिकाः
नेतारः कृषकाः वीरभटाः।
सम्भूय कुरुध्वं सिंहनाद-
माक्रमणं कुरु, आक्रमणं कुरु॥२७॥

Padmashri Rama Kant Shukla Collection at Devavani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

छात्राः शिक्षकास्तथा श्रमिकाः,
वाणिज्योद्योगकृतोऽधिकृताः ।
सर्वे सम्भूय कुरुत हुंकृति -
माक्रमणं कुरु, आक्रमणं कुरु॥२८॥

बालकाः किशोराः अथ युवकाः
बालिकाः किशोर्यो युवतिगणाः।
प्रौढाः वृद्धाः सम्भूय वद-
न्त्वाक्रमणं कुरु, आक्रमणं कुरु॥२९॥

अधिवक्तारः कवयश्च नटाः
साहितीकलासङ्गीतकराः ।
सञ्चारमाध्यमीयाश्च वद -
न्त्वाक्रमणं कुरु, आक्रमणं कुरु॥३०॥

हे वैज्ञानिकाः शोधकाराः
दार्शनिकाः संन्यासिनः समे
कुरुतोच्चैःस्वरंण सिंहनाद-
माक्रमणं कुरु आक्रमणं कुरु॥३१॥

अभिनेतारः क्रीडकास्तथा
धार्मिकाः कार्मिकाः शिल्पकराः।
सर्वे सम्भूय संवदध्वम्
आक्रमणं कुरु आक्रमणं कुरु॥३२॥

मानवता जयिनी जगति स्यात्
दानवता क्षीणबला च भवेत्।
सर्वत्र सन्तु सर्वे सुखिनः
आक्रमणं कुरु, आक्रमणं कुरु॥३३॥

प्रथमं दृश्यान् शत्रूंस्त्वं जय
तदनु च गूढान् शत्रूंस्त्वं जय।
अन्तर्लीनेष्वपि रिपुषु त्वम्
आक्रमणं कुरु, आक्रमणं कुरु॥३४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पार्थिवाः जलीयास्तैजस्काः
वायव्या नभोगता रिपवः।
तव सन्तु विजेतव्या नूनम्
आक्रमणं कुरु, आक्रमणं कुरु॥३५॥

राष्ट्रस्वरेण यद् व्यक्तमस्ति
तन्मतमङ्गीकुरु आशु वीर!
निद्रां जागृहि, जहि आतंकिन-
माक्रमणं कुरु आक्रमणं कुरु॥३६॥

अशनाया वृत्तेर्न्यूनत्वं
दारिद्र्यं स्वास्थ्यहीनता च।
सर्वेऽपीमे रिपवस्तेष्वपि
आक्रमणं कुरु, आक्रमणं कुरु॥३७॥

अन्तरपि सन्ति बहिरपि च सन्ति
सर्वत्रात्मानं त्रासयन्ति।
तेषां समूलमुन्मूलनार्थ-
आक्रमणं कुरु, आक्रमणं कुरु॥३८॥

ज्ञानाभयसाम्यत्यागानाम् -
स्मृतिधृतिमेधानां रक्षार्थम् ।
एतद्विरुद्धरिपुनाशार्थम्,
आक्रमणं कुरु, आक्रमणं कुरु॥३९॥

दुर्जेयाः षड् रिपवो जेयाः
गूढप्रवेशिनो हन्तव्याः।
उपकृतिरक्षार्थं त्वमपकृतौ
आक्रमणं कुरु, आक्रमणं कुरु॥४०॥

अथवा किं बहुना रमाकान्त
उन्नमय्य भालं चिरञ्जीव।
विजयस्व रिपून् अव निजराष्ट्रम्
आक्रमणं कुरु, आक्रमणं कुरु॥४१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राष्ट्रस्वर एष समुद्घुष्टः
राष्ट्रस्वर एष श्रोतव्यः।
उच्चैः स्वरेण सर्वे वदन्तु
आक्रमणं कुरु आक्रमणं कुरु॥४२॥

रचनातिथिः-२३.९.२०१६

इयं रचना सर्वप्रथमं २३.९.२०१६ तमे दिनांके नोएडास्थे इण्टरनेशलन चैम्बर ऑफ मीडिया एण्ड एण्टरटैनमैण्ट इण्टस्ट्री एण्ड एशियन एकेडेमी ऑफ आर्ट' द्वारा समायोजिते द्वितीयग्लोबललिटरेरीफेस्टिबल इत्यत्र संस्कृतकविसम्मेलने पठिता॥

२९.९.२०१६तमे दिनांके दिल्लीस्थे पी.जी.डी.ए.बी (सान्ध्ये) महाविद्यालये श्राविता। तदनु १९.१०.२०१६तमे दिनांके लखीमपुर खीरी दशहरा संस्कृत कविसम्मेलने श्राविता।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शोभनं कृतम्

–डॉ. रमाकान्तशुक्लः

जय जय भारतभट! साधु साधु
शोभनं कृतं शोभनं कृतम्।
आतङ्कवादशाला ध्वस्ता
शोभनं कृतं शोभनं कृतम्॥

शल्यचिकित्साक्रमणं कृत्वा
कल्पनातीतकौशलं कृतम्।
आशीविषस्य दंष्ट्रोत्खाता
शोभनं कृतं शोभनं कृतम्॥

आतङ्कवाद-शिक्षण-शाला
ध्वस्ता निहता आतङ्किनश्च।
हेलया निशीथेऽस्मद्वीरैः
शोभनं कृतं शोभनं कृतम्॥

अष्टाविंशे सैतम्बरेऽह्नि
शास्त्रेन्दुखाक्षि(२०१६)वर्षे रात्रौ।
अस्मद्वीरैर्यत्कृतं तद्धि
शोभनं कृतं शोभनं कृतम्॥

कः कदा कुत्र वा कथं गतः
किं कर्तुमना इति न ज्ञातम्।
केनापि कार्यपूर्तेः पूर्वं
शोभनं कृतं शोभनं कृतम्॥

निर्दोषजना नो हता भटै-
स्तेषां सम्पत्तिर्नो ध्वस्ता।
आगस्कृत एव जना निहताः
शोभनं कृतं शोभनं कृतम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

परिणामानुमेयकार्या ये
भारतवीरास्तेऽस्मद्वन्द्याः।
आतङ्किनागनकुलैर्वीरैः,
शोभनं कृतं शोभनं कृतम्॥

सेनापराक्रमो जयत्यसौ
गरिमा देशस्यावितो येन।
सर्वे वदन्ति 'भारतवीरैः
शोभनं कृतं शोभनं कृतम्॥

ज्ञातं न मया त्वयका न तेन
ज्ञातं न केनचन किं ज्ञातम्।
विद्युद्गत्या सैनिकैर्जितं
शोभनं कृतं शोभनं कृतम्॥

कज्जललिप्तानन एषोऽस्मत्-
प्रतिवेशी किं ब्रवीतु संसदि।
निजकर्मफलास्वादं करोतु
भारतवीरैः शोभनं कृतम्॥

आयत्यामपि यद्यातङ्की
शान्तो न भवेद्दण्ड्योऽसौ स्याद्।
सेनयोद्घुष्य सुस्पष्टतया
शोभनं कृतं शोभनं कृतम्॥

भूधराकाशतोयेषु सदा
रक्षातत्परैः स्फूर्तवीरैः।
इतिहासं नूत्नं संविलिख्य
शोभनं कृतं शोभनं कृतम्॥

आतङ्कपोषको निजपरिषदि
आस्ते किंकर्तव्यविमूढः।
विक्रमं सैनिकैः स्वं प्रदर्श्य
शोभनं कृतं शोभनं कृतम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नेतारो रक्षत वाक्संयम-
मथ रक्षत भारतगरिमाणम्।
राष्ट्रस्वरेण सह वदत 'भटैः
शोभनं कृतं शोभनं कृतम्॥'

राष्ट्रस्वरेण काङ्क्षितं हि यत्
तत् पूरितमस्माद्वीरभटैः।
यैः स्थाने काले संविचार्य
शोभनं कृतं शोभनं कृतम्॥

(२९/०९/२०१६ तमे दिनाङ्के रात्रौ भारतीयसेनया कृतं शल्यचिकित्साक्रमणं (Surgical Strike) इत्यभियानं विज्ञाय प्रणीतेयं रचना)

रचनातिथिः - ०८/१०/२०१६

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दशमगुरुवरं नमामि

डॉ. रमाकान्त शुक्लः

सर्वं वंशं स्वकीयं बलिमकुरुत यो धर्मयज्ञस्य वह्नौ,
संख्ये चम्कौरसंज्ञे प्रकटितमतुलं येन शौर्यं च धैर्यम्।

प्रादाद् यो धर्ममार्गं सकलजनहितं खालसाख्यं पवित्रं,
तं श्रीगोविन्दसिंहं दशमगुरुवरं श्रद्धयाहं नमामि॥१॥

यस्याम्बा गूजरी देवी पिता तेगबहादुरः।
गोविन्दाय नमस्तस्मै सर्ववंशप्रदायिने॥२॥

दशमं गुरुमीडेऽहं धर्मरक्षार्थमागतम्।
पिता पुत्राश्च धीरेण येन धर्मार्थमर्पिताः॥३॥

सेनानी काव्यकर्ता च समाजस्य सुधारकः।
योऽन्यायस्य विरोधार्थं त्यक्तसर्वस्व आत्मवान्॥४॥

फतेहसिंहनामानं सिंहं जोरावरं तथा।
अपरावपि यः पुत्रौ धर्मरक्षार्थमार्पयत्॥५॥

बलिदानं पितुर्दृष्ट्वाप्यासीद्यो धर्ममार्गगः।
अन्यायोन्मूलनार्थं यः सदा जागरितोऽभवत्॥६॥

निर्बलान् बलिनः कृत्वा भीतान् कृत्वा तथाभयान्।
श्येनैः साकं खगा युद्धे योजिता येन सत्वरम्॥७॥

शुभकर्माणि कर्तुं यो देवीं वरमयाचत।
युद्धात्पलायनं यस्य मतं नासीत् सुधर्मिणः॥८॥

कवीनां सारसर्वस्वं ज्ञानभक्तिक्रियात्मकम्।
ग्रन्थं यो गुरुरूपेण शिष्येभ्यो दत्तवान् गुरुः॥९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीमद्गोविन्दसिंहस्य तस्य जन्ममहोत्सवे।
पञ्चाशदूर्ध्वत्रिदशते वर्ध्याप्यन्ते जना मया॥१०॥

रणे वीरगतिं प्राप्तान् सैनिकान् स्वसुतं च यः।
दृष्टवान् समया दृष्ट्या तस्मै स्युर्वन्दनानि नः॥११॥

शस्त्री शास्त्री च सेनानी धर्मरक्षाव्रती कृती।
साहित्यकर्ता यश्चासीत् तस्मै श्रीगुरवे नमः॥१२॥

विमुद्रीकरण-प्रश्नोत्तरम्

डॉ. रमाकान्त शुक्लः

कोपिनी प्रेयसी उवाच–

साहस्री पञ्चशती व्यवहारात्प्रच्युतास्ति यथा।
तद्वन्मच्चित्तादपि कितव! विमुद्रीकृतोऽसि त्वम्॥१॥

चाटुकारः प्रिय उवाच–

विश्वासं जित्वा ते पुनरपि हृदयं प्रविष्टः स्याम्।
द्विसहस्रात्मकमुद्रा यथा पुनर्विपणिमाविष्टा॥२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राजकवित्वाकांक्षा

डॉ. रमाकान्त शुक्लः

कविरुवाच–

राजकविः स्यामहमिति कांक्षां कुर्वे शुभे देहलि!
वद तव कोऽस्तीश्वर इति कुर्यां तस्य प्रशस्तिगानमहम्।

विद्युज्जलयोर्मूल्यं नो वर्धितमस्ति यत्कृपया।
तस्य प्रशस्तिगानं डिण्डिमघोषेण कुर्वेऽहम्॥१॥

प्रथमो ध्वनिरुवाच–

अहमस्मि मुख्यमन्त्री यस्य प्रयत्नैरिदं जातम्।
लब्ध्वा प्रभूतबहुमतमहमस्यां दिशि प्रयत्नशीलोऽस्मि॥२॥

द्वितीयो ध्वनिरुवाच–

इदमास्ते मम कार्यं जलविद्युत्पूर्तिकर्ताहम्।
दिल्लीनगरनिगम इति मम नाम न किं श्रुतं भवता? ॥३॥

तृतीयो ध्वनिरुवाच–

उपराज्यपालनामा दिल्लीसर्वोच्चशासकोऽहं वै।
केन्द्रीयसर्वकारः शासनकार्याय मां नियोजयति॥४॥

इष्टं राजकवित्वं यदि त्वदीयं कवे! तस्मात्।
राजप्रशस्तिगानं कुर्ववहितमानसेन त्वम्॥५॥

कविरुवाच–

देहलि! ब्रूहि को भर्ता तवास्ते प्राणरक्षकः?
महापौरो मुख्यमन्त्री महामात्योऽथवाऽपरः?॥६॥

देहली उवाच–

प्रभुरेवास्ति मे भर्ता स एव प्राणरक्षकः।
अजागलस्तनाः शेषे कालयापनतत्पराः॥७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चिकन्नगुनिया वा स्यात् डेंगू वा स्यान्महाज्वरः।
शूकरज्वरकोपो वा स्वयमायान्ति यान्ति च॥८॥

यानावरोधकष्टं वा पीडा नालावरोधजा।
मार्गभङ्गापघाता वा सह्या स्युः प्रभुलीलया॥९॥

वायुप्रदूषणं वास्ताम् ध्वनिदूषणमस्तु वा।
जलप्रदूषणं वा स्यात् स्वयमायान्ति यान्ति च॥१०॥

उत्कोचाचार आस्तां वा भ्रष्टाचारोऽथवा भवेद्।
केनाप्युन्मूलनीयो नो द्रष्टव्यस्तु पदे-पदे॥११॥

तर्कभट्टारकाः सर्वे सर्वे जनहितैषिणः।
सर्वे चासन्दिकाप्राणाः सांख्यपूरुषसन्निभाः॥१२॥

प्रभुरेवास्ति मे भर्ता प्रशस्तिं कुरु तस्य वै।
मत्क्रोडस्थजनानां यो रक्षकोऽस्ति स्वमायया॥१३॥

तस्य प्रशस्तिगानेन त्वं शान्तिं लप्स्यसे पराम्।
राजप्रशस्तिगानेन पश्चात्तापं त्वमाप्नुयाः॥१४॥

इति ते ज्ञानमाख्यातं गुह्याद् गुह्यतरं मया।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु॥१५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संस्कृतघोषगीतम्–

राष्ट्रभाषा संस्कृतम्

रमाकान्त शुक्लः

राष्ट्रभाषा संस्कृतम्
विश्वभाषा संस्कृतम्
लोकभाषा संस्कृतम्
सर्वभाषा संस्कृतम्॥१॥

ज्ञानभाषा संस्कृतम्
कर्मभाषा संस्कृतम्
भक्तिभाषा संस्कृतम्
योगभाषा संस्कृतम्॥२॥

शास्त्रभाषा संस्कृतम्
काव्यभाषा संस्कृतम्
नाट्यभाषा संस्कृतम्
शिल्पभाषा संस्कृतम्॥३॥

गद्यभाषा संस्कृतम्
पद्यभाषा संस्कृतम्
मिश्रभाषा संस्कृतम्
हृद्यभाषा संस्कृतम्॥४॥

नृत्यभाषा संस्कृतम्
गीतभाषा संस्कृतम्
कृत्यभाषा संस्कृतम्
वृत्तभाषा संस्कृतम्॥५॥

शोधभाषा संस्कृतम्
बोधभाषा संस्कृतम्
न्यायभाषा संस्कृतम्
सांख्यभाषा संस्कृतम्॥६॥

धर्मभाषा संस्कृतम्
अर्थभाषा संस्कृतम्
कामभाषा संस्कृतम्
मोक्षभाषा संस्कृतम्॥७॥

शैवभाषा संस्कृतम्
शाक्तभाषा संस्कृतम्
वैष्णवी वाक् संस्कृतम्
सात्वती वाक् संस्कृतम्॥८॥

जैनभाषा संस्कृतम्
बौद्धभाषा संस्कृतम्
आस्तिकानां संस्कृतम्
नास्तिकानां संस्कृतम्॥९॥

ब्रह्मभाषा संस्कृतम्
क्षत्रभाषा संस्कृतम्
वैश्यभाषा संस्कृतम्
कर्मिभाषा संस्कृतम्॥१०॥

प्रीतिभाषा संस्कृतम्
नीतिभाषा संस्कृतम्
शूरभाषा संस्कृतम्
धीरभाषा संस्कृतम्॥११॥

प्रेमभाषा संस्कृतम्
हास्यभाषा संस्कृतम्
शोकभाषा संस्कृतम्
क्रोधभाषा संस्कृतम्॥१२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वीरभाषा संस्कृतम्
भीतिभाषा संस्कृतम्
विस्मयाढ्यं संस्कृतम्
शान्तभाषा संस्कृतम्॥१३॥

वैद्यभाषा संस्कृतम्
वेद्यभाषा संस्कृतम्
सूत्रभाषा संस्कृतम्
भाष्यभाषा संस्कृतम्॥१४॥

वेदभाषा संस्कृतम्
आदिभाषा संस्कृतम्
उपनिषद्वाक् संस्कृतम्
भारतात्मा संस्कृतम्॥१५॥

सूरिभाषा संस्कृतम्
नेतृभाषा संस्कृतम्
श्रमिकभाषा संस्कृतम्
संगणकवाक् संस्कृतम्॥१६॥

सत्कलावाक् संस्कृतम्
साहितीवाक् संक्कृतम्
हर्षदा वाक् संस्कृतम्
तोषदा वाक् संस्कृतम्॥१७॥

दृश्यभाषा संस्कृतम्
श्रव्यभाषा संस्कृतम्
प्राच्यभाषा संस्कृतम्
नव्यभाषा संस्कृतम्॥१८॥

पाठ्ययमास्ते संस्कृतम्
लेख्यमास्ते संस्कृतम्
श्रव्यमास्ते संस्कृतम्
वाच्यमास्ते संस्कृतम्॥१९॥

पूजनीयं संस्कृतम्
कीर्तनीयं संस्कृतम्
गोपनीयं संस्कृतम्
सेवनीयं संस्कृतम्॥२०॥

तावकी वाक् संस्कृतम्
मामकी वाक् संस्कृतम्
तस्य भाषा संस्कृतम्
कस्य नास्ते संस्कृतम्॥२१॥

सूक्तिसिन्धुः संस्कृतम्
युक्तिगेहः संस्कृतम्
विश्वबन्धुः संस्कृतम्
विश्वनीडं संस्कृतम्॥२२॥

व्यासभाषा संस्कृतम्
न्यासभाषा संस्कृतम्
अस्ति सरलं संस्कृतम्
अस्ति सरसं संस्कृतम्॥२३॥

नम्रतावाक् संस्कृतम्
कम्रतावाक् संस्कृतम्
मोहिनी वाक् संस्कृतम्
शोभना वाक् संस्कृतम्॥२४॥

गर्जनावाक् संस्कृतम्
तर्जनावाक् संस्कृतम्
वर्जनावाक् संस्कृतम्
सर्जनावाक् संस्कृतम्॥२५॥

पुष्पभाषा संस्कृतम्
वज्रभाषा संस्कृतम्
वह्निभाषा संस्कृतम्
नीरभाषा संस्कृतम्॥२६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वस्तिभाषा संस्कृतम्
शास्तिभाषा संस्कृतम्
आर्यभाषा संस्कृतम्
कार्यभाषा संस्कृतम्॥२७॥

क्रान्तिभाषा संस्कृतम्
शान्तिभाषा संस्कृतम्
क्षान्तिभाषा संस्कृतम्
व्यक्तिभाषा संस्कृतम्॥२८॥

सामभाषा संस्कृतम्
दामभाषा संस्कृतम्
भेदभाषा संस्कृतम्
दण्डभाषा संस्कृतम्॥२९॥

घोषभाषा संस्कृतम्
रोषभाषा संस्कृतम्
तोषभाषा संस्कृतम्
कोशभाषा संस्कृतम्॥३०॥

संस्कृतेर्वाक् संस्कृतम्
निर्भया वाक् संस्कृतम्
शक्तिभाषा संस्कृतम्
रक्षिणी वाक् संस्कृतम्॥३१॥

स्वस्थभाषा संस्कृतम्
स्वच्छभाषा संस्कृतम्
श्रेष्ठभाषा संस्कृतम्
ऐक्यभाषा संस्कृतम्॥३२॥

भावनावाक् संस्कृम्
प्रेरणावाक् संस्कृतम्
देशनावाक् संस्कृतम्
साधनावाक् संस्कृतम्॥३३॥

बालकानां संस्कृतम्
नव्ययूनां संस्कृतम्
प्रौढनृणां संस्कृतम्
वृद्धनृणां संस्कृतम्॥३४॥

प्रेयसी वाक् संस्कृतम्
श्रेयसीवाक् संक्कृतम्
ज्यायसीवाक् संस्कृतम्
नव्यसीवाक् संस्कृतम्॥३५॥

सद्गुरोर्वाक् संस्कृतम्
शिष्यवाणी संस्कृतम्
संगणकवाक् संस्कृतम्
जालभाषा संस्कृतम्॥३६॥

गौडभाषा संस्कृतम्
लाटभाषा संस्कृतम्
कैशिकीवाक् संस्कृतम्
भारतीवाक् संस्कृतम्॥३७॥

ब्रह्मभाषा संस्कृतम्
जीवभाषा संस्कृतम्
मायिकी वाक् संस्कृतम्
जगद् भाषा संस्कृतम्॥३८॥

द्वैतभाषा संस्कृतम्
अद्वया वाक् संस्कृतम्
सद्गुणावाक् संस्कृतम्
निर्मलावाक् संस्कृतम्॥३९॥

मुस्लिमानां संस्कृतम्
क्रैस्तवानां संस्कृतम्
सिक्खभाषा संस्कृतम्
भारतानां संस्कृतम्॥४०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संस्कृतेर्वाक् संस्कृतम्
सत्कृतेर्वाक् संस्कृतम्
उन्नतेर्वाक् संस्कृतम्
सद्गतेर्वाक् संस्कृतम्॥४१॥

रक्तभाषा संस्कृतम्
पीतभाषा संस्कृतम्
कृष्णभाषा संस्कृतम्
शुक्लभाषा संस्कृतम्॥४२॥

स्कन्धभाषा संस्कृतम्
पर्वभाषा संस्कृतम्
अङ्कभाषा संस्कृतम्
सर्गभाषा संस्कृतम्॥४३॥

पुण्यभाषा संस्कृतम्
गुण्यभाषा संस्कृतम्
युद्धभाषा संस्कृतम्
शुद्धभाषा संस्कृतम्॥४४॥

नर्मभाषा संस्कृतम्
मर्मभाषा संस्कृतम्
वर्मभाषा संस्कृतम्
शर्मभाषा संस्कृतम्॥४५॥

मातृभाषा संस्कृतम्
भ्रातृभाषा संस्कृतम्
पित्र्यभाषा संस्कृतम्
मित्रभाषा संस्कृतम्॥४६॥

भूमीभाषा संस्कृतम्
व्योमभाषा संस्कृतम्
वायुभाषा संस्कृतम्
सूर्यभाषा संस्कृतम्॥४७॥

उत्तरावाक् संस्कृतम्
दक्षिणावाक् संस्कृतम्
पूर्वभाषा संस्कृतम्
वारुणीवाक् संस्कृतम्॥४८॥

प्रत्नरत्नैः पूरितम्
नव्यकाव्यैः संस्कृतम्
भातु राष्ट्रे संस्कृतम्
भातु भूमौ संभृतम्॥४९॥

आदिकविना सेवितं
नव्यकविभिः सेवितं
भातु राष्ट्रे संस्कृतम्
भातु भूमौ संस्कृतम्॥५०॥

अन्वितेर्वाक् संस्कृतम्
संगतेर्वाक् संस्कृतम्
मित्रतावाक् संस्कृतम्
संवदध्वम् संस्कृतम्॥५१॥

रचनातिथिः- १३.०७.२०१७

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सुन्दरी सा

—डॉ. ऋषिराजपाठकः

मधुरमधुशाला, सुन्दरी सा।
मम हृदयशाला, सुन्दरी सा॥

निखिलजगज्जयिनी शुचिहासा।
सरलसुरबाला, सुन्दरी सा॥१॥

लोलविलोलविलोचनभाषा।
रदरुचिरराला, सुन्दरी सा॥२॥

हृदयहारिणी हरिणी रमणी।
मदभरितचाला, सुन्दरी सा॥३॥

मुखसरसिजसौन्दर्यसमृद्धिः।
नवरसरसाला, सुन्दरी सा॥४॥

यौवनमदसंगीतनर्तकी।
कृतमदनताला, सुन्दरी सा॥५॥

नयनयुगलशरचूर्णितहृदया।
भ्रकुटिकरपाला, सुन्दरी सा॥६॥

ऋषि'मपि हरति प्रणयनवबन्धा।
कलितकरमाला, सुन्दरी सा॥७॥

रचनातिथिः १५.४.२०१७

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कुण्डलियैकादशी

डा. देवीसहाय पाण्डेय 'दीपः'

१. भारतमातुर्महिमा

कर्तव्ये निरता नरा भारतभुवि विलसन्ति।
अस्यां भूमौ देवता जन्मलाभमिच्छन्ति॥
जन्मलाभमिच्छन्ति क्लेशः कोऽपि नेक्ष्यते।
षडर्तवः क्रीडन्ति हृदयमवलोक्य हृष्यते॥
कविदीपोऽयं भणति शशिरवि चरणे भव्ये।
भ्रमतो नीराजनानिभौ निरतौ कर्तव्ये॥

२. गर्ववर्जनम्

नश्वरसंसारे कथय गर्वं कुरुषे कस्य।
धन मध्ये चपला निभं धनं जीवनं पश्य॥
धनं जीवनं पश्य कस्य दासोऽभूत वित्तम्।
ध्रुवं मरणमायाति न विस्मरणीयं नित्यम्॥
कविदीपोऽयं भणति सुस्थिरो भव सुविचारे।
मा गर्वं वह ह्यस्मिन्नतिनश्वरसंसारे॥

३. स्वर्गादपि गरीयसी भारतभूमिः

श्रेष्ठां स्वर्गादपि सदा भारत भूमिं पश्य।
परमोदारा सोख्यदा सेव्येयं सर्वस्य॥
सेव्येयं सर्वस्येह ब्रह्मणोऽवतारः।
पूता ऋषयोभूता ये मन्त्रद्रष्टारः॥
कविदीपोऽयं भणति कुरुत सेवायाश्चेष्टाम्।
ज्ञात्वा भारतभूमिमिमां स्वर्गादपि श्रेष्ठाम्॥

४. भारतमातुः गौरवम्

मत्वा पितुराज्ञां मुदा श्रीरामो ह्यत्रैव।
हित्वा राज्यं वनमगात् भूता चिन्ता नैव॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भूता चिन्तानैव सागरे कृतवान् सेतुम्।
हत्वा रावणबलं समुच्छ्रितवाञ्जयकेतुम्॥
कविदीपोऽयं भणति श्रृणुत कर्णं स्वं दत्वा।
सेवध्वं जननीं महितां स्वर्गादपि मत्वा॥

५. हीटरः

धन्योऽयं हीटरसखा शिशिरे सुखं ददाति।
जराजीर्णकायं कृशं तनुत्राणमिव णति॥
तनुत्राणमिव वाति घातयति शिशिराघातम्।
दृष्ट्वा शीतं क्रुद्धमाननं रक्तं जातम्॥
कविदीपोऽयं भणति राजते निर्धूमोऽयम्।
शिशिरे नान्यः सखा हीटरः खलु धन्योऽयम्॥

६. द्विचक्रिका (साइकिल)

द्विचक्रिकेयं सुखकरी स्वल्पव्यया विभाति।
साभारं भारं वहति सरला सुखं ददाति॥
सरला सुखं ददाति निर्धनेभ्यो वरदानम्।
वायुभोजनं चलति योजनं दूरस्थानम्॥
कविदीपोऽयं भणति भाति दूषणरहितेयम्।
सकलवाहनं त्यक्त्वा सेव्या द्विचक्रिकेयम्॥

७. दूरभाषः (टेलिफोन)

कृता विचित्राविष्कृतिर्दूरभाषयन्त्रस्य।
पर्यङ्कस्थः प्राप्नुते कुशलं सर्व जनस्य।
कुशलं सर्व जनस्य मनो मे प्राप्य हृष्यते।
दूरस्थोऽपि जनः सुनिकटवर्तीव दृष्यते॥
कविदीपोऽयं भणति सदा घण्टिकावादिता।
हरति मनो मे दिव्याविष्कृतिरियं या कृता॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

८. दूरदर्शनम् (टेलिविजन्)

दूरदर्शनं हर्षणं हरति मनः सर्वस्य।
मनोरञ्जयति सर्वदा मान्यमिदं लोकस्य॥
मान्यमिदं लोकस्य गृहे कृत्स्नं संसारम्।
प्रदर्शयति कानन सरितः सागर प्रसारम्॥
कविदीपोऽयं भणति पश्य सर्वं प्रदर्शनम्।
आस्ते सञ्जयदिव्यदृष्टिरिव दूरदर्शनम्॥

९. वायुयानम्

उत्पतनं मे रोचते नभसि वायुयानेन।
विक्रीडन् सह वारिदैः वैनतेयवेगेन॥
वैनतेयवेगेन वीक्ष्य सकलं संसारम्।
विष्णुपदेऽस्मिन् पदे पदे सुखदं सञ्चारम्॥
कविदीपोऽयं भणति भाग्यसम्भूतं गमनम्।
नभसि वायुयानेन रोचते मे ह्युत्पतनम्॥

१०. रेलयानम्

प्रत्यक्षं गच्छति यदा लौहपथि गर्वेण।
धूमयानमवलोक्यते सर्वैश्चाश्चर्येण॥
सर्वैश्चाश्चर्येण घोररावाः श्रूयन्ते।
पश्युत्कर्णाजनाः पार्श्वभागे दृश्यन्ते॥
कविदीपोऽयं भणति पश्य पथ दारणदक्षम्।
जनजर्नादनं वहति यथा गरुडः प्रत्यक्षम्॥

११. अयोध्या

नगरीयमयोध्या सदा सुखदा शुभं ददाति।
अवताराणां भूरियं सरयूजलं विभाति॥
सरयूजलं विभाति सौख्यदा धर्मरक्षिता।
रामेणोपसर्पतात्र हि मृत्तिका भक्षिता॥
कविदीपोऽयं भणति मन्यते धर्मधुरीयम्।
पुरीषु सर्वा सुश्रेष्ठायोध्या नगरीयम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चन्द्रिका

जि.एस्. श्रीनिवासमूर्तिः
murthygss@gmail.com

१. [वंशस्थवृत्तम्]

वणिग्वरः कश्चिदुवास वित्तवान् हरेः कृपापात्रगतस्स्वकर्मणा।
प्रियासमेतो नगरे महापुरे स्वधर्ममाश्रित्य सुनन्दनाभिधः ॥१॥

सुनन्दनस्याप्रतिमा वधूः क्षमा स्वभर्तुरिष्टा गुणरूपसम्पदा।
परस्परश्रीप्रथनेन बन्धुरौ निशामृगाङ्काविव तौ बभूवतुः ॥२॥

तयोर्द्वयोर्धर्म्यसुखेषु सक्तयोरजायतापूर्वसुखप्रदा सुता।
प्रमोदयन्ती पितरौ स्वलीलया शरीरबद्धार्जितसत्कृतिर्यथा ॥३॥

सुतप्तजाम्बूनदवर्णभास्वरा शिरीषपुष्पादपि कोमलाकृतिः ।
विलोकनेनैव महार्घहर्षदा यथार्थनाम्नी खलु चन्द्रिकाभिधा॥४॥

शिशुर्जनन्याः स्तनपानवाञ्छया यदा रजन्यामरुदत् पिता द्रुतम्।
प्रियात्मजाप्रेमतुलानवस्थितो प्रसुप्तपत्नीं कथमप्यबोधयत्॥५॥

यदार्भकः सर्तुमथ प्रवर्तते पुरः प्रयासेन शनैः स्ववक्षसा।
त्रिविक्रमक्रान्तिनिभस्तयोस्तदा हिमालयारोहणवन्महोत्सवः॥६॥

तडित्प्रभावत्स्फुरदुज्ज्वलस्मितं प्रदर्शयन्तीं तनयां यदृच्छया।
क्षमा निजाङ्के विनिवेश्य निर्वृता मुहुर्मुहुश्चुम्बति नैव तृप्यति॥७॥

वचोभिरप्यर्थविवर्जितैः शिशोः पिता त्वभिप्रायचयान् हि बुध्यते।
यथाम्बरे मेघपरम्पराकृतावैति बालो मृगरूपशृङ्खलाम्॥८॥

स्वकायमुद्धृत्य करौ धरातले निवेश्य जानुद्वयमप्यसौ सुता।
यदा परिक्रामति वीक्षितुं जगन्निमज्जतस्तौ खलु हर्षसागरे॥९॥

विनाश्रयं तिष्ठति चन्द्रिकाद्य वै अहो परिक्रामति भित्तिमाश्रिता।
विनावलम्बं चलितुं प्रवर्तते पुरस्स्वशक्त्येत्यभवन्समुत्सवाः॥१०॥

कुतूहलप्रेरितचेष्टनोद्यता सुता यदा भ्राम्यति वेश्मनि द्रुतम् ।
तया कृतो नूपुरशिञ्जितस्वनः कुटुम्बसङ्गीतलयः प्रतीयते॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मनोज्ञमस्पष्टमुदीरितं तया क्षमा यदाम्बेति पदं प्रशुश्रुवे।
विवेद सौख्यं परमं तथा मुनिर्महेशसालोक्यपदे यथा भजेत्॥१२॥

यदा सुता प्रश्नसुमैः शतैः क्षमामवाकिरद्रम्यपदैर्निरन्तरम्।
तदुत्तरप्राप्तिमुपेक्ष्य चुम्बिता मुखेऽम्बया वाक्प्रतिबन्धनाशया॥१३॥

पुराणरामायणभारतोद्धृताः कथाः पिता श्रावयति स्म चन्द्रिकाम्।
प्रदोषकाले नलिनैः सहात्मजाविलोचने मीलत इत्यपेक्षया॥१४॥

२. [शालिनी]

याते काले चन्द्रिकाभूत्कुमारी शालां यान्ती हृद्यमित्रैः समेता।
पित्रोस्तस्या इङ्गितेष्टार्थसिद्धौ प्रेम्णा सर्वं कुर्वतोरात्मतृप्त्यै॥१५॥

पुत्र्यां शुभ्रैः हासकल्लोलफेनैरानन्दाब्धौ मज्जयन्त्यामुभौ तौ।
व्याधिग्राहः प्राहरत् द्राक्क्षमां तामीर्ष्याग्रस्तं किं भवेद्दैवमेवम्॥१६॥

व्याधेर्बाधां दुस्सहां सा कथञ्चित् सोढुं येते चन्द्रिकाक्षोभभीत्या।
आप्तानां वै शोभनाकांक्षया यत् कुर्वत्याशाबाधनं सम्भवेत्तत्॥१७॥

व्याधिव्याधो वागुरां ग्लानिरूपां प्रक्षिप्यास्याः कोमले श्लक्ष्णदेहे।
भामिन्येणीं रोदयामास यावत् वैद्यान् भर्तानाययत्तावदेव॥१८॥

वैद्या रुग्णां नैकरीत्या परीक्ष्य काम्यादन्यं निर्णयं प्राप्तवन्तः।
रोगस्तस्या भेषजातीतवृत्तिं प्राप्तस्तस्माद्दुर्गमः स्वास्थ्यमार्गः॥१९॥

वैद्या ऊचुर्नैगमं ते प्रियाया भैषज्यार्थं कुर्महे सर्वयत्नान्।
दैवायत्तं स्वास्थ्यमस्या इदानीं नोपेक्ष्यः स्यादादितो व्याधिवह्निः॥२०॥

काले काले सेव्यमाना स्वभर्त्रा मृत्योर्भीताऽभक्षयत् श्रद्दधाना।
सर्वान् जायून्वैद्यदत्तान् तथापि ग्रीष्मे कुल्येवाभजत्काश्र्यमाशु॥२१॥

आर्ता तन्वी म्लानपुष्पोपमा सा स्वास्थ्यप्राप्तिं काङ्क्षमाणा कथञ्चित्।
द्रष्टुं याता तापसं सुप्रसिद्धं दीनानां वै ज्ञानिनो विष्णुकल्पाः॥२२॥

पूज्य ज्ञानिन्नाश्रितानां शरण्यं दीना चाहं प्रश्रिता त्वां प्रपद्ये।
व्याधित्रस्तामेकपुत्रीं च साध्वीं कारुण्याब्धे पाहि मामित्यवोचत् ॥२३॥

सिद्धो वृद्धो तां दयापूर्णदृष्ट्याऽपश्यत् पश्चात् मीलिताक्षो बभूव।
पश्यन्ती सा तं मुनिं ध्यानमग्नं भ्रान्ते चित्ते कामपि प्राप शान्तिम् ॥२४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शूलं व्याधेस्तत्क्षणादेव नष्टं दीप्ते दीपे ध्वान्तवत् गेहकक्षे।
विस्मृत्याधिं शान्तचित्ता ययाचे साधौ पश्यत्यज्जसोन्मील्य नेत्रे ॥२५॥

आश्चर्यं मे ग्लानिरन्तर्दधाति त्वत्प्रेमौघप्लाविता वल्लरीव ।
स्वार्थं किञ्चित् कामये नापि भूयात् पुण्याः स्वामिन् जीवने सद्विभूतिः॥२६॥

ज्ञानी तस्याः प्रार्थनां स्मेरवक्त्रः शृण्वन् तां स्वप्रेमदृष्ट्याभ्यषिञ्चत्।
वत्से मा भीरित्यवोचत्तथैव प्रादात् पुत्र्यै गुह्यमन्त्रोपदेशम्॥२७॥

मन्त्रं तावत् त्वं प्रयुङ्क्ष्व त्रिरेव बाले नो चेत् निष्फलत्वं स गच्छेत्।
तस्माद् भूयात् दत्तमन्त्रप्रयोगः कृच्छ्रेष्वेव स्वल्पकार्ये न वत्से॥२८॥

इत्थं सिद्धश्चन्द्रिकां बोधयित्वा हर्षोत्सिक्तां तां क्षमामित्यवोचत्।
ब्रह्माण्डेऽस्मिन् शाश्वतं नास्ति किञ्चिन्निश्चिन्ताभूर्न्यस्य भारं रमेशे॥२९॥

साधुप्रोक्तां वाचमास्वादयन्ती पुत्र्या साकं सा क्षमा शान्तचित्ता।
प्रत्यावृत्ता स्वालयं नष्टभीतिः सन्तः पोष्यश्रेयसे सिद्धहस्ताः॥३०॥

चित्तं तस्या शारदाकाशतुल्यं स्वच्छं शान्तं सर्वदाभूत्तथापि।
प्राप्तिस्तस्याः संसृतौ सीमितासीत् रोगार्तागादूर्ध्वलोकं जवेन॥३१॥

तस्याः पुत्र्याः शोकसंप्लावितायाः को वा लोके सान्त्वनं हन्त कुर्यात्।
मातृप्राया का भवेदर्भकस्य मातानन्या देहिनां सर्ववन्द्या॥३२॥

मातू रूपं दृश्यते सर्वतोऽस्याः वाण्यस्पष्टं श्रूयते सर्वकाले।
स्पर्शः स्निग्धो भासते स्वप्नमध्ये वात्सल्यार्द्राह्वानशैली न लब्धा॥३३॥

बाष्पार्द्राक्षीमात्मजां सान्त्वयित्वा कोपाक्रान्तां स्मेरवक्त्रां चकार।
क्षुद्बाधां स्वां लीलया नावलोक्य प्रादादन्नं पीडयन्त्यै सुतायै॥३४॥

सोढ्वा पुत्र्या दुर्नयं बाल्यजातं तस्यै वृत्तिं सज्जनानां शशास।
स्वच्छायायामाश्रितां वृक्षवत् सा पुत्रीं सम्यक् सर्वकाले ररक्ष॥३५॥

सर्वं कालात् क्षीणतां गच्छतीति प्राज्ञानां सद्भाषितस्यानुरोधात् ।
शान्ता भूत्वा चन्द्रिका जन्मदस्य सेवां कर्तुं गूढबाधा प्रयेते॥३६॥

तातस्सोऽपि स्वात्मजाप्रीणनार्थं पत्नीप्रेम्णा वञ्चितोऽपि स्वदुःखम्।
गूहँस्तस्याः शिक्षणारोग्यवृद्ध्यै पुत्रीवक्त्रस्मेरबिम्बैर्ननन्द॥३७॥

काले याते नैगमो कामविद्धो भार्यामन्यां लब्धुमिच्छामवाप।
चित्रं नैतज्जीविनां स्त्रीसुखेच्छा सर्वेच्छासु प्रायशो दुर्निवार्या॥३८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

३. [रथोद्धता]

चन्द्रिकापि युवतिप्रभां दधौ फुल्लदुच्चकुचकुड्मलश्रिया।
प्रापतुश्च जघने विशालतां कापि मोहकरुचिर्मुखे बभौ॥३९॥

लोलमुग्धपरिधावकेक्षणैर्वायुनुन्नतनुनीलकुन्तलैः।
भीरुताक्तमृदुहासविभ्रमैर्नूपुरध्वनितमन्दसङ्क्रमैः॥४०॥

आचकर्ष वनिता अपि क्षणाच्चन्द्रिका ससुखमायतेक्षणा।
किं पुनर्युवजनान् महापुरे यौवनज्वरसुतप्तदेहिनः॥४१॥

चन्द्रिकामहमपश्यमापणे नेत्रमेलनकृतौ तया सह।
प्राप्तसौख्यमतुलंत्वितीरितं स्निग्धयूनि तरुणेन केनचित्॥४२॥

मद्गृहस्य पुरतः प्रयाति सा प्रत्यहं मम हि भाग्यदेवता।
इत्यवोचदपरः कृती युवा यौवनस्य विविधा गतिर्ध्रुवम्॥४३॥

एकदाथ नगरस्य वाटिकां कामदिग्धमनसा सुनन्दनः।
सञ्चचार निभृतं यदृच्छया कांश्चन स्त्रियमपश्यदागताम्॥४४॥

सापि तं मुहुरवेक्ष्य नैगमं क्षौमवस्त्रवररत्नभूषितम्।
स्वेङ्गितप्रकटने ह्यशक्ततां प्राप्य पादपतलं गता ह्रिया॥४५॥

ऐक्षत प्रकटसंगमेच्छया नैगमः पृथुनितम्बशालिनीम्।
मध्यमे वयसि संस्थितां स्त्रियं भामिनीमतनुसंहतस्तनीम्॥४६॥

चूष्यवस्त्विव हि योषितो वपुर्निर्निमेषनयनेन पीयते।
तस्य वीक्षणविधानलज्जिता दृष्टिपातमवनौ करोति सा॥४७॥

आससाद मदनाभिपीडितस्तां स्त्रियं विटपिमूलवर्तिनीम्।
कासि देवि वद जन्म कुत्र ते श्रावयेति वनितां जगाद सः॥४८॥

मत्पिता दिवमगात् पुरैव मामात्मजासहितनष्टभर्तृकाम्।
विद्ध्यनाथवनितां कलाभिधामित्युवाच ललनामणिः ह्रिया ॥४९॥

मामवेहि वणिजं सुनन्दनं प्राप्तवित्तबलवैभवं जनम् ।
गेहिनी मम गता दिवं रुजा मां विहाय तनयां च दुःखिताम्॥५०॥

भामिनि त्वदनुरागयाचकं मां वृणीष्व ससुखं सह त्वया।
मद्गृहे तवसुता च वत्स्यतीत्यब्रवीत्स ललनां सुनन्दनः॥५१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तस्य रूपविभवैश्च मोहिता पञ्चबाणविशिखाभिपीडिता।
कामवह्निशमनार्थमादृता स्वीचकार वचनं रतार्थिनः॥५२॥
आलिलिङ्ग सुदृढं स कामिनीं तं चुचुम्ब वदनेऽनपत्रपा।
तत्क्षणादभवतां परस्परं कामतर्पणविधौ सहायकौ ॥५३॥

४. [उपजातिः-इन्द्रवज्रा-उपेन्द्रवज्रा मिश्रणम्]

अपूर्णकामः स समानकामां गान्धर्वमार्गप्रगृहीतपाणिः।
द्वितीयभार्यां तनुजाद्वितीयां सुनन्दनः स्वालयमानिनाय॥५४॥
दाम्पत्यसौख्ये निरतौ प्रकामं तौ दम्पती यापयतः स्म कालम्।
सखीं स्वसारं सुमुखीमुमाख्यां लब्ध्वाऽतुषद्विस्मितचन्द्रिकापि॥५५॥
अन्योन्यसङ्गात्प्रथमानहर्षे द्वे चेरतुस्ते ससुखं नगर्याम्।
तयोर्विहाराध्ययनानि चापि परस्परोपस्थितिमाश्रितानि॥५६॥
दिनेषु गच्छत्सु धनार्जनार्थं वणिग्जगामान्यपुरीं कदाचित्।
लुण्टाकवर्गैरभिहन्यमानस्तत्रार्दितो जीवितमुत्ससर्ज॥५७॥
सौदामनीघातनिभं कठोरं वृत्तान्तमाकर्ण्य मृतेः स्वभर्तुः।
पपात सद्यो भुवि मन्दभाग्या चक्रन्द चोच्चैः शिशुवत् कला सा॥५८॥
द्वितीयवैधव्यमवाप्य योषित्स्वभागधेयानि भृशं जगर्ह।
मां प्राप्य दैवोपहतामधन्यां हा नाथ मृत्योर्वशमाप्तवान् त्वम् ॥५९॥
गाथास्ति पापी यदि याति सिन्धुं तत्रापि गुल्फौ न जलेन सिक्तौ।
त्वां सद्गुणाढ्यं परिणीय यन्मे वैधव्यदुःखं पुनरप्यवाप्तम्॥६०॥
लब्ध्वा तरोराश्रयमार्तवल्ली ननन्द धृत्वा स्मितकुड्मलानि।
तस्याः सुखं तत् क्षणिकं बभूव बभञ्ज वृक्षं सहसा गजेन्द्रः॥६१॥
उत्तुङ्गसौधान् विरचय्य चित्ते तत्रावसं वैभवदर्पयुक्ता।
अहंत्विदानीं विभवैर्विहीना कथं करिष्यामि कुटुम्बरक्षाम्॥६२॥
इत्थं प्रलप्य प्रणता चिरेण पुत्र्यौ निरीक्ष्याश्रुमुखी कुमार्यौ।
तयोर्भविष्यच्छुभकामनार्थं कृच्छ्रेण सा तत्र समाहिताभूत्॥६३॥
पुत्री पुरैवाभिहता नियत्या मातुर्वियोगादधुना पितुश्च।
मृतिं दुरन्तां सहसा निशम्य दुःखाम्बुधौ गाढतरं ममज्ज॥६४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मात्रा विहीना कृपणा सुतप्ता कथं सहिष्ये जनकस्य मृत्युम्।
दैवं हतं हन्ति पुनः सदेति तथ्यं वचो हन्त मयानुभूतम्॥६५॥
वृक्षान्निपत्य व्रणितं शयानं बुभुक्षितो द्रागवधीन्मृगेन्द्रः।
दारिद्र्यकूपे पतितं क्षुधार्तं ददंश घोरः क्षयरोगसर्पः॥६६॥
पितः कथं मामबलां विहाय गन्तासि कृत्वा तनयामनाथाम्।
वात्सल्यपूर्णामृततुल्यवाग्भिः को प्रीणयेन्मां सततं त्वदन्यः॥६७॥
एवं प्रकामं रुदती कुमारी स्वबाष्पधारार्द्रमुखी त्रियामाः।
निनाय नैकाः प्रततान्धकारे निरस्तनिद्रा हृदि चन्द्रिका सा॥६८॥
शरीरयात्रा पुरतो हि गच्छेत् दुःखं सुखं चाविगणय्य लोके।
कलापि कौटुम्बधुरं वहन्ती वाणिज्यवृत्तौ निरता बभूव ॥६९॥
कदापि पूर्वं न नियुक्तचित्ता वाणिज्यकार्ये गृहिणी कला सा।
एकाकिनी पण्यकलानभिज्ञा भर्तुः पदे कर्तुमियेष वृत्तिम्॥७०॥
आवर्तपूर्णां सरितं गभीरां कथं तरेत् संप्लवनासमर्थः।
भर्तृक्रियाकौशलसंश्रिता श्रीः काले गते क्षीणतरा बभूव॥७१॥
दासाश्च दास्यः भृतिमात्रतुष्टा भृतिं विना तत्यजुराप्तसेवाम्।
अन्याश्रयं भक्तुमनन्यमार्गा मृगा इवारण्यमवग्रहार्तम्॥७२॥
कर्माण्यनेकानि गृहोचितानि भूमार्जनादिश्रमसाधितानि।
भृत्यैर्विना कर्तुमसाध्यमासीत् यदा कलागात् कुपथं तदैव॥७३॥
सुखोचितां भर्तृसुतां विमाता न्ययोजयत् कर्मणि दासयोग्ये।
सम्पद्यमानासु विपत्सु नृणां मनांसि नूनं कलुषीभवन्ति॥७४॥
क्व गार्हकार्यं क्व च पेलवाङ्गी किं मार्जनाय प्रभवेत् शिरीषम्।
मयूरपिच्छं खननाय वा किं चन्द्रातपस्तण्डुलशोषणाय॥७५॥
सा चन्द्रिका पाककलानभिज्ञा नियोजिता पाकगृहे विमात्रा।
सर्वाणि दैनंदिनखादनानि पक्तुं सकाले खलु निस्सहाया॥७६॥
प्रक्षालनं वेश्मतलस्य पात्रसम्मार्जनं चांशुकधावनं च।
सर्वाणि कार्याणि हि चन्द्रिकाया भारा अभवन् विधिदुर्विपाकात्॥७७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

५. [शालिनी]

यस्या हस्तौ कन्दुकक्रीडयास्तां रक्तावद्यप्रापतुः कृष्णवर्णम्।
स्थालीवेश्मक्षालनाच्चन्द्रिकायाः काले हन्त श्लक्ष्णतां त्यक्तवन्तौ॥७८॥

या लेखन्या पत्रपृष्ठे व्यलेखीत् सा शोधन्या मार्जने न्यस्तचित्ता।
या विद्यार्थं पाठशालां प्रपेदे साद्य क्रेतुं पण्यशालामुपैति॥७९॥

यस्या वक्त्रं सर्वदासीत्स्मितार्क्तं म्लानं त्वद्य त्रासपूर्णं विवर्णम्।
यासीत् कन्या प्रस्फुरच्चञ्चलाक्षी साभूद्दीना व्याघ्रभीता मृगीव॥८०॥

रत्नस्यूतानर्घवासांसि यस्याः शर्वर्यां च प्रास्फुरन्नभ्रदीप्त्या।
अद्याप्रातः पाककर्माविलानि म्लानिं प्रापुः पात्रनिर्णेककार्यात्॥८१॥

आपूर्वाह्णं याऽस्वपीत्त्यक्तचिन्ता सा जागर्ति द्राक् हि सूर्योदयात् प्राक्।
कष्टं नो चेत् दण्डनं सा सहेत निःसन्देहं तर्जनां वा विमातुः॥८२॥

बाहुं वामं चन्द्रिका स्वोपधानं कृत्वा श्रान्ता वल्लरीकोमलाङ्गी।
आर्तास्वप्सीत्कर्कशे दारुतल्पे या शेते स्म प्रस्तरे पिच्छपूर्णे॥८३॥

योमासीत्प्राक्चन्द्रिकायाः सखीव सा मेने तामात्मकर्मार्थदासीम्।
तस्या भूषावेशरूपक्रियासु दासीवत्तां चन्द्रिका सेवते स्म॥८४॥

इत्थं दासीकर्मसु न्यस्तचित्ता श्रान्ता कार्यात् सञ्चराभूत्कदाचित्।
मान्द्यं तस्या वीक्षमाणा विमाता भूयो भूयो दण्डयामास तन्वीम्॥८५॥

कोपाविष्टान्यानि कार्याणि चैव कर्तुं तामाज्ञापयत् निर्घृणा सा।
यस्या आसीन्नित्यकार्यं ह्यशक्यं तस्या साध्यं किं भवेदन्यकार्यम्॥८६॥

एकत्रासन् श्यामलाः पात्रपुञ्जा अन्यत्रासन् कश्मला वस्त्रमालाः।
किं कर्तव्यं चिन्तयन्तीत्यकस्मात् सस्मारार्ता पूर्ववाक्यानि साधोः॥८७॥

एकान्ते सा साधुवर्योपदिष्टं मन्त्रं भक्त्या कौतुकाक्रान्तचित्ता।
नेत्रे रक्ते मीलयन्ती जजाप तापग्रस्ता बद्धपद्मासनार्ता॥८८॥

मन्त्रं सञ्जप्यादरेणाञ्जलिं च बद्ध्वा चक्षुष्यायताक्ष्युन्निमील।
यावत्तावत्काचनाप्राकृता स्त्री प्रत्यक्षाभूत्बिभ्रती दिव्यदीप्तिम्॥८९॥

ज्योत्स्नाशुभ्रस्मेरवक्त्रा बभासे देवी काष्ठा दीपयन्ती स्वकान्त्या।
दृग्भ्यां सान्द्रां प्रेमपीयूषधारां सिञ्चन्त्यार्तक्लेशसन्तापहन्त्रीम्॥९०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मन्द्रस्पष्टश्लक्ष्णवर्णाभिरामैर्वात्सल्यात्तप्रेमपूर्णैर्वचोभिः।
वीणानादान्मञ्जुलैः सान्त्वयन्ती भीतां कन्यां दिव्ययोषिद्बभाषे॥९१॥

मा भीर्वत्से विद्धि मां त्वत्सहायां मातृप्रायां त्वत्सुखोदर्ककर्त्रीम् ।
प्रोक्तैर्मन्त्रैः सत्वरावाहितास्मि किं ते कार्यं किं च कृच्छ्रं वदास्ति॥९२॥

तस्या देव्याः स्नेहलिप्तैर्वचोभिर्नष्टे तापे भीरुतां द्राग्विहाय।
देवीं भक्त्या चन्द्रिका सम्प्रणम्य मन्दं मन्दं प्रश्रिता प्रत्युवाच॥९३॥

देवि त्वं मे प्रार्थनां पूरयस्व कृत्स्नं मह्यं कार्यजातं विमात्रा।
दत्तं क्षिप्रं त्वत्प्रसादात्समाप्तिं यातु प्रीता मद्विमाता भवेच्च॥९४॥

वत्से कार्यस्थानमादेशयेति प्रोक्ता यावत् पाकशालां निनाय।
गच्छन्त्यग्रे चन्द्रिका तावदेवापश्यत् भ्रान्ता कल्पनातीतदृश्यम्॥९५॥

पात्राण्यासन् प्रस्फुरद्वज्रशोभीन्यग्रेऽपूर्वस्वच्छवासांस्यभूवन्।
स्वच्छो धौतः पाकशालातलश्च सन्निर्वृत्तं दुष्करं कार्यजातम्॥९६॥

कार्यं सर्वं तत्परावृत्तदृष्ट्यां देव्यै तस्यां दर्शयन्त्यां क्षणेन।
अन्तर्धानं दिव्यरूपागमत्सा संवृष्याभ्रं व्योम वै द्राक् जहाति॥९७॥

तृप्ता दृष्ट्वा कार्यजातं समाप्तं देवी याता दृक्पथादित्यतुष्टा।
द्वन्द्वेनेत्थं बाधिता चन्द्रिका सा मन्त्रं व्यर्थं क्षुद्रकार्ये शुशोच॥९८॥

मन्त्रः पूतो द्विर्विवेकात्प्रयोज्यो यस्माद्यावज्जीवमानन्दलाभः।
भूयादित्थं चिन्तयामास तन्वी बध्नन्त्यज्ञा मक्षिकाः स्थूलरज्ज्वा॥९९॥

सर्वं कार्यं चित्तवेगात् समाप्तं पश्यन्त्या वै श्लाघिता सा विमात्रा।
दिष्ट्या देव्या दिव्यसान्निध्यलाभात् वृत्तं कार्यं हीति नावेत् कला सा॥१००॥

६. [स्वागता]

मन्त्रहूतविबुधस्त्रियमाप्तां संकटाग्निशमनेऽतिसमर्थां।
मातरं स्वबलदां गणयन्ती चन्द्रिकाथ दिनकर्मसु मग्ना॥१०१॥

चित्ततृप्तिरभजत् कृतकृत्यां शान्तता भुवमिवाशु दिनान्ते।
चन्द्रिकां स्मितमुखीं सुकुमारीं सर्वतो निजरुचिं प्रकिरन्तीम्॥१०२॥

दास्यवृत्त्युचितवस्त्रवसानाप्यार्यभोग्यरुचिरूपगुणाढ्या।
पश्यतां समदि गण्यजनानां मानसं मृदुमतेः प्रममन्थ॥१०३॥

CC-0. Padma Shri Rama Kant Shukla Collection at Devavani Parishad, Uttam Nagar, New Delhi.

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दास्यभावमनुसृत्य विमातुः पुत्रिकामनुचरत्यतिदृप्ताम्।
चन्द्रिका पथि जवेन यदा तामापिबन्ति तरुणाः शितदृग्भ्याम्॥१०४॥

कुन्तलालकतरङ्गविलासं पश्यतो युवजनस्य तरुण्याः।
मानसेऽपि जनयत्यनिवार्यं वीचिजालमभिलाषमनोज्ञम्॥१०५॥

मन्थरालसगतिर्वनितायाः सुप्तकाममनयत्तरुणानाम्।
जागरस्थितिमनूह्यविधायां मन्मथस्य तरुणेषु हि दृष्टिः॥१०६॥

मण्डितापि वसनैर्बहुमूल्यैरात्मजा तु शुशुभे न कलायाः।
मत्सराविलमतिर्विजगर्हे चन्द्रिकां युवजने निरतेति॥१०७॥

चन्द्रिकां स्वनिलये त्वसहायां मित्रभावमधिगम्य ययाचे।
कोऽपि सुन्दरतनुस्तनुरूपः स्वेच्छयाश्रयमुपेत्य बिडालः॥१०८॥

मोहकध्वनिमदम्यविलासं स्निग्धशुभ्रमृदुरोमविशिष्टम्।
चन्द्रिका मनुत तं निजमित्रं तुल्यशीलविषयेषु सुसख्यम्॥१०९॥

चन्द्रिकामनुसरन्गृहकार्ये व्यापृतां मृदुपदैरनिशं सः।
मावमाविति वदन् दरभीतः पृच्छतीव न ददासि पयः किम्?॥११०।

चन्द्रिका यदि ददाति न दुग्धं सत्वरं पदतले वनितायाः।
प्रश्रितं विलुठति स्म बुभुक्षुः प्रेमचोदकदृशः परिषिञ्चन्॥१११॥

दीयते यदि पयो निजपात्रे सत्वरं पिबति मीलितनेत्रः।
चिन्तयन्निव धरा लयमीयात्तेन किं मम पयो यदि लब्धम्॥११२॥

चन्द्रिकाङ्कमधिरुह्य दिनान्ते कन्दुकाकृतिमवाप्य स शेते।
मूकजन्तुरनुरागनिबद्धः स्निह्यति ह्यतिशयेन मनुष्ये॥११३॥

मूषकान् निशि हिनस्ति सखेलं पाककोष्ठविघसादनदक्षान्।
प्रीणयन् स्वकलया निजगोप्त्रीं चन्द्रिकां सपदि मूषकभीताम्॥११४॥

इत्थमीप्सितपरस्परबन्धौ तौ दिनान्क्षपयतः कृतकृत्यौ।
कोऽवगच्छति हरेरभिलाषं मित्रताह्यसहजापि सुखान्ता॥११५॥

७. [प्रहर्षिणी]

तत्रासीत्कथितमहापुरे नृपालः सद्वृत्तः प्रथितयशा गुणाभिरामः।
चन्द्राख्यः स्वविषयपालने धुरीणः सन्तुष्यन् प्रियहितकर्मभिः स्वपौरान्॥११६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तस्यासीन्मदननिभो युवा तनूजो विद्यावान् विनयखनिस्त्रिविक्रमाख्यः।
यं दृष्ट्वा पुरललनागणः प्रदध्यौ सासूयं वरयति कामयं सुधन्याम्॥११७॥
चन्द्रस्तं तनुजमपूर्वरूपभाजं तारुण्ये निरुपमशोभया ज्वलन्तम्।
द्रष्टुं द्राक् समुचितकन्यया समेतं दाम्पत्ये समरसशालिनं व्यकाङ्क्षीत्॥११८॥
पुत्रं सोऽगददनुरागपूर्णवाचा विद्यायाः समधिगतोऽसि वत्स पारम्।
तस्मात्त्वं परिणययोग्य इत्यवैमि तन्वीं त्वं सदृशगुणां वधूं वृणीष्व॥११९॥
उक्तिं तामतिसुखदां निशम्य पुत्रो मानार्थं सपदि नियन्त्रितानुभावः।
स्वोद्वाहं निरुपमकन्ययानुमेने तारुण्ये परिणयवाक् सुखावहा वै॥१२०॥
सद्वंश्यास्तनय चिनोम्यहं त्वदर्थं सद्वृत्ताः रुचिरमुखीश्च राजपुत्रीः।
तासु त्वं वरय यदृच्छया मनोज्ञां कन्यां या तव भविता हि धर्मपत्नी॥१२१॥
इत्युक्तः सविनयमब्रवीन्नरेशं भूगर्भे न भवति किं प्रशस्तवज्रः।
अब्धौ किं वदतु लभामहे न मुक्ता ओषध्यो गहनवनान्तरे न किं स्युः॥१२२॥
व्यासस्य प्रथितमुनेः किमाभिजात्यं बालघ्नः सगरसुतो न किं कुलीनः।
विश्वासो मितचयने न मेऽस्ति पुर्यामस्यां ते तृणकुटजेऽपि मे प्रिया स्यात्॥१२३॥
श्लाघित्वा स्वसुतविवक्षितं नृपालः सम्मन्त्र्य स्वहितजनैर्विवाहकार्ये।
पुत्रार्थे परिणयघोषणामसाध्नोदेवं तन्नगरभटैः प्रगे विधेयैः॥१२४॥
भोः पौराः शृणुत नृपस्य घोषणां भो उद्वाहो नृपतनयस्य निश्चितोऽस्ति।
आयान्तु त्वरितपदेन पौर्णमास्यां प्रासादं निशि समलङ्कृताः कुमार्यः ॥१२५॥
आयान्तु त्वरितपदेन पौरकन्या युष्मासु प्रभुतनयो मनोज्ञकन्याम्।
संपन्नामुचितगुणैश्च रूपलक्ष्म्या ज्योत्स्नायां वरयति पौरनृत्यरङ्गे॥१२६॥
इत्येवं नरपतिघोषणां निशम्य कन्यायाः किल जननी प्ररूढमोहा।
एकैका मधुमथनं रहो ययाचे पुत्री मे भवतु नरेशपुत्रपत्नी॥१२७॥
श्रुत्वैतत्सपदि कलाप्युमां स्वपुत्रीं भूषाभिर्नृपसदनोचितैश्च वस्त्रैः।
औत्सुक्यादलमकरोद्वृथाभिलाषा मातृणां निजतनयाः सदा मनोज्ञाः॥१२८॥
संश्रुत्य श्रवणसुखामपूर्ववार्तामुत्कण्ठां ह्यलभत चन्द्रिकाप्यवर्ण्याम्।
किं राज्ञः प्रियतनयस्य कम्रपाणेः संस्पर्शात्ततपुलका न मामकीनाः॥१२९॥
उद्युक्तां जनपसुतस्य नृत्यगोष्ठीमौत्सुक्यादपरिमिताज्जवेन गन्तुम्।
वैमात्रीं प्रणतमुखी मिथो ययाचे गच्छेयं नृपसदनं त्वया सहाहम्॥१३०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मात्सर्यं कथमपि गूहितुं प्रवृत्ता व्याचष्टे स्म मधुरसावहासवाग्भिः।
हञ्जे त्वां नृपसुत एव नाययेद्वै मृग्यन्ते तव सदृशाः कुलीननार्यः॥१३१॥
श्रुत्वा तामभिभवकारिणीं दुरुक्तिं दासीव व्यथितमतिर्विनम्रमौलिः।
नोवाच प्रतिवचनं प्रसह्य कोष्ठं तत्याज प्रणतजनस्य कोऽन्यमार्गः॥१३२॥
आयाता पुरललनासु पौर्णमासी प्रत्याशाकुवलयिनीर्विकासयन्ती।
ऐश्वर्याप्लुतसदनेषु संस्थितासु दारिद्र्योपहततृणावृतोटजेषु॥१३३॥
संसिक्ता हिमसलिलेन राजरथ्या आमोदा मलयजचन्दनप्रसूताः।
प्रासादा युवजनहर्षघोषजुष्टाः पौराणां मुदमवदन्निवापुरान्तम्॥१३४॥
औत्सुक्यं निरवधिकं गृहे कलायाः सम्भ्रान्ते खलु विदधे कलामुमां च।
स्मर्तव्यं बहु नरपस्य सन्निधाने वाग्दोषा दुरभिरुचिश्च गूहितव्याः॥१३५॥
नासाग्रे स्फुरदमलो मनोज्ञवज्रः कण्ठे चाप्रतिमरुचिः प्रलम्बमाला।
नाभ्यन्ते कनकमयी महार्घकाञ्ची नैराश्यं किमु कथयन्त्यहो ह्युमायाः॥१३६॥
गच्छन्त्यां तुरगरथेन सज्जितेन वैमात्र्यां नरपगृहं सह स्वमात्रा ।
दिङ्मूढा चिरमरुदत्स्वमन्दभाग्ये मार्जालं हृदि परिरभ्य चन्द्रिकार्ता॥१३७॥
मार्जालः परिपतति स्म सान्त्वनार्थं मा शोचीरिति वदतीव तामुपेत्य।
तिर्यञ्चः स्वहितजनस्य सर्वभावान् जानन्ति प्रकृतिगतेङ्गितावबोधात्॥१३८॥
पश्यन्ती दरचकिता बिडाललीलां सस्माराभयवचनं मुनेः पुरोक्तम्।
प्रागेव प्रकटितसार्थकप्रयोगं संस्मृत्यामितसुषमामवाप तन्वी॥१३९॥
चित्ते तं समुचितसूचकं बिडालं वन्दित्वा प्रशमितधीर्दृढप्रतिज्ञा।
आसीना स्थिरकमलासनेऽजपत्सा साधूक्तं प्रणतवपुः क्रमेण मन्त्रम्॥१४०॥

८. [उपजातिः-वंशस्थ-इन्द्रवंशा मिश्रणम्]

प्रसह्य देवी स्फुरदुज्ज्वलप्रभा या प्रादुरासीत् जपकर्षिता पुरा।
प्रत्यक्षतां प्राप्य जगाद चन्द्रिकां वत्से प्रियं किं करवाणि तद्वद॥१४१॥
चन्द्रप्रभायामधुना नृपात्मजो वृणोति पत्नीं नृपपालिते वने।
यास्याम्यहं तत्र यथा विभूषिता मातः कुरु त्वं करुणानिधे तथा॥१४२॥
इति ब्रुवाणां परिरभ्य चन्द्रिकामाघ्राय मूर्ध्नि प्रजगाद देवता।
कूष्माण्डमेकं गृहवाटिकाज्जवादुपानयापक्वमपेतमार्दवम्॥१४३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मार्जालमप्यादिशतार्द्रलोचनं षण्मूषकानानय जीविनो द्रुतम्।
वनात् बिलाद्वाथ महानसाद्वा त्वत्स्वामिनीभाव्यसुखप्रदास्ते॥१४४॥
श्रुत्वा निदेशं स दधाव निष्कुटं कुतूहलोत्साहभयप्रचोदितः।
वक्त्रे गृहीत्वा पृथुलान् बिलेशयान् क्षणात्प्रतीयाय कृतार्थतोद्धतः॥१४५॥
अत्रान्तरे सम्भ्रमनुत्तसाध्वसा प्रत्यागता गेहवनात् गृहान्तरम्।
प्रगृह्य कूष्माण्डमखण्डवर्तुलं चन्द्रोपमं मन्दजवेन चन्द्रिका॥१४६॥
ततक्ष कूष्माण्डमपूर्वकौशलान्निरूपयामास रथाकृतिं दृढाम्।
निमेषमात्रेण रथं नृपोचितं देवी महान्तं ससृजे स्फुरद्ध्वजम्॥१४७॥
आदर्शवत् श्लक्ष्णमपूर्वसुन्दरं सुवर्णलिप्तप्रतिमाभिशोभितम्।
महेन्द्रयानोपममैक्षतोत्सुका तं निर्निमेषा रथमेव चन्द्रिका॥१४८॥
सुराङ्गना द्राक् चतुरस्तुरङ्गमान् संस्पृश्य मार्जालधृतान् बिलेशयान्।
व्यकल्पयत् पुष्टबलिष्ठबन्धुरान् प्रकाशयन्ती निजहस्तलाघवम्॥१४९॥
विधाय सूतं सिततोत्रशोभितं तथाखुनैकेन दृढेन लीलया।
अन्येन योधं शितखड्गधारिणं रथाभिपालं तरुणं विनिर्ममे॥१५०॥
निमेषमात्रेण चकार चन्द्रिकां विभूषणैः पार्थिवकन्यकोचितैः।
महार्घरत्नैः खचितैर्विभूषितां स्फुरत्प्रभामुष्टभवृन्ददीप्तिभिः॥१५१॥
सुवर्णसूत्रोतदुकूलनिर्मितस्वरङ्गनारोचककञ्चुकावृता।
बभूव सद्यो लसदुज्ज्वलप्रभा देवीकृपाधारबलेन चन्द्रिका॥१५२॥
सामोदपुष्पैः सुविविक्तवर्णकैः शिरोरुहा दक्षतयैव मण्डिताः।
नेत्रे सुपक्ष्मे सुषमां समाप्नुतां तस्याः सुनीलाञ्जनसूक्ष्मरेखया॥१५३॥
रक्तौष्ठलेपेन जपासुमत्विषं सुखेन नारङ्गदलोपमाधरौ।
अवापतुश्चन्द्रिकयाप्यलक्षितौ प्रसारयन्तौ तरुणार्कवद्द्युतिम्॥१५४॥
अलञ्चकारारुणवर्णचर्चिते तस्याः पदे स्फाटिकपादुकाद्वयम्।
रम्यं घनीभूतशशिप्रभानिभं कामप्यनूह्यश्रियमावहन्निजाम् ॥१५५॥
अयं दिवास्वप्न इति भ्रमे स्थितां जगाद देवी स्मितपूर्वमादरात्।
वत्से रथेन व्रज राजमन्दिरं सुसज्जितेन प्रसभं सुनिर्भया॥१५६॥
परं तु मा विस्मर यामदुन्दुभिर्निशीथमाख्याति न यावदञ्जसा।
तावन्निवर्तस्व गृहं नृपालयान्नो चेद्विनश्येत्सकलं च कल्पितम्॥१५७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भूयाच्छुभं ते गमने मतिं कुरु प्रसन्नवक्त्रा स्मितदीप्तपङ्क्तिः।
इति ब्रुवाणा दिवमुत्पपात ह प्रसह्य देवी चपलेव भास्वरा॥१५८॥

मार्जालमापृच्छ्य सखायमुत्सुका रथान्तरे रत्नकुथास्तृते तले।
निविश्य सूतं विनयेन चन्द्रिका दिदेश गन्तुं नृपसौधमञ्जसा॥१५९॥

रथ्यासु पौरा ललनां रथस्थितामवेक्ष्य तारापथतः समागताम्।
चन्द्रांशुमूर्तिं निशि विस्मयाकुलास्तां निष्कलङ्कां नियतं हि मेनिरे॥१६०॥

दृष्टिप्रसूनैरनुरागसौरभैस्तामर्चमर्चं प्रथमानयौवनाः।
स्थिता ध्वजालङ्कृतराजपद्धतौ न लेभिरे तृप्तिमनङ्गचोदिताः॥१६१॥

कन्याः कुलीना गुणरूपशोभिताः समानकामा नृपपुत्रलोभने ।
म्लानत्वमापुः प्रसमीक्ष्य चन्द्रिकां कुशेशयानीव दिनात्यये भृशम्॥१६२॥

कस्यात्मजेयं नरपस्य सुन्दरी कुतो रथोऽयं सुरयानसन्निभः।
यदीक्षते राजसुतो मनागिमां भवेदनङ्गज्वरबाधितो ध्रुवम्॥१६३॥

वृथास्मदीयं सकलं प्रसाधनं विनापि तेनेयमुषेव दीपयेत्।
इति ब्रुवाणा ललना हतेप्सिता न गूहितुं शेकुरवार्यमत्सरम् ॥१६४॥

रथे नृपावाससमीपमागते बद्धाञ्जलिः प्रत्युदगात्ससम्भ्रमम्।
वहन् रथस्थां वनितां स्वदृष्टिभिः राजप्रतीहारगणः सुशिक्षितः॥१६५॥

सौभाग्यवान्नूनमिमां मनोहरां नृपस्य पुत्रो वरयेत् हरीच्छया।
प्रजल्पतीत्थं बहुशो मिथो जने रथात्प्रसन्नावततार चन्द्रिका॥१६६॥

यदा शनैः साचलदायतेक्षणा नितम्बिनी मन्दगतिर्नृपालयम् ।
तस्या अभिख्यामृतपानकाङ्क्षिणः समागता राजपथस्य पार्श्वयोः॥१६७॥

तस्यां चरन्त्यां नृपपालिते वने छायास्तरूणां सहसा तिरोहिताः।
तस्या रुचा सज्जनसन्निधेः खलु प्रायेण धावन्ति भयार्तदुर्जनाः॥१६८॥

९. [वियोगिनी]

नृपपालितपुष्पवाटिकामगमन् पौरसुता निशामुखे।
अमरालयरोहणे रता इव लक्ष्योन्नतिसंप्रचोदिताः॥१६९॥

यदि मां वरयेन्नृपात्मजो मम पूर्वार्जितपुण्यसञ्चयः।
भविता यदि नो तथापि मे रुचिरोद्यानवनाभिवीक्षणम्॥१७०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इति मानसतर्कबोधिताः परिणामे विगतस्पृहा मुदा।
व्यचरन्सविलासमङ्गना नरपालोपवने सुविस्मिताः॥१७१॥
नरपोपवने कलामुमा भवती पश्यति चन्द्रिकानिभाम्।
किमु कामपि सुष्ठु भूषितां विचरन्तीमिति विस्मिताब्रवीत्॥१७२॥
क्व भवेदिह दीनसेविका दिनकार्येषु रता गृहे भवेत्।
त्यज मोहमियं सुमध्यमा नरपालस्य सुता हि कस्यचित्॥१७३॥
इति मातुरुदीरितेन सा मनसि प्राप्तशमा कथञ्चन।
स्वविधावभजत्स्पृहामुमा युवतीनां सुपतिर्वरेप्सितम्॥१७४॥
अथ राजसुते सुभूषिते स्ववयस्यैः सह नन्दनोपमम्।
कुसुमोपवनं समागते जनघोषो गगनान्तमस्पृशत् ॥१७५॥
विटपाश्रितरम्यबर्हिणान् क्वचिदुन्मत्तनदच्छिलीमुखान्।
क्वचिदायतशीतशाद्वलान् क्वचिदामोदवहान् सुमोद्गमान्॥१७६॥
क्वचिदुल्लसदातवीरुधः फलभारानततुङ्गपादपान्।
विविधाकृतिवर्णमोहकैः कुसुमैरावृतगुल्मसञ्चयान्॥१७७॥
अवलोकयतोऽभितो मुदा नृपपुत्रस्य हृदालयं द्रुतम्।
मदनः प्रविवेश लीलया निभृतं योषिदपाङ्गवर्त्मना॥१७८॥
नवयौवनशोभिनीः स्त्रियो मणिरत्नाभरणैर्विभूषिताः।
विचरन् सविलासमुत्सुका नृपपुत्रः प्रददर्श सर्वतः॥१७९॥
चपलामिव योषितां गणे स्फुरदाह्लादकरूपशालिनीम्।
दरहासविलासमोहिनीं कमनीयां स ददर्श चन्द्रिकाम्॥१८०॥
स्मरसायकलक्ष्यतां गतः स शनैरायतलोचनोऽभ्यगात्।
स्मयमानमुखः प्रसन्नधीरबलां वेपथुमूर्तमानिनीम्॥१८१॥
भयकारणमस्ति नात्र ते ललने त्वत्सुहृदित्यवेहि माम्।
मम मानसराज्ञि देहि मे तव पाणिग्रहणे कृतार्थताम्॥१८२॥
मम हस्तपरिग्रहक्रियामनुजानासि यदि प्रभावति।
प्रणयार्णववीचिसंप्लवे परिषिक्तं कुरुषे चिराय माम्॥१८३॥
इति राजकुमारभाषितं श्रवणानन्दकरं निशम्य सा।
कुरुते न मतिं करार्पणे न निराकर्तुमनर्घयाचनाम्॥१८४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कदलीव मरुज्जवाहता प्रचकम्पे सुभृशं कृशोदरी।
अवलम्बनहेतुनेव तत्करमाशु प्रणयी समग्रहीत्॥१८५॥

तरुणस्य कराग्रसङ्गमात् पुलकस्वेदयुगेन बाधिता।
तनुसंहननश्रिया प्रिया भजते कामपि नव्यभोग्यताम्॥१८६॥

प्रसभं विचकर्ष किं बलादथवा तामवहद्भुजान्तरे।
स्वयमेव गतानुसृत्य तं क्षणमुग्धा न किमप्यवेत्तदा॥१८७॥

रजनीचररश्मिरञ्जिते वरनृत्योचितभव्यकुट्टिमे।
मुदितेन ननर्त चन्द्रिका नृपपुत्रेण सहोत्सवप्रिया॥१८८॥

नृपपुत्रसुहृद्गणैः सह प्रणनर्तुः प्रमदाः समुत्सुकाः।
न हि कापि भवत्यतर्पिता तरुणोत्साहमयं नृपाङ्गणम्॥१८९॥

किमुवाच मिथस्त्रिविक्रमः किमभूतात्महृदुत्थमुत्तरम्।
सुतरां न हि वेत्ति चन्द्रिका क्षणिके स्वर्गसुखे परिप्लुता॥१९०॥

न च वेत्ति हि कालधावनं न च सा क्लाम्यति नर्तने रता।
नववर्षजलार्द्रबर्हिणाननुकृत्य प्रचचाल लीलया॥१९१॥

अथ नर्तनहर्षसागरे प्लवमाना सहसा ससाध्वसम्।
घनगर्जितवद्भयावहं व्यशृणोद्घोरनिशीथदुन्दुभिम्॥१९२॥

हरिणीव मृगेन्द्रगर्जनश्रवणार्ता झटिति प्रमुच्य सा।
नृपपुत्रकरं भयद्रुता तमनापृच्छ्य दधाव मण्डपात्॥१९३॥

अवितर्कितनिर्गमात् स्त्रियाः मतिशून्ये भवति त्रिविक्रमे।
स्मृतवत्यथ देवतावचः स्वरथं प्राद्रवदार्तभामिनी॥१९४॥

अगमद्वनिता यदा द्रुतं व्यगलत् स्फाटिकवामपादुका।
त्वरयाकुलमानसाबला न वराकी तदवेद्रथोन्मुखा॥१९५॥

गृहमेत्य रथादवातरद्वनिता यावदहो तिरोऽभवत्।
सकलो रथवाजिसारथिप्रकरस्तावदतर्क्यमायया॥१९६॥

वसनं च दुकूलनिर्मितं सहसा दासजनोचितं क्षणात्।
अभवन्मणिरत्नभूषणान्यगमन्मन्त्रहतान्यदृश्यताम्॥१९७॥

सुतया सह नर्तनाङ्गणात् गृहमेत्य स्वनियोगतत्पराम्।
अवलोक्य जहर्ष चन्द्रिकां गतशङ्का स्वसुखोद्यता कला॥१९८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१०. [द्रुतविलम्बितम्]

नृपसुते स्मरमार्गणदारिते विलपति प्रिययैव विनाकृते।
नृपभटास्त्वरया हि समानयन्नुपवनाधिगतां मणिपादुकाम्॥१९९॥

व्यलपदित्थमवेक्ष्य स पादुकां कथमसि त्वमिहाद्य निशामुखे।
सुमपदां स्खलितां च विसृज्य तामुपवने पदपांसुभिरावृता॥२००॥

कथय कुत्र गता मम हृत्प्रिया कथय नाम कुलं च मम स्त्रियाः।
कथमहो मम मानसनायिकां पथि विहाय वने न विलज्जसे॥२०१॥

इतरथा न भवेत्तव दर्शनं मम गतिर्हि भवेदतिदुस्सहा।
नियतिरेव गतस्य तु कारणं लघयसि त्वमिमां मम वेदनाम्॥२०२॥

प्रियसुतं विलपन्तमथाब्रवीत् सपदि सान्त्वयितुं धरणीपतिः।
तनुज कातरतां त्यज मा शुचः प्रियतमामचिरात्परिणेष्यसे॥२०३॥

प्रियतमाधृतराजदुपानहा तदनुरूपपदा खलु मृग्यते।
मम भटैर्निपुणैः प्रतिमन्दिरं द्रुतमुपेत्य पुरेऽद्य सुनिश्चयम्॥२०४॥

नृपनिदेशधरैर्हि तथैव सा प्रकटिता नगरे मणिपादुका।
युवतयो ह्ययतन्त समुत्सुका बृहदभूत्पदमानमुपानहः॥२०५॥

श्रुतवती नरपस्य सुनिश्चयं नृपभटान् स्वगृहं समुपाहरत्।
निजपदेन कला मणिपादुकां समधिरोढुमुमां समचूचुदत्॥२०६॥

रमयितुं जननीमिव निश्चिता अयतताप्तुमशक्यमुमा वृथा।
क्व तनुगात्रवती मणिपादुका क्व पृथुलश्चरणो जडयोषितः॥२०७॥

तदनु मन्दमभाषत चन्द्रिका हतदशां विनयेन भिया कलाम्।
अभिलषे नितरामनुमन्यताम् अनुपमामधिरोढुमुपानहम्॥२०८॥

अयि कथं कृपणा मणिपादुकां समधिरोढुमिमां खलु वाञ्छसि।
प्रथितसत्कुलजोचितभाजनं भजति भृत्यजनस्य न लभ्यताम्॥२०९॥

इति वचो भणितं कलया यदा नृपभटैः प्रसभं समुदीरितम्।
भवति नात्र मनागपि भिन्नता भृतकवर्गजनोऽप्यनुमुद्यते॥२१०॥

स्मितमुखी दृढनिश्चयचोदिता सपदि तां स्फुरदुज्ज्वलपादुकाम्।
अधिरुरोह सलीलमलज्जिता नृपभटोत्थमुदा सह चन्द्रिका॥२११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

११. [माल्यभारिणी]

अथ राजभटाः प्रफुल्लवक्त्रा विनयोपेतगिरा समाह्वयन्स्ताम्।
शृणु देवि पुरेशपुत्रपत्नी भवितासि त्वममोघभाग्यशक्त्या॥२१२॥
परिधानमनाविलं वसाना दृढमच्छिद्रमितो नृपालयं त्वम्।
व्रज शीघ्रमुदेति भाग्यसूर्यो नृपपुत्रास्यमिषेण तावकीनः॥२१३॥
शृणुत क्षितिपालयं व्रजामि प्रसभं कामदुघां समर्च्य देवीम्।
समयः प्रतिपाल्यतां भवद्भिः कृपयेति प्रणतावदद्विनम्रा॥२१४॥
प्रमदाऽतुलभक्तिभावपूर्णा मुनिदत्तं प्रबलं जजाप मन्त्रम्।
स्वतनुं प्रणिधाय नैजकक्षे रहसि स्वस्थमना निमील्य नेत्रे॥२१५॥
सपदि स्मिततोयसिक्तवक्त्रा विबुधस्त्री शुभमूर्तिराविरासीत्।
तनये वद किं मयाद्य कार्यं करुणा मे त्वयि सर्वदेत्यवादीत्॥२१६॥
कुरु राजसभार्हभूषणैर्मा जननीं मे भगिनीं च भूषितास्त्वम्।
सृज देवि तथा रथं ससूतं शृणु याच्ञामिति चन्द्रिका ययाचे॥२१७॥
सुकरः खलु पुत्रि ते नियोगः कृतमित्येव मयात्र विद्धि भक्ते।
इति यावदुवाच देवता स्त्री सकलं सृष्टमभूत् हि तावदेव॥२१८॥
लसदुज्ज्वलभूषणैर्विविक्तैर्विमलक्षौमपरिच्छदैश्च रामाः।
सुरयोषिदमोघमाययैव क्षणमात्रेण विभूषिता बभूवुः॥२१९॥
पुरुहूतनियन्तृतुल्यसूतो दृढपुष्टाकृतयस्सितास्तुरङ्गाः।
कनकोदकलिप्तशृङ्गयुक्तो लघुघण्टासहितो रथश्च सिद्धाः॥२२०॥
तनये तव वाञ्छितं प्रपूर्णं सकलं स्थास्यति सृष्टमत्र तावत्।
नववस्त्रविभूषणानि राजा सुखितो दास्यति वो शुभाय यावत्॥२२१॥
इति यावदुवाच दिव्ययोषित् क्षणदेव प्रसभं ह्यभूददृश्या।
अनिरीक्ष्यगतेन तावदेव प्रजहत्याशु कृतिस्थलं कृतार्थाः॥२२२॥
उमया सह लज्जिता विमाता प्रसमीक्ष्याचरणं हि चन्द्रिकायाः।
अपकारकृतां कृतोपकारो बहुशो वर्धयते सतां प्रवृत्तिम्॥२२३॥
स्वसखायमनुद्धतं बिडालं रथमारुह्य सहर्षमाह्वयन्ती।
सह तेन जगाम चाङ्गनाभ्यां वृतबाला जनपालयं जवेन॥२२४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रुरुधे रथमाशु चन्द्रिकायाः प्रतिहारः नृपमन्दिरस्य मार्गे।
अवदत् प्रतिषिध्यतेऽस्य जन्तोर्नृपसौधे नरपाज्ञया प्रवेशः॥२२५॥

यदि चेत् शृणु मे प्रियो बिडालः प्रतिषिद्धोऽस्ति मया सह प्रवेष्टुम्।
जनपः कृपया त्वया निवेद्यो न भवेत् सौधवरे मम प्रवेशः॥२२६॥

दरविस्मयरोषरञ्जितास्यो दृढमेतद्वचनं निशम्य तन्व्याः।
त्वरया नृपनिश्चयोपलब्ध्यै प्रतिहारो नृपसन्निधिं जगाम॥२२७॥

अवगम्य समाकुलेन राजा प्रतिहारेण यथावदुक्तमर्थम्।
स्मितपूर्वमभाषत प्रहृष्टो घनगम्भीररवेण सान्त्वयन् तम्॥२२८॥

प्रतिहार न तत्र कापि चिन्ता नियमो मे न हि युज्यतेऽबलायाम्।
भविता खलु सा मम स्नुषा भो अनुयान्तु प्रमदां शतं बिडालाः॥२२९॥

यदि मूकमृगेषु वृत्तिरस्या इयती प्रेममयी भवेत्तदानीम्।
भविता नियतं प्रसन्नदृष्टिः करुणार्द्रा नगरप्रजास्वमुष्याः॥२३०॥

स्थिरता हृदयस्य वै प्रशस्या ललनायाः स्वबिडालपालनार्थम्।
नृपपुत्रकरावलम्बनाशा स्थगिताहो कुरुते हि कापि नान्या॥२३१॥

नियमः परिपालितस्त्वयाहं बहु मन्ये तव गाढकर्मनिष्ठाम्।
व्रज नायय सादरं सुभाग्यां मम पुत्रस्य समक्षमाशु तन्वीम्॥२३२॥

नृपवाक्यचमत्कृतिप्रहृष्टः प्रतिहारः पुलकावृतार्द्रगात्रः।
समवाप्तुमुदीरितां नृपाज्ञां प्रणतो बद्धकराञ्जलिश्चचाल॥२३३॥

१२. [पुष्पिताग्रा]

अथ नृपतनयः स्मरेण विद्धो निजदयितागमनस्य रम्यवार्ताम्।
स्वसहचरजनैर्निशम्य हृष्टो दिनकरतप्तमहीव वर्षपाते॥२३४॥

अनुपमदयितां निनीषमाणो जनपसुतः प्रययौ सुहृत्समेतः।
निजभवनमुखे स्थितां सुकन्यां वदनरुचैव दिशः प्रदीपयन्तीम्॥२३५॥

अतिशयभयसिक्तवामपाणिं स्वकरतले परिगृह्य चन्द्रिकायाः।
स्वपितृभवनमेव लज्जितां तां पितृनमनाय निनाय राजपुत्रः॥२३६॥

अविरतमनुयाति तां बिडाले अनयदुभे ललना कलामुमां च।
नरपतिनिलयं न कैः प्रशस्या स्वजनवदन्यजनेषु वृत्तिरस्याः॥२३७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दयितनिजसुतं प्रियासमेतं प्रणतममोघशुभाशिषां वचोभिः।
नरपतिरमितोत्सवोऽभ्यषिञ्चत् किमिह सुखं जनकस्य पुत्रभूतेः॥२३८॥
सुतपरिणयमङ्गलार्थसिद्ध्यै निजसचिवं च समादिदेश राजा।
भवतु सकलवैधकार्यजातं नगरजनस्य सुखार्थमित्यवोचत्॥२३९॥
समुचितसुजने विमातृपुत्रीं घटयितुमैच्छदुमां च चन्द्रिका सा।
सविनयमवदत्स्वरागपात्रं यदि भवितेदमहं ध्रुवं सुहृष्टा॥२४०॥
स्वसुतपरिणये निविष्टचित्तश्चतुरमतिस्सचिवस्तदा बभाषे।
निरवधिकगुणो युवा सुरूपी मम सुत एव भवेदुमोपयन्ता॥२४१॥
अभजत हृदयं सुखं कलाया निजतनुजोपयमप्रकल्पनोत्थम्।
विकचसुमरुचिं बभाज तन्व्या मुखमनिरीक्षितमङ्गलादुमायाः॥२४२॥
तदनु सपदि मन्दहासमूर्तिः सचिवसुतो गिरिशाभिधो बभाषे।
प्रियतमपदवीं दधीत रम्या यदि मयि मत्सुखमेत्यपूर्वकाष्ठाम्॥२४३॥
विकसितकुसुमे पपात भृङ्गो नवमकरन्दपिपासितो हि दिष्ट्या।
रुचिकरमभवद्विषक्प्रदत्तं शिवदयया हितमातुरस्य पथ्यम् ॥२४४॥
न किमपि ललना शशाक वक्तुं विलसदपाङ्गदृशो भृशं किलोचुः।
स्मितसहितपरस्परेक्षणैस्तत् तरुणयुगं निजसम्मतिं बभाषे ॥२४५।

१३. [वसन्ततिलका]

पौरान्यमज्जयदलौकिकहर्षसिन्धौ पृथ्वीशपुत्रसुखदामलचन्द्रिकाभा।
संश्रुत्य ते नृपपथेषु विवाहयुग्मवार्तां मिथो शुभकरीं बहुधा शशंसुः॥२४६॥
उद्वाहसंभ्रमविधिं पथि घुष्यमाणं श्रुत्वा भटैर्निजसुखाय यदृच्छयैव।
कर्माणि वृत्तिसहजानि विहाय पौराः रथ्यास्वलङ्करणकर्मणि संप्रवृत्ताः॥२४७॥
कैश्चित्स्वसौधशिखरेषु च चत्वरेषु संस्थापिता गगनचुम्बिलसत्पताकाः।
कुड्यानि सद्मनिकरस्य सुधावलेपैः नूत्नश्रियं ह्युदवहन् पुरि राजमार्गे॥२४८॥
रथ्याः सुगन्धिहिमशीतलवारिसेकैः अम्लानपुष्पनिचयग्रथितार्द्रहारैः।
कन्दर्पचित्रफलकैर्निशि दीपवृक्षैः कामप्यपूर्वसुषमामतुलामवापुः॥२४९॥
पौराः प्रभोर्वरनिमन्त्रणमाददानाः स्वस्थानयोग्यमणिमौक्तिकभूषिताङ्गाः।
स्वच्छप्रशस्तवसनाः शतशः समेताः देवेशसद्मनिभराजतराजसौधे॥२५०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राज्ञा सह स्वप्रकृतीः स्वयमेव राजा सप्रश्रयं ह्याससभाजत राजसौधे।
चन्द्रो नभस्युडुगणान् दयितान् ससन्ध्यः सुस्वागतं न किमसौ वदति प्रदोषे॥२५१॥

कन्याद्वयी परिणये धनिकैश्च दीनैर् औद्वाहिकैर्बहुविधैरभिवर्षिताभूत्।
आशीर्भिरीप्सितफलप्रदवेदवाक्यैः नोपायनं खलु सुखाय यथा सदाशीः॥२५२॥

सन्तर्पयन्ति सकलान् स्म नरेशसूदाः स्वाद्वोदनैश्च घृतभर्जितभक्ष्यभोज्यैः।
द्राक्षाम्रदाडिमरसोद्धृतचोष्यपेयैः ताम्बूलपूगमधुसंस्कृतचर्व्यलेह्यैः॥२५३॥

नात्राभवत् परिणतो न युवा न बालः योऽन्नप्रदानमनुभूय न तृप्तिमाप।
नैवाभवच्च युवतिः स्थविरा कुमारी योपायनं न परिगृह्य विवेद तुष्टिम्॥२५४॥

राजस्नुषाभिमतमेतदिति ब्रुवाणैः तत्तत्पशूचितनवीनसुसिद्धखाद्यैः।
सम्प्रीणिता नगरगोव्रजपक्षिवृन्दाः मार्जालकुक्कुरगणा धरणीशभृत्यैः॥२५५॥

वध्वौ स्वभर्तृसहिते वरभोगभाग्ये पादार्चनाय जननीमभिजग्मतुस्ते।
दुःखं सुखं च युगपत् ह्यनुभूय माता वर्षातपाहतधरेव बभौ विमूढा॥२५६॥

सप्रश्रयं स्वजननीं प्रणिपत्य पुत्र्यौ बाष्पावरुद्धवचसागदतां विनम्रे।
अद्यप्रभृत्यपगतं तव कृच्छ्रजातं मातस्त्वमास्व ससुखं भवनेऽस्मदीये॥२५७॥

माता विहस्य जनसंसदि सानुतापं लज्जानुलिप्तवचसा न्यगदत्स्वपुत्र्यौ।
तुष्टास्मि भोः सपदि चन्द्रिकयोपदिष्टा नास्तीह कार्यमधुना मम जागृताहम्॥२५८॥

वाराणसीं जिगमिषामि ममात्मशान्त्यै पायाद् हरिः पुरजनान् सकलांश्च युष्मान्।
यस्यांघ्रियुग्ममनिशं मनुजाः स्मरन्तः विन्दन्ति शाश्वतसुखं तमहं श्रयामि॥२५९॥

एकाकिनी नु कथमेषि विहाय पुत्र्यौ मा गा इह क्षपय कालमिति ब्रुवाणाम्।
पुत्रीमुमामवददीप्सितनिर्णयां मां रुन्धे न कोऽपि शमथं भज मा शुचस्त्वम्॥२६०॥

[मन्दाक्रान्ता]

मातुः श्रुत्वा गिरिवदचलं निश्चयं तं बिडालः
तस्याः क्रोडं प्रति यतमनाः पुप्लुवे चन्द्रिकाङ्कात्।
एकाकिन्यै सहचरसुखं रक्षणं च प्रदातुं
तिर्यग्जन्तुः स्वऋजुचरितैर्दर्शयेत्तथ्यमार्गम् ॥२६१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

माजरिणान्वहमनुसृतागात् कला पुण्यकाशीं
भर्त्राश्वस्ता प्रियसहचरी चन्द्रिका दीपयन्ती।
राज्ञः सौधं पुरजनपदान् स्मेरवक्त्रा बभासे
भुञ्जानेष्टान् युवसमुचितान् धर्म्यकामान् समृद्धान्॥२६२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उपालम्भशतकम्

'अभिराज' राजेन्द्रमिश्रः

अन्नपूर्णे! दृढं वेद्मि भिक्षां मह्यं न दास्यसे।
तथापि नाधिकारस्ते मत्कपालस्य भञ्जने॥१॥

अद्याऽहं निर्भयं वच्मि भूधरेश्वरनन्दिनि!
सिद्धं स्वपितुः पुत्रीत्वं त्वया पाषाणचित्तया॥२॥

कदर्थितोऽप्यहं मातस्त्वामुपात्तो मुहुर्मुहुः।
तथापि न द्रवीभूता प्रसूस्त्वमसि कीदृशी??॥३॥

अभिराज्या प्रसूतोऽहं न त्वयेति विचिन्त्य भोः।
खलीकृतस्त्वया मन्ये जीवनेऽहं पदे-पदे॥४॥

महामाये महामाये चण्डिके विन्ध्यवासिनि!
दुर्गतं रक्ष रक्षाऽम्ब! त्वदेकमनसं सुतम्॥५॥

अनन्यशरणं मातर्देवतान्तरनिःस्पृहम्।
त्वय्यर्पितमनोबुद्धिं त्वद्यशःकीर्तिचारणम्॥६॥

अहेतुवैरिभिर्नित्यं शातितं परिभावितम्।
रक्ष मां जननि प्रीते! सर्वसामर्थ्यमण्डिते॥७॥

इत्येवमादिवैवश्यदैन्यसाध्वसवाचिकैः।
नित्यम्मया स्तुतोपास्ता त्वं महेश्वरगेहिनि॥८॥

तथापि न द्रवीभूतं हृदयं वज्रनिष्ठुरम्।
वशंवदं जनं हत्वा यशो हन्त कलङ्कितम्॥९॥

निर्विशङ्कं ततस्सोऽहं यथाकाममुपालभे।
न ते रोषाक्तदृष्टीनां यन्त्रणा मेऽस्त्यणीयसी॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ज्ञातं ज्ञातं मया ज्ञातं स्वानुभूत्यैव साम्प्रतम्।
न माकन्दफलं दत्ते सेविताऽपि स्नुहीततिः॥११॥

पाठं पाठं पुराणेषु त्वदीयां कीर्तिशंसनाम्।
मुग्धचित्तोऽहमुद्भ्रान्तो दृढमस्मि प्रवञ्चितः॥१२॥

इदानीं ज्ञायते सम्यक् साऽखिला शौयैवर्णना।
कल्पनया प्रसूताऽस्ति कस्यचित् श्रुतलेखिनः॥१३॥

जननी युवती दीना मे प्रसूताऽत्मजत्रया।
आपादिता नु वैधव्यं विपत्सागरमज्जिता॥१४॥

कनिष्ठो हन्त निर्दोषो सुरेन्द्रो मत्सहोदरः।
दुरन्तपङ्गुतां नीतो जीवन्नपि न किं हतः॥१५॥

यत्नपोष्यमहोऽस्माकं कणादं शैशवं कृतम्।
परावलम्बि निर्हासं, निस्सुखं, सततताकुलम्॥१६॥

किं किमद्य स्मरान्यम्ब! तवोपेक्षाविषव्रणम्।
अभूद्धि संशयापन्नं पाण्डवानां नु जीवितम्॥१७॥

एतत्सर्वं त्वया दृष्टं हन्त मूकान्धचर्यया।
तथापि न कृतं किञ्चित् न दत्तमवलम्बनम्॥१८॥,

पृथेव मामकी माता दीनदीना महीयसी।
नित्यनेत्रगलन्नीरा दह्यमाना हृदग्निना॥१९॥

पुत्रत्रयसुरक्षार्थं द्वाराद्द्वाराण्युपेयुषी।
भिक्षमाणेव हा धातर्निकारं कं न सङ्गता??॥२०॥

माणिक्यमन्दिरे स्वीये मध्येभक्तं विराजिता।
किं न तस्या विपच्चक्रं दृष्टवत्यसि निष्ठुरे॥२१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मातुस्सोदरयोश्चैकस्सहायस्सोऽहमन्तिमः।
तत्प्रगाढाऽनुरागाम्बुशफरस्तन्मयाऽखिलः॥२२॥

यौवनदेहलीभूमिं स्पृशन्नेव ततोऽम्बिके।
योजितो हन्त डाकिन्या कयाचित्पापरूपया॥२३॥

तत्तच्छलैः षड्यन्त्रैश्च तत्प्रवञ्चनयुक्तिभिः।
शाठ्यैर्मायाभिरुद्वेगैर्दुष्कृतैश्च निरन्तरैः॥२४॥

जीवनं ननु जातं मे दुरन्तं यातनागृहम्।
क्षपितं यौवनं हन्त यस्मिन् मुक्त्यर्थिनो मम॥२५॥

एतत्सर्वं विजानासि, किन्तु लोकोऽपि वेत्त्विदम्।
विदित्वा तेऽश्मचित्तत्वं बुध्येदिति प्रकाश्यते॥२६

पराम्बातनुजेनापि मया सोढं सुदुस्सहम्।
अभूतपूर्वं यद्दुःखं तेन किं त्वं यशस्विनी??॥२७॥

कीदृशोऽस्ति विवेकस्ते पृच्छाम्यद्य हरप्रिये:!
प्रमाणं किं भवद्भक्त्या निष्ठाया अर्पणस्य वा॥२८॥

पापिनोऽनार्जवा येऽपि सन्ततं लोकपीडकाः।
सुखं प्रविष्टा दृश्यन्ते तेऽपि भावत्कमन्दिरे॥२९॥

पापार्जितधनैः स्वीयैस्ते निर्मान्ति महालयम्।
यस्मिन् विराजसे मातस्तत्स्वर्णमुकुटोन्मदा॥३०॥

त एव पापिनो दृष्टा धर्माचार्यवशंवदाः।
शर्कराब्रीहिगोधूमैराश्रमक्षेमचिन्तकाः॥31

यदीयमेव पाटी ते समवाप्तुं शुभाशिषम्।
निहता मादृशा अम्ब! लोचनाश्रुधना जनाः॥३२॥

Padma Shri Ramakant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कस्मान्नित्यं परीतोऽस्मि जयेऽकारणवैरिभिः।
किम्मयाऽपहृतं नष्टं मुषितं वाऽशुभात्मनाम्॥३३॥

वर्णाऽवरोऽपि यो विद्वान् विद्यादाता गुरुर्मया।
भाले पद्धूलिमालिप्य नित्यमेव समर्चितः॥३४॥

सामान्यप्रतिभं पुत्रं यस्याऽहमङ्कवर्धनैः।
प्रत्यक्षमेव निर्भीकः पुरस्सारितवानहो॥३५॥

अधमस्सोऽपि पर्याये स्वकीये समुपागते।
मामुपेक्ष्य स्वजातीयामवृणोत् कामपि स्त्रियम्॥३६॥

भक्तिर्निष्ठा सपर्या मे प्रतिभाऽपि खलीकृता।
घातितश्चापि विश्वासस्तेन वर्णाधमेन मे॥३७॥

तन्निकारविषण्णोऽहमनिच्छन्नपि शीर्णधीः।
प्राग्विदेशं ततोऽगच्छं देवभूमिं हिमाचलम्॥३८॥

प्रयागत्यागपीडा मे तथापि हृदयन्तुदा।
न कदापि प्रशान्ताऽभूद् वर्धिताऽप्युत्तरोत्तरम्॥३९॥

विनतञ्चैव वन्दारुं दृढनिष्ठं वशंवदम्।
लब्धं किन्तेन मूढेन मां प्रवञ्च्य दुरात्मना॥४०॥

साऽपि वामा स्वजातीया कृतघ्ना गतयौवना।
प्रकृत्यैव शठा तस्मै किमदात् समुपायनम्॥४१॥

लोकनिन्दा वृता हन्त परलोकोऽपि नाशितः।
मृतघट्टपिशाचोऽसौ जीवत्यद्य यशश्च्युतः॥४२॥

अद्यापि निभृतं लोका दृष्ट्वा तं प्रतिचत्वरम्।
वदन्त्येव तिरस्कृत्य शिष्यं भुङ्क्तेऽयमेनसी[1]॥४३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्त्रियोऽखिला भवद्रूपा इत्येवं हि समुच्यते।
किं भणानि परं तस्या विषये घातितो यया॥४४॥

प्रीतिमावोदुमिच्छन्ती प्राणैरपि पतिंवरा।
मदेकनिष्ठाऽनन्या च हन्त सप्ताऽनयत्समाः॥४५॥

अकस्माद्धि ततस्सैव जाता पर्यङ्कशायिनी।
कस्यचिन्नृपशोर्मातर्ध्वान्तेषु मां प्रकुर्वती॥४६॥

तदुद्वाहविभावर्यां त्वद्गवाक्षपुरः स्थितः।
अहं मौनमुपास्थाय दृगश्रुक्लिन्नविग्रहः॥४७॥

धिक्कृतो न्यक्कृतो नष्टो वञ्चितो मज्जितोऽर्दितः।
समभूवं समक्षं ते सर्वलोकखलीकृतः॥४८॥

कालरात्रिं मदीयां तां कालिके! स्मरसि ध्रुवम्!
कन्दुकीकृत्य मद्भाग्यं खेलन्ती, नोऽथवा मनाक्॥४९॥

त्वयि मातर्यदि स्त्रीत्वं समस्तं सुप्रतिष्ठितम्।
कस्मात्तर्हि तदालम्ब्य जीवनेऽस्मि कलङ्कितः॥५०॥

तस्याः कृतघ्नवेश्याया व्यभिचारेण धर्षितः।
चिरं यावदहं जातो विक्षिप्तो गतगौरवः॥५१॥

पिङ्गलेवाऽश्वपालं सा श्रिता भुङ्क्तेऽद्य रौरवम्।
तथापि संस्मृतिस्तस्याः शोकशङ्कुं समेधते॥५२॥

प्रतीक्षते स्म या काचिन्मां सुसौम्या कुलालजा।
तामवाप्याऽभवं धन्यो भुवने भाग्यवत्तमः॥५३॥

किन्तु यावन्न साऽवाप्ता तावत्पश्चात्तपन्नहम्।
कर्माधिं नारकीयं वा सोढवान्न सुदुस्सहम्॥५४॥

Padma Bhushan Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भावि नैव सुखं दुःखं जानीते खलु पूरुषः।
वर्तमानैः सुखैर्दुःखैर्मोदतेऽथ विपद्यते॥५५॥

दैवज्ञोऽपि न दैवज्ञः केवलं नाटयत्यलम्।
दैवज्ञतामसौ दीनः सर्वज्ञः केवलं विधिः॥५६॥

सवित्री सर्वदेवानां त्वं वा जानास्यनुत्तमम्।
विश्वज्ञानमसन्दिग्धं यथाभाऽखिलकाशिनी॥५७॥

तथाऽप्यहं विपृच्छामि मातरं सुतगौरवैः।
कल्कने चक्रव्यूहेऽहं कस्मान्नित्यं निपातितः॥५८॥

कुलालजैव यद्यासीद् धर्मपत्नी ममाऽनघा।
हस्ते नु जारजातायाः कथङ्कारं निपातितः॥५९॥

दुःस्वप्न इव सोऽप्येवं वृत्तान्तोऽवसितोऽधमः।
स्वीयं स्थायि तलं प्राप्तं मयाऽन्ते वहदम्बुना॥६०॥

कीदृशं मेऽस्ति दुर्भाग्यं, पश्य पर्वतनन्दिनि!
यैः कृतज्ञैस्सदा भाव्यं कृतघ्नास्तेऽधमा मम॥६१॥

निःस्वार्थं ये हि सम्बद्धा गुणमात्रैकशंसिनः।
शिष्या मित्राणि दूरस्थाः कोविदा बुधपण्डिताः॥६२॥

ते तु गायन्ति मद्गीतं मत्कवित्वरसोन्मदाः।
प्रीतिबन्धं मया सार्धं ते संयोज्य कृतात्मनः॥६३॥

कनिष्ठा वा वरिष्ठा वा तुल्यावस्थाश्च मध्यमाः।
सर्वे मय्यभिराजे ते स्निह्यन्त्येव निरन्तरम्॥६४॥

स्वार्थसिद्धिदृशा किन्तु ये मया सह सङ्गताः।
मया सौधाट्टमानीताः काकाद्धंसाश्च निर्मिताः॥६५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

असिद्धे सति कस्मिंश्चित् तदभीष्टप्रयोजने।
त एव प्रसभं जाताः कृतघ्नाः प्रीतिघातिनः॥६६॥

कृतघ्नानां स्फुरत्पङ्क्तौ नाम शीर्षे यदङ्कितम्।
तदस्ति करुणेशाख्यः प्रद्युम्नमूलसंज्ञकः॥६७॥

तीर्थध्वाङ्क्षोऽयमुन्मत्तः कुक्कुरोऽगृहघट्टकः।
स्मरकीटश्च दुर्वृत्तः लम्पटो लटकाधमः॥६८॥

अधमो रक्षिसेवातः सार्धचन्द्रं बहिष्कृतः।
महीयसीं महादेवीं[1] समालम्ब्य समाद्दतः॥६९॥

क्व कवीन्द्रधुरि ख्याता छायावादकवीश्वरी।
महीयसी महादेवी क्व चायं द्वारकुक्कुरः??॥७०॥

आत्मानं मानसं पुत्रं तदीयं ख्याति सैरिभः।
शब्दार्थतत्त्वमूढोऽपि खराक्रन्दी कवीयति॥७१॥

अधन्येन मयैवाऽयं जातु पूर्वं कृपान्वितः।
मयकैव महादेवीं द्रष्टुकामोऽयमापितः॥७२॥

सहसैव महादेव्याः प्रयाणे सत्ययं खलः।
कूटपत्रबलै[2]र्जातस्तद्दायादोऽद्य संसदि॥७३॥

छलच्छद्मप्रवीणोऽयं प्रकृत्या तस्कराधमः।
कालनेमिरयं शौण्डः शम्बरो वा मयात्मजः॥७४॥

मत्संसर्गमहिम्नैव काव्यगोष्ठ्यां प्रवेशितः।
नैकधोपकृतश्चार्थैः कृच्छ्रे दुःखे समर्थितः॥७५॥

वाहनं फीयेटाख्यं मे क्रीत्वा जाल्मोऽयमस्थिरः।
जनं कञ्चिन्निहत्य द्राङ् मयि क्षिपति किल्विषम्॥७६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मद्विश्वासबलेनैव समादाय कराक्षरम्।
कूटप्रमाणपत्राणि कारितवानयं खलः॥७७॥

सङ्कटे पतितं दृष्ट्वा तदभीष्टं मया कृतम्।
हन्त मामेव सन्दग्धुमयं भस्मासुरायते॥७८॥

सोऽप्यभिनयति क्लिष्टां भक्तिं ते भुवनेश्वरि!
प्रकाशोऽहमसौ ध्वान्तो हन्तभक्तावुभौ तव??॥७९॥

त्वत्कृपामृतवर्षाया इदं मर्म न वेद्म्यहम्।
,सम्भावयसि देवेशिः पूताऽपूतौ कथं समम्॥८०॥

विपद्भिर्जीर्णजीर्णोऽहं मातःशीर्णोऽस्मि साम्प्रतम्।
शक्तिर्न विद्यते योद्धुं क्षीयते मे जिजीविषा॥८१॥

तद्यदि स्यात्तवाऽभीष्टं प्राणान् हत्वा महेश्वरि!
भवेयं नामशेषोऽहं नाऽन्यः पन्था विलोक्यते॥८२॥

साध्वी सौम्यतनुर्जाया मधुवाङ्मदनुवर्तिनी।
शिलीध्रकोमलो जात्तो विद्याविनयमण्डितः॥८३॥

परास्बास्तुतिकारश्चाप्यहं त्वत्कीर्तिगायनः।
एते त्रयोऽप्यहोरात्रं त्वदनुस्मरणे रताः॥८४॥

यदि मातरसह्याः स्युरनर्हाः सुखमञ्चितुम्।
तत्समेषां क्षणेनैव प्राणलीलां समापय॥८५॥

महिषच्छागमेषाणां रक्तपानैर्न तोषिता।
मन्येऽस्माकमसृक्पानैस्तव तुष्टिर्भविष्यति॥८६॥

सुतो विपद्भिर्भिद्येत क्रन्देन्मृत्युव्यथां श्रयन्।
सस्मितं जन्मदात्री च तिष्ठेत्किञ्चिन्न कुर्वती॥८७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मातरं तादृशीं धिग्धिक् सर्वथा धिक्तमात्मजम्।
जननीसुतसम्बन्धं तादृशं धिगहो शतम्॥८८॥

इतोऽग्रे नाह्वयामि त्वां भवामि वा त्वदाश्रयः।
सोढव्यमसहायेन मया सर्वं महेश्वरि!!८९॥

जनकश्शैशवे हित्वाऽदृष्टकायो दिवङ्गतः।
चिरं संरक्ष्य माताऽपि प्रयाता पितुरन्तिकम्॥९०॥

अग्रजो मे महायोगी स्यन्दिकाजलमज्जितः।
मध्येमार्गं जहौ सार्थं बन्धुप्रणयमूर्तिमान्॥९१॥

एक एवाऽवशिष्टो मे महात्माऽनुजसोदरः।
सोऽपि काश्यां तनुं त्यक्त्वा शिवसायुज्यमाश्रितः॥९२॥

श्रीमद्दुर्गाप्रसादस्याऽभिराज्याश्चैकलस्सुतः।
इदानीमवशिष्टोऽहं त्वन्मनास्त्वदुपाश्रयः॥९३॥

दुःखे सुखे विपच्चक्रे द्वैधे शोके पराभवे।
हर्षे माने च सम्भावे पुरस्कारे सुखोदये॥९४॥

मातर्जानासि यत्सद्यः प्रणतोऽहं विनम्रधीः।
सभार्यस्ससुतो गौरि! त्वामेवैकामुपैम्यहम्॥९५॥

त्यक्तो विष्णुर्विधिस्त्यक्तस्त्यक्ताः सर्वेऽमृतान्धसः।
त्वत्कृते त्वद्भवोऽप्यम्ब! ननु पश्चात्कृतो हरः॥९६॥

यतस्त्वमसि सर्वेषां देवानां जननी जये।
त्वयैव शक्तिमन्तस्ते परया शक्तिरूपया॥९७॥

यद्भ्रुवोः भङ्गमात्रेण विश्वमुद्याति लीयते।
सा न कस्मादविपद्धन्त्री मदीयत्येव विस्मयः॥९८॥

Padma Shri Rama Kant Shukla Collection at Devi Vani Parishad, Uttam Nagar, New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पुरन्दरादिदेवान् या स्वयंशक्तांश्च रक्षति।
सा न मां त्रायते कस्माद् मानवं सुलभापदम्॥९९॥

तदिदानीं हरप्रीत्या शापिताऽस्यम्ब! चण्डिके।
जीवनं कुरु निर्विघ्नं नामशेषमथोऽपि वा॥१००॥

निर्यद्दृगश्रुमषिकामुपयोज्य सोऽहं
स्वीयां व्यथां हृदयतूलिकया लिखामि।
पश्यामि, किन्नु कुरुते जननी पराम्बा
शप्तापि हन्त्यवति वा वृषभध्वजेन॥१०१॥

उपालम्भशती जूने द्वादशेऽह्नि प्रपूर्यते।
ग्रहाकाशखयुग्माब्दे खैस्ते सायन्तने भृगौ॥१०२॥

॥ इतिश्रीमद्दुर्गाप्रसादाभिराजीमध्यमतनूजेन त्रिवेणीकविनाऽ
भिराजराजेन्द्रेण प्रदत्तमुपालम्भशतकमवसितम् ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इदं विश्वम् (संस्कृतगजलम्)

प्रो. (डॉ.) महेश झा
कलायतनम्, शास्त्रीनगर मुंगेर-८११२०१

जालकलुषितमिदं विश्वम्।
कालकवलितमिदं विश्वम्॥१॥

कोकिलाकूजितं विरलम्।
काकबधिरितमिदं विश्वम्॥२॥

जाह्नवीजलमलं मलिनम्।
मधुपिपासितमिदं विश्वम्॥३॥

हेममोहितमखिलमधुना।
प्रेमविधुरितमिदं विश्वम्॥४॥

दम्भदलितं दीनवृन्दम्।
दानवर्जितमिदं विश्वम्॥५॥

दुर्जनार्जितमाधिपत्यम्।
साधुविहसितमिदं विश्वम्॥६॥

हंसकारण्डवविरहितम्।
बकव्याहतमिदं विश्वम्॥७॥

रामवर्जितमतिविमुग्धम्।
कामनर्त्तितमिदं विश्वम्॥८॥

कृष्णगीतामृतमपथ्यम्।
कंसमर्दितमिदं विश्वम्॥९॥

पारलौकिकभयमवसितम्।
वञ्चनारतमिदं विश्वम्॥१०॥

जीवनं वत मानवीयम्।
वेत्त्यकिञ्चनमिदं विश्वम्॥११॥

आत्मविध्वंसकविधानैः।
ज्ञानगर्वितमिदं विश्वम्॥१२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आशा

डॉ. रमाकान्त शुक्लः

आशे! ते महिमानं कः शक्तः पूर्णतो गातुम्।
ब्रह्मा हरिर्हरो वा शेषो वा शारदा वापि॥१॥

जने जने त्वं व्याप्ता कणे कणे त्वं निलीनासि।
सत्यं शिवं विधत्से सुन्दरमथ यं जनं वृणुषे॥२॥

नास्तेऽलङ्कारो मे वाचामास्ते तथा न गुणः।
आशां तथापि कुर्वे तव गुणगानस्य मन्दमतिः॥३॥

नास्ते परीक्ष्यवादी यस्त्वां दुःखं परं मनुते।
आशे! सुखं परं वै त्वमेव जगतोऽवलम्बनमसि॥४॥

अथ कतिपयैर्वचोभिर्दृष्टान्तैः कैश्चिदप्याशे।
तव महिमानं गातुं प्रवृत्त एषोऽस्मि सञ्जातः॥५॥

स्खलनं जनस्वभावो यद्यनुचितमत्र किञ्चित् स्यात्।
तस्य कृते क्षन्तव्यस्त्वयाहमाशे महोदारे॥६॥

सम्बोध्या क्वापि भवेः क्वापि च कर्त्री प्रथमपुरुषे।
एवं विविधैः रूपैस्तव महिमाविर्भवत्यग्रे॥७॥

आर्यार्यागीतिर्वा मात्रावृत्तं प्रयुज्यतेऽत्र मया।
यस्या लक्षणमाप्यं कस्मिन्नपि लक्षणग्रन्थे॥८॥

आशावाद्यहमस्मि तत्प्रेरणया सुचारु जीवामि।
नैवापयातु सा मे हृदयात् सञ्जीवनी शक्तिः॥९॥

लक्ष्यसुकल्पनमाशा तामनुसृत्यैव जायते यत्नः।
प्रथमं तु योजना स्यात् क्रियान्वयो भवति तत्पश्चात्॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'साक्षात्कारो भवति, प्रस्थास्ये तत्कृते श्वोऽहम्।
अहं नियुक्तो भविते' त्याशा मनुजं करोति संस्फूर्तम्॥११॥

'मम चयनं नो जातं, का हानिस्तेन मे जाता।
भाविनि साक्षात्कारे स्यां सफलो' जयति युवकाशा॥१२॥

'धार्ष्ट्यं चरन्नयं स्यात् प्रतिवेशी मे कदापि भद्रजनः।'
इत्याशयास्य सहते पार्श्वनिवासी कुटिलचेष्टाः॥१३॥

'ममं देहे मधुमेहे नैव भवेच्छर्करावृद्धिः।'
इत्याशयैव रोगी स्वादुमधुव्यञ्जनान्यसौ त्यजति॥१४॥

सूर्यस्याशां कुरुते पृथिवी तस्याश्च चन्द्रोऽयम्।
तारा ग्रहांस्तथोल्का ब्रह्माण्डे भ्रामयत्याशा॥१५॥

'नैराश्यं परमसुखं यदि मनुषे, ब्रूहि तन्मे त्वम्।
किं 'नैराश्य'– पदेऽपि न विलसत्याशा हसन्तीव॥१६॥

बाला वा स्यात्तरुणी प्रौढा वृद्धाथवास्त्वाशा।
रञ्जयति मनो ध्यातुः स्मितवदनाकर्षणेन युता॥१७॥

धर्मार्थकाममोक्षप्राप्तेराशास्ति किं त्याज्या?
किमु पुरुषार्थचतुष्टयमृते भवति कोऽपि ना पूर्णः॥१८॥

त्यजतु दुराशामथवा त्यजतु निराशां कदाशां वा।
त्यजतु कदापि सदाशां नरो न भद्रं यदीच्छति सः॥१९॥

जयतीयं खल्वाशा देशजनानां मनस्सु जागरिता।
'सौराज्यमथ समृद्धिः राष्ट्रेऽस्मिन् सर्वदैव स्यात्'॥२०॥

'कलहं कृत्वा यातः कार्यालयमद्य मे पतिः प्रातः।
अनुनेष्यति मां सायं' पत्न्या आशा जयतु सेयम्॥२१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जयतादियमप्याशा–'कार्यपरः स्यात्समोऽपि सर्वत्र।
दिवसे श्रमव्रती स्यात्, सायं प्रातः सदन्नभोजनं लभताम्'॥२२॥

इयमप्याशा जयतात्–'भवतात् काले जगति वृष्टिः।
प्रभूतमन्नं दुग्धं विद्युच्छक्तिश्च येन स्यात्'॥२३॥

इयमथ जयतादाशा – 'सर्वे शिक्षां लभन्तां वै।
सर्वे स्वस्थाः सन्तः सेवन्तां विश्वरूपेशम्'॥२४॥

'आशाधृतमस्ति जगत्' – लोकोक्तिरियं जयति लोके।
'तत्राशास्ते यत्र श्वासोऽ'थाभाणको जयति॥२५॥

इयमेवाशा नाट्ये प्राप्त्याशारूपमाधत्ते।
सैवाग्रे नियताप्तिः फलागमश्चाप्यथो भवति॥२६॥

'यक्ष्येऽहं यदि, मयका स्वर्गो लभ्यस्तदा नूनम्।
इयमाशा मीमांसाशास्त्रे यज्ञस्य कारणं भवति॥२७॥

'दुःखत्रयाभिघातो व्यक्ताव्यक्तज्ञविज्ञानात्'।
इत्याशयैव सांख्यं मर्त्यो व्यवहृतिपथे नयति॥२८॥

'मायाजीवब्रह्मज्ञानान्मोक्षोऽस्तु मे नूनम्'।
इत्याशयैव वेदान्त्यनुभववाक्यं समाश्रयते॥२९॥

'चित्तस्य वृत्तयो मे योगेन निरोधमाप्स्यन्ति।'
इत्याशा युञ्जानं योगसृतिं रोढुमीरयति॥३०॥

'स्थितिरियमास्ते ब्राह्मी स्थित्वास्यामन्तकालेऽपि।
ब्रह्मपदं प्राप्स्यामी' त्याशेरयति स्थितप्रज्ञम्॥३१॥

सन्ध्याकर्मणि सूर्योपस्थानमनुः किमाशा नो।
'जीवेम वयं शरदः शतं च पश्येम शृणुयाम'॥३२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आशा तृष्णा वा स्यात् भवेत् पिपासा स्पृहा वापि।
अनया विना तु जीवनमास्ते निर्लक्ष्यमथ रुद्धम्॥३३॥

शतकमथो साहस्त्री नो शक्ता गुणगणख्याने।
आशाया इयमास्तेऽनादिरनन्ताप्रमेया च॥३४॥

'इह जन्मनि यन्नाप्तं भाविनि जन्मनि भवेत् प्राप्यम्।'
इत्याशयैव जीवो नानायोनिषु परिभ्रमति॥३५॥

जह्यां धनागमाशामथ जह्यां जीवनस्याशाम्।
किन्तु प्रभोरकारणकरुणाशां वद कथं जह्याम्॥३६॥

'दधिभाण्डं भेत्स्यामो नूनं जन्माष्टमीदिवसे।'
गोविन्दा इत्याशाभरिता स्तूपं विनिर्मान्ति॥३७॥

'दधिघटभञ्जनखेला-स्पर्धायां नो जयो भविता।'
गोप्यो मुम्बापुर्यामाशासाना विलोक्यन्ते॥३८॥

'अस्माकं सन्ततयो दास्यन्ति जलाञ्जलिं श्राद्धे।
अस्मभ्यं' पितर इमामाशां न परित्यजन्ति पितृलोके॥३९॥

'परमेशो मयि करुणां विधास्यती'त्याशया पूर्णः।
निष्कामः सन् भक्तः सर्वान् कामान् परित्यजति॥४०॥

यद्याशया विहीनं जगदिदमास्तां तदा भ्रातः!
संसारचक्रमेव स्थगितं स्यान्नीरसं च स्यात्॥४१॥

'आशाधृतमिदमास्ते जगदि' त्याभाणकोऽन्वर्थः।
आशाविहीनजनता प्रविशत्यन्धं तमो दीना॥४२॥

आशैवास्त्यवलम्बनमिह लोके कालयापनस्य परम्।
आशां विना तु लोको निष्क्रिय इव जायते नूनम्॥४३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'मम पुत्रोऽयं मूर्खः स्यादेव कदाचन प्राज्ञः।'
इत्याशयास्य पित्रा क्रियते कस्को न वा यत्नः?॥४४॥

'बसयानं गृह्णामी'त्याशापूरितमना दिल्ल्याम्।
धावत्यनुबसयानं तरुण इवायं नरो वृद्धः॥४५॥

शुक्ला वा स्यात् कृष्णा वा स्यादभिसारिका युवतिः।
प्रियमिलनाशापूरितचित्ता गणयति न सृतिकष्टम्॥४६॥

अङ्गं गलितं पलितं मुण्डं च मुखं दशनहीनम्।
भैक्ष्याशयैष नूनं वनीयको यापयति कालम्॥४७॥

'मम कविता वा लेखो नूनं पत्रे प्रकाशितो भविता।'
इत्याशया कविस्तं सम्पादकपार्श्वमापयति॥४८॥

'अन्त्येष्टिं मे कुर्यात्स्वयमागत्येह शङ्करो नूनम्।'
इत्याशयास्य माता संन्यासायानुमनुते तम्॥४९॥

विकचं कुसुमं दूरे मकरन्दपरागसंवलितम्।
तन्मधुपानस्याशा रोलम्बं धावयति तूर्णम्॥५०॥

'वेतनवृद्धिर्नः स्यादि' त्याशापूर्णमानसाः श्रमिकाः।
कार्यावरोधघोषं कृत्वा वेष्टनसृतिं समुपयान्ति॥५१॥

आशा दुरत्ययास्ते तस्याः पारं न कोऽपि याति यतिः।
शून्ये स्थित्वापि यमी मोक्षाशां नो परित्यजति॥५२॥

तृष्णा स्पृहा पिपासा कोशे चाशासमार्थकाः प्रोक्ताः।
किन्त्वाशाव्युत्पत्तिर्व्याप्त्यर्थकधातुतो जाता॥५३॥

स्वादिगणीयो धातुः पाणिनिना सम्मतो ह्याशू व्याप्तौ।
तस्मादाशा सिद्धा, सा विश्वं व्याप्य जयति सदा॥५४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यथा व्यापको विष्णुर्लोकत्रितये तथैवाशा।
व्याप्येदं ब्रह्माण्डं दुरत्यया जयति दुस्त्याज्या॥५५॥

'जीवनपर्यायः किम्? अग्रेसरणस्य कास्ति परिभाषा?'
प्रश्नस्योत्तर'माशा' द्विशब्दसिद्धं जयति लोके॥५६॥

'मूढ जहीहि धनागम-तृष्णा'मिति वाक् कथयितुं सरला।
किन्तु व्यवहर्तुमियं कठिनास्तेऽसम्भवा चास्ते॥५७॥

को नाशासंस्पृष्टः संन्यासी वा गृही योगी?।
निःस्वो वा सधनो वा बालो युवकोऽथवा वृद्धः?५८॥

आशा कस्यापीयं ज्ञानावाप्तेर्भवति लोके।
भक्त्यावाप्तेः कर्मावाप्तेर्वा कस्यचिद् भवति॥५९॥

कस्यापि यशोऽवाप्तेराशा भवतीह संसारे।
जीवनमुक्तेरथवा निर्वाणस्यास्ति कस्यचिच्चाशा॥६०॥

'मायावतीप्रशासनमुच्छिन्नं शीघ्रमेव भवेत्।'
इत्याशया मुलायमसिंहो जनतासभां कुरुते॥६१॥

मायावत्याशास्ते 'प्रधानमन्त्री त्वहं भविष्यामि।'
आशेयं यदि भग्ना तदा तु कष्टं भवेत्तस्याः॥६२॥

क्षुद्राणां कामानां पूर्तेराशा न कर्तव्या।
किन्तूदात्तोद्देश्यप्राप्तेराशा तु करणीया॥६३॥

शकुन्तलाशासाना पतिमिलनं काश्यपाश्रमभुवि।
परिधूसरे वसाना वसने विरहव्रतं धत्ते॥६४॥

पतिराशा पत्न्याशा माताशा जनक आशास्ते।
सन्तानमथो मित्रं ह्याशारूपं जगत्सर्वम्॥६५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मनसि सदा सुसमाधिनि उदेत्युषेव स्मितास्याशा।
आशाभङ्गे सकलं जीर्णारण्यं जागद्भवति॥६६॥

तुलसीदासस्याशा रामोऽस्तीत्येव तेन कथितं वै।
मीराया आशास्ते गिरिधरगोपालनागरः कृष्णः॥६७॥

बुभुक्षितस्याशास्ते भोजनमुदरप्रपूर्तये यत्स्यात्।
नग्नस्य वस्त्रमास्ते वासविहीनस्य गृहमाशा॥६८॥

तीर्थयात्रिणामाशा पूर्णा स्यात्तीर्थयात्रायाम्।
ध्यानस्थस्याशेयं 'लयो भवतु मे ऽ प्रमेयेशे॥'६९॥

'धर्मयात्रया मे स्यात् कल्याणं किञ्च सन्तुष्टिः।'
इत्याशया सहन्ते लोका मार्गस्य कष्टानि॥७०॥

'युगलं मे स्यात् सिद्धम्' इत्याशापूरितानि सत्त्वानि।
वनाब्धिगिरिमरुभूमिषु 'डिस्कवरीचैनले' पश्य॥७१॥

'क्रेष्यति फलानि दत्वा मूल्यमनल्पं गृहस्वामी।
गृहपति' रित्याशास्ते फलविक्रेता गृहस्य पुरतो वै॥७२॥

'पादत्राणे धृत्वा पदयोर्धूल्याथ धूसरिते।
आयास्यति मम पार्श्वं' कोऽप्याशास्ते हि चर्मकरः॥७३॥

'ग्रीष्मे भीष्मे पास्यति जनो घटस्थं जलं शीतम्।'
इत्याशया कुलालस्तापयति घटाननलगर्ते॥७४॥

'आयास्यत्यपराधी कश्चित्प्रतिभूति-कार्यार्थम्।'
धर्मकञ्चुकं श्यामं धृत्वायं प्राड्विवाक आशास्ते॥७५॥

इयं च रूपाजीवा तिष्ठन्ती स्वीयगृहवलभौ।
आशास्ते ह्यागमनं ग्राहकतरुणस्य धनदस्य॥७६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

गृहनिर्माणश्रमिका आशायां वृत्तिलाभस्य।
तिष्ठन्ति राजमार्गे वर्तनदातुः प्रतीक्षायाम्।।७७।।

'उत्पत्स्यतेऽत्र कश्चित्समानधर्मा ममायत्याम्।'
इत्याशया प्रणीते भवभूतिः स्वाभिमतकाव्यम्।।७८।।

'आयास्यति मम देशे विदेशमुद्राहमहमिकया।'
कौमनवेल्थक्रीडा आयोज्यन्तेऽनयाशयापि सखे।।७९।।

'वर्धिष्यते प्रतिष्ठा क्रीडास्पर्धा-सुयोजनेन देशस्य'।
इत्याशयापि योजक इच्छति साफल्यमेतासाम्।।८०।।

'कौमनवेल्थक्रीडाः निष्प्रत्यूहं समाप्तिमेष्यन्ति।'
इत्याशा कलमाडिं प्रेरयति पदप्रतिष्ठार्थम्।।८१।।

क्रीडामन्त्र्याशास्ते विना विरोधं समाप्ताः स्युः।
राष्ट्रकुलक्रीडा या विज्ञाप्यन्ते सकलविश्वे।।८२।।

'राष्ट्रकुलक्रीडायाः साफल्यं नैव भविते'ति।
आशेयं मणिशंकर-चित्ते जागर्ति खसुममिव।।८३।।

मनमोहनसिंहस्याशास्ते यद्राष्ट्रकुलखेलाः।
सफलतया सम्पन्नाः स्युर्दिल्लीराजधानीभुवि।।८४।।

'अस्मद्देशो लभतां क्रीडास्पर्धासु नैकासु।
महारजत-पदकानी' त्याशास्ते देशजनतायाः।।८५।।

मणिशङ्कर-कलमाड्योरहिनकुलं दृश्यते देशे।
अनयोरेकतरस्यैवाशापूर्तिर्भवेद्बन्धो।।८६।।

राष्ट्रकुलक्रीडानां समापने सफलतापूर्वम्।
जाते दिल्लीनगरे भग्ना मणिशंकरस्याशा।।८७।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

परिवारप्रमुखस्याशास्ते यन्मे कुटुम्बस्य।
सम्मिल्य सदस्या वै कुर्युः प्रगतिं प्रतिष्ठां च॥८८॥

ग्रीष्मे भीष्मे गवया यूथं निर्माय दूरमभियान्ति।
आशासाना 'लभ्यं क्वचित्तडागे पयोऽस्माभिः'॥८९॥

सिंहा मृगाः करीन्द्राः भल्लूकाः शूकरा महिषाः।
पानीयं जलमाप्तुं विपिने भ्राम्यन्ति बद्धाशाः॥९०॥

आषाढस्य प्रथमे दिवसे गर्जत्ययं मेघः।
कर्षण-बीजावापावाशास्ते समयतः कृषकः॥९१॥

'अन्तर्वर्त्नी धेनुः प्रसूय वत्सं यथाकालम्।
मम पुत्रार्थं दास्यति पयो'जयति मातुराशेयम्॥९२॥

पारावतदम्पत्योराशेयं स्याच्चिरञ्जयिनी।
अस्मत्पोतो गगने समयेन्नोड्डयतु वर्धितो भूत्वा॥९३॥

विडालिकाया आशा 'मूषिकलब्धिर्भवेन्मह्यम्'।
श्येनस्याशास्तीयं 'पक्षी लभ्यो मया भुक्त्यै'॥९४॥

पुरोहितानामाशा 'यजमानानां समृद्धिः स्यात्।
बहु देयमस्तु तेषां योगक्षेमं चलतु येन'॥९५॥

ग्रन्थिभेदकानामियमाशास्ते 'यात्रिणः सर्वे।
पुष्कलधनं गृहीत्वा गृहाच्चलेयुः स्वयात्रार्थम्'॥९६॥

भिक्षूणामियमाशा 'भैक्ष्यं लभ्येत नः प्रचुरम्।'
आशेयमातुराणां 'स्वास्थ्यं संलभ्यमस्माभिः'॥९७॥

आशास्यते सुगुरुभिः 'परिणामः स्यात्परीक्षायाः।
एवम्भूतो यत्र श्रेष्ठोऽस्मच्छिष्य एव स्यात्'॥९८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'सम्पूर्णा दिल्लीयं ममैव बसयानमारोहतु।'
संवाहक आशास्ते 'ब्लू' बसयानस्य यात्रिरिपुः॥९९॥

अध्यापकस्य चाशा सच्छिष्योऽस्तीति मन्येऽहम्।
शिष्याणामाशास्ते सद्गुरुरित्यत्र नास्ति सन्देहः॥१००॥

लेहे मेघविदारण-जन्यजलप्लावने जाते।
जीवितबालमिषाद्वै, जयति जयति जीवितस्याशा॥१०१॥

भूकम्पजन्यमृत्योस्ताण्डवमपि तर्जयत्याशा।
साहाय्यकर्मकृद्भिः स्थाप्यन्तेऽनाश्रिता लोकाः॥१०२॥

नियतिकृते संसारे परमं दुःखं भवत्वाशा।
कविरचिते संसारे परमसुखं नित्यमियमाशा॥१०३॥

मार्गे प्रसूय पुत्रीं माता तु मृता, परं पुत्री।
जीवत्यनाथनिलये स्वस्था, जय जीवनाशे त्वम्॥१०४॥

'मम नास्ते काप्याशा त्यक्ष्याम्यधुना सुखेन मे प्राणान्।'
अत्राप्याशा निहिता दुःखमृते प्राणमोक्षस्य॥१०५॥

'न कामयेऽहं राज्यं न स्वर्गं नापुनर्भवं किन्तु।
आर्तजनानामार्तिर्नश्यत्वे'षा जयत्वाशा॥१०६॥

'नहि किञ्चिदहं याचे किन्तु दिदृक्षे पदं शैवम्।'
अप्ययदीक्षितकथने नास्त्याशा किं समुल्लसिता?१०७॥

धृतषोडशशृङ्गारा मुकुराग्रे या स्थिता तन्वी।
तस्या आशास्ते किल दयितो धावन् गृहं प्राप्तः॥१०८॥

'पुत्राच्छिष्याद्वा स्यात् पराजयो मे सभामध्ये।'
पितुर्गुरोर्वा जयतादियमाशोदारचित्तस्य॥१०९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आशेयं जयिनी स्यात् 'हिसां जेष्यत्यहिंसैव।
जेष्यत्यभावसङ्घं नित्यसमृद्धिः सकलविश्वे॥'११०॥

आशेयं जयिनी स्यान्निरागसां स्यान्न संहारः।
आशेयं जयिनी स्यान्न वृत्तिहीनो भवेत्कोऽपि॥१११॥

सम्पूर्णजीवनेऽथो सत्यश्रमपरहितादिभिः सततम्।,
परलोकनिर्मितेरप्याशा कथमिव परित्याज्या॥११२॥

यदि च कुसङ्गं त्यजसि न, पूज्यानां त्वमपमानमथ कुरुषे।
बन्धो त्वया कदाचन कुशलस्याशा न कर्तव्या॥११३॥

'आमृत्योः श्रियमिच्छेत् नैनां मन्येत दुर्लभां मनुजः।'
इयमुक्तिः किं कथयति? 'आशास्ते मूलमुन्नत्याः'॥११४॥

दुर्व्यसनेषु पतित्वा स्वास्थ्यं यदि नाशयसि नैजं त्वम्।
प्रभुरेव रक्षकस्ते कः कुर्यात्तव शिवस्याशाम्॥११५॥

'सर्पे वा हारे वा सुहृदि रिपौ वा मणौ लोष्टे।
समदृष्टेर्मम दिवसा यान्त्वि'त्यत्रास्ति किं नाशा?॥११६॥

'अमरसरित्स्यात्तटिनी देवोऽपि स्यान्महादेवः।
वटविटपो दयिता स्याद'त्रापि न किं लसत्याशा॥११७॥

मोघाशा नो कार्याऽमोघा कार्या सदैवाशा।
पौरुषमपरिज्ञाय त्वया न कार्या कदाप्याशा॥११८॥

आशाभावेऽधीतिर्भरणं पुष्टिस्तथा स्वास्थ्यम्।
उन्नतिरुल्लासो वा सर्वं व्यर्थं प्रतीयते नूनम्॥११९॥

आशासद्भावे सति दारिद्र्यं रुग्णता तथाभावः।
दैन्यमुपेक्षा जडता सर्वं रमणीयतां याति॥१२०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आशे! त्वां खलु वच्मि त्याज्योऽहं नो त्वयास्मि ते प्रणयी।
त्यक्तस्त्वया यदि स्यां निर्जीवोऽहं भविष्यामि॥१२१॥

जयतान्ममेयमाशा–'देशे सर्वः सुखी स्यान्ना।
सर्वो निरामयः स्यात् सर्वः पश्येत्तथा भद्रम्'॥१२२॥

आशेयं किल जयतात्–'वसुधैव कुटुम्बकं समेषां स्यात्।
शोषणहीनमदीनं सुखशान्तिमयं जगद् भवतात्॥१२३॥

अत इदमुचितं नास्ते कथनं- 'दुःखस्य कारणं ह्याशा'।
कर्म ज्ञानं भक्तिः– सर्वेषां मूलमस्त्याशा॥१२४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राष्ट्रमेतत्सदा वर्धतां भारतम्

डॉ. बलदेवानन्द सागरः
एच-९ आकाशभारती आवासः, इन्द्रप्रस्थविस्तारः - २४,
दिल्ली-११००९२

राष्ट्रमेतत्सदा वर्धतामेधताम्।
राष्ट्रमेतत्सदा वर्धतां मेदताम्॥

लोकतन्त्रं यदीयं ध्रुवं सुन्दरं
न्यायतन्त्रं सदा सर्वकल्याणदम्।
प्रेमतन्त्रं समेषां च भद्रङ्करं
राष्ट्रमेतत्सदा वर्धतां भारतम्॥१॥

पुण्यतोया वहन्त्यञ्जसा निम्नगा
नर्मदा-सिन्धु-गङ्गा-वितस्तादिकाः।
यस्य हैमाद्रि-विन्ध्यादयो भूधराः
राष्ट्रमेतत्सदा वर्धतामेधताम्॥२॥

तातपादा मुदा पालने तत्पराः
मातरो भ्रातरो यत्र प्रासादिकाः।
देशिका यत्र सन्तोषमोदावहाः
राष्ट्रमेतत्सदा मोदतां मेदताम्॥३॥

ज्ञानविज्ञानधारासमालिङ्गितं
नृत्यसङ्गीतसाहित्यसम्भावितम्।
रम्यलोकोक्तिलावण्यलीलायितं
राष्ट्रमेतत्सदा वर्धतां भारतम्॥४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इमे बन्धाः प्रथमं मईमासस्य प्रथमे दिवसे पालिभाषायां रचिताः।
तदन्तरं प्रकाशनार्थम् अर्वाचीनसंस्कृतमिति पत्रिकां प्रेषिताः।
इदानीं सम्पादकमहोदयानां निर्देशमनुश्रित्य प्रकाशनार्थं
तेषां संस्कृतछाया कृता।

मे वारो जयतेतराम्

बन्धकारः –शैतलः सङ्घसेनः

समायातो हि मे-वारो ह्यद्य सर्वत्र भूमौ ।
भृतकानां मई-वारः समग्रो भृति-जीविनाम् ॥१॥

शतकाब्दिद्वयोनत्वे शिकागावे महापुरे ।
भक्तवैतनिका भृत्ति-जीविनो भृतकास् तथा ॥२॥

कर्मकराश्च दासाश्च कार्याय नियतास् तथा ।
उदरपूरणार्थाय क्रीतदासास् तथा पुनः ॥३॥

सन्निपातं गतास् तत्र ते च तेषां समर्थकाः ।
कार्यानुपातिकां प्राप्तुं भृतिं शोषण-वारणाम् ॥४॥

कालकार्यावधिं मातुं वारयितुम् अतिरेकताम् ।
तुमुलध्वनिघोषेण गर्जयन् गगने इव ॥५॥

देहि कर्मकरेभ्यो हि भृतिं शोषण-वारिताम् ।
अन्यत्र सर्वलोकेषु कर्मकरा समग्रिताः॥६॥

घोरं प्रदालयिष्यन्ति धनिकानां धनं बलम् ।
यन्त्रगृहाणि सर्वाणि यन्त्राणि यन्त्रकारकम् ॥७॥

कर्मकरैश्च सामग्री शिकागावे कृता यथा ।
पूर्वं लोकेषु कुत्रापि न कृता इतिवृत्तके ॥८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कर्मकराणां सङ्ग्रामः संवत्सरेभ्यो वत्सरम् ।
गतिपरश्च संजातश् शिकागोर्हिं बहिः पुनः ॥९॥

ततः परं विदेशेषु देशान्तरेषु सर्वतः ।
कर्मकराणां सामग्री सफलाभवत् पुनः पुनः ॥१०॥

निबद्धोऽष्टहोरासु कार्यावधिस् ततः परम् ।
स्त्रीपुरुषतुल्यत्वं द्वितीयं बिन्दुकं तथा ॥११॥

भृतका लब्धसमुत्साहा आयास-बहुलाश् च ते ।
निष्पादयन् च तद् बिन्दुम् एकीभूय ततः परम् ॥१२॥

कार्यचयो यथाकामं तृतीयं बिन्दुकं ननु ।
सम्प्राप्तुं भृतका लोके वैतनिकास् तथा पुनः ॥१३॥

कार्यस्थानं यथाकामं चतुर्थं बिन्दुकं तथा ।
सम्प्राप्तुं भृतका लोके वैतनिकास् तथा पुनः ॥१४॥

धनपतिचयो सेच्छं पञ्चमं तावद् बिन्दुकम् ।
सम्प्राप्तुं भृतका लोके वैतनिकास् तथा पुनः ॥१५॥

सङ्क्षोभणं ततो घोरं कर्मकरा अकुर्वंश्च।
संलब्धाश्चान्तशश्च तैरधिकारः स्वकस् तथा ॥१६॥

इतस् ततश्च सर्वत्र सञ्चारितोपलब्धिः सा ।
अपूर्वा सा च संलब्धिः संशयो ननु तत्र न ॥ १७॥

सोपलब्धिश्च या किन्तु प्राप्ता लोके इतस् ततः ।
भ्रामकम् एव तत् तथ्यं तत्ततो लब्धिकल्पिका ॥१८॥

आबालवृद्धका अद्य पुरुषाश्च स्त्रियस् तथा ।
सुशीर्णाश् शोषिता लोके संत्रासिता संप्रदालिताः ॥१९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विश्वीकृते च भूगोलेऽद्यतनीये च विश्वके ।
जनास् तृतीयविश्वस्य शोषणचक्रदालिताः ॥२०॥

न जीवन्ति सुखं लोके दुःखदारिद्र्यदुर्गताः ।
भविष्यति कथं मोक्षो चिन्तयाम्यहर्निशम् ॥२१॥

मोक्षमार्गः कुतो यातो ज्ञातुकामो ह्यहं पुनः ।
हे पान्थात्र तिष्ठ त्वं क्षणमपि कुट्यां मम ॥२२॥

सम्मिल्य त्वं तथा चाहं समर्थौ मार्ग-विन्दने ।
प्रापयिष्ये च तं मार्गं क्रान्तिवीरैः समङ्कितम् ॥२३॥

यथा सोवियतक्रान्तिर् यथा देशे च चीनके ।
जनानां भृतकानां च मे वारो जयतेतराम् ॥२४॥

दशाधिकद्विसाहस्रे वर्षे मईकवारके ।
शैतलसङ्घसेनस्य बन्धोऽयं च प्रकाशितः ॥२५॥

इति इमे बन्धाः शैतलस्य सङ्घसेनस्य वैशाली इन्कलेवस्थस्य
दिल्ली-नैवासिकस्य ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्त्री

डॉ. बनमाली बिश्वालः
५७, वसन्त विहारः, झूसी, इलाहाबादः-२११०१९

अहं नारी
संसारस्य सृष्टिरनुपमा,
मयि सृष्टा सृष्टिः परं
न जानेऽहं संसारस्य कथं
मद्विषये दृष्टिः काचिदन्या।

गृहं न भवति गृहं
क्वचिन्मद्रहितम्,
उपस्थित्या मम यतो
गृहं स्वर्गायितम्,
स्वर्गायिते गृहे तस्मिन्
प्रवाहिता मया स्नेहगङ्गा,
तथाप्यस्मिन् संसारे मे
नास्ति क्वचित् स्वतन्त्राऽपि सत्ता।

जनिं लब्ध्वा अहं जाता
कस्य यदि कन्या,
कालेनाहं कस्य पुनर्भगिनी संवृत्ता,
सञ्जाते विवाहे कस्य पत्नी परिणीता
वंशं चालयितुं कस्य जनन्यहं जाता
संसारेऽस्मिन् सर्वत्र सम्भूय
न भवामि कुत्र,
न कुत्रापि स्वतन्त्रा मे सत्ता।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वेदान्तिनो ब्रह्मेवाहं बोभूये सर्वत्र
परं बत न दृश्येऽहं कुत्र
परिवारे विशालेऽपि
नास्ति नाम, नास्ति मम गोत्रम्।

अपि नैतत् तथ्यमस्ति
अहमस्मि अस्तित्वरहिता?
सर्वत्र सुपरिचिता
किन्तु क्वचित् नास्ति मम सत्ता?

स्नेहमयी प्रेममयी ममतामय्यपि
पदे पदे चास्मि सम्पीडिता
'स्त्रियाश्चरित्र' मित्युक्त्या तथाप्यलङ्कृता,
प्रीति-भक्ति-दया-विनिमये
समाजेन मदर्थेयं
दयनीया स्थितिः प्रकल्पिता।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जीवन-रहस्यम्

प्रो. सुधीकान्त भारद्वाजः

कश्चिज्जनो जीवनमार्गरुद्धः
प्राप्तुं समाधानगतिं कथञ्चित्।
आशातुरङ्गेषु विरूढमानो
यत्नं विधत्ते बहुयोजनाभिः॥१॥

उत्खाय बाधाद्रुमगुल्मपुञ्जान्
प्राप्नोति मार्गं यदि कृच्छ्रयोगात्।
निष्कण्टकं तत् सरणिं स मत्वा
हर्षाभिभूतश्चलतीष्टलक्ष्यम्॥२॥

गत्वा परं द्वित्रिपदानि भूयो
मार्गावरोधं लभते पुनः सः।
साध्यं सुदूरं खलु मन्यमानः
चित्ते भृशं सीदति रुद्धकामः॥३॥

भूयोऽपि बाधाः कठिना विशोध्य
ह्याशाभिभूतो मनसि प्रफुल्लः।
धत्ते पदं शीघ्रगतिः पुनर्भोः
पाताय खिन्नः सततं समन्तात्॥४॥

आशानिराशासु सदा भ्रमन् सः
ह्याप्नोति चिते न शमं कदापि।
उद्देश्यहीनो विचरन् सुजीर्णः
ह्यज्ञातमार्गो विजहाति लोकम्॥5॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

लक्ष्यं किमस्तीह नृलोकमध्ये
साध्यं च किं सिद्धगतिश्च कोऽत्र।,
जानाति कश्चिन्न गुरुर्न शिष्यः
विभ्रान्तचित्तोऽत्र जनो हि सर्वः॥६॥

आजन्मकालात् मरणं च यावत्
दोलायमानोऽत्र नरो भ्रमेषु।
अज्ञातलक्ष्यस्त्वरितं विधावन्
सर्वं विहायात्र विलुप्यते सः॥७॥

किं केन लब्धं विगतं च किं भोः
स्पष्टं न किञ्चिद् भ्रमितो हि लोकः।
शक्त्या युतः को विबलश्च कोऽत्र
सर्वं हि कालस्य वशंगतं भोः॥८॥

मिथ्याभिमानात् सफलं नरो यः
स्वं मन्यते शक्तियुतः कदाचित्।
अग्रे क्षणे लुप्तबलो विपन्नः
पराश्रितो जीवति मानहीनः॥९॥

कालस्य शक्तेर्वशतां स नीतो
लोकः स्वशक्तिं विदधाति नैव।
सृष्टेः क्रिया गच्छति कस्य योगात्
सर्वं रहस्ये विनिगूढतत्त्वम्॥१०॥

(रचनातिथिः ४.८.२०१०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पारसीकाव्यानुवादः

डॉ. बलराम शुक्लः,
हिन्दूमहाविद्यालयः दिल्ली

(२००९तमाब्दे देववाणीपरिषदः पण्डितराजसमारोहे प्रस्तुतं पद्यद्वयम्, पारसीक-कवि-रूमी-प्रणीतग़ज़लस्य कस्यचन भावानुवादरूपम्।)

ग़ज़लकविः - मौलाना जलालुद्दीन रूमी (त्रयोदशशतकोत्पन्नः)

छन्दोनाम - हज़ज मुसम्मन अख़रब

गणव्यवस्था - मफ़ऊल मफ़ाईलुन मफ़ऊल मफ़ाईलुन (प्रतिपङ्क्ति)

पैदा शुदो पैदा शुद गुमगश्त ए मा इम्शब
मी चर्खमो मी रक़्सम बा बादे सबा इम्शब
यकरोज़ न बा मा शुद ईन चर्खे़ फलक हमराह
गोई मनो दिल हस्तीम मेहमाने ख़ुदा इम्शब
दीवाना दिले मिस्कीन बावर न कुनद ईन बख़्त
हक़ दारद अगर दारद सद चूनो चेरा इम्शब
दर कुल्ब ए मा ख़ुर्शीद मेहमान् शुदे बाद इमरोज़
दर महफ़िले मा मेहताब अफ़्शान्दे सफ़ा इम्शब

(भावानुवादः)

॥ माहाभाग्यम् ॥

लुप्तो लब्धो हृदयदयितो वीतवीते निशीथे
प्रातर्वातैस्सममहमहो अद्य नृत्यन् भ्रमामि ।
एकान्तं मेऽसुखमुपनतं वक्रचक्रेण पूर्वम्
त्रैलोक्येऽस्मिन्नहमतिथिवत् सम्प्रतीक्षे प्रतीक्ष्ये॥
नो चेच्चेतो विधिमधिगतं मेऽत्र प्रत्येतुमीष्टे
ह्रस्वे तस्मिन् समुचितमिदं चञ्चलेऽचेतने च ।
अद्यारभ्य प्रखरकिरणोऽभ्यागतो मत्कुटीरे
पूर्णश्चन्द्रः प्रतिरजनि रे मेऽतिथिर्मेऽतिभाग्यम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अभिनन्दनपद्यानि

श्री श्री. सुन्दरराजः

प्रचलितविकृतिनामसंवत्सरे दक्षिणायने वर्षऋतौ सिंहमासे कृष्णपक्षे दशम्यां भृगुवासरे आर्द्रानक्षत्रे परमहंसपरिव्राजकाचार्यवर्यश्रीकाञ्चीकाम-कोटिपीठाधिप-श्रीजयेन्द्रसरस्वतीजद्गुरूणां पञ्चसप्ततिपूर्तेरनन्तरं षट्सप्ततितमजन्मदिवसमुद्दिश्य आयोजिते महोत्सवे बालकवि विल्लूर श्रीसुन्दरराजेन प्रणीय पठितानि पद्यानि।।

****

एकाम्रक्षेत्रसरसः एकाम्रारण्यपार्श्वतः।
एकाम्रक्षेत्रमेत्यान्यत् एकं रंस्याम्यहं स आः॥१॥

जयेन्द्रविजयेन्द्रयोः विजयिशंकाराचार्ययोः
कलिंगविजये पुरा सुरगिराऽर्पितस्वागतः।
निमंत्रित उपागतो गुरुनियोगतोऽहं कविः
यतेस्स्तवमितो यते कमपि जन्मऋक्षोत्सवे॥२॥

उड्याणपीठमिति तत् पुरुषोत्तमस्थं
ऊरीचकार गुरुरेव पुराऽऽगतो नः।
काञ्चीपुरादधि पुरीं तदनेककृत्वः
एत्याभ्युपास्त विमलां पुरुषोत्तमं सः॥३॥

आयात एष पुरुषोत्तममेकदा प्राक्
आधातुमालयमथादिमशंकरस्य।
अस्थापयत् स्वयमथर्वणवेदपाठ-
शालां महोदधितटे तदहं स्मरामि॥४॥

रस्यन्ति केऽपि कवितां यतयोऽपि मुक्ताः
तस्या रसेन मधुरेण विकृष्यमाणाः।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तत्कारणं किमिति ते हि विदन्ति सत्यं
ब्रह्मेति वेद उदितः पुरुषो रसो वै॥५॥

श्रीचंद्रशेखरदृशा कविरस्मि बालः
प्रौढो दृशाऽस्म्यथ जयेन्द्रसरस्वतीनाम्।
वृद्धो दृशाऽद्य विजयेन्द्रसरस्वतीनां
मातस्सरस्वति! दृशैव तवेव तेषाम्॥६॥

ब्रह्मविष्णुशिवसन्निधौ गुरुः कामकोटिवरपीठमास्थितः।
न्यूनसप्ततिपदेऽभिषेचितः पञ्चसप्ततिमितो गतो वयः॥७॥

सप्ताश्वास्सप्तसूर्याः गणितभुव इतः सप्त सप्तांबुवाहाः
सप्तोदन्वन्तः एते कुलजगिरिवरास्सप्त सप्त स्वरास्ते।
सप्त द्वीपाश्च जिह्वः ज्वलदनलपुटे सप्त वर्णाः प्रकृत्याः
सप्तानां या ततिस्तां जयति गुरुरसौ सप्ततिं पञ्च तीर्त्वा॥८॥

जय विजयेन्द्राभिधाख्यात काञ्चीमठाधीश पञ्चोत्तरां
सप्ततिं तीर्ण षट्सप्ततिंप्राप्त विश्वप्रसिद्ध स्वयंसिद्ध
संसिद्ध्यसंदिग्ध सुधप्रभादिग्ध भो भो विदग्धप्रय काषाय-
धारिन् अकापट्यकारिन् अमायिन् शुभानां ततीनां विधायिन्
शिवानां ततिं नः प्रदेयाः यथा वेद उक्तं तथास्त्वों तदों ओं
च तत् सत्॥९॥

नन्दति सुन्दरराजः वन्दितशंकरगुरुद्वन्दपद्द्वन्द्वः।
छिन्दन् अन्तर्द्वन्द्वं विन्दति मन्दोऽप्यमन्दमानन्दम्॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मकरसङ्क्रान्तिः

रमाकान्तशुक्लः

शिशिर-संत्रास-संहर्त्री मकरसङ्क्रान्तिरायाता।
मनःसूत्साहजनयित्री मकरसङ्क्रान्तिरायाता ॥१॥

महात्मानः प्रयागे कुम्भमेलासंगमे स्नातुम्।
सशोभायानमायाताः मकरसङ्क्रान्तिरायाता॥२॥

जनाञ्ज्योतिर्नयति तमसो नयति सच्चासतो या सा।
नृणामुपकारसन्धात्री मकरसङ्क्रान्तिरायाता ॥३॥

मृगे मृगलाञ्छनादित्यौ प्रविष्टौ लोकसौख्यकरौ ।
पितामहतृप्तिसन्दात्री मकरसङ्क्रान्तिरायाता॥४॥

जनाः श्रद्धायुता आतन्वते तीर्थेषु निस्तन्द्राः।
जपं दानं तथा स्नानं मकरसङ्क्रान्तिरायाता ॥५॥

जना अलसा अपि प्रातः समुत्थायाभिषेकार्थम्।
प्रयागे सङ्गमं प्राप्ता मकरसङ्क्रान्तिरायाता ॥६॥

त्रिवेणी-सङ्गमे स्नात्वा जना अपुनर्भवाधिकृताः।
त्वमप्येहीह मनसा द्राङ् मकरसङ्क्रान्तिरायाता ॥७॥

सतिल-गुड-गोलिकास्तिलमोदकान्स्तिलशर्करा-पट्टीः।
श्वशुरहेतोर्ददति वध्वो मकरसङ्क्रान्तिरायाता ॥८॥

क्वचित् पौषादिपर्वास्ते क्वचित्सङ्क्रान्तिपर्वास्ते।
क्वचिच्चेयं मता लोहड्डी मकरसङ्क्रान्तिरायाता॥९॥

बिहूपर्वासमे सम्मान्यते नृत्यज्जनैः समुदम्।
कृषिः सफला भवेत्तेषां मकरसङ्क्रान्तिरायाता ॥१०॥

गृहान्निष्कासितं कर्णाटकेष्वान्ध्रेषु नरनार्यः।
दहन्ति व्यर्थसम्भारं मकरसङ्क्रान्तिरायाता॥११॥

जना बङ्गप्रदेशे यान्ति गङ्गासागरे स्नातुम्।
कपिलमुन्याश्रमक्षेत्रे मकरसङ्क्रान्तिरायाता॥१२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जनाः पञ्चाम्बुराज्ये भङ्गडां गिद्दां प्रकुर्वाणाः।
ददत्यनलाय नैवेद्यं मकरसङ्क्रान्तिरायाता ॥१३॥

प्रसिद्धं सुन्दरी-मुँदरी-कथाख्यानं प्रगायन्तः।
गृहद्वारे स्थिता बाला मकरसङ्क्रान्तिरायाता ॥१४॥

पतङ्गा उत्तरायणपर्व मानयितुं नभोऽङ्गणगाः।
सुरम्ये गुर्जरप्रान्ते मकरसङ्क्रान्तिरायाता ॥१५॥

तमिलनाडुप्रदेशे पोङ्गलस्यास्ते महामहिमा।
त्रिभिर्दिवसैः समायोज्या मकरसङ्क्रान्तिरायाता ॥१६॥

विकर्तनपूजनं सग्धिः पशूनां स्नानशृङ्गारौ।
विधीयन्तेऽत्र सानन्दं मकरसङ्क्रान्तिरायाता॥१७॥

वधूर्हरियाणदेशीयाः प्रसादयितुं निजौ श्वशुरौ।
समं वाद्यैः प्रयातीयं मकरसङ्क्रान्तिरायाता ॥१८॥

चटक-चटका-कृते तिल-तण्डुलान् प्रक्षिप्य मोदन्ते।
गृहाङ्गणमध्यगा नार्यो मकरसङ्क्रान्तिरायाता॥१९॥

कुरुक्षेत्रे हरिद्वारे नरोऽन्यत्तीर्थभागे वा।
समीडन्ते रविं स्नात्वा मकरसङ्क्रान्तिरायाता॥२०॥

न यो यातुं समर्थः कुम्भमेलायां प्रयागे सः।
गृहे कुरुतात् परोपकृतिं मकरसङ्क्रान्तिरायाता ॥२१॥

तिलस्पर्शं शिरसि कृत्वा मनुष्या ब्रह्मवेलायाम् ।
बिहारे स्नान्ति सश्रद्धं मकरसङ्क्रान्तिरायाता ॥२२॥

उदीच्यां वाप्यवाच्यां वा प्रतीच्यां चाप्यथो प्राच्याम् ।
नवोत्साहं वितन्वाना मकरसङ्क्रान्तिरायाता ॥२३॥

समेषां कामनाः सफला भवेयुः कार्यलग्नानाम्।
समेषां मङ्गलं भूयात् मकरसङ्क्रान्तिरायाता॥२४॥

त्यजालस्यं भजोत्साहं सुकर्मन्यस्तचित्तस्सन्।
रमाकान्त! प्रसन्नः स्या मकरसङ्क्रान्तिरायाता॥२५॥

रचनातिथिः १५.०१.२०१९

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शब्दमन्दाकिनी

सच्चिदानन्दमीमांसकालम्बिनी,
तापविध्वंसिनी मङ्गलाशंसिनी!
भाति या विश्वबन्धुत्वसंवर्धिनी,
देवभाषैव सा शब्दमन्दाकिनी!!१॥

शाश्वती संस्कृति र्भारतीया यया,
मेदिनी प्राङ्गणे कामनीयाभया!
प्राणिनिश्रेयसायैव विस्तारिता,
स निलिम्पोद्भवा शब्दमन्दाकिनी!!२॥

यामुपाश्रित्य सत्यव्रते दीक्षिता
मानवा निर्जरत्वं लभन्ते मुदा!
या सदा संस्कश्ताचारसञ्चारिणी,
दिव्यभाषास्ति सा शब्दमन्दाकिनी!!३॥

वेदवेदान्तविद्यावतां वन्दिता,
सत्कवीनां वश्ता भूभश्तां पूजिता!
ब्रहमसंयोगिनां योगिनां सम्मता,
वेदविद्योतिता शब्दमन्दाकिनी!!४॥

ज्ञानविज्ञानभव्यप्रभाधारिणीं
सद्गुणैः सज्जनानां मनोहरिणीम्!
संसश्तौ शान्तिसौजन्य विस्तारिणीं,
देववाणीं श्रये शब्दमन्दाकिनीम्!!५॥

पुण्यपीयूष पाथोघिपद्मावती,
प्रीतिसम्पोषिणी सूरिसन्तोषिणी!
या रसज्ञालिमञ्जुस्वनाश्वासिनी,
भाति सा वैबुधी शब्दमन्दाकिनी!!६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अक्षरांशुस्मितस्नेहनिष्यन्दिनी,
निर्गलन्नादमाधुर्यविन्यासिनीम्!
लोललालित्यलीलान्तरोल्लासिनीं,
संस्कशताभां भजे शब्दमन्दाकिनीम्!!७॥

मनवो मानवायैव। जीवेदिति-
प्रज्ज्वलोद्गारसङ्कल्पनावाहिनी!
सर्वदा लोककल्याणकल्लोलिनी,
राजते नैगमी शब्दमन्दाकिनी!!८॥

धर्मजाति प्रदेशादिभेदान् विना,
साम्यसद्भावसाम्राज्यसवंर्धिनी!
या तितीर्षाजुषां तारिणी विश्रुता,
मेदिनीं पातु सा शब्दमन्दाकिनी!!९॥

आश्रमोत्कर्षिणी लोकसंस्कारिणी,
नित्यनिर्लिप्तसत्कर्मसम्पादिनी।
गूढतत्त्वानुसन्धानदिग्दर्शिनी
भातु भूत्यै सतां शब्दमन्दाकिनी!!१०॥

नैगमी चागमी पुण्य पौराणिकी,
रम्यरामायणी भारतेद्भावनी!
नन्दनोद्यान कल्पप्रसूनावनी,
स्यन्दतेहर्निश शब्दमन्दाकिनी!!११॥

कामदा कामधेनूपमा निर्मला,
विस्फुरत्स्वस्तिकल्लोललोञ्चला!
मोहमात्सर्यमूलापहा सुस्वरा,
त्रायतां संसृतिं शब्दमन्दाकिनी!!१२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मनवीं चेतनां पाति मञ्जुस्मितैः,
कापि कल्पान्तकालेऽपि कामायनी!
भूतले स्वर्गसम्भावनाशिल्पिनी,
भाति सारस्वती शब्दमन्दाकिनी!!१३॥

ध्वान्तलीने धराप्राङ्गणे प्रागसौ,
सर्वतः सन्ततोतिस्म दिव्यां द्युतिम्!
मोदतेऽद्यापि सम्मोदयन्ती भवं,
शश्वदाभामयी शब्दमन्दाकिनी!!१४॥

शारदाकच्छपीनिस्वनस्पर्धिनीं
शिल्पसाहित्यसङ्गीतविस्तारिणीम्!
नौमि पीयूष माधुर्यधारावहां
विश्ववन्द्यामिमां शब्दमन्दाकिनीम्!!१५॥

व्याहतक्रौञ्चचीत्कारसंवेदना
व्यञ्जिनी भुक्तिमुक्त्यर्थिनां रञ्जिनी।
तूर्णमाराधकानां व्यथाभञ्जिनी
भाति देवोद्भवा शब्दमन्दाकिनी!!१६॥

व्यासविस्तारिता भासहासान्विता,
कालिदासीयवागर्थविभ्राजिता!
दण्डिभामण्डिता सन्ततं स्यन्दतां,
सुद्ध्युपास्या शिवा शब्दमन्दाकिनी!!१७॥

भारवेरर्थगाम्भीर्यं वैशारदी,
बाणकादम्बरीया सुधानिर्झरी!
माघमाधुर्यमोदावहा माधवी,
हर्षदास्तां सदा शब्दमन्दाकिनी!!१८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पाणिनीयागमोपासनापाविता,
भामहानन्दभोजप्रभाभ्यर्चिता!
शङ्करराचार्य-वैदुष्य-विश्वासिता,
भूतिदा भ्राजतां शब्दमन्दाकिनी!!१९॥

ज्ञानसम्मानिता श्रीनिवासार्चिता,
शास्त्रिखिस्तेमहाभागसम्भाविता!
भास्करोद्भासिताऽद्यापि सत्यव्रतं,
पाति सानातनी शब्दमन्दाकिनी!!२०॥

यां समाराध्यसभ्दिः समाराधितो,
वर्धयन् भूरि सारस्वतं वैभवम्
राधिकावल्लभो भाति भूमण्डले,
सास्ति सत्कीर्तिदा शब्दमन्दाकिनी!!२१॥

यां समभ्यर्च्य राजेन्द्रमिश्रोऽधुना
विन्दते दुर्लभं वन्दनीयं यशः!
लब्धकीर्ती रमाकान्त शुक्लस्तथा,
राजते स्तौमि तां शब्दमन्दाकिनीम्!!२२॥

सूक्तिमुक्तामणिव्रातसङ्गुम्भिता,
स्रग्विणी शीलसूत्रप्रबन्धाञ्चिता!
चारुचारित्ररोचिष्मतां चन्द्रिका
चिन्मयी स्यन्दतां शब्दमन्दाकिनी!!२३॥

शेमुषीं पाति या बान्धवोद्भाविनी,
नैपुणीं नौति या मुक्तिनिष्पादिनीम्!
वैदुषीं वेत्ति या सौहृदोज्जीविनी
वैबुधी भाति सा शब्द मन्दाकिनी॥२४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कश्मलोन्मूलिनीं सद्गुणोन्मीलिनीं,
सर्वभाषाजनीं संस्कशतां पावनीम्!
चारुचेतस्विनां सद्विमर्शावनीं
कामये काञ्चनीं शब्दमन्दाकिनीम्!!२५॥

या परार्थे निजार्थापहा लक्षणा,
या मनोज्ञार्थविद्योतिनी व्यञ्जना!
याभिधेति त्रिधा शक्तिसंधारिणी,
सास्तु सर्वार्थदा शब्दमन्दाकिनी!!२६॥

चिन्तनोद्यानजं सौरभं तन्वती,
नित्यनैसर्गिकं विभ्रमं विभ्रती!
भारती भारतीयार्षरोचिष्मती,
भूरिशो वर्धतां शब्दमन्दाकिनी!!२७॥

सर्वमन्त्रस्वरूपार्थितार्थप्रदा,
सर्वलोकैकसंवादिनी ह्लादिनी!
सौमनस्यं दिशन्ती वहन्ती स्वतां,
शं विदध्यादियं शब्दमन्दाकिनी!!२८॥

वाग्मिभिर्वन्दिता कल्पनाकाशिनी,
व्योमतो निःसशता भूतलोल्लासिनी!
तिग्मतापापहा मानवानन्दिनी,
शास्ति लोकत्रयं शब्दमन्दाकिनी!!२९॥

लौकिके वैदिके वाङ्मये निर्मला,
ज्ञान विज्ञान विद्योतिनी प्राञ्जला।
सर्वलोकैककल्याणभावोज्ज्वला,
मञ्जुला स्यज्दतां शब्दमन्दाकिनी!!३०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्नेह कल्लोल लीलालिलौल्यान्विता,
मानवाह्लादनव्यञ्जनापेशला!
तोषयन्ती शिवं पोषयन्ती भवं,
सेवनीया सतां शब्दमन्दाकिनी!!३१॥

विश्वविश्रान्तिदा सर्वथा शान्तिदा,
संसश्तौ रामराज्यव्यवस्थोत्सुका!
कल्मषध्वंसिनी बन्धुतावर्धिनी
शोभतां सुस्वरा शब्दमन्दाकिनी!!३२॥

सुप्रयुक्ता समाराधकैः सस्पश्हं,
मर्त्यलोके तथा नाकिलोकऽपि या!
कल्पवल्लीसपमा कामितार्थप्रदा,
कस्य पूज्या न सा शब्दमन्दाकिनी!!३३॥

आननान्निःसरन्ती सुधा सन्निभा,
श्रोतश्चित्ते तनोत्यञ्जसा या मुदम्!
सा चिदानन्ददूती प्रतीक्ष्या जनैः,
दिक्षु तन्याच्छिवं शब्दमन्दाकिनी!!३४॥

या समभ्यर्चिता श्रेयसां साधिका,
कश्मणगीताशु कार्पण्यदोषापहा!
सानघा पुण्यपीयूषपाथोघिजा,
भातु भूत्यै सतां शब्दमन्दाकिनी!!३५॥

ब्रह्मबोधाय या विश्रुतोपासिता,
या च लोकोपकराय विस्तारिता!
या निपेया भवव्याधिशान्त्यै सदा,
सास्तु मोदोर्मिला शब्दमन्दाकिनी!!३६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रञ्जनव्यञ्जनाशिञ्जिनीमञ्जुला,
रञ्जयन्ती मनश्चारुचेतोभृताम्!
तप्ततापापहा संसृतिं त्रायते,
लोकसञ्जीवनी शब्दमन्दाकिनी॥३७॥

यां विना सुष्ठु संसारलीला पुरो,
वर्धितुं नैव शक्नोति वार्त्तोन्मुखी!
भावभाजां मनोभावनावाहिनी,
स्यन्दतां सानिशं शब्दमन्दाकिनी!!३८॥

छान्दसीशन्तमा गद्यगुम्फोद्गमा,
नाटयचम्पूकथाख्यायिकाशिल्पिनी!
यत्प्रसादोदिता साहिती शोभते,
शोभतां सूर्मिला शब्दमन्दाकिनी!!३९॥

क्वापि निष्किञ्चना वञ्चनासन्दिता,
मुक्तिमिच्छन्ति नैवाधिगच्छन्ति ये!
तत्कृते जीवनोल्लासिनी स्वस्तिदा,
नूतना स्यन्दतां शब्दमन्दाकिनी!!४०॥

येन यत्नेन सद्भावना भूतले,
भूरिशो भव्यभूतिप्रदा वर्धताम्!
साम्प्रतं तं प्रयत्नं विदध्यादियं
नव्यभावोर्मिला शब्दमन्दाकिनी!!४१॥

भारते मुक्तिमाप्ते विकासोऽभवद्,
पुष्कलो नात्र सन्देहलेशःक्वचित्!
किन्त्वसङ्ख्या जनास्तेन दूरीकृता,
योजयेत्तानियं शब्दमन्दाकिनी!!४२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जतिधर्मादिभेदान् समुद्भाव्य ये
स्वार्थसिद्धिं विधित्सन्ति पाखण्डिनः।
सम्यगालक्ष्य ताल्लोकशत्रूनियं,
शास्तु साम्यावहा शब्दमन्दाकिनी!!४३॥

यत्र नक्तं दिवा चन्द्रमार्तण्डयो,
र्न प्रकाशः क्षमो ध्वान्तविध्वंसने!
तत्र दीपान् मश्दुस्नेहसम्पूरितान्,
दीपयेदञ्जसा शब्दमन्दाकिनी!!४४॥

कुण्ठिता ये हताशा व्यथन्ते चिरान्
मुक्तिमार्गं न पश्यन्ति मोहान्धिताः
भातु तेषां दश्गुन्मीलिनी सुस्वरै-
श्चेतनावाहिनी शब्दमन्दाकिनी!!४५॥

ये विरामं विना सन्ति लग्नाःश्रमे,
तत्फलं किन्तु सम्यङ्न विदन्ति ते।
दूरयेच्चिन्तनीयानिमां कुप्रथां,
न्यायमार्गानुगा शब्दमन्दाकिनी!!४६॥

ये कदाचारवन्तो जगन्निन्दिता-
स्ते सदाचार शिक्षाप्रदाने रताः।
छद्मदुर्गं निपात्याशु तेषां वहेत्-
लोकवन्द्या नवा शब्दमन्दाकिनी!!४७॥

येऽनश्तं व्याहरन्त्यर्थतश्चणाहता,
दम्भिनो वावदूका दुराचारिणः।
तैरियं दूषिता खिन्नगङ्गानिभा,
खिद्यते साम्प्रतं शदमन्दाकिनी॥४८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

या समत्राप्यनुष्ठेयनिर्देशिका,
देशिका श्रेयसां सत्यसन्देशिका।
पातु नः सा मनोज्ञार्थसन्दर्शिका,
कल्पनाकाशिका शब्दमन्दाकिनी॥४९॥

संस्कश्तोपासिता सुप्रयुक्ता मिता,
भावनासम्मिता व्यक्तनादोदिता!
इच्छितार्थं दिशन्ती वितन्याच्छुभं,
प्रस्नुता सौरभी शब्दमन्दाकिनी॥५०॥

पवनी सावनी दिव्यसञ्जीवनी,
शाश्वती नूतनोन्मेषनिष्यन्दिनी।
सिद्धिकामैनर्ईणां प्रेयसे श्रेयसे,
श्रद्धया सेव्यतां शब्दमन्दाकिनी॥५१॥

जीवनी सर्वलोकानां पीयूषद्रवनिर्झरी!
तनोतु सज्जनानन्दं शब्दमन्दाकिनी सदा॥५२॥

(५२/27)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अनुच्छेदोच्छेदने शुभकामना अभिनन्दनम्!

—रमाकान्तशुक्लः

सप्तत्यधिकगुणशत(३७०)मितानुच्छेद-मूलोच्छेदने।
हे भारतीयाः! वो ब्रुवे शुभकामना अभिनन्दनम्॥१॥

मन्त्री प्रधानो गेहमन्त्री ससंदः सदनद्वयम्।
अर्हन्ति जनतापक्षतः शुभकामना अभिनन्दनम्॥२॥

अमरेशयात्रायां न कश्चिद् विघ्न उत्पन्नो भवेत्।
जय शारदे! जय वैष्णवि! शुभकामना अभिनन्दनम्॥३॥

जीवन्तु सर्वे पार्श्ववर्तिन आत्मसंयमधारिणः।
पुष्टिं भजेत् कश्मीरभूः शुभकामना अभिनन्दनम्॥४॥

कश्मीर-लद्दाखावनौ सुविकासयात्रा सम्भवा।
आतंक उच्छिनो भवेत्! शुभकामना अभिनन्दनम्॥५॥

ये चाल्पसंख्याका जनास्तेषां हितं स्यादक्षितम्।
आतङ्किनां राज्यं गतम्! शुभकामना अभिनन्दनम्॥६॥

ध्वज-संविधान-प्रधानगतमैक्यं भवेदिह सम्मतम्।
नूनं त्रिरंगध्वजजये शुभकामना अभिनन्दनम्॥७॥

राष्ट्रप्रतीकनिरादरं नो कोऽपि कर्तुं पारयेत्।
अपराधिनां स्याद् दण्डनं, शुभकामना अभिनन्दनम्॥८॥

कश्मीरभूभागेऽधुना हे नागरिक! भरतावनेः।
सम्पत्क्रयाय भवान् प्रभुः, शुभकामना अभिनन्दनम्॥९॥

देशस्य नागरिकाः समे व्यापार-सेवा-कर्मसु।
निरता भविष्यन्तीह वै, शुभकामना अभिनन्दनम्॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अस्मत्रिरंगध्वजमहिम्नो रक्षणं लोके भवेत्।
सर्वत्र समतास्ते नृणां, शुभकामना अभिनन्दनम्॥११॥

सर्वेऽपि भारतवासिनः सम्भूय हर्षसमन्विताः।
कथयन्ति पश्य परस्परं, शुभकामना अभिनन्दनम्॥१२॥

परदेश-चोदितबुद्धयो ये देशखण्डन-तत्पराः।
तेषां समीहाध्वंसने, शुभकामना अभिनन्दनम्॥१३॥

सोढास्मदीयैः सैनिकैः पाषाण-वृष्टिर्या पुरा।
विरता भविष्यति सायतौ, शुभकामना अभिनन्दनम्॥१४॥

राष्ट्रोत्तमाङ्गं पीडयन्ती वेदनाद्योन्मूलिता।
राष्ट्र प्रसन्नं दृश्यते, शुभकामना अभिनन्दनम्॥१५॥

काश्मीरिका याः कन्यकास्तासां विवाहे दुःखदा।
धारा निरस्ता संसदा, शुभकामना अभिनन्दनम्॥१६॥

या जानता वाजानतास्मत्पूर्वजेन कृता पुरा।
तस्यास्त्रुटेः सम्मार्जने, शुभकामना अभिनन्दनम्॥१७॥

काश्मीरका ये पण्डिता निष्कासिता निजराज्यतः।
तेषामभूदाश्वासनं, शुभकामना अभिनन्दनम्॥१८॥

यास्तत्र जाता कन्यका अधिकारवञ्चनपीडिताः।
तासां शुभा स्यादायतिः, शुभकामना अभिनन्दनम्॥१९॥

आतङ्किनां देशद्रुहां सीदन्ति दुष्टमनोरथाः।
सूर्योदयो जातो नवः, शुभकामना अभिनन्दनम्॥२०॥

सीमान्तपारे संस्थिता येऽस्मद्धरापीडनपराः।
ते कान्दिशीका धर्षिताः, शुभकामना अभिनन्दनम्॥२१॥

स्याच्छारदादेशः सुखी कुङ्कुममनो मुदितं भवेत्।
सर्वः प्रसन्नः स्याज्जनः, शुभकामना अभिनन्दनम्॥२२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्यादुद्भटात्मा हर्षितः स्यान्मम्मटात्मा हर्षितः।
स्यात्कल्हणात्मा हर्षितः, शुभकामना अभिनन्दनम्॥२३॥

स्वस्ति प्रजाभ्यो जायताम् सम्पूर्णजगदतिहर्षितम्।
प्रश्ना भवन्तु समाहिताः, शुभकामना अभिनन्दनम्॥२४॥

(रचनातिथिः ६.८.२०१९, प्रथमः सार्वजानिकः पाठः २१.८.२०१९ तमे दिनाङ्के देववाणी-परिषदश्चतुश्चत्वारिंशे सङ्कल्पना-समारोहे)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आर्योपवनम् (पूर्वार्धः)

–जि.एस्. श्रीनिवासमूर्तिः

आयान्त्वार्याः स्वागतमुपवनमारादुदारमृदुहृदयाः ।
पश्यत विविधा अस्मिन् भवन्ति तरुगुल्मवल्लर्यः॥१॥

वनपालरोपितलताः कतिपयतरवो निसर्गसंवृद्धाः।
सुरभीणि सुमान्यत्र प्रकृष्टवर्णानि चान्यत्र॥२॥

गन्धरहितानि पेशलवर्णयुतानि कुसुमानि सन्त्यस्मिन्।
तान्यपि कदाचिदुचितागदेषु बहुशः प्रयुक्तानि॥३॥

स्तम्बादिपादपा अपि दृश्यन्तेऽत्र बहुशो निरुद्देशाः।*
जीवानामुद्देशो जीवनमेवेति कथयन्तः॥४॥

आरामा नैके कुत अधुनायमपर इहेति मा पृच्छेः।
वनपस्तुष्टिं विन्दति रोपणकर्मणि न संशीतिः॥५॥

शाद्वल न त्वं भवितासि गुरुर्न कुसुमं फलं न ददासि भोः।
कथमपि कुत्रापि त्वं जीवन् चिरं क्षपयसि कालम् ॥६॥

रुग्ण कुतस्त्वं धावसि वैद्यस्य गृहं गृहोपवनमेहि ।
तत्रैवागदनिचयं ददते तरुगुल्मवल्लर्यः ॥७॥

यानस्थाने कृषकः प्रतीक्षते खलु समाप्य कार्याणि ।
यानेन स्वग्रामं गन्तुं सायं परिश्रान्तः ॥८॥

नाविक तारयसि त्वं पथिकं सरितं यमद्य करुणालुः ।
भविता स एव पत्न्यास्तव जारस्तत्त्वमवगच्छेः ॥९॥

पिबसि क्षीरं क्षुधितो निमीलिताक्षो बिडाल निश्चिन्तः।
सर्वः पश्यति दृष्टो नाहमिति दृढं मनुषे कथम् ॥१०॥

पथिके वदति तपति मम भालं किमुपशमनं वदेत्यार्ते।
कृपणस्तैली तैलं न ददानो भणति कष्टं भोः॥११॥

नम्रो लतादशायां नाभूद्भवति कथमद्य यो वृक्षः ।
गच्छान्यत्र स्यात्स्निग्धो मसृणः श्रमेणालम्॥१२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मुसलः पेषणकर्मणि जरितः स भवति कदापि न हि भोक्ता।
सन्त्यन्ये भोक्तारो पिष्टस्य तदेव विधिलिखितम्॥१३॥

पश्य धनिकोऽभवमहो इति दृप्तो धरति कालयामिन्याम् ।
श्वेतातपत्रमूर्ध्वमुपहसितं न गणयन्मूर्खः ॥१४॥

नालर्को भषति दशति न श्वा यो भषणशील इत्युक्तिः।
ज्ञाता वानेन शुना धावनमेव वरमिति मन्वे॥१५॥

पुरजनभरिते याने पुरुषो तिष्ठन् प्रयाति बहुदूरम् ।
गम्यस्थानाभ्याशे लभते पीठं स किमुपविशेत्॥१६॥

भवति हि मयैव सर्वं निर्मलमिति मा कदापि कत्थेथाः।
फेनक मलिनो भवसि त्वमपि यदा त्वां नरो धावेत्॥१७॥

विप्रः स्वीकृतवस्त्रं दाने माति हि रहः सुनिर्लज्जः।
किंचिल्लब्धं भूयान्मम भाग्यमिति भवति न तुष्टः॥१८॥

आस्तां मैत्री शृणु मां सदा करीषवणिजा सह स्नेहात्।
गन्धोपजीविना सह नियतद्वन्द्वकलहो हि वरम् ॥१९॥

संस्पृश्योष्णं नीरं तप्ताङ्गुलिरर्भकोपि दधि शीतम् ।
स्पृशति हि विना प्रमादं फूत्कृत्यान्यत्र भयभीतः॥२०॥

गलितरदस्य प्राप्ती राशिः भृष्टचणकस्य किं कार्यम् ।
वज्ररदः क्षुधित अहो लभते न हि चणकमप्येकम्॥२१॥

सूदस्य सुतः पृष्टो वर्णय चन्द्रस्य वृद्धिमसिते पक्षे ।
पाककलायां सिक्तो भक्ष्यासक्तो वदति मन्दम् ॥
तेंकोलुशकलतुल्यो फुल्लति वै मधुरकोलकट्टैवत् ।
वासितदोसाकान्तिं मुष्णात्यन्ते शशिरिड्लीवत् ॥२२, २३॥

रजकस्य रासभमसौ ददाति खलु नर्तकाय दानार्थम् ।
अपि गच्छति नाकं वा कारागारं न जानीमः ॥२४॥

पुष्प! कदापि त्वं मा दर्शय दुर्मदमनित्यमस्ति यशः ।
त्वत्परिमलवर्णौ श्वो सायं यास्यत अवकराब्धिम् ॥२५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

साक्षात्कर! नवरसद! त्वममित हर्षं ददासि सर्वेषाम् ।
तन्व्या कयापि यन्त्रितचर्यः सा तव कलत्रं किम् ॥२६॥

दीर्घवपुस्त्वं विद्युद्दीप ज्वलितः प्रकाशमानोऽसि ।
ज्वलने कुतो विलम्बस्त्वय्यादिष्टे प्रकाशार्थम् ॥२७॥

बधिरः पचति हि पक्वं मूको भुङ्क्ते दिने दिने तूष्णीम्।
अन्नं सुसाधितं वा न वा भगवतापि न ज्ञातम् ॥२८॥

प्रमदाभिसरणशीला जारगृहं गन्तुमादृता रात्रौ ।
पत्ये दधि कर्तुं सातंचनकर्म प्रयतते किम् ॥२९॥

घटकारः कष्टेन हि कुरुते घटमेकमुत्सुकः प्रीत्या ।
दण्डेन कोऽपि बालः शकलीकुरुते सलीलं तम् ॥३०॥

देवः प्रणताय यथा वरं सलीलं ददीत करुणालुः ।
ममताजुष्टो पूजकवर्यो न तथार्थिने दद्यात् ॥३१॥

आम्रस्यान्तः कठिनं न स्वाद्यं बहिरसाम्यमाधुर्यम् ।
कण्टकितं खलु पनसं बहिरन्तस्तु मधुजुष्टं स्यात् ॥
द्राक्षाफले च सेबे सर्वं स्वाद्यं तदेव वैविध्यम् ।
प्रकृतौ रसिकः स्वाद्यं यत्तदनुभवेत्त्यजेदन्यम् ॥३२, ३३॥

मा पिब यात्रिक तालद्रुमतलमाश्रित्य गोरसमदुष्टम्।
मन्वत इतरे मद्यं पिबत्ययं मत्त इति पान्थाः ॥३४॥

धेनुरियं साधुवरा कमपि न बाधत इति स्तुवन्त्यन्ये ।
गोपालमेव दोहनसमयेऽसौ बाधते बहुधा ॥३५॥

अधिपोऽपि सहस्राणां तुरगाणां भवति हि गृहिणीदासः ।
धावत्याहूतोऽयं पत्न्या वद किमुत सामान्याः ॥३६॥

वीजन! दृष्ट्वा शिखिनं नृत्यन्तमिमं वृथानुकुरुषे त्वम्।
क्व मयूरनृत्यलीला क्व ते स्खलितपदकुसंचारः ॥३७॥

सौवर्णसूचिरिति यदि तेन व्याधयसि ते शरीरं त्वम् ।
बाधां नानुभवसि किं सूचेः शितता हि निजधर्मः ॥३८॥

वप पूगद्रुमबीजं रोहेद्यदि ते भविष्यति तरुभाग्यम् ।
नो चेच्चिन्तां मा कुरु बीजं मात्रं त्वया नष्टम् ॥३९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यदि भक्षयेद्धनाढ्योऽखाद्यं मनुते जनो भिषग्दत्तम् ।
यद्यत्ति निर्धनो तत्तदा वदति हन्त दारिद्र्यम् ॥४०॥

बोधयितुं साध्यं किल सुप्तं तारस्वरेण सर्वेषाम् ।
सुप्तमिव निश्चलं त्वं जागरयसि केन मार्गेण ॥४१॥

जलमपि सिन्धौ मुञ्चति यदि मित्वा किल विमुञ्चति प्राज्ञः ।
मानं विना न कुर्याद्दानं किंचन तथादानम् ॥४२॥

भर्तुरतृप्तस्य भवति दध्यपि शुद्धं शिलाशकलजुष्टम् ।
प्रायेणातृप्तिः खलु पश्यति दोषं विना हेतुम् ॥४३॥

त्वमुलूखल उपविशसि यदि मुसलाघातरोधनं स्यात्किम्?।
अन्यत्र गच्छ मूढ प्राणान्संरक्ष शरणार्थिन् ॥४४॥

प्रतिवेशिनः सुतं यः प्रणुदति वाप्यां गभीरतां मातुम् ।
तस्य प्रतिवेशी कोऽपि न भविता खलु विना मूढम् ॥४५॥

मृत्कुम्भं श्वश्रूर्यदि भञ्जयति तदा न किंचिदपि नष्टं स्यात् ।
गलितो भग्नः कुम्भः करात्स्नुषाया अमूल्यो वै ॥४६॥

कण्डूयसि क्षतं यदि वारं वारं पुरातनं मूढे ।
भविता नवं नवं तन्न कदापि विरोपितं शमितम् ॥४७॥

कतरेण वर्त्मना त्वं गच्छसि बहुधाऽत्र भिद्यते मार्गः ।
वर्त्मैकमुखं कथमपि वृतमिति मत्त्वा चर विमृश्य ॥४८॥

दोसा रन्ध्रैः पूर्णा पाकगृहेषु हि सदैव सर्वेषाम् ।
अस्मिन्गृहे तु भर्जनमेव सरन्ध्रं भवति हन्त ॥४९॥

श्रुत्वा वृषभः सूयत इति भृत्यस्य वचनं गृहिण्यवदत् ।
दूरात् शीघ्रं बन्धय गामित एवागमिष्यामः ॥५०॥

पादपशाखाजनितः सरुः कुठारस्य हन्त बहुशीघ्रम् ।
स्वकुलस्यैव भविष्यति कठोरमृत्युर्वद किमित्थम् ॥५१॥

पुच्छं शुनकस्य यथा सरलीकरोषि तथैव वक्रःसः ।
व्यर्थस्तव प्रयत्नः जहाति स कदापि न स्वगुणम् ॥५२॥

काचगृहो वसतिस्तव तथापि हिंससि शिलाभिरन्यान्स्वम्।
वेत्सि न कथं तव गृहं नष्टं स्यादश्मनैकेन ॥५३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वृक्षोऽयं तु पिपतिषति कस्मात्पातयितुमिच्छसि परशुना ।
भवति हि वृथा श्रमस्ते सद्यः श्वो वा पतत्येव ॥५४॥

परशुर्भनक्ति काष्ठं खनति खनित्रं गभीरविवरं द्राक् ।
शत्रुं हन्ति शितासिः करणं त्ववलम्बते कार्यम् ॥५५॥

मलदूषितान्तरीयान् कथमित्थं परिहसत्स्वन्येषु त्वम् ।
मार्जयसि बहिरनुचितं शीघ्रं त्वं गच्छ निलयान्तः ॥५६॥

बालः कश्चन चषकेऽन्या कापि नयति बृहत्कलशयुगले।
गङ्गाया जलममलं पिपीलिकापि स्ववदनान्तः ॥५७॥

नद्याः पूरे वहति प्रसभं क्रोष्ट्रीं विनष्टं भुवनमहो ।
इति सा क्रन्दति गतवति जीवे सर्वं खलु गतं भोः ॥५८॥

चिररुग्णो नववैद्यादधिकतरं रोगलक्षणमवैति ।
बहुशोऽवैत्यगदगुणानपि भिषजोऽप्यधिकतरमेव ॥५९॥

मेषे गर्ते निपतत्येकैकस्तं प्रताडयति मर्त्यः ।
निष्कारणमश्मभिः पतितस्य जगति गतिश्चिन्त्या ॥६०॥

पीत्वा भेषजमधुना सपदीच्छसि किं निरामयत्वं रुग्ण?।
कालेनैव ह्यगदः परिणमति सहस्व शान्तमनाः ॥६१॥

कुल्यालङ्घनकर्मणि साधितमूनं मनागपि भवेच्चेत् ।
लङ्घनकर्तुः पतनं कुल्यायां साधितं विद्धि ॥६२॥

गृहदीप इति ज्वालां स्पृशसि यदि न दहति किं तव करं सा।
निलये विपिने वा सा मुञ्चति न कदापि निजधर्मम् ॥६३॥

491, 7th Cross, 4th Main,
JP Nagar, 3rd Phase,
Bangalore - 560078
e-mail: murthygss@gmail.com

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आर्योपवनम् (उत्तरभागः)

—जि.एस्. श्रीनिवासमूर्तिः

गम्यस्थाने दृष्टिं दूरान्यस्य निकटे पदे पान्थ।
स्खलसि यदि पतेः गर्तेऽगाधे चर सावधानं भोः॥६४॥

यावद्दूरं काम्ये गृनुरवतरस्युपत्यकां मूर्ख।
तावदुस्साध्यस्ते भविष्यति खलु पुनरारोहः॥६५॥

शैलारोहणनिरतस्तुङ्गस्थाने चरेदवहितो वै।
नो चेत् स्खलनाच्छीघ्रं व्रणितो भग्नो भजति नैच्यम्॥६६॥

तिन्तिड जरठः कृशितः श्वो वान्येद्युः पतिष्यसि गतायुः।
कृशितं तथापि न कुतोऽम्लत्वं दृष्टं तव फलानाम्॥६७॥

क्षुधितेन शुना पूतिकमन्नं लब्धं समुचितसंव्यूहः।
अन्यल्लभेत किं श्वा खादेत्कोऽन्यो वद कदन्नम्॥६८॥

नृत्ये विफला काचि-
त्पश्यति दोषं नटी नटनरङ्गे।
को विश्वसिति हि तस्यां
विहाय तस्याः प्रियाभिजनान्॥६९॥

पदकन्दुकखेलायां बहुशो
पटुनापि लक्ष्यपालेन।
लक्ष्यं न रक्ष्यते खलु
तथापि स भवति न निरवश्यः॥७०॥

लक्ष्यस्य भेदकोऽयं तस्य सहाया भवन्ति खेलायाम्।
अस्यैव यशो वित्तं लोको जानाति न तदितरान्॥७१॥

"गुरुवपुषस्तव भारं वहसि त्वं गज कथं विनायासम्?"।
इति पृष्टोऽवददार्खं वहसि यथा त्वं तथैवाहम्॥७२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

परिणय ललनां कामपि विना विलंबमिति विप्रमवदत्स्त्री।
प्रत्यवदत्तां विप्रः सिद्धोऽहं मां वृणीष्व त्वम्॥७३॥

वसतिर्धनिकस्य गृहे मांससमृद्धमशनं त्रिवारं ते।
वीथीसरमां समलामनुधावसि शुनक निर्लज्जः॥७४॥

ब्रह्मास्त्रेण दशमुखं युद्धे रामो जघान तेजस्वी।
तस्याप्यभवदवश्यं सारथिना स्मारणममोघम्॥७५॥

तरुमूले दृष्टोऽयं सर्पो व्रणितो जहाति न प्राणान्।
तस्य लगुडेन ताडनमारान्न जहाति पोगण्डः॥७६॥

जङ्घां दीर्घाकुरुषे शय्याविस्तृतिमतीत्य यदि पान्थ।
निद्राभंगः शीतौ पादौ भीतिर्भुजङ्गेभ्यः॥७७॥

वीणावादनचतुरो जनयति मधुरध्वनि स्ववीणायाः।
अनभिज्ञैरितरैः किं बालैः शक्यं तथाकर्तुम्॥७८॥

यदि वादयसि मनोज्ञं वेणुं पुरतस्तवादृतमहिष्याः।
सा शृणुयात् किं लभते गानश्रवणजरसास्वादम्॥७९॥

निम्नं गच्छति सलिलं ससुखं तुङ्गस्थलादनिर्बद्धम्।
शक्तिरवश्या भूरि प्रवणविरुद्धं जलं नेतुम्॥८०॥

शुनको भषतु प्रोच्चौरुन्नमितमुखो यथेच्छममितगर्वः।
नष्टा किमिन्द्रनगरी निपतति गगनं किमुद्वेगात्॥८१॥

यात्रिक कुशलं प्रीत्या पृच्छस्यन्यान्सखेव याने त्वम्।
कस्त्वं के ते गम्यस्थाने प्राप्तेऽवतरसि द्राक्॥८२॥

लब्धा लभ्या सागरमथने लब्धं च नेप्सितं गरलम्।
नापास्यद्यदि रुद्रस्तद्वद वृत्तं किमभविष्यन्॥८३॥

पूर्विकरोपितवृक्षच्छाया वसतिः फलान्यशनमस्य।
नवतरुरोपणमस्य न कार्यं कत्थति तरुरयं मे॥८४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दीपं झञ्झावातेऽपि नय रजन्यां भवेत्स पथदर्शी।
वाते निर्वाप्यत इति कदापि जह्यान्न करदीपम्॥८५॥

सस्यात् गुणवन्मरिचं दूषितमप्येवमस्ति लोकोक्तिः।
दूषितसस्यमपि भवेन्न यदा मरिचस्य का वार्ता॥८६॥

प्लवनं शिक्षितुमिच्छसि किं त्वं ग्रन्थपठनेन विद्यार्थिन्।
प्लवनाभ्यासं कुर्यादुदके नान्यो विकल्पस्स्यात्॥८७॥

सायं प्रातः सलिलस्रोतः प्रवहति निरन्तरं नद्याम्।
गाधजले जलजानां वृद्धिः ह्रासो मृतिश्चान्ते॥८८॥

भार्ये वर्षारम्भो गुरोरुपस्थितिरिहागतो बन्धुः।
एकत्राद्य सुसमयोऽयमाचर महः पच सुभक्ष्यम्॥८९॥

ज्वलनकणस्य क्षमताऽपारा स दहति वनानि च पुराणि।
दीपयति तैलदीपानेकैकं च प्रकाशार्थम्॥९०॥

मृत्कलशे रन्ध्रयुते जलमानेतुं यदि प्रयतसे भोः।
भवति श्रमस्तव वृथा मित्रैश्चोपहसितो भवसि॥९१॥

क्षोभयसि जलं निश्चलमन्तःकर्दममकारणं यदि चेत्।
सलिलमपेयं सरसश्चिराय भवति त्यजन्ति जनाः॥९२॥

उद्घाटय तव निलये तावद्वातायनानि वात्वनिलः।
सर्वाशाभिर्यावन्न त्वां स न पातयति चण्डः॥९३॥

"किं नष्टमभूत्ते वद" "कुण्डलम्"
"इह किं" "न, तत्र तरुमूले"।
"मृगयसि कुत इह ललने"
"तत्र तमो भवति दीपोऽत्र"॥९४॥

शकटीयुगबद्धवृषभयुगलस्यैकस्तु जिगमिषति सिन्धुम्।
अन्यो जिगमिषति गृहं वृषलः क्षेत्रं प्रयाति कथम्?॥९५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तोलयसि सुवर्णं यदि काष्ठतुलायां प्रशंसति न कोऽपि।
अवलंबते तुलाया वरणं हि पदार्थसान्द्रत्वम्॥९६॥

घनवस्तु द्रवरूपं तनुते भजति द्रवस्त्वनिलरूपम्।
तापात् बन्धाः शिथिलीभवन्ति नियमः स अनिवार्यः॥९७॥

यावन्न भवति वृत्ताकारस्तावत्पदे पदे बालः।
वृत्तस्यासमखण्डान् घटयति विघटयति च न खिन्नः॥९८॥

आर्येऽचिरपरिचितजनमीदृशममितसुखभाजनं कुरुषे।
का त्वं कोऽहं कथमयममूल्यरमणीयसंसर्गः॥९९॥

निर्गमनिरते मृदुपदशिञ्जितपुलकितरसज्ञजनवन्द्ये।
आर्ये वर्णालङ्कृतचरणे भवतात्पुनर्मिलनम्॥१००॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

समीहा!!

-प्रो. जनार्दनप्रसादपाण्डेयमणि

यदि स्यान्मे क्वचित् काचित् समीहा लोकरागेऽस्मिन्!
प्रभो सा भासतां भावान्विता देवापगा-कूले!!

सुरम्या वाङ्मयी द्राक्षामयी मे रागिणीक्रीडा।
स्वनन्ती स्यात्सदा सारस्वते शब्दार्चनामूले॥१॥

भजन्ती प्रत्यहं परमेश्वरं कर्माणि तन्वाना।
शुभा श्वासक्रिया मे लीयतां विष्णौ वपुर्नीले॥२॥

परेषां दुःखदग्धं वा परेषां सौख्यसन्तुष्टम्।
इदं चित्तं मदीयं रज्यतां सत्यार्चने शीले॥३॥

रसोद्भूता रसक्लिन्ना रसप्राणा रसाऽऽधीना।
सुहासा गीतिका मे गीयतां विश्वे वृहत्तूले॥४॥

पवित्रा भक्तिवाचो मे प्रयान्तु प्रत्युमाकान्तम्।
सदा ब्रह्माण्डमेतन्नृत्यति प्रीणाति यच्छूले॥५॥

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
गङ्गानाथझापरिसरः, आजादपार्क, इलाहाबाद (उ.प्र)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चन्द्रोऽहम्

—ऋषिराजपाठकः

कोऽसौ चलश्चारुतेशोऽमृतनिष्यन्दवर्षणः?
चन्द्रश्चलश्चारुतेशोऽमृतनिष्यन्दवर्षणः।
अहं चलश्चारुतेशोऽमृतनिष्यन्दवर्षणः॥१॥

राकाकाशस्यैकमात्रं राकेशोऽस्मि प्रशासकः।
घना नो यानहं स्पर्धे सान्द्रभावप्रकाशकः॥२॥

कूलात्कूलमलं प्रीत्यौकर्षन् मोदे सरित्पतिम्।
प्राणिनां रुचिवैभिन्याद् भावयामि मनोगतिम्॥३॥

आकाशमपरं नास्ति मत्तः परतरं तथा।
अनन्तं गगनं सर्वं मह्यं मे प्रसृतं यथा॥४॥

सनातनः सखा चास्मि प्राणिनां प्रत्ययाध्वगम्।
तद्रहस्यं सुरक्षामि राकाकम्बलमध्यगम्॥५॥

दूरस्थोऽपि प्रपश्यामि सुखिनो दुःखिनोऽबलान्।
सबलान् विवर्णान् हानैर्लक्ष्यलक्ष्मलवान् चलान्॥६॥

सखा प्रणयिनोश्चास्मि प्रियायाश्च मुखस्मितम्।
अविस्मृतस्मृती रत्या अद्वैतं प्रणयामृतम्॥७॥

परस्परमर्पणाय मामाकृष्य नभस्तलात्।
युग्मं प्रणयिनोः प्रेम्णो वचनं यच्छत्यच्छलात्॥८॥

युग्ममद्वैतमापन्नं वीक्ष्य मेऽपि मरीचयः।
रविरश्म्यधरोत्कण्ठाश्चुम्बनामृतपीतयः॥९॥

आश्लिष्टमृत्यवः प्रीत्यै ममोदयदिवाकराः।
मिलन्मदस्तकिरणा व्योमारुणविभाकराः॥१०॥

(रचनातिथिः १८-१९.०८.२०१९)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीकृष्णाष्टकम्

—अरविन्दतिवारी

हरिं वंशिकारागमुग्धं भवन्तं
सदा गोपिकावृन्दवन्द्यं चरन्तम्।
प्रिया गा वने सादरं चारयन्तं
भजे धीमतां मानसं चोरयन्तम्॥१॥

गृहं गोपिकानां कुमार विशन्तं
च हैयङ्गवीनं कदाप्याहरन्तम्।
धृतं गोपवृन्देन सत्यं वदन्तं
भजे नन्दसूनुं भवन्तं महान्तम्॥२॥

जगद्दैत्यदर्पजमेनं लसन्तं
सखे वासखे सर्वकाले हसन्तम्।
स्वचक्रेण दुष्टं भुवो नाशयन्तं
भजे कंसकालं खलं संहरन्तम्॥३॥

सभायां सतां द्रौपदी पीडयन्तं
कुरूणां नृपं स्वं बलं दर्शयन्तम्।
अहो शाटिकां सत्वरं वर्धयन्तं
भजे वासुदेवं स्वचित्ते वसन्तम्॥४॥

महाभारते दूतभूतं भ्रमन्तं
दुर्योधनं कौरवं बोधयन्तम्।
रुषा दिव्यरूपं च सन्दर्शयन्तं
भजे कृष्णमेवं मनो नन्दयन्तम्॥५॥

जगत्यां पुनर्धर्मकेतुं वहन्तं
विशालं पनर्धर्मसेत पतन्तम्।
कराभ्यां स्वदेशे पुनस्स्थापयन्तं
भजे धर्मसिन्धुं धरां पावयन्तम्॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

महासङ्ग्रे मायया सञ्ज्वलन्तं
प्रवीरं स्वधर्मे पुनर्योजयन्तम्।
गुडाकेशमित्रं कवीन्द्रं जयन्तं
भजे श्रीरणे चार्जुनं प्रेरयन्तम्॥७॥

सदा कर्मयोगं जनान् शिक्षयन्तं
बुधं योगिनं योगिराजं नमन्तम्।
मुनीनां प्रियं भारतं मोहयन्तं
भजेऽत्रारविन्दस्तमो नाशयन्तम्॥८८॥

कृष्णाष्टकमिदं लोकेऽरविन्देन कृतं शुभम्।
यः पठेच्छ्रद्धया भक्तस्तस्मिन् कृष्णः प्रसीदति॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्राच्यविद्याधिवेशनम्

-प्रणेता डॉ. रमाकान्त शुक्लः

वन्दे लम्बोदरं विघ्नतमिस्रापहभास्करम्।
शब्दार्थसिद्धिसंदात्रीं ततोऽहं भारतीं भजे॥१॥

ततः साम्बशिवं नत्वा सर्वविद्याजगद्गुरुम्।
गुरून् ध्यात्वा च कुर्वेऽहं प्राच्यविद्याधिवेशनम्॥२॥

ब्रह्मानन्दं गुरुं तातं मातरञ्च प्रियम्वदाम्।
अभिवाद्य मनःसंस्थौ प्रवर्ते पद्यबन्धने॥३॥

त्रिलोक्यां वसुधा श्लाघ्या तस्यां भरतभूः प्रिया।
तस्यां पुण्यपुरी वन्द्या शौर्य-पाण्डित्य-मण्डिता॥४॥

सह्यपर्वतरम्यायां पुण्यपुर्यां नदीद्वयम्।
मूला-मूठेत्यभिख्यातं जनानां जीवनप्रदम्॥५॥

मल्लस्तम्भचणा बालाः शिवराज-कथाप्रियाः।
विद्याभ्यासपरा यत्र गुरुसेवाविधायिनः॥६॥

एवम्भूतैः सरस्वत्याः पुत्रैः संशोधनव्रतैः।
स्थापिताभा[1] सभा प्राच्यविद्या-सम्मेलनाभिधा॥७॥

याखिले भारते तत्तत्स्थानेष्वायोज्य मेलनम्।
विद्याविविधशाखासु प्रकरोत्यनुशीलनम्॥८॥

तस्याः सभायाः प्रथमाधिवेशनं पुणेनगर्यामभवत्सुयोजितम्।
नन्दात्मनन्देन्दु (१९१९) समङ्कितेऽब्दके कृस्तीयपञ्चाङ्गपरम्परायुते॥९॥

---

१. स्थापिता अ.भा. सभा प्राच्यविद्या-सम्मेलनाभिधा॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीरामकृष्णो गोपालो भाण्डारकरवंशजः।
महाध्यक्षोऽभवत्तत्र विपश्चिद्भिः सुपूजितः॥१०॥

दामोदरात्मजः श्रीमान् पाण्डुरंगो गुणे-कुलः।
महासाचिव्यदायित्वं सम्यङ्निर्वाह्य हर्षितः॥११॥

दामोदरात्मजः श्रीमान् रघुनाथो बुधोत्तमः।
कर्मरकर-वंशीयस्तस्मै साह्यं प्रदत्तवान्॥१२॥

विज्ञैः पुण्यपुरी दृष्टा देशान्तरसमागतैः।
पार्वतीमन्दिरं दृष्टं सारसारामशोभितम्॥१३॥

कुचनेत्राङ्कचन्द्राब्दे (१९२२) कलिकाता-पुरोत्तमे।
आयोजितमभूद् भव्यं द्वितीयमधिवेशनम्॥१४॥

आचार्यः सिलवाँ लेवी महाध्यक्षोऽभवत्सुधीः।
डब्ल्यू आर् गोरले तत्र महासाचिव्यमादधात्॥१५॥

विबुधाः शोधपत्राणि प्रेष्ठा उत्साहपूर्वकम्।
अपठन् विदुषां मध्ये पी.जी. टीचिंग-कौंसिले॥१६॥

प्रश्नान् पृष्ट्वा बुधान् संख्यावन्तस्तुष्टिं तदुत्तरैः।
जग्मुस्तथा ननन्दुस्तान् स्वकीयाशीर्भिरानतान्॥१७॥

मद्रपुर्यां ततो जातं तृतीयमधिवेशनम्।
मद्रासाख्ये प्रतिष्ठाढ्ये विश्वविद्यालये शुभे॥१८॥

डॉक्टरगङ्गानाथो झा महाध्यक्षपदे स्थितः।
महनीयैर्विचारैः स्वैः श्रोतॄन् भूर्यभ्यनन्दयत्॥१९॥

साक्कोट्टइ-कृष्णस्वामी अय्यङ्गरकुलोद्भवः।
महासाचिव्यमकरोच्छ्रीदीवान-बहादुरः॥२०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अब्धिनेत्राङ्कचन्द्राब्दे (१९२४) मद्रपुर्यधिवेशनम्।
स्मारं स्मारं बुधाः सर्वे पराह्लादं प्रपेदिरे॥२१॥

दर्शनाक्ष्यङ्कचन्द्राब्दे (१९२६) प्रयागेऽभूत्सुयोजितम्।
ए.आय.ओ. सीतिसंस्थायाश्चतुर्थमधिवेशनम्॥२२॥

प्रयागे विश्वविद्यानामालये सुप्रतिष्ठिते।
महाध्यक्षोऽभवन्मोदी जीवनजी जमशेदजी॥२३॥

यः शम्स्-उल्-उलेमा-सर्-डाक्टरैर्वाड-संज्ञकैः।
विरुदैर्भूषितो रेजे पारसीकनृनायकः॥२४॥

महासाचिव्यमकरोत् डाक्टरोऽमरनाथझाः।
यमाश्रित्य प्रचलिताः प्रयागे रुचिराः कथाः॥२५॥

भोगिनेत्राङ्कचन्द्राब्दे (१९२८) पञ्चमं ह्यधिवेशनम्।
लाहौरे विश्वविद्यानामालयेऽभूत्सुयोजितम्॥२६॥

शास्त्री हरप्रसादोऽभून्महाध्यक्षोऽत्र डाक्टरः।
विद्याविनयसम्पन्नो वाग्मी शोधपरायणः॥२७॥

गङ्गाशोणसिलनभुवि पाटलिपुत्रेऽधिवेशने मतिमान्।
अय्यङ्गर एवासीन्महासचिवपदविभूषयिता॥२८॥

षष्ठं पाटलिपुत्राख्ये पुरेऽभूदधिवेशनम्।
नभोरामांकचन्द्राब्दे (१९३०) बिहारोत्कलमानितम्॥२९॥

'रायबहादुर' विरुदालङ्कृत आसीन्महाध्यक्षः।
श्रीमान् हीरालालो विद्याविनयादिसम्पन्नः॥३०॥

वह्नि-रामाङ्कचन्द्राब्दे (१९३३) वटोदरपुरेऽभवत्।
बडौदाशासनातिथ्ये सप्तमं ह्यधिवेशनम्॥३१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तत्र काशीप्रसादोऽभून्महाध्यक्षो बुधोत्तमः।
जैसवालकुलोत्पन्नः इतिहासविशारदः॥३२॥

इहाप्यय्यङ्गरो विद्वान् महासचिवतां व्यधात्।
चतुर्वारमसावेनद्दायित्वं समुदूढवान्॥३३॥

भूतरामाङ्कचन्द्राब्दे (१९३५) खैष्टेऽभूदधिवेशनम्।
अष्टमं श्रीमहीशूर-विश्वविद्यालये श्रुते॥३४॥

डाक्टरस्तत्र सा. कृष्ण-स्वाम्यय्यङ्गरपण्डितः।
प्राच्यविद्यास्तुतिं चक्रे महाध्यक्षासनस्थितः॥३५॥

श्रीपादः कृष्णसूनुर्वै बेल्वल्करकुलोद्भवः।
डाक्टरोपाधिसश्रीको महासचिवतां गतः॥३६॥

ऋषि-रामाङ्क-चन्द्राब्दे (१९३७) त्रावणकोर-शासनम्।
श्रीअनन्तपुरे रम्ये पद्मनाभकृपाविते॥३७॥
समायोजितवद् हृष्टं नवमं ह्यधिवेशनम्।
फ्रेडरिक् विलियम् थामस् महाध्यक्षो बभाविह॥३८॥
(युग्मकम्)

कार्यं सर्वं यथायोग्यं सञ्चाल्य हृदि हर्षितः।
श्री. कृ. बेल्वल्करस्तत्र महासचिवतां गतः॥३९॥

श्रीमाला-श्रीपतिक्षेत्र (तिरुमाला-तिरुपति)-देवस्थानसमाह्वये।
खाब्धिनन्देन्दु (१९४०) वर्षेऽभूद्दशमं ह्यधिवेशनम्॥४०।

महामना मालवीयो विद्वान्मदनमोहनः।
महाध्यक्षोऽभवत्तत्र ख्यातनामा सुदर्शनः॥४१॥

श्री मैसूर हट्टि कृष्णो महासाचिव्यमूढवान्।
शेषेण धार्यते भूमिः पाल्यते विष्णुना तथा॥४२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

निशानाथाब्धिनन्देन्दु (१९४१) प्रथितेऽब्देऽधिवेशनम्।
एकादशमभूद्भाग्य-नगरे भूतिपूरिते॥४३॥

गुलामो यजदान्यासीन्महाध्यक्षोऽत्र डाक्टरः।
श्रीसुशीलकुमारो डे महासचिवतां गतः॥४४॥

काशीहिन्दू-विश्वविद्यालयेऽभूद्द्वादशं शुभम्।
रामाब्धिनन्दचन्द्राब्दे (१९४३) प्राच्यविद्याधिवेशनम्॥४५॥

श्री. कृष्ण बेल्वलकरो महाध्यक्षोऽत्र संबभौ।
डॉक्टरः सु.कु.डे. चासीन्महासचिवपीठभाक्॥४६॥

ततो नागपुरे कन्हानोर्मिमालासुलालिते।
रसाब्ध्यङ्केन्दु (१९४६) वर्षेऽभूत्त्रयोदशमनुत्तम्॥४७॥
विद्वज्जनैः समाकीर्णं प्राच्यविद्याधिवेशनम्।
यत्र प्रौढैस्तथा नव्यै-र्विद्वद्भिश्शोधनं कृतम्॥४८॥
(युग्मकम्)

पाण्डुरङ्गो वामनजः काणे-कुल-समुद्भवः।
महाध्यक्षोऽत्र शुशुभे धर्मशास्त्र-धुरन्धरः॥४९॥

कालिङ्डिकुरिञ्ची अय्याः नीलकण्ठो बुधोत्तमः।
महासाचिव्यमकरोत् शास्त्री हर्षसमन्वितः॥५०॥

नारङ्गकफलास्वादः काव्यशास्त्ररसैः सह।
विद्वद्भिः सङ्गतैस्तत्र न्यषेवि समुदं मुहुः॥५१॥

वस्वब्धिग्रहचन्द्राब्दे (१९४८) दरभङ्गाह्वये पुरे।
चतुर्दशमभूत्सत्रं श्यामामातृकृपाकुले॥५२॥

दरभङ्गामहाराजस्तत्रातिथ्यप्रदोऽभवत्।
नानादिग्देश-सम्प्राप्त-विद्वद्भ्यो मानपूर्वकम्॥५३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मजूमदारोऽत्र रमेशचन्द्रोऽभवन्महाध्यक्षपदप्रतिष्ठः।
ऐतिह्यवेत्ताखिलभूप्रसिद्धः सदैव संशोधनकर्मलग्नः॥५४॥

डाक्टर एम्. निजामुद्दीनाभिधानस्तथा प्रधीः।
महासचिवताञ्चक्रे दरभङ्गाधिवेशने॥५५॥

आलतेकरवंशस्य प्ररोहोऽनन्तसञ्ज्ञकः।
सदाशिवतनूजन्मा डाक्टरोपाधिभूषितः॥५६॥
डाक्टरो रामचन्द्रोऽथो नारायणसुतः सुधीः।
दाण्डेकरवंशस्य दीप्तमुक्ताफलोत्तमः॥५७॥
भूषयामासतुस्तत्र महासचिवपीठकम्।
अन्योन्यं साह्यकर्तारौ सौमनस्यपरिप्लुतौ॥५८॥
(सन्दानितकम्)

आभ्यामेव हि विद्वद्भ्यामग्रेऽप्यङ्गीकृतं पदम्।
इदं, सफलतां याते येन द्वे ह्यधिवेशने॥५९॥

अथ पञ्चदशं मुम्बा-पुर्यभूदधिवेशनम्।
श्री सुशील कुमारो डे महाध्यक्षोऽभवत्सुधीः॥६०॥

मुम्बापुरीविश्वविद्यालय आयोजयत्त्विदम्।
एशियाटिक-सोस्याटी-साहाय्येनाधिवेशनम्॥६१॥

इदं पञ्चदशं सत्रं नन्दाब्ध्यङ्केन्दु-वत्सरे (१९४९)।
आयोजितमभूद्विज्ञैः स्मरणीयं व्यवस्थया॥६२॥

इन्दुभूताङ्कचन्द्राऽब्दे (१९५१) सत्रं लक्ष्मणपुर्यभूत्।
षोडशं यत्र प्राज्ञानां सम्मर्दः सम्यगञ्चितः॥६३॥

शास्त्री का.अ. नीलकण्ठो महाध्यक्षो भवन्निह।
स्वीयसम्बोधने चक्रे प्राच्यविद्याविचारणाम्॥६४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वह्निभूतग्रहेन्द्वब्दे (१९५३) सप्तदशाधिवेशनम्।
अहम्दाबादनगरे समायोज्यत सत्प्रियम्॥६५॥

सहयोगं चकारास्मिन् कर्मण्युत्साहशालिनी।
अहम्दाबाद-शिक्षायाः समितिः स्वागतोत्सुका॥६६॥

महाध्यक्षोऽत्र सञ्जातश्चट्टोपाध्यायवंशजः।
श्री सुनीति कुमारः सन् प्राच्यविद्याविशारदः॥६७॥

डाक्टरः श्रीरामचन्द्रनारायण-पदोत्तरः।
दाण्डेकरोऽस्मिन् सत्रेऽभून्महासचिवमानभाक्॥६८॥

अनेन साकमभवद् वेंकटरामराघवः।
कविर्विद्वांस्तथा वेद-विद्या-रक्षण-दक्षिणः॥६९॥

अन्नामलाइ-नगरेऽष्टादशं ह्यधिवेशनम्।
भूतप्राणाङ्कचन्द्राब्दे (१९५५) संयोजितमभूत्ततः॥७०॥

सर्वेपल्लीपूर्वपदो राधाकृष्णाह्वयः सुधीः।
महाध्यक्षोऽभवत्तत्र षड्दर्शन-विशारदः॥७१॥

अन्नामलाइनगरे तमिल्नाडुगते बुधैः।
प्रकृत्याः सुषमा दृष्टा चित्तनेत्रापहारिणी॥७२॥

पर्वता विहगा वन्या जीवाः किञ्च सरीसृपाः।
अभयारण्यगा दृष्टाः चेतोमोदप्रदायकाः॥७३॥

ग्रन्थग्रन्थिं समुद्घाट्य शास्त्राभ्यासे रतैर्बुधैः।
लोकस्य दर्शनं कार्यं, लोकः सर्वगुरुर्यतः॥७४॥

अहम्दाबादनगरेऽन्नामलाइपुरे तथा।
देहल्यामथ साचिव्यं चक्रतुः भुवनेश्वरे॥७५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रा.ना. दाण्डेकरः श्रीमाँस्तथा वेङ्कटराघवः।
ययोर्वंशंवदा धीरा भारतस्य निवासिनः॥७६॥
(युग्मकम्)

ऋषिभूताङ्कचन्द्राब्दे (१९५७) देहल्यामूनविंशकम्।
श्रीदेहली-विश्वविद्यालयः सत्रं समाह्वयत्॥७७॥

सदाशिवात्मजोऽनन्त आलतेकरवंशजः।
तत्राभवन्महाध्यक्षो प्राच्यविद्यादिवाकरः॥७८॥

श्रीराजेन्द्रप्रसादेनोद्घाटितं हृधिवेशनम्।
स्मरणीयमभूत् विद्याचणानां शोधकर्मणाम्॥७९॥

भुवनेश्वरेऽभूद्विंशं सत्रमुत्साहमण्डितम्।
मिराशी वासुदेवः श्रीविष्णुरध्यक्षतां व्यधात्॥८०॥

नन्दभूताङ्कचन्द्राब्दे (१९५९) ओडिशा-राज्यमौत्कलः।
विश्वविद्यालयश्चैवा योजयामासतुर्महम्॥८१॥

इन्दु-तर्काङ्क-चन्द्राब्दे (१९६१) जम्मु-कश्मीर-शासनस्।
अधिश्रीनगरं सत्रमेकविंशं स्वयोजयत्॥८२॥

डाक्टरो वेंकटरामो राघवो विबुधोत्तमः।
महाध्यक्षासनं भेजे विद्वत्कमलभास्करः॥८३॥

गत्वा श्रीनगरं रम्यं भारत-त्रिदशालयम्।
वैदुष्येन समं प्राज्ञैः निसर्गश्रीर्न्यषेव्यत॥८४॥

प्रत्यभिज्ञा-दर्शनादि-शास्त्रालोकनमुग्धधीः।
विद्वांस्तत्र समागत्य धन्यतामभजन्मुहुः॥८५॥

डलझीलं महारम्यं शारदामदिरं तथा।
रक्तं चतुष्पथं दृष्ट्वा विद्वांसो मोदमाप्नुवन्॥८६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अक्षौट-कुंकुम-द्राक्षा-सेव-शुष्कफलादिकम्।
मधु माषञ्च संसेव्य दोषज्ञा हर्षमाप्नुवन्॥८७॥

नौगृहेषु शिकाराख्येष्वारूढा ज्ञास्तु केचन।
डल-झीलविहारेण प्रह्लादं परमं ययुः॥८८॥

महासाचिव्यमकरोद् रा.ना. दाण्डेकरो बुधः।
रामारावस्तथा विद्वान् डाक्टर एम. पूर्वकः॥८९॥

प्राण-दर्शन-नन्देन्दु (१९६५) प्रमितेऽब्देऽसमे ततः।
संयोजितं गुवाहाट्यां द्वाविंशमधिवेशनम्॥९०॥

श्रीवासुदेवशरणोऽग्रवालो बिबुधोत्तमः।
महाध्यक्षोऽस्य सत्रस्याभवत् पण्डितमानितः॥९१॥

रा.ना. दाण्डेकरः पृथ्वीनाथपुष्पस्तथा बुधौ।
महासचिवदायित्वमूहतुः कार्यतत्परौ॥९२॥

गुवाहाटीगतैर्विज्ञैः कामाख्यादर्शनं कृतम्।
उमानन्दकृपा लब्धा ब्रह्मपुत्रोऽभिनन्दितः॥९३॥

काजीरङ्गानामकं सुप्रसिद्धं सत्त्वारण्यं लोकितं विज्ञवर्यैः।
खड्गिव्रातो यत्र विस्रम्भचारी दृश्याः सिंहा यत्र दन्तावलाश्च॥९४॥

महिषैः खड्गिभिः सिंहैः गजराजैस्तथा मृगैः।
सेवितं किञ्च विहगैः काजीरंगा व्यलोकि तैः॥९५॥

शास्त्राभ्यासरतैर्विद्भिर्दृश्यो लोकोऽपि निश्चितम्।
एतेनायाति नैपुण्यं काव्यकारणतां गतम्॥९६॥

सर्वस्मिन्नप्यतो विज्ञाः! प्राच्यविद्याधिवेशने।
आयोजकैः प्रावधानं भ्रमणाय विधीयते॥९७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रस-दर्शन-नन्देन्दु-प्रथिते (१९६६) खैष्टवत्सरे।
त्रयोविंशमभूत्सत्रं पुरेऽलीगढनामके॥९८॥

अलीगढस्थमुस्लीम-विश्वविद्यालयेन वै।
अयोजिते महासत्रेऽध्यक्षोऽभून्जैनपण्डितः॥९९।
आदिनाथो नेमिनाथ उपाध्येनामडाक्टरः।
संस्कृतप्राकृतापभ्रंशादिभाषासुपण्डितः॥१००॥
(युग्मकम्)

पुष्प-दाण्डेकरावत्राप्यभूतां महदुत्तरौ।
सचिवौ सदसः सञ्चालन-कर्मणि पण्डितौ॥१०१॥

वाराणस्यामभूत्तीर्थङ्करसंख्यानुगो (२४) महः।
भोगि-शास्त्राङ्क-चन्द्राब्दे (१९६८) विश्वविद्यालयाङ्गणे॥१०२॥

वाराणसेय-पद-पूर्वक-विश्वविद्या-
गेहेऽधिवेशनमिदं सफलत्वमापत्।
प्राच्यप्रतीच्यसुधियां सुविचारजन्या-
लोकप्रभाप्रसरणादवदातभूतम्॥१०३॥

पठित्वा शोधपत्राणि काश्यां विद्वज्जनैः समैः।
गंगास्नानं समाचर्य विश्वनाथस्तुतिः कृता॥१०४॥

कैश्चित् नौकाविहारेण गंगातीरसुशोभिनाम्।
घट्टानां दर्शनं कृत्वा स्वात्मा धन्यः कृतो बुधैः॥१०५॥

प्रालेयाचलतुल्यानां पण्डितानां महौजसाम्।
शास्त्रार्थे गर्जनं श्रुत्वा को नाम न सुखी भवेत्॥१०६॥

आचार्यश्रीविश्वबन्धुर्महाध्यक्षासने स्थितः।
प्राच्यविद्यानुसन्धान-प्रगत्यर्थमभाषत॥१०७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आवस्वब्ध्यङ्कचन्द्राब्दात् (१९४८) महासचिवतां गतः।
रसाह्यङ्काब्जपर्यन्तं (१९८६) दाण्डेकरबुधोत्तमः॥१०८॥

वाराणस्यां तेन साकं महासाचिव्यधारकः।
बेल्लिकोत्तो रामचन्द्रः शर्मा डाक्टर आस्थितः॥१०९॥

कलिकाता-पुरे जातं पञ्चविंशाधिवेशनम्।
नन्द-तर्काङ्कचन्द्राब्दे (१९६९) स्फूर्त्युत्साहसमन्वितम्॥११०॥

विश्वविद्यालयस्तत्र जादवपुरलाञ्छनः।
योजयित्वा महासत्रं प्राप्तवान् भूरिशो यशः॥१११॥

श्रीमान् परशुरामो ज्ञः श्रीलक्ष्मण-तनूद्भवः।
वैद्यवंशावतसोऽभून्महाध्यक्षोऽत्र डाक्टरः॥११२॥

उज्जयिन्यां महाकाल-नगर्यामभवत्ततः।
नेत्रर्षिनन्दचन्द्राब्दे (१९७२) षड्विंशमधिवेशनम्॥११३॥

दिनेशचन्द्रसर्कारस्तत्राध्यक्षपदे स्थितः।
स्वभाषणे समस्यानां समाधानानि प्रास्तुवत्॥११४॥

स्थानीयसचिवत्वेन वि. पूर्वो वेंकटाचलः।
उद्घाटने समाप्तौ च पद्यबन्धैरभाषत॥११५॥

श्रीशिवमंगलसुमनः कविवर्यः कुलपतिस्तत्र।
हृदयावर्जकभाषणमकरोत्समवेतविज्ञानाम्॥११६॥

मालवी-माच-गैर्वाणी-नाट्यप्रभृतिमञ्चनम्।
सर्वं हृद्यतया तत्र प्रयुक्तं सत्कलाधरैः॥११७॥

समापनसमारोहे सूचनासीत्प्रसारिता।
रा.ना. दाण्डेकरेणात्र महासचिवपीठतः॥११८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विश्वनाथात्मजः श्रीमान् पुरुषोत्तमडाक्टरः।
महाध्यक्षश्चितः प्राज्ञो बापटान्वयजन्मभाक्॥११९॥

कुरुक्षेत्रे सप्तविंशं महासत्रं भविष्यति।
पुरुषार्थर्षि-नन्देन्दौ (१९७४) वर्षे गीता-सुघोषिते॥१२०॥

विक्रमाख्ये मया विश्वविद्यालये
प्रस्तुतं पत्रमेकं समुत्साहिना।
दत्तमाजीवनं किञ्च शुल्कं ततः
प्राच्यविद्यासभायाः सदस्योऽभवम्॥१२१॥

कुरुक्षेत्रे समभवत् सप्तविंशाधिवेशनम्।
पु.वि. बापट आचार्यो महाध्यक्षासनं श्रितः॥१२२॥

रा.ना. दाण्डेकरस्तत्र महासचिवतां गतः।
वि. वेंकटाचलस्तत्र संयुक्तसचिवोऽभवत्॥१२३॥

अपठ्यत मया तत्र पत्रमेकं ससंमुदम्।
रमारञ्जनमुख्यार्याध्यक्ष्ये संस्कृतभाषया॥१२४॥

तत्र गीतारथो दृष्टोऽथो स्थाण्वीश्वरमन्दिरम्।
बह्मपूर्वं सरो दृष्टं स्नानं तत्र समाचरम्॥१२५॥

आद्यारचरणझावर्य्याः सपत्नीका मया सह।
स्नात्वा ब्रह्मसरस्तोये परां मुदमवाप्नुवन्॥१२६॥

पण्डितानां परिषदि तेषां पाण्डित्यपूरितम्।
शास्त्रार्थमाकर्ण्य मनश्चमत्कृतमभून्मम॥१२७॥

सांस्कृतिके समारोहे हरियाणाराज्यविश्रुताः।
स्त्रीभिः पुम्भिश्च या गीतास्ता रागिण्यः श्रुता मया॥१२८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीमद्भिर्बापटाचार्यैस्तथा दाण्डेकरैः सह।
मया रामसुरेशेण पाण्डेयेनांकिता छविः॥१२९॥

राजधानीमहापूर्व-विद्यालय-सुषत्रिका।
प्रकाश्य चित्रं तन्मोदं गता स्वान्तः सितासितम्॥१३०॥

विद्वांसो मिलितास्तत्र जाताः परिचिता मया।
वृद्धविद्वत्प्रणामेन पावितो मस्तको मम॥१३१॥

ध्यानेशनारायणचक्रवर्ती घोषस्तथा दीपकनामधेयः।
अन्ये जनाश्चैव जगत्प्रसिद्धं प्रादर्शयन्नाटकमद्वितीयम्॥१३२॥

धारवाडे ततो जातमष्टाविंशाधिवेशनम्।
कर्णाटकविश्वविद्यालयामन्त्रितमुद्भटम्॥१३३॥

कलम्बूर शिवो राममूर्तिस्तत्राभवद् बुधः।
महाध्यक्षो ज्ञानमूर्तिः श्रुतो मूर्तिकलाचणः॥१३४॥

रसर्षिनन्दचन्द्राब्दे (१९७६) धारवाडाधिवेशने।
के. कृष्णमूर्तिराचार्यः स्थानीयसचिवोऽभवत्॥१३५॥

ततः प्रकाशितं ध्वन्यालोकग्रन्थं द्विभागकम्।
क्रीत्वाहमासं मुदितस्तथान्या अपि पुस्तिकाः॥१३६॥

मल्लिकार्जुनमंसूरप्रस्तुतं गानमद्भुतम्।
नयनाभोंसले-नृत्यं तथा कर्णाटकस्तुतिः॥१३७॥

एतत्सर्वमपि श्रोत्र-नेत्र-विश्रामदायकम्।
कार्यक्रमे सांस्कृतिके कलाकारैः प्रदर्शितम्॥१३८॥

तत्राधिवेशने दृष्टो राधावल्लभपण्डितः।
हरिदत्तश्च तन्मित्रं राजलक्ष्मी च पंण्डिता॥१३९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ततः पुण्यपुरे जातमूनत्रिंशाधिवेशनम्।
'बोरी'-परिसरे पुण्ये भोग्यश्वाङ्केन्दुवत्सरे (१९७८)॥१४०॥

श्रीडेनियल इङ्गाले महाध्यक्षसेनस्थितः।
महासाचिव्यमकरोद् दाण्डेकरमहोदयः॥१४१॥

महाराष्ट्रप्रदेशस्य राज्यपालमहोदयः।
श्रीसादिकअली तत्र मुख्यातिथरजायत॥१४२॥

श्रीमान् धडफले तत्र सरसं प्रास्तुवद् बुधः।
'कात्यायनी' नाम नाट्यं तथा 'संगीतकं वरम्'॥१४३॥

निर्देष्टृ-प्रस्तुतं वीक्ष्य नाटयं मण्डपसंस्थितः।
नानादिग्देशसम्प्राप्तो जनो मग्नो रसार्णवे॥१४४॥

श्रीमान् शक्तिधरः शर्माऽस्मांक 'खुर्जा'-सतीर्थकः।
सज्जनसिंह लिश्केन सह तत्र समागतः॥१४५॥

अस्माभिरपि तद्दृष्टमनुष्ठानं रसावहम्।
शुक्लेन शमर्णा लिष्केनारुणोदयजानिना॥१४६॥

भारतस्य युवप्नोऽथो प्रौढा वृद्धा मनीषिणः।
अष्टादशविभागेषु-शोधपत्राण्यवाचयन्॥१४७॥

भाटे सरोजादिगीतां ग.बा. पलसुलेकृताम्।
गीतिं मन्दाकिनी-नाम्नीं सचेता को हि विस्मरेत्॥१४८॥

साहित्यसङ्गीतकलासाधनातीर्थ-सन्निभे।
श्रीरवीन्द्रयशस्तम्भे श्रुते शान्तिनिकेतने॥१४९॥

वियद्वसुग्रहेन्द्वब्दे (१९८०) कार्तिके मासि पावने।
प्राङ्गणे विश्वभारत्या जातं त्रिंशाधिवेशनम्॥१५०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नीहाररञ्जनो राय आचार्योऽध्यक्षतां गतः।
रा.ना. दाण्डेकरश्चासीत् महासचिवपीठगः॥१५१॥

विश्वोत्तरभारत्यां ब्रह्ममित्रस्य सम्मुखे।
साहित्यविषये पत्रं प्रस्तुतं मयका किल॥१५२॥

जी.सी.त्रिपाठिना साकं तत्र मे संस्तवोऽभवत्।
तथा परिचयश्चाभूत् एम्. डुकवित्जसंज्ञया॥१५३॥

सांस्कृतिक्यां च प्रस्तुत्यां दृष्टा 'चाण्डालिका' मया।
रवीन्द्राख्यं च संगीतं बंगभाषागतं श्रुतम्॥१५४॥

रा.ना. दाण्डेकरेणाहं समापन-महोत्सवे।
आहूतः पद्यपाठार्थं किन्त्वासमनुपस्थितः॥१५५॥

स्वकक्षे सुखमस्वाप्सं भुक्त्वा दधि सशर्करम्।
अतो नैव स्थितस्तत्र समापन-महोत्सवे॥१५६॥

पश्चादहं समाप्ते तु समापन-महोत्सवे।
दाण्डेकर-महाभागान् याथार्थ्यं व्यनिवेदयम्॥१५७॥

श्रुत्वा मत्कथितं वृत्तं तेऽट्टहासपुस्सरम्।
कृत्वा वार्तां मया साकं स्वनिवास-स्थलं गताः॥१५८॥

ततो बोलपुर-स्थानाद् गृहीत्वा रेलयानकम्।
कलिकातां प्रयातोऽहं द्रष्टुं नगरवैभवम्॥१५९॥

कालिकामन्दिरं किञ्च दक्षिणेश्वरमन्दिरम्।
विक्टोरियास्मारकं च तारामण्डलवीक्षणम्॥१६०॥

मेट्रोयानं ट्रामयानं मूषकाणां बिलानि च।
रिक्शायानं जलयानं वेलूरमठमेव च॥१६१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आपणान् विपणीश्चैव पुस्तकालयमेव च।
वटवृक्ष-महोद्यानमन्यद्दृश्यं यथाक्षमम्॥१६२॥

वीक्ष्यागतो बोलपुरमग्रिमे दिवसे तथा।
अपरिण्डियेतियानेन प्रस्थितो देहलीं प्रति॥१६३॥

मृन्निर्मितानि बालानां गोलकानि तथापरम्।
क्रेतव्यं पेटिकायां हि निधायापत् स्वदेहलीम्॥१६४॥

ततो जयपुरे जातमेकत्रिंशाधिवेशनम्।
राजस्थानविश्वविद्यालयामन्त्रणपूर्वकम्॥१६५॥

नेत्राहिनन्दचन्द्राब्दे (१९८२) योजितेऽस्मिन् महोत्सवे।
श्रीगौरीनाथशास्त्र्यासीन्महाध्यक्षो महामतिः॥१६६॥

रा.ना. दाण्डेकरश्चासीन्महासचिवमानभाक्।
कृष्णकान्तचतुर्वेदी सहसाचिव्यमाप्तवान्॥१६७॥

स्वागतं व्याहरत्तत्र श्रीमान् कुलपतिर्मुदा।
अतिथिभ्यः समस्तेभ्यः टी.के.एन. उन्नीथनः॥१६८॥

ओ.पी. मेहरा-नामा राजस्थान-गवर्नरः।
सत्रमुद्घाटयामास स्वीयभाषणपूर्वकम्॥१६९॥

तेनोक्तं प्राच्यविद्याया ज्ञानिभिर्विश्वबन्धुता।
स्थापनीया पालनीया पोषणीया च यत्नतः॥१७०॥

श्रीराजेन्द्रप्रसादस्य वाक्यं तेन समुद्धृतम्।
अतीताध्ययनं भूयाद् भव्यद्भाविहितावहम्॥१७१॥

तेनोक्तं यत्समाजस्य मनोवृत्तिसुधारणे।
कलाज्ञानविचारज्ञा महतीं भूमिकां दधुः॥१७२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रम्ये जयपुरीयेऽस्मिन्नधिवेशन एकतः।
ज्ञान-विज्ञान-पूर्णानि शोधपत्राणि पण्डितैः॥१७३॥
पठितान्यन्यतश्चान्यैः कलाकारैः सुशिक्षितैः।
दृश्यश्रव्यानुयायिन्यो हृद्याः प्रस्तुतयः कृताः॥१७४॥
(युग्मकम्)

कालिदासकृतं काव्यम् ऋतुसंहारनामकम्।
चन्द्रशेखर-निर्देशे प्रयुक्तं गीतनाट्यवत्॥१७५॥

गिरीशकरनाडस्य 'ययाती' त्यतिविश्रुतम्।
नाटकमपि प्रादर्शि शिक्षाभ्यासपरैर्नटैः॥१७६॥

'धरती धोरारी' त्येषा राजस्थानीयगायकैः।
प्रस्तुतिः श्लाघिता जाता दर्शकैः सर्वकैरपि॥१७७॥

अध्यक्षेण स्वयं तत्र गौरीनाथेन शास्त्रिणा।
बालपात्रमयं नाट्यमभिज्ञानं प्रदर्शितम्॥१७८॥

दाण्डेकरानुमत्याहं समापन-महोत्सवे।
प्राच्यविद्यापराँच्छ्लोकान् श्रावयित्वा मुदं गतः॥१७९॥

ते श्लोका अङ्किता दैनन्दिनीपृष्ठे मया द्रुतम्।
तस्मिन्नेव दिने श्रातृवृन्दरुज्जनवारिणः॥१८०॥

ते श्लोका अत्र दीयन्ते विद्वज्ज्नमुदे मया।
प्रमादान् क्षन्तुमर्हन्ति जातानत्र दयालवः॥१८१॥

"श्रीभाण्डारकरेण लेविसिलवाँ-काणे-मिराश्यय्यरैः
गंगानाथबुधादिनाथशिवरामैरर्चिता सादरम्।
राधाकृष्ण-दिनेशचन्द्रविनुता श्रीकण्ठमोदीडिता
गौरीनाथयुता जयत्यविरतं श्रीप्राच्यविद्या शुभा॥१८२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पुण्यपूः कालिकाता तथा देहली
मुम्बई मद्रदेशस्तथा कालिका।
पूजयामासुरन्या नगर्यश्च यां
प्राच्यविद्यां शुभां नौमि तां सादरम्॥१८३॥

वासुदेवार्चिता नीलकण्ठार्चिता
रामचन्द्रार्चिता वेंकटाराधिता।
विश्वबन्धुत्वमुद्घोषयन्ती च या
प्राच्यविद्यां शुभां नौमि तां सादरम्॥१८४॥

यत्र विश्वं भवत्येकनीडं सतां
यत्र सत्यं शिवं सुन्दरं राजते।
यत्र वैदुष्यपुञ्जः समृद्धिं गतः
प्राच्यविद्यां शुभां नौमि तां सादरम्॥१८५॥

वेदभाभासिता सत्कलालासिता
ज्ञानविज्ञानसाहित्यचर्चायुता।
या च वागर्थसंशोधनैर्वर्द्धिता
प्राच्यविद्यां शुभां नौमि तां सादरम्॥१८६॥

संस्कृतं प्राकृतं तामिलं तेलुगुं
कन्नडं कैरलीं बांगलामांगलाम्।
वाचमन्यां च तां तां ब्रुवाणा च या
प्राच्यविद्यां शुभां नौमि तां सादरम्॥१८७॥

या च प्रेमामृतेनास्ति सिक्ता भृशं
या च शीलाम्बुधेर्वीचिरुल्लासिनी।
जंगमं ज्ञानतीर्थं च या कीर्त्यते
प्राच्यविद्यां शुभां नौमि तां सादरम्॥१८८॥"

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सहस्रं द्विशतं चैव विद्वांसोऽत्र समागताः।
अक्टूबरमासस्यैकत्रिंशेऽह्नि गृहं गताः॥१८९॥

ममाग्रजः कृष्णकान्तशुक्लो डॉक्टरलाञ्छनः।
बसयानेन सम्प्राप्तो देहलीं मयका सह॥१९०॥

कञ्चित्कालं यापयित्वा देहल्यां स पुनर्गतः।
बरेलीनगरं यत्र वासस्तस्य कुटुम्बिनः॥१९१॥

प्राणसिद्धिग्रहेन्द्वब्दे (१९८५) कर्णावत्यामभूत्ततः।
गुजरातविद्यापीठे द्वात्रिंशमधिवेशनम्॥१९२॥

घाटगेवंशसम्भूतोऽमृतः श्रीमाधवात्मजः।
अभाषत महाध्यक्षासनमास्थाय पण्डितः॥१९३॥

निर्वाचने मया तत्र सम्प्राप्तो विजयस्तथा।
प्रतिभागिनामहं स्नेहपात्रमासं सुभाग्यतः॥१९४॥

तत्रापि पठितं पत्रं मयैकं शोधसाधितम्।
प्रश्ना उत्तरिता सर्वे ये पृष्टाः श्रोतृभिर्मुदा॥१९५॥

षडशीत्युत्तरैकोनविंशे (१९८६) खैष्टेऽथ वत्सरे।
एशियाटिक-सोस्याट्या कलिकातामहापुरे॥१९६॥

सौल्टलेक-महाक्षेत्रे त्रयस्त्रिंशाधिवेशनम्।
योजितं परमप्रीत्या स्वीयसाधनशक्तितः॥१९७॥

'साल्ट लेके' समारम्भे रमारंजन-पण्डितः।
स्वागतं व्याहरज्ज्ञेभ्यो धीरगम्भीरया गिरा॥१९८॥

बंगस्य मुख्यमन्त्री श्री ज्योतिर्वसुमहाशयः।
उद्घाटनं समज्यायाः कृतवान्निजभाषणैः॥१९९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

साल्टलेक्-स्टेडियम्मध्ये कविसम्मेलने श्रुताः।
सभ्यैः कवीनां रचना नानाभावसमन्विताः॥२००॥

द्राविडभाषाविद्वान् वादासेरी इयेमपेरुमलः।
आसीत् सुब्रह्मण्यम् कलिकातायां महाध्यक्षः॥२०१॥

कविसम्मलेनं कर्तुं कवयो मामवीवदन्।
साल्टलेके कृतं तच्च मया लोकानुशासनात्॥२०२॥

दीपकोत्तरघोषेण श्रीरवीन्द्रस्य गीतयः।
अनूद्य संस्कृते गीता विद्वन्मानसमोददाः॥२०३॥

अनेकैः श्रावितं स्वीयं काव्यं लिखितपाठकैः।
अपश्यन्नैव सभ्यान्ये लेखमात्रावलोकिनः॥२०४॥

सहसा विद्युतो लोपादन्धकारोऽभवद्घनः।
तदा कोऽपि न सन्नद्धः प्रस्तोतुं कवितां निजाम्॥२०५॥

तदान्धतमसो राज्ये कण्ठस्थं श्रावितं मया।
'भाति मे भारतं' गीतं होरार्धसमयावधौ॥२०६॥

सभागारे कृतं कैश्चिल्लघुटार्चप्रदर्शनम्।
यत्प्रकाशकणा आसन् ध्वान्ते खद्योतका इव॥२०७॥

मत्काव्यपाठवेलायां सहसा विद्युदागता।
मया दृष्टा रसे मग्ना-स्तत्रासीनाः सचेतसः॥२०८॥

पुनः सञ्चालितं जातं कविसम्मेलनं द्रुतम्।
पठिता यत्र रचना अनेकैः कविपुंगवैः॥२०९॥

रा.ना. दाण्डेकरेणात्र महासचिवता कृता।
पृथ्वीनाथेन पुष्पेण तत्साह्यं प्रतिपादितम्॥२१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ममाग्रजः कृष्णकान्तः शुक्ल आचार्य-डाक्टरः।
उमाकान्तः सभार्यश्च कलिकातां समागतौ॥२११॥

नन्दवस्वङ्कचन्द्राब्दे (१९८९) विशाखापत्तने पुरे।
पण्डितैर्मण्डितं जातं चतुस्त्रिंशाधिवेशनम्॥२१२॥

आन्ध्रोत्तरे विश्वविद्यालये संयोजितो महः।
स्मरणीयोऽभवत्पुंसां सज्जातिथ्यप्रकर्षवान्॥२१३॥

विशाखापत्तने श्रीमान् रा.ना. दाण्डेकरः सुधीः।
महाध्यक्षासने स्थित्वा सदःशोभामवर्धयत्॥२१४॥

शिवदत्तदत्तात्रेयो जोशीवंशसमुद्भवः।
महासचिवतां यातः विद्वद्वर्धापितोऽभवत्॥२१५॥

महासचिववक्तव्ये जोशी पद्यमये बुधः।
महासचिव-पूर्वेभ्यो नम उक्तिं समार्पयत्॥२१६॥

प्राकृतस्य तथा जैन-विद्याया अनुभागके।
मया निर्व्यूढमाध्यक्ष्यं विद्वन्मानपुरस्सरम्॥२१७॥

पण्डितानां सभा यत्र योजितासीन्महागृहे।
तत्राध्यक्षानुमत्यैव योजितं कविमेलनम्॥२१८॥

सूर्यनारायणः पेरिश्चकारोद्घाटनं बुधः।
कविसम्मेलनस्यास्य स्वीयैराशंसनैः शुभैः॥२१९॥

तस्य सान्निध्य एवासीत् चालितं कविमेलनम्।
त्रिघण्टाकालपर्यन्तं श्रोतृवृन्दसुखप्रदम्॥२२०॥

तत्राभिराजराजेन्द्रमिश्रादिकविकोकिलैः।
यथेच्छं कूजितं येन वसन्तस्यागमोऽभवत्॥२२१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कृष्णनारायणो राजदेवमिश्रोऽथ भास्करः।
श्री कामताप्रसादः श्री शर्मौगेटिपरीक्षितः॥२२२॥

प्रतापवन्द्योपाध्यायो जयश्रीर्बङ्गराज्यजा।
कृपारामादयस्तत्र प्रास्तुवन् कविता निजाः॥२२३॥

विशाखापत्तने सत्र-समापनमहोत्सवे।
'भाति मे भारतं' काव्यं श्रावितं सस्वरं मया॥२२४॥

तच्छ्रुत्वा मोदमापन्नाः सदस्याः सकलास्तदा।
केचिच्चित्रांकने लग्ना विदेशागतसूरयः॥२२५॥

रमारञ्जनमुख्यार्यो गाढं मां परिषष्वजे।
दाण्डेकरमहाभागोऽपि परां मुदमाप्तवान्॥२२६॥

विशाखापत्तने दृष्टा समुद्रतटमागतैः।
'पनडुब्बी' ति विख्याता बृहन्नौका, विदां गणैः॥२२७॥

स्वातन्त्र्ययुद्धयज्ञस्य होतुरादिनिवासिनः।
प्रतिमां च विलोक्यासन् जनाः श्रद्धासुपूरिताः॥२२८॥

महोदधेस्तरंगाणां गर्जनं धावनं तथा।
श्रुत्वा दृष्ट्वा च सञ्जाताः बुधा विस्मितमानसाः॥२२९॥

श्रीकाङ्गडीगुरोर्वंश-विश्वविद्यालये ततः।
खाङ्कनन्देन्दु (१९९०) वर्षेऽभूत् पञ्चत्रिंशाधिवेशनम्॥२३०॥

गङ्गातरङ्गालिपूते हरिद्वारे सुयोजिते।
अस्मिन् सत्रे महाध्यक्षो रमारञ्जन आययौ॥२३१॥

वाग्मी विद्वान् मुखर्जी श्री रमारञ्जन ऊचिवान्।
'सन्त्यद्य समकालीनाः उल्लेख्याः कवयो मया'॥२३२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मादृशानामनेकेषां नामान्युक्तानि तेन वै।
संस्कृतस्य प्रगत्यर्थं नूला यत्नाश्च कांक्षिताः॥२३३॥

राजारमन्नविज्ञानी समुद्घाटनभाषणम्।
कृत्वा प्रशंसां विज्ञानां प्राप्तवान् तुष्टिदायिनीम्॥२३४॥

रात्रौ मया तत्र गरीबदास-विद्यालये देवगिरः कवीनाम्।
सम्मेलनं योजयितुं प्रयासः कृतस्तथापं महतां प्रशंसाम्॥१३५॥

संस्कृतकविसम्मेलन-सञ्चालक आसमहमेव।
हरिनारायणदीक्षित आसीदध्यक्षतां गमितः॥२३६॥

प्रयागतः सूरिमणिर्जनार्दन-प्रसादपाण्डेयमणिर्युवा कविः।
अगायतालम्ब्य मनुष्यचेतनां गीतिं स्वकीयव्यथया परिप्लुताम्॥२३७॥

तत्राभिराजेन मनोपहारिणा
गीतेन सर्वा हि सभा विमोहिता।
'न मे प्रिये रोचत एव जीवनं
न वा जगच्चास्ति प्रियं त्वया विना'॥२३८॥

विद्वरैर्हरिद्वारं गतैः पञ्चपुरी-गतम्।
रामणीयकमाहात्म्यमक्षिलक्ष्यीकृतं मुदा॥२३९॥

ब्रह्मकुण्डे कृतं स्नानं भीमगोडावलोकिता।
गत्वा कनखलेऽकारि श्रीदक्षेश्वरदर्शनम्॥२४०॥

छतरीमन्दिरे केचित् संस्थितं कृष्णविग्रहम्।
सम्पूज्य राधिकायुक्तं मनःशान्तिमवाप्नुवन्॥२४१॥

दर्शनं मनसादेव्याश्चण्डीदेव्याश्च पावनम्।
कृत्वावलोकितं पुण्यं भारतमातृमन्दिरम्॥२४२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

हरद्वारे ब्रह्मकुण्डे गंगानीराजनं बुधाः।
दृष्ट्वा हि धन्यतामापुः पुनर्दर्शनकांक्षिणः॥२४३॥

केचिद्गत्वा हृषीकेशं सेतुं श्रीलक्ष्मणाभिधम्।
दृष्ट्वा प्रमोदमायाताः श्रद्धावन्तस्तथास्तिकाः॥२४४॥

शिवदत्तदत्तात्रेयजोश्यधिवेशनस्य समापने।
उदघोषयत्कवठेवकरोऽ स्माकं महाध्यक्षो नवः॥२४५॥

श्रेण्यसंस्कृतसंज्ञस्यानुभागस्याभवं चितः।
अध्यक्षोऽहं हरिद्वारे सर्वसम्मतनिर्णयात्॥२४६॥

अध्यक्षभाषणं कर्तुं पुण्यपुर्यधिवेशने।
मया सज्जा विधेयासीदग्रिमे वत्सरद्वये॥२४७॥

समापनोत्सवे जाता प्रस्तुता कविता मणेः।
ततः स्वनगरं याता ज्ञाः स्मरन्तोऽधिवेशनम्॥२४८॥

रामाङ्कनन्देन्द्वब्दके (१९९३) श्रीपुण्यपुर्यां सूरयः।
अधिवेशने षट्त्रिंशके मिलिता गवेषणकारिणः॥२४९॥

आसीन्महाध्यक्षवरः प्रभाकरो नारायणः श्रीकवठेकरान्वयः।
'बोरी' तिसञ्ज्ञे प्रथिते गवेषणागारे स्वसंशोधनकर्म-दर्शिणः॥२५०॥

श्रेण्यसंस्कृतपरेऽनुभागकेऽध्यक्षतां कृतवतः प्रसन्नता।
वर्धिता मम च पत्रवाचकास्तोषमापुरथ शोधसाधकाः॥२५१॥

श्रेण्यसंस्कृतसंज्ञस्यानुभागस्याभवन् बुधाः।
अध्यक्षास्तेषु केषाञ्चिन्नामान्यत्र लिखाम्यम्॥२५२॥

महामहोपाध्यायः श्री कुप्पूस्वामी विदां वरः।
महामहोपाध्यायः श्री प्रसादो हरपूर्वकः॥२५३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

महामहोपाध्यायो झा गंगानाथो बुधोत्तमः।
वनमाली चक्रवर्ती पण्डित ए.सि. वुल्नरः॥२५४॥

एस.के.डे.एफ.डब्ल्यू. कुन्हनराजादिपण्डिताः।
हरिचन्द्रः शास्त्रिवर्यः पी.वी. काणे बुधोत्तमः॥२५५॥

के.ए. पदोत्तरः श्रीमान् सुब्रह्मण्यं तथाय्यरः।
श्रीमान् शिवप्रसादश्च भट्टाचार्यो विदुत्तमः॥२५६॥

वी. राघवन् तथा के.के. हण्डीकः सूरिपुंगवः।
श्री एस.पी. चतुर्वेदी जी.वी. देवस्थली तथा॥२५७॥

चक्रवर्ती तथा चिन्ताहरणो वदतां वरः।
आर.सी. पारिखश्चैव आर.डी. करमर्करः॥२५८॥

सी.बी. गुप्तस्तथा विद्वान् वेंकटाचलसञ्ज्ञकः।
पृथ्वीनाथपुष्पनामा कविपण्डितलेखकः॥२५९॥

रामचन्द्रद्विवेदी च शास्त्री सत्यव्रतस्तथा।
ब्रह्ममित्रस्तथावस्थी श्रीराधावल्लभस्तथा॥२६०॥

आचार्यो राजदेवश्च मिश्रवंशसमुद्भवः।
मिश्रोऽभिराजराजेन्द्रो देवनारायणश्च झाः॥२६१॥

सुषमा च कुलश्रेष्ठा हरिदत्तः प्रयागतः।
श्रीब्रजेशकुमारश्च शुक्लवंशसमुद्भवः॥२६२॥

रमारञ्जनमुख्यार्यो वंगपण्डितयूथपः।
पाण्डेयोऽमरनाथश्च तथान्ये कविसत्तमाः॥२६३॥

अस्मिन्नेवानुभागेऽहमध्यक्षीयाभिभाषणम्।
विद्वज्जनानां पुरतः कृतवान् पुण्यपत्तने॥२६४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आसन्नावण्टिता विज्ञा ममाध्यक्ष्ये शताधिकाः।
पश्चाद् भागद्वये तेषां पत्रपाठक्रियाभवत्॥२६५॥

मिश्रो राजेन्द्रोऽभिराजो मनस्वी
यं सम्पाद्याभूत्प्रसन्नो नितान्तम्।
तं ग्रन्थं 'श्रीदेववाणी-सुवासं'
रा.ना. दाण्डेकार उद्घाट्य हृष्टः॥२६६॥

पञ्चभागात्मके ह्यस्मिन् ग्रन्थे मान्यमनीषिणाम्।
लेखाः प्रकाशिता आसन्नध्यर्वाचीनसंस्कृतम्॥२६७॥

दाण्डेकरवक्तव्यानन्तरं मिश्र-चालिते।
कवयो रचनाः स्वीयाः कविसम्मेलनेऽपठन्॥२६८॥

'अभिराजो' राजेन्द्रो मिश्रकुलस्यास्ति यो गरिमा।
स्वीयैः संस्कृतगीतैः रञ्जितवान् श्रोतृसङ्घातम्॥२६९॥

श्रीमान् मण्डनमिश्रोऽथो कवठेकरपण्डितः।
आद्याचरण आचार्यः संख्यावान् वेंकटाचलः॥२७०॥

जयमन्तमिश्र-पुष्पादीक्षिताशोकशास्त्रिणः।
जोश्यादिविबुधास्तत्राभाषन्त ज्ञाभिनन्दिताः॥२७१॥

रात्रौ सांस्कृतिकं कार्यक्रमं दृष्ट्वा सभागृहे।
नानादेशसमायाता विद्वांसो हर्षमाप्नुवन्॥२७२॥

रोहिताक्षपुरे जातं सप्तत्रिंशाधिवेशनम्।
महर्षिश्रीदयानन्द-विश्वविद्यालये श्रुते॥२७३॥

अब्ध्यङ्कनन्दचन्द्राब्दे (१९९४) योजितेऽस्मिन् महोत्सवे।
के. कृष्णमूर्तिराचार्यो महाध्यक्षश्चितः पुरा॥२७४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

किन्त्वस्वास्थ्याद्विदस्तस्यानुपस्थित्यामवाचयत्।
रामकर्ण उपाध्यक्षो महाध्यक्षस्य भाषणम्॥२७५॥

भारद्वाजो हंसराजो मुख्यातिथिरभूदिह।
यजनोत्तरवीरश्च स्थानीयसचिवोऽभवत्॥२७६॥

तत्र श्रीरङ्गनाथेन संस्तवो मेऽभवद्विदा।
अर्वाचीनकृतीनां यः प्रथितोऽस्ति विचारकः॥२७७॥

किन्तु तस्मिन्दिने ज्ञानी जैलसिंहो दिवं गतः।
सांस्कृतिकानुष्ठानानि निरस्तान्यभवंस्ततः॥२७८॥

कवीनां रचनानां तु पाठ आसीत् सुयोजितः।
शिक्षासम्बन्ध्यनुष्ठानमयमासीद्यतो मतः॥२७९॥

मया सञ्चालिते रात्रावस्मिन् कार्यक्रमे युवा।
लालाशंकर आसीन्मे गयावालः सहायकः॥२८०॥

श्रीनारङ्गः सत्यपालो दिल्लीं मां तत आनयत्।
स्वीयेन कारयानेनापीरागढि च कोविदः॥२८१॥

रोहिताक्षपुरे सर्वैर्भिन्नस्थानसमागतैः।
दधिदुग्धमधाहाराः प्रीत्या संसेविता बुधैः॥२८२॥

सर्वे गुरुकुलं दृष्ट्वा झज्झरस्थं मनोहरम्।
विद्वांसः शोधकर्तारः परां मुदमवाप्नुवन्॥२८३॥

छात्राणां तत्र तेऽपश्यन् रज्जुरोहणकौशलम्।
ओमानन्दयतेः किञ्च संग्रहालय-वैभवम्॥२८४॥

ऋषिग्रहाङ्कचन्द्राब्दे (१९९७) कलिकातापुरे पुनः।
श्रीजादवपुराख्येन विश्वविद्यालयेन वै॥२८५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

योजिते प्राच्यविद्याया अष्टात्रिंशाधिवेशने।
जयमन्तमिश्र आचार्यो महाध्यक्षोऽभवत् सुधीः॥२८६॥

शि.द. जोशिमहाभागो महासचिवतां व्यधात्।
नवीनसंस्कृताध्यक्षः श्रीरामकरणोऽभवत्॥२८७॥

श्रीसीतानाथ आचार्यः सत्रसञ्चालकोऽभवत्।
स्थितोऽहमपि तत्रैव शृण्वन् पत्राणि धीमताम्॥२८८॥

कवीनां काव्यपाठार्थं प्रस्तावो मयका कृतः।
अध्यक्षेण प्रसन्नेनानुपदं स्वीकृतो हि सः॥२८९॥

मयेदमपि तत्रोक्तं पत्रं स्याद्रचनास्तु वा।
सर्वेभ्योऽपि प्रदीयेत प्रमाणोत्तरपत्रकम्॥२९०॥

अर्वाचीनं यच्च साहित्यमास्ते तत्राप्यास्ते वैभवं संस्कृतस्य।
प्राच्यं किञ्चार्वाक्तनं मेलयित्वा विद्वद्वृन्दैः पाठनीयं बटून् वै॥२९१॥

तेन ज्ञेयं कीदृशं नव्यमास्ते कीदृक् चास्तेऽस्मत्पुराणं हि काव्यम्।
ग्राह्यो विज्ञैरुत्तमांशो द्वयोश्च सामञ्जस्यान्वेषणं तत्र कार्यम्॥२९२॥

नवसंस्कृतसाहित्यानुभागाध्यक्षताकृते।
चितोऽहं सर्वसम्मत्यैवागामिन्यधिवेशने॥२९३॥

ततो बड़ौदानगरे प्राच्यसंस्थानपक्षतः।
वस्वङ्कग्रहचन्द्राब्दे (१९९८) ऽष्टात्रिंशमधिवेशनम्॥२९४॥
श्रीमत्प्रभुदयालाग्निहोत्राध्यक्ष्ये सुयोजितम्।
नानावटी च राजेन्द्रः स्थानीयसचिवोऽभवत्॥२९५॥
(युग्मकम्)

सन्ध्या सांस्कृतिकी रम्या किन्तु तत्रातिवृष्टितः।
स्थगितासीदतस्तत्र नाभवत्सरसा सभा॥२९६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

किन्तु तत्र ममाध्यक्ष्यानुभागे कवयो मुदा।
अपठन् नूतनाः स्वीयाः रचना भारतीसुताः॥२९७॥

गुरुवन्दनसङ्गीतमरुणोदयजानिना।
प्रस्तुतं यत्समाकर्ण्य सभ्या आनन्दमाप्नुवन्॥२९८॥

तत्र संस्कृतसेवायाः समितेः पक्षतो बुधः।
गौतमो वाडिलालः श्री पटेलः सद्भ्य आर्पयत्॥२९९॥
ग्रन्थानायोजयत् किञ्च पुस्तकानां प्रदर्शनीम्।
तत्र संस्कृतविद्याया आलये सुप्रतिष्ठिते॥३००॥
(युग्मकम्)

नभःखाकाशनेत्राब्दे (२०००) चेन्नई-नगरेऽभवत्।
संस्कृताकादमी-हूतं चत्वारिंशाधिवेशनम्॥३०१॥

तत्र विद्यानिवासाख्यो मिश्रः पण्डित-मण्डनम्।
महाध्यक्षत्वमापन्नो हिन्दी-लेखक-सत्तमः॥३०२॥

सरोजा श्रीमती तत्र 'भाटे'-कुल-विभूषणम्।
महासाचिव्यमकरोद् वैयाकरण-सिंहिनी॥३०३॥

स्थानीयसचिवत्वेन रमादेवी बुधोत्तमा।
सत्रं सञ्चालयामासातिथ्यकृत्यसमाकुला॥३०४॥

ततो जगन्नाथकृपासनाथा
पुरीतिसंज्ञा नगरी पवित्रा।
चन्द्राब्धिसंख्यं (४१) किल प्राच्यविद्या-
धिवेशनं योजयति स्म हृष्टा॥३०५॥

श्रीविहारे जगन्नाथ सं.वि. विद्यालयाङ्गणे।
नेत्राकाशनभोनेत्र (२००२)-वर्षेऽभूद्विदुषां महः॥३०६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विद्यानिवासमिश्रोऽभून्महाध्यक्षोऽत्र पण्डितः।
कृष्णकान्तश्चतुर्वेद उपाध्यक्षपदं गतः॥३०७॥

जोशिवंशसमुत्पनः श्रीमुरलीमनोहरः।
मुख्यातिथिपदारूढः समुद्घाटितवान् महम्॥३०८॥

श्रीमान् सुन्दरराजश्च पद्यैः संस्कृतनिर्मितैः।
अतिथिस्वागतं कृत्वा प्राप्तवान् परमां मुदम्॥३०९॥

हरेकृष्णः शतपथी स्थानीयः सचिवोऽभवत्।
साहित्यशास्त्रनिष्णातो विधिवेत्ता तथा कविः॥३१०॥

स पुर्यां समवेतानां स्वागतं कृतवान् सताम्।
प्रत्युद्ग्रहीदतिप्रेम्णातिथीनातिथ्य-मर्मवित्॥३११॥

तत्र त्रिदश-भारत्याः कविसम्मेलनोत्सवः।
समायोज्यत सोत्साहं जनाकीर्णे सुमण्डपे॥३१२॥

श्रीश्री. सुन्दराजस्य मुख्यातिथ्ये महाकवेः।
रमाकान्तस्य शुक्लस्याध्यक्षतायां तथा कवेः॥३१३॥

चन्द्रकान्तस्य शुक्लस्य सान्निध्येऽथ विपश्चितः।
कविसम्मेलनस्यास्य प्रारम्भोऽभून्मुदावहः॥३१४॥

पद्यपुष्पोपहारेण सत्कृताः कवयस्तदा।
अध्यक्षश्चातिथिर्मुख्यः हरेकृष्णेन धीमता॥३१५॥

तत्रासन् काव्यरचनापटवः सुकवीश्वराः।
पञ्चविंशतिसंख्याका नानादिग्देशवासिनः॥३१६॥

मया पद्यमयी प्रस्तावना तत्र कृता शुभा।
आमन्त्रिताश्च कवयः काव्यपाठाय सादरम्॥३१७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'सर्वशुक्लोत्तरा'-ग्रन्थे प्राकाश्यं सा गताभवत्।
प्रस्तावना, मया सेह प्रस्तुता क्रियते पुनः॥३१८॥

"दारुब्रह्मजगन्नाथं श्रीसुभद्राबलान्वितम् ।
चन्द्रभागां च कोणार्कं गिरिं धवलपूर्वकम्॥३१९॥

लिंगराजं महेशानं गौरी-केदारमन्दिरम्।
दुग्धकुण्डं च मुक्तेशं सिद्धेश्वरमथो प्रभुम्॥३२०॥

नन्दनं काननं चैवोदयपूर्वगिरेर्गुहाम्।
खण्डोत्तरगिरिं चैव जयगोपालमन्दिरम्॥३२१॥

चिल्कासरोवरं चैव विश्वविद्यागृहाणि च।
बालेश्वरं तथा पारादीपं हीराकुडं तथा॥३२२॥

श्रीविहारं तथा वाणीविहारं ज्ञानदायकम्।
गौरीकुमारब्रह्माणं केशवं च दिगम्बरम्॥३२३॥

सुन्दरराजनामानं कविप्रेष्ठांस्तथापरान्।
प्रेम्णांके दधतीं वन्देऽहमुत्कलवसुन्धराम्॥३२४॥

हरे कृष्ण ! त्वमायाहि कवीनां मानदो भव।
कविसम्मेलनं प्राच्यविद्यासम्मेलने शृणु॥३२५॥

इदानीं भारतस्याहं कविकर्मरतान् बुधान्।
आवाहयामि संक्षिप्तकाव्यपाठाय सादरम्॥३२६॥

अल्पाक्षरमसन्दिग्धं रसपूर्णं च सारवत्।
काव्यं विजयतां तत्रभवतां प्रेरणाप्रदम्॥३२७॥

चन्द्रकान्तरमाकान्तौ शुक्लौ धन्यौ शुभोदयात्।
यत्कवीन् सुहृदश्चेमौ वन्देते मञ्चमास्थितौ"॥३२८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'भाति मे भारतं' काव्यं सस्वरं पठित मया।
तच्छ्रुत्वासन् सहृदयाः प्रसन्ना मण्डपस्थिताः॥३२९॥

समापन-समारोहे तत्र पुर्यधिवेशने।
गौरीकुमारः श्रीब्रह्मा ग्रन्थमेकं मदर्पितम्॥३३०॥

पटनायकसान्निध्ये लोकायार्पितवान् कविः।
हरेकृष्णश्च तं ग्रन्थं स्वीचकार नतो भवन्॥३३१॥

ततः साम्बशिवाशीर्भी रक्षितायां विदां पुरि।
वाराणस्यामभूद्भव्यो द्वाचत्वारिंश (४२) उत्सवः॥३३२॥

अब्धिशून्यनभोनेत्रे (२००४) वर्षे मासि नवम्बरे।
चतुर्थेऽह्नि समारब्धं त्रिदिनीयाधिवेशनम्॥३३३॥

मुख्यातिथिरासीच्छ्री कार्डोना जार्जपण्डितः।
येन व्याकरणं काश्यामधीतं सद्गुरोर्मुखात्॥३३४॥

मया तथेच्छारामेण सहैवायं गतो बुधः।
वाराणसीं, मण्डपस्थान् विज्ञान् समभिनन्दितुम्॥३३५॥

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयाजिरे।
कल्पिते मण्डपे जार्जमभिराजोऽभ्यनन्दयत्॥३३६॥

'अभिराज' इत्येवोक्ते ज्ञायते यस्य संस्तवः।
राजेन्द्रमिश्रनामानं को न जानाति भारते?॥३३७॥

असौ कुलपतिः काश्यां श्री सं.सं.वि.वि.-शोभितः।
कविर्विद्वान् महावाग्मी सुसम्पादक-लेखकः॥३३८॥

जार्जं मञ्चं समानीय स्थापयित्वा तथासने।
योग्यां तस्यार्हणां कृत्वाशृणोत्तस्याभिभाषणम्॥३३९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कृष्णकान्तचतुर्वेदो महाध्यक्षीयभाषणम्।
कृत्वोपचक्रे दोषज्ञान् वाग्मी शास्त्रविदां वरः॥३४०॥

मया सञ्चालितं मञ्चे कविसम्मेलनं महत्।
पञ्चघण्टावधिव्यापि युवप्रौढप्रसाददम्॥३४१॥

'भाति मे भारतं' नाम काव्यस्य नवमं नवम्।
लोकायार्पितवाँस्तत्र संस्करणं 'सनातनः'॥३४२॥

ततो जम्मूविश्वविद्यालये संयोजितं ह्यभूत्।
त्रिचत्वारिंशसंख्याकं प्राच्यविद्याधिवेशनम्॥३४३॥

तत्र राजेन्द्रमिश्रेण महाध्यक्षीयभाषणम्।
कृत्वा चमत्कृताः सर्वे विद्वांसस्तत्र सङ्गताः॥३४४॥

उपाध्यक्षोऽभवत्तत्र संस्कृतभाषणे रतः।
श्री सतीशोत्तरश्चन्द्रो झोपाह्वो बुधनायकः॥३४५॥

महासचिव्यकर्मस्था सरोजा बुधमानिनी।
श्रीगंगाधरपण्डा च तस्याः साह्यं समाचरत्॥३४६॥

रमणीका जलाली च स्थानीयसचिवोऽभवत्।
वैष्णवी-रघुनाथौ हि नत्वा विज्ञाः गृहं गताः॥३४७॥

वस्वाकाशनभश्चन्द्र (२००८) वर्षेऽभूदधिवेशनम्।
कुरुक्षेत्रे चतुश्चत्वारिंशं विबुधसम्मतम्॥३४८॥

झाः सतीशोत्तरश्चन्द्रो महाध्यक्षासनस्थितः।
विज्ञानां पुरतः सम्यक् संस्कृतेनाभ्यभाषत॥३४९॥

समुद्घाटनकर्त्र्यासीत् सोनियागाँधिनामिका।
राजनेत्री तथा भाटे महासचिवतां गताः॥३५०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मिथिलेशकुमारोऽभूत् सहसाचिव्यवाहकः।
रणवीरसिंह इत्याख्यः स्थानीयसचिवोऽभवत्॥३५१॥

सायंकाले कुरुक्षेत्रे गीता-भवन-मञ्चके।
ममाध्यक्ष्येऽभवद्भव्यं सांस्कृतं कविमेलनम्॥३५२॥

मुख्यातिथ्यासने श्रीमान् महापात्रदिगम्बरः।
हरिदतः सुभाषश्च विशिष्टातिथितां गतौ॥३५३॥

ततस्तिरुपतौ पञ्च-चत्वारिंशाधिवेशनम्।
राष्ट्रिय-सं. विद्यापीठं समायोजितवन्मुदा॥३५४॥

तत्र सत्यव्रतः शास्त्री महाध्यक्षोऽभवद् बुधः।
भाटे सरोजा विदुषी महासचिवतां व्यधात्॥३५५॥

आसीत्स्थानीयसचिवः श्रीराधाकान्तठाकुरः।
नभश्चन्द्रनभोनेत्रे (२०१०) ऽब्देऽयं जातो महोत्सवः॥३५६॥

तत्र श्रद्धालुभिः प्राप्तं वेङ्कटेशस्य दर्शनम्।
आत्मा धन्यः कृतः सर्वैस्तत्प्रसादोपलब्धितः॥३५७॥

नेत्रेन्दुखाक्षिवर्षेऽभूत् (२०१२) षट्चत्वारिंश उत्सवः।
कश्मीरेषु श्रीनगरे विश्वविद्यालयेश्रुते॥३५८॥

जानकीबल्लभः श्रीमान् पट्टनायकवंशजः।
महाध्यक्षोऽभवत्तत्र संस्कृतस्य बुधोत्तमः॥३५९॥

समुत्साहवती भाटे महासचिवतां गता।
स्थानीयसचिवत्वेन त्रिपाठी मतिदाभवत्॥३६०॥

अब्देऽब्धीन्दुनभोनेत्रे (२०१४) गुवाहाटीपुरेऽभवत्।
सप्तोत्तरचत्वारिंशं प्राच्यविद्याधिवेशनम्॥३६१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राधावल्लभ आचार्यो महाध्यक्षासनस्थितः।
त्रिपाठी निजवक्तव्यं प्रादात् तर्कसमन्वितम्॥३६२॥

आसीद् भाटे यथापूर्वं महासचिवतां गता।
आचार्या नलिनी मिश्रा स्थानीयसचिवोऽभवत्॥३६३॥

हरिद्वारे पुनः प्राच्य-विद्याया अधिवेशनम्।
अष्टोत्तरचत्वारिंशं (४८) समायोज्यत योजकैः॥३६४॥

उत्तराखण्ड सं.वि.वि.-प्रायोजित उत्सवः।
'नोटबन्दि'-हते काले श्रीहीन इव लक्षितः॥३६५॥

शास्त्रचन्द्रनभोनेत्र (२०१६) संख्यकेऽब्देऽधिवेशने।
अग्रवालो महावीरो महाध्यक्षोऽभवद् बुधः॥३६६॥

भाटे विद्योत्तमेहासीत् महासचिवतां गता।
स्थानीयसचिवोऽस्यासीच्छ्रीगिरीशकुमारकः॥३६७॥

सिद्धिब्रह्मवियत्पक्ष (२०१८)-खैष्टेऽब्दे मइमासके।
वेरावलाख्ये नगरे सोमेश्वरकृपाविते॥३६८॥

श्रीसोमनाथसंस्कृत-विश्वविद्यालये श्रुते।
एकोनपञ्चाशत्तमाधिवेशनमभूत् शुभम्॥३६८॥
समुद्घाटनविध्यर्थं केशूभाई समागतः।
गुर्जरप्रान्तशिक्षाया मन्त्री चाप्यागतोऽभवत्॥३७०॥
(युग्मकम्)

चन्द्रकान्तोऽभवच्छुक्लो महाध्यक्षासनस्थितः।
रमाकान्तश्च शुक्लोऽभूदुपाध्यक्षासनस्थितः॥३७१॥

अथाहं संप्रवक्ष्यामि तेषां नामानि धीमताम्।
उपाध्यक्षपदस्था ये प्राच्यविद्यां सिषेविरे॥३७२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

एतेषामभिधानानि प्रज्ञापीयूषनामके।
ग्रन्थे प्रकाशितान्यासन् सोमनाथाधिवेशने॥३७३॥

चेन्नईनगरे पुर्यामुपाध्यक्षोऽभवद्बुधः।
कृष्णकान्तचतुर्वेदी वक्तृलेखकपण्डितः॥३७४॥

सतीशचन्द्रझा आसीदुपाध्यक्षपदं गतः।
श्रीजम्मूनगरे रम्ये योजिते ह्यधिवेशने॥३७५॥

रोहिताक्षाख्यनगरे शुकदेवो विदांवरः।
उपाध्यक्षपदं प्राप्तः प्राच्यविद्याधिवेशने॥३७६॥

श्रीशर्मा हरिदत्ताख्यस्तिरुपत्यधिवेशने।
उपाध्यक्षपदासीनः कविराचार्यपण्डितः॥३७७॥

अग्रवालो महावीरः कुरुक्षेत्राधिवेशने।
चित आसीदुपाध्यक्षो गुवाहाट्यधिवेशने॥३७८॥

अन्येषां किल विज्ञानां विषये नास्ति सूचना।
मत्सकाशे ततो नाहमुपाध्यक्षान् प्रकीर्तये॥३७९॥

चितः शुक्लो रमाकान्तो हरिद्वाराधिवेशने।
उपाध्यक्षसासीनस्ततो वेरावलेऽभवत्॥३८०॥

श्रीगणेश उमाकान्तस्थिटे वेरावले चितः।
उपाध्यक्षासनस्थोऽ भून्नागरपूराधिवेशने॥३८१॥

महासाचिव्यमकरोद् भाटे व्याकृतिपण्डिता।
देवेन्द्रनाथपाण्डेयः स्थानीयसचिवोऽभवत्॥३८२॥

जानकीशरणाचार्यः स्थानीयः सचिवोऽभवत्।
अतिरिक्तासनासीनो विद्वज्जनप्रियङ्करः॥३८३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चौधरीवंशसम्भूतोऽर्कनाथो बुधकेसरी।
श्रीमान् कुलपतिस्तत्र ज्ञानां स्वागतकृद्बभौ॥३८४॥

विभिन्नेष्वनुभागेषु शोधपत्रकवाचनम्।
षोडशोत्तरसंस्कारनामनाटकमञ्चनम्॥३८५॥

वेदपाठः शुभो नृत्यप्रस्तुतिः सभ्यमोहिनी।
कविसम्मेलनं श्रव्यं तत्रायोज्यन्त योजकैः॥३८६॥

सीनेटाखये सभागारे कवीनां पञ्चविंशतिः।
ममाध्यक्ष्येऽपठत्काव्यं श्रोतृकर्णरसायनम्॥३८७॥

श्रीमान् नारायणः शास्त्री परमेश्वरपूर्वभाक्।
अर्कनाथ-पटेल-श्रीचन्द्रभूषणझादयः॥३८८॥

विशिष्टातिथयोऽभूवन् काव्यपाठविधायिनः।
भाटेसरोजा-रजनी-पुजारा अपठन् कृतीः॥३८९॥

सौराष्ट्रे सोमनाथस्य समुद्रतटवर्तिनः।
विधाय दर्शनं सर्वेऽतिथयो धन्यतां गताः॥३९०॥

समापन-समारोहे श्रीमानोझा रमेशसन्।
मुख्यवक्तृस्वरूपेण प्राप्तः सभ्य-सुभाग्यतः॥३९१॥

सभाध्यक्ष-पदे चाहं योजकैः स्थापितोऽभवम्।
कुलपत्यनुरोधाच्च गीतवान् 'भाति भारतम्'॥३९२॥

घोषणा तत्र सञ्जाता महासचिवपक्षतः।
समायोज्यो रामटेके पञ्चाशत्तम उत्सवः॥३९३॥

व्यवस्था स्यात्सुरुचिरा नागपूराधिवेशने।
इति सञ्चिन्त्य स्थानीयः सचिवो मधुसूदनः॥३९४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रामटेके कालिदास-विश्वविद्यालये श्रुते।
सभामाकारयामासागस्तमासे ससूचनम्॥३९५॥
(युग्मकम्)

कुलपतिवरखेडी श्रीनिवासो मनीषी
सकलसमितिसभ्यान् मानयन्नातिथेयः।
अधिगगनशराङ्कं (५०) सत्रमालक्ष्य तेभ्यः
प्रणयवचनपूर्णं स्वागतं व्याजहार॥३९६॥

तस्य संरक्षकत्वेऽदात् सूचना मधुसूदनः।
पी.पी.टी. माध्यमेनाथ सदस्यैस्ता विचारिताः॥३९७॥

'गैर्वाणी-पत्रकाराणामत्र सत्रं भवेदि'ति।
मया दत्तः परामर्शः सर्वैरङ्गीकृतोऽभवत्॥३९८॥

शब्दशास्त्रसरोहंसी महासचिवतां गता।
भाटे सरोजा संदृश्य पी.पी.टीं. हर्षमागता॥३९९॥

तस्मिन्नवसरे प्राच्यविद्याध्यक्षेण सादरम्।
श्रीगौतमपटेलेन 'वैबसाइट्' प्रवर्तिता॥४००॥

अथ सर्वे भोजनार्थं गताः कुलगुरोर्गृहे।
ततः सामूहिकं चित्रं सदस्यानां समङ्कितम्॥४०१॥

आकाशे वारिदा आसन् मन्दवृष्टिरथाभवत्।
अभिषिक्ता अतो मार्गाः सञ्जाताः सौख्यदायकाः॥४०२॥

मार्गेषु कारयानानि धूलेरुद्धूलनं विना।
अग्रेसराण्यशोभन्त लक्ष्यप्राप्त्यै यथा भटाः॥४०३॥

प्रथितः खिण्डसीनामा दृष्टोऽस्माभिर्जलाशयः।
स्थितप्रज्ञो यथा योगे विप्रुड्भिरविचालितः॥४०४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रसराजादिभिस्तस्मिन् स्थिते पोते मधुस्वरम्।
कालिदासकृतं काव्यं मेघदूतमगायत॥४०५॥

तत्राल्पाहारवेश्मान्तः सुपक्ववट-भक्षणम्।
कृतं सर्वैरतिथिभिः सचायं स्फूर्तिदायकम्॥४०६॥

ततः सर्वे गता राज-महलाख्ये सुसज्जिते।
होटले प्रथिते कर्तुं भोजनं षड्रसान्वितम्॥४०७॥

आतिथेयोऽभवच्छ्रीमान् वरखेड़ी-महोदयः।
सग्धिर्जाता तृप्तिदात्री सर्वेषां हि विपश्चिताम्॥४०८॥

ततः सर्वे समायाता रामधामनि हर्षदे।
यथा पतत्रिणः सायं विश्रामार्थं तरुं श्रिताः॥४०९॥

अग्रिमे दिवसे सर्वे कालिदास-स्थलं गताः।
राममन्दिरमालोक्य प्रसादं परमाप्नुवन्॥४१०॥

परावृत्तास्ततः सर्वे विश्वविद्यालयस्थितम्।
'वर्णेकर'-सभागारमागता हृष्टचेतसः॥४११॥

तत्रायोज्यत संगोष्ठी शोधकर्त्रुपकारिणी।
मयापि तत्र वक्तव्यं किञ्चिद्दत्तं सभोचितम्॥४१२॥

मध्याह्नभोजनं कृत्वा प्रस्थिताः सकला बुधाः।
पुरं नागपुरं यत्रायोजितासीत् सभा विदाम्॥४१३॥

संस्कृतस्य प्रचारिण्या सभयाऽथोऽन्यसंस्थया।
विद्याचक्र्या कालिदास-विश्वविद्यालयेन च॥४१४॥

लीनारस्तोगिवर्यायाः सहस्रविधुदर्शनम्।
कविसम्मेलनं चात्र सम्पन्नं बुधतोषदम्॥४१५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वर्णेकरश्चन्द्रगुप्तः वीणागानु-बुधेश्वरी।
जोशिवर्य्यश्च सञ्जाता उत्सवस्य सुचालकाः॥४१६॥

तत्रापठन् स्वकीया रचनाः सर्वे कविश्रेष्ठाः।
लीना-पेन्नागस्ति-त्रिपाठिरसराजमिथिलेशाः॥४१७॥
गौतमपटेल-शुक्ल-ब्रजेश-रणजित्परागाद्याः।
मुख्यातिथिवरखेडी तथान्यकवयः सरस्वतीपुत्राः॥४१८॥
(युग्मकम्)

कविसम्मेलनाध्यक्षो रमाकान्तो विदाश्रवः।
'भाति मे भारतं' चान्यां रचनामपठन्मुदा॥४१९॥

कवीनां रचनाः श्रुत्वा श्रोतृभिः समबुध्यत।
कूजन्ति विहगा नैके नन्दने कल्पपादपे॥४२०॥

पाण्डेप्रकाशपत्नी माममिलत्सादरं तथा।
पत्युः स्मृतौ तया दत्तः पुरस्कारः कवेः कृते॥४२१॥

प्राप्तवाँस्तं पुरस्कारं श्रीपेन्नामधुसूदनः।
महोत्सवसमाप्तौ च स्वल्पाहारः समैः कृतः॥४२२॥

अस्मान् दिनकरः श्रीमान् प्रापयद् होटलं द्रुतम्।
विश्रम्य रात्रौ यत्राहमन्येद्युर्गृहमागतः॥४२३॥

आगत्य दिल्लीमन्येषु कार्येषु व्यापृतोऽभवम्।
यात्राया वर्णनं कर्तुं पद्यैरहमवाञ्छयम्॥४२४॥

कविप्रतिभयेदानीं पञ्चाशत्तममुत्सवम्।
घट्यमानं नागपुरे साक्षात्पश्यामि भाविनम्॥४२५॥

शून्य-पक्ष-नभो-नेत्र-संख्या (२०२०) ब्दारम्भ मासके।
शताब्दीं मानयन्तीं स्वां प्राच्यविद्यां नमाम्यहम्॥४२६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पञ्चाशत्तममायोज्य प्राच्यविद्याधिवेशनम्।
ककुका. सं.वि.वि. चित्तेऽभून्महदानन्दसम्मदः।।४२७।।

महाध्यक्षासनस्थोऽत्र श्रीगौतमपटेलवित्।
महासचिवतां वोढुं सौ. भाटेऽत्र समागता।।४२८।।

स्थानीयः सचिवः पेन्ना मधुसूदनसत्कविः।
संरक्षकः श्रीनिवासः श्रमसक्तो दिवानिशम्।।४२९।।

वेंकय्या नायडूः श्रीमानुपराष्ट्रपतिः प्रियः।
भारतस्य समायात उद्घाटन-विधित्सया।।४३०।।

अनेकेऽतिथयः प्राप्ताः छात्रा अध्यापकास्तथा।
देशस्य सर्वराज्येभ्यः पठितुं स्वीयपत्रकम्।।४३१।।

रमेशचन्द्रशुक्लेन प्रणीते नवभारते।
पुराणोत्तरकाव्ये ये संस्कृतज्ञाः प्रकीर्तिताः।।४३२।।
तानालम्ब्य मयाप्येकं प्रस्तुतं शोधपत्रकम्।
इदानीन्तनगीर्वाणभारत्या अनुभागके।।४३३।।
(युग्मकम्)

शोधपत्रं पठित्वा ते नागरं रामणीयकम्।
दृष्ट्वा मोदं गमिष्यन्ति, भ्रमणं ज्ञान-मोददम्।।४३४।।

रामटेकपुरे रम्ये कालिदासयशःसिते।
प्राच्यविद्या-शताब्दीयं बुधानां मंगलं क्रियात्।।४३५।।

यस्या सम्मेलने प्राप्ता विज्ञा जिज्ञासवस्तथा।
संशोधनाब्धिं गाहन्ते प्राच्यविद्यां नतोऽस्मि ताम्।।४३६।।

यत्र विश्वं भवत्येकनीडं ज्ञानां सुमेधसाम्।
सन्मत्युद्बोधिनी ह्येषा प्राच्यविद्या जयेत्सदा।।४३७।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

साङ्गा वेदाः ब्राह्मणाश्च तथोपनिषदः समाः।
बुधैर्यत्र विचार्यन्ते प्राच्यविद्यां नमामि ताम्।।४३८।।

जम्बूद्वीपापराख्यस्यैशियाखण्डस्य वाङ्मयम्।
मत्तव्यं यत्र विद्वद्भिः प्राच्यविद्यां नमामि ताम्।।४३९।।

यस्याः प्रेरणया प्राज्ञाः लौकिकीः सकलाः कलाः।
विचारयन्ति ध्यानेन प्राच्यविद्यां नमामि ताम्।।४४०।।

व्याकरणालङ्कारश्रीर्यत्र सद्भिर्गवेष्यते।
नानादिग्देशसम्प्राप्तैः प्राच्यविद्यां नतोऽस्मि ताम्।।४४१।।

इतिहासपुराणानां वैभवं यत्र वर्ण्यते।
विदुषां कामधेनुं तां प्राच्यविद्यां नमाम्यहम्।।४४२।

आयुर्वेद-धनुर्वेद-योगविद्या-विचारणा।
सुधीभिः क्रियते यत्र प्राच्यविद्यां नमामि ताम्।।४४३।।

यत्र मन्दिरनिर्माणं स्थापत्यादिकलादृशा।
वीक्ष्यते ज्ञैर्मनोयोगात्प्राच्यविद्यां नतोऽस्मि ताम्।।४४४।।

संस्कृतां पारसीकां चारबीभाषां विपश्चितः।
पश्यन्ति तुलनादृष्ट्या प्राच्यविद्यां नतोऽस्मि ताम्।।४४५।।

वैदिकं चार्हतं बौद्धं चार्वाकं यत्र वाङ्मयम्।
संख्यावद्भिर्विचार्येत प्राच्यविद्यां नमामि ताम्।।४४६।।

तत्तत्क्षेत्रीयभाषाणां चिन्ता यत्र प्रवर्तते।
अनुभागे विशिष्टे तां प्राच्यविद्यां नमाम्यहम्।।४४७।।

कविसम्मेलनं यत्रायोज्यते कवितल्लजैः।
मनोबुद्धिप्रसादार्थं प्राच्यविद्यां नमामि ताम्।।४४८।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्थापत्यं च पुरातत्त्वं यस्यां साङ्गणिकीं तथा।
अवलम्ब्य विचारः स्यात्प्राच्यविद्यां नमामि ताम्।।४४९।।

परिषत्पण्डितानां हि सोत्साहं यत्र योज्यते।
शास्त्राटवी-मृगेन्द्राणां प्राच्यविद्यां नमामि ताम्।।४५०।।

आश्रित्यालोच्यते विज्ञैर्यत्रार्वाचीनसंस्कृतम्।
प्राचीनां च नवीनां च प्राच्यविद्यां नमामि ताम्।।४५१।।

शिल्पाण्यथ लेखशास्त्रं धर्मः पाण्डुलिपिस्तथा।
विचार्यन्ते बुधैर्यत्र प्राच्यविद्यां नमामि ताम्।।४५२।।

गद्यपद्यनिबन्धानां काव्यानां च समीक्षणम्।
पण्डितैः क्रियते यत्र प्राच्यविद्यां नमामि ताम्।।४५३।।

भारतस्य प्रदेशेषु स्वमायोज्याधिवेशनम्।
देशदर्शनसन्धात्री प्राच्यविद्या जयेत्सदा।।४५४।।

पत्रकारतपस्याया मूल्याङ्कनविधायिनी।
जागरूत्का दिवानक्तं प्राच्यविद्या जयेत्सदा।।४५५।।

उज्जयिन्यां धारवाडे विशाखापत्तने तथा।
पुण्यपुर्यां हरिद्वारे कालिकातामहापुरे।।४५६।।

बोलपूरे कुरुक्षेत्रे पुर्यां तिरुपतौ तथा।
वाराणस्यां सोमनाथे योजिते ह्यधिवेशने।।४५७।।

गृहीतो मयका भागो विद्वांसश्चावलोकिताः।
कविसम्मेलनं किञ्चायोजि संहृष्टचेतसा।।४५८।।

संख्यावतां कवीनाञ्च संप्राप्य शुभकामनाः।
अष्टाधिकचत्वारिंशद्वत्सरा यापिता मया।।४५९।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यैः प्राच्यविद्या विद्वद्भिः सेविता सेव्यतेऽथवा।
तान्सर्वान् भारतीपुत्रान् सादरं प्रणमाम्यहम्॥४६०॥

भारतस्य प्रतिष्ठा स्यात् सम्पूर्णेऽपि महीतले।
निर्भयाः सन्तु संसारे प्राच्यविद्या-मनीषिणः॥४६१॥

कृष्णोमाविष्णुलक्ष्मीप्राक्कान्तभ्राता सुधीप्रियः।
रमाजानी रमाकान्तो लब्धशम्भुकृपः कृती॥४६२॥

साहित्योदधिमन्थाद्रिब्रह्मानन्दतनूद्भवः।
प्रियम्वदायाः स्तन्येन परिपुष्ट उदारधीः॥४६३॥

वसिष्ठगोत्रसम्भूतः शुक्लोपाह्वः प्रसन्नधीः।
माध्यन्दिनशाखाध्यायी लब्धवर्णकुलोद्भवः॥४६४॥

वाणीविहारसंस्थे देहल्यां श्रीरमालये।
कुर्वन्निवासं कृतवान् प्राच्यविद्याधिवेशनम्॥४६५॥

शुभाशिषो लभन्तां मे पुत्राः पौत्राः स्नुषास्तथा।
चन्द्रमौलिस्तथानन्दवर्धनोऽभिनवः सुताः॥४६६॥

आर्चिताऽथ शिवाङ्गी च रम्याथो वरदस्तथा।
शुभाङ्गी सिन्धुजा चैव दिव्याङ्गी पौत्र-पौत्रिकाः॥४६७॥

अनिता-मोनिका-रीनाः स्नुषास्तिस्रोऽपि लेखने।
विघ्नं नोत्पादयामासुर्ये हि कोलाहलादिभिः॥४६८॥

खाद्यं पेयं यथाकालं दत्वा, मां समतूतुषन्।
सर्वेऽप्येते लभन्तां श्रीपरमेशकृपां सदा॥४६९॥

रमास्ते धर्मपत्नी मे सुखे दुःखे च सङ्गिनी।
तत्कृतं सर्वसाहाय्यं शब्दैर्वक्तुं न पारये॥४७०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

परिवारस्य या छत्रं कुटुम्बपरिरक्षिका।
सुभद्रं कामये तस्या आत्मकल्याणहेतवे॥४७१॥

श्रीलोकेशकुमारेण शर्मणाक्षरयोजनम्।
मनोयोगेन विहितं स्वगृहेऽथ रमालये॥४७२॥

दुर्गाप्रसादसिंहेन संशोधनकर्मणि।
साहाय्यं कृतमित्येतौ धन्यवादस्य भाजनम्॥४७३॥

संस्कृतं प्रति सर्वेषामादरः स्याद्रुचिस्तथा।
पठित्वा प्राप्नुयुर्मोदं प्राच्यविद्याधिवेशनम्॥४७४॥

योऽप्येतत्पठेत्काव्यं तच्छये सन्तु सिद्धयः।
सस्कृतं सस्कृतिं विद्यां प्रत्यसौ भक्तिमान् भवेत्॥४७५॥

रसर्षिगगनाक्ष्यब्दे (२०७६ वि.) वैक्रमे मार्गशीर्षके।
एकादश्यां सिते पक्षे काव्यमेतत्प्रपूरितम्॥

॥इति रमाकान्तशुक्लप्रणीतं 'प्राच्यविद्याधिवेशनं' नाम काव्यं सम्पूर्णम्॥
मार्गशीर्ष शुक्ल एकादश्यां वि.सं. २०७६ तदनुसारम् ८/१२/२०१९

रमालयः, आर-६, वाणी-विहारः, नयी दिल्ली-११००५९
ई-मेल-sarvashukla@gmail.com

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोनाशतकम्

–'अभिराज' राजेन्द्र मिश्रः

यथाऽऽसीन्महदातङ्को गौराङ्गशासनावधौ।
विषूचिकामहामार्याः प्लेगनाम्न्या रुजोऽथवा॥१॥

ततोऽपि दारुणं जातं भैरवञ्च महद्भयम्।
करोनाया महामार्या दुराधर्षं निरौषधम्॥२॥

विषाणुरस्य रोगस्य क्षणेनैव प्रवर्धते।
शतं सहस्रं लक्षं वा हित्वा कोटिगुणायते॥३॥

अयं विषाणुर्नासातो मुखाद्वा नेत्रवर्त्मना।
प्रविश्य फुप्फुसं कम्रं सङ्क्राम्यति निरौषधः॥४॥

नयनं जायते रक्तं किंशुकपुष्पलोहितम्।
ज्वरश्चापि कृतैर्यत्नैरसह्यः प्राणघातकः॥५॥

आगमो निर्गमश्चापि निःश्वासस्य प्रबाध्यते।
फुप्फुसोऽप्यन्ततो विद्धस्सविस्फोटं विनश्यति॥६॥

नामाऽप्यस्या महामार्या न केनापि श्रुतं पुरा।
धूमकेतुरयं दृष्टस्सहसैव विलक्षणः॥७॥

प्रशमनोपायाः केऽपि सम्बभूवुर्न सार्थकाः।
न च केनापि राष्ट्रेण समाधानं गवेषितम्॥८॥

हाहाकारस्ततो विश्वप्राङ्गणेऽद्य समुत्थितः।
वैज्ञानिका दधद्गर्वाः कान्दिशीका विलोकिताः॥९॥

त्रिसहस्राधिका नूनं चीनदेशे दिवङ्गताः।
दक्षिणकोरियादेशेऽप्यहो जातं महद्भयम्॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इटल्यामम्बरीषेऽपि पाकिस्तानेऽथ भारते।
मलेशियाऽफगाने वाऽपीराने सर्वतोऽधिकम्॥११॥

प्रायेण निखिले विश्वे सप्तसहस्रसंख्यकाः।
कालस्य कवलीभूताः सागसो वा निरागसः॥१२॥

भारतेऽपि त्रयो हन्त सैरिभवाहनाहृताः।
अकाल एव संसारं प्रविमुच्य दिवङ्गताः॥१३॥

आस्तां तावदिदं सर्वं, राष्ट्रमद्य समुद्यतम्।
आत्मानं रक्षितुं यत्नैः रक्षिष्यत्यपि निश्चितम्॥१४

अन्ये शतमिताश्चापि रुग्णा अष्टादशाधिकाः।
यत्नतश्चोपचर्यन्ते भिषग्भी रोगवेदिभिः॥१५॥

भारतेऽपि समायातो रोगोऽयं बाह्यदेशतः।
मिथस्सम्पर्कजस्सोऽयं सहसा बहुलोऽभवत्॥१६॥

भारताभिजना ये वै ईरानादिभुवं गताः।
त एव सार्धमानीतवन्तश्चेमं विषाणुकम्॥१७॥

नैतावदेव, किञ्चन ददृशे सङ्कटान्तरम्।
यद्राष्ट्रस्य कृते जातं समाधेयं प्रयत्नतः॥१८॥

इटल्यां चीनदेशेऽपीराने बहुसंख्यकाः।
प्रवसन्तो भारतीयाः करोनाभयभङ्गुराः॥१९॥

स्वदेशं हि समागन्तुं सञ्जाता द्रुतकातराः।
तेषां कुटुम्बिनश्चापि समुद्विग्ना भयातुराः॥२०॥

अनुरोधं कृतवन्तश्शासनं प्रति नित्यशः।
करोनारोगतो मुक्तिं दापयितुं मुहुर्मुहुः॥२१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मोदिवर्यो नरेन्द्रोऽसौ प्रार्थनया वशीकृतः।
प्रधानमन्त्रिरूपेण स्वेतिकर्तव्यतां दधे॥२२॥

प्रेषयित्वा विमानं स्वं तूर्णं देशान्तरे ततः।
प्रोषितान् भारतीयान् स आनयामास भारतम्॥२३॥

तेन राष्ट्रं परं तुष्टं परितुष्टाः कुटुम्बिनः।
परितुष्टं जगत्सर्वं भारतप्रीतिनिष्ठया॥२४॥

चिचिन्त सकलं विश्वं भारतमेव भारतम्।
स्वजनानामहो यद्धि योगक्षेमौ प्रतन्वते॥२५॥

पाकिस्तानकृते स्वीयाः सैनिका बर्करोपमाः।
म्रियन्ते चेन्म्रियन्तां ते, मूल्यं दत्तमपेक्षितम्॥२६॥

शवास्तेषां निखाताः स्युस्सादरं धरणीतले।
भक्षिता वा शृगालैः स्युः का नु चिन्ताऽत्र जीवताम्॥२७॥

कार्गिलसमरे सोऽयं व्यवहारः प्रदर्शितः।
स्वसैनिकान् मृतान् हित्वा पाकश्वानः पलायिताः॥२८॥

सादरं भारतीयास्तान् भूमिगर्ते शवान्दधुः।
कुरानोच्चारणं कृत्वा यथाधर्मं यथाविधि॥२९॥

स्वजनानानयामास भारतं निष्ठया तया।
यथा ते स्वकुटुम्बे स्युः सार्धमेव कुटुम्बिभिः॥३०॥

आनीतेष्वपि तेष्वेको द्वौ त्रयोऽथ च पञ्चषाः।
नूनं करोनासंग्रस्ता अलक्ष्यन्त परीक्षिताः।३१॥

एवं हि भारतेऽप्यद्धा करोनाविषमूर्च्छिताः।
सन्दृष्टाः, अन्यथा राष्ट्रमासीदेव समञ्जसम्॥३२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रधानमन्त्रिसङ्कल्पैः राष्ट्रं जातं समुद्यतम्।
निष्करोनं विधातुं स्वं भारतं सर्वतोमुखम्॥३३॥

दुर्निवारो यतश्चायं विषाणुः स्पर्शजो मतः।
ततो नु वारयामास मोदी स्पर्शात्तु बान्धवान्॥३४॥

स्वकीये खलु सन्देशे महामात्योऽवदद्यथा।
सोऽयम्मोदी नरेन्द्रोऽहं किञ्चिदद्य निवेदये॥३५॥

बान्धवा भारतीया मे श्रूयतां वचनं मम।
हित्वा सर्वविधं स्पर्शं पालयन्तां स्वसंस्कृतिम्॥३६॥

स्वदेशीयो भवेन्मित्रं मित्रं वैदेशिकोऽथवा।
अलं तस्य परिष्वङ्गैश्चुम्बनैर्हस्तमेलनैः॥३७॥

दूरादेव नमस्कारो हस्तसम्पुटमुद्रया।
समुदाचारमाहर्तुं करणीयस्सहादरम्॥३८॥

'नमस्ते' चापि वक्तव्यः प्रणिधाय वपुर्मनाक्।
सेयं परम्पराऽस्माकं भारतीया पुरातनी॥३९॥

यात्रा नैव विधातव्या जनसम्मर्दसङ्कुला।
रेलयाने बाष्पयाने विमाने चापि यत्नतः॥४०॥

वर्जनीयाः समारोहाः करोनारतिभूमयः।
क्वचित्कस्यापि संस्पर्शैर्विषाणुर्न विशेत्तनौ॥४१॥

जनः कः कुत आयातो निर्विषाणुर्भवेन्न वा।
ज्ञातुमित्यसमर्थानामेकान्तसेवनं वरम्॥४२॥

यावन्नापसरेद्राष्ट्रात् रुगातङ्कोऽति दारुणः।
तावत् पुत्रकलत्राणां मध्य एव वरं स्थितिः॥४३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अलं भयेन दैन्येन वैवश्येनाथ चिन्तया।
असहायभावनयाऽप्यलं हीनमनोरथैः॥४४॥

नरेन्द्रमोदीनामाऽयं यावज्जीवति बान्धवः।
न भयं भारतीयानां कोरोनातः किमप्यहो॥४५॥

यावदेव महामात्य आजुहाव स्वराष्ट्रजान्।
तावदेव रुजं रोद्धुं भारतेन यता कटिः॥४६॥

यात्रिभिः स्थगिता यात्रास्तिथयः परिवर्तिताः।
परमार्थतो निरस्ता नियता वा महोत्सवाः॥४७॥

गृहीता उचितोपायाः प्रतियानचतुष्पथम्।
करोनाप्रतिरोधार्थं शासनादेशवर्तिभिः॥४८॥

विषाणुनाशकैर्नीरैर्बहिस्त आगतानि वै।
प्रक्षालितानि यानानि प्रत्यहं नु यथायथम्॥४९॥

अयष्पथगन्त्रीणाञ्च सर्वे जवनिकापटाः।
जात्वधौता गवाक्षेभ्योऽप्यवतार्य पृथक्कृताः॥५०॥

सकृच्चापि न धौतानि कम्बलान्याक्रयावधेः।
प्रयोक्तुं च निषिद्धानि त्वरितं रेलमन्त्रिणा॥५१॥

विष्टरं प्रच्छदं चापि कम्बलं यात्रिणेऽधुना।
विभागो दास्यति नैव तदानेयं स्वयं जनैः॥५२॥

इत्यपि घोषितं स्वैरं रेलयानाधिकारिभिः।
तत्सर्वमेव सानन्दं यात्रिभिश्चाभिनन्दितम्॥५३॥

ऐतिह्यपक्षः सम्प्रति विषाणोरस्य गूहितः।
प्रकाशनीयोऽवश्यं हि ज्ञेयश्च राष्ट्रवासिभिः॥५४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कस्मात्कुतः कथं सोऽयं दाववह्निस्समुत्थितः।
दह्यते येन कान्तारः सत्त्वोद्विज्जादिसङ्कुलः॥५५॥

श्रूयते यद्धि चीनस्थे वुहानानाम्नि संस्थले।
विषाणुश्चीनदेशेन संहारार्हः प्रकल्पितः॥५६॥

विश्वविध्वंसकामोऽयं नीचश्चीनोऽतिदर्पितः।
नृशंसकर्मा दृप्तश्च निर्मर्यादोऽतिनिष्ठुरः॥५७॥

भारतं मन्यमानः स्वं सविशेषं सपत्नकम्।
प्रतिवेशानन्यांश्चापि भारतपक्षपातिनः॥५८॥

गुप्तरीत्या, विना युद्धं विषाणोरेव माध्यमैः।
अरातिजातमुच्छेत्तुं वाञ्छति चौरकर्मणा॥५९॥

वैज्ञानिकैर्नु तत्रत्यैः शासनादेशवर्तिभिः।
अयं प्राणहरः सृष्टो विषाणुर्विश्वनाशकः॥६०॥

आसीन्निगूहितं सर्वं, संस्खलितेन केनचित्।
किन्तु भाण्डमिदं दिष्ट्या संस्फुटितं विना श्रमम्॥६१॥

ततो भस्मासुरकल्पः करोनासुरनामकः।
विषाणुश्चीनमेवाग्रे ध्वंसितुमुपचक्रमे॥६२॥

शर्वरीविहगा दैवात् चमगादडसंज्ञकाः।
तस्यां प्रयोगशालायामाक्रमणं दृढं दधुः॥६३॥

अस्मिन्नाक्रमणे नूनं करोनाख्यविषाणवः।
संसक्ताः पक्षिदेहेषु रुधिरेषु च मिश्रिताः॥६४॥

त एव पक्षिणः पश्चात् हत्वा भोजे समर्पिताः।
भोज्यमांसतया यद्वा सूपरूपतया क्वचित्॥६५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मांसादिनां शरीरेषु सुखेनैव प्रवेशिताः।
दर्शितवन्तः स्वीयन्ते विक्रमं रभसेन वै॥६६॥

चीनस्था अन्यदेशीया निशाविहगभक्षकाः।
जाता एषां विषाणूनां स्वीयदेशे प्रवर्तकाः॥६७॥

यत्र यत्र गताश्चीनाः करोनाश्चापि संगताः।
एवं हि निखिले विश्वे महामारी कृतास्पदा॥६८॥

चीनाश्चान्येऽथ चीनस्था यत्र तत्र विषाणवः।
एवं चीनार्जितं पापं भुनक्ति सकलं जगत्॥६९॥

अपक्वः खलु यो मांसः पिशितं हि तदुच्यते।
अश्नन्ति पिशितं ये वै पिशाचाश्चैव ते मताः॥७०॥

चीना दृष्ट्या तया नूनं पिशाचा एव मानिताः।
यतः कृशानुकल्पास्ते दृश्यन्ते सर्वभक्षिणः॥७१॥

मत्कुणाः कृमयः कीटाः पल्ल्यो गोधा भुजङ्गमाः।
पक्षिणः सर्वजातीया ग्राम्या वन्याः पशुव्रजाः॥७२॥

भक्ष्याः सर्वेऽपि चीनानां पक्वा जीवन्त एव वा।
अहो नृशंसता तेषामतिशेतेऽसुरानपि॥७३॥

चतुर्दशोत्तरशतविधमांसस्य भक्षिणः[१]।
भवन्ति चीनदेशीयाः प्रमाणैरिति वेद्यते॥७४॥

जीवन्त्योऽपि वृहल्लूता ज्वलत्तैलेन भूर्जिताः।
विक्रीयन्ते राजमार्गे प्रत्यक्षं तत्र नित्यशः॥७५॥

व्याघ्रशिश्नमदन्त्येते कामशक्तिविवृद्धये।
सर्परक्तं पिबन्त्यद्धा कुक्कुरं भक्षयन्ति च॥७६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

किन्न खादन्ति दैत्यास्ते बौद्धधर्मानुयायिनः।
कीदृशास्ते खला बौद्धाः कीदृशाश्चापि धार्मिकाः॥७७॥

तेषामेव हि जीवानां प्राणपीडाऽभिशापतः।
चीनो विनाशलीलाया भविता जगति स्थलम्॥७८॥

क्रन्दनं मृत्युकष्टञ्च शातनं प्राणयन्त्रणम्।
तेषां निर्दोषजीवानां नूनं चीनं विनङ्क्ष्यति॥७९॥

अहिंसा परमो धर्म इतिमानि हि भारतम्।
जीवदयापक्षधरं चकास्ति धरणीतले॥८०॥

कामं भवेयुरत्रापि केचिन्मांसादिनो जनाः।
सन्ति ध्रुवं समाजेन त्यक्तनिन्दितथूत्कृताः॥८१॥

नृशंसराक्षसेभ्योऽपि प्रचुरं तेऽधमा जनाः।
जीवन्तं प्राणिनं हत्वा बुभुक्षां शमयन्ति ये॥८२॥

उदारा वसुधाऽस्माकं मातृकल्पाऽपि वत्सला।
उत्पादयत्यहो भक्ष्यं किं किं नैवाऽमृतोपमम्॥८३॥

वास्तुकं धान्यकं मूलं पलाण्डुमालुकं तथा।
पालक्यं शर्कराकन्दं शाकं कं कं न पौष्टिकम्॥८४॥

पुष्प-ग्रन्थि-पत्रभिन्ना गोजिह्वा स्वादु गृञ्जनम्।
ताम्रतरञ्च[२] वृन्ताकं भूमिगर्भान्नु जायते॥८५॥

लघ्वाकारं बृहद्रूपं दीर्घं तनु च वर्तुलम्।
भिन्नोपयोगं वृन्ताकं जनन्योत्पादितं भुवा॥८६॥

कूष्माण्डालाबुमरिच-तरुरोही[३]-शरपुत्रिकाः[४]।
लिकुचं पनसं जम्बु कारवेल्लमनुत्तमम्॥८७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

हन्त शतविधाः शाकाः शतकन्दफलानि च।
रोगव्याधिहराण्यम्बा पृथ्वी सृष्टवती स्वयम्॥८८॥

परं स्वास्थ्यकरं सर्वमपक्वमपि भक्षितम्।
पक्वञ्चापि तृप्तिकरं रक्तपातादिवर्जितम्॥८९॥

पशुमांसस्थिता रोगा प्रविश्य घ्नन्ति मानवम्।
गुणाः शाकस्थिताः किन्तु पुष्णन्त्येव निजाश्रयम्॥९०॥

गूढं रहस्यमेतद्धि नो विजानाति मानवः।
जिह्वालौल्यवशीभूतः शवमांसं भुनक्त्यहो॥९१॥

जीवनमेव शाकानां फलानां सार्थतां व्रजेत्।
अन्नादीनां यदि स्युस्ते भक्षिताः पशुभिर्नरैः॥९२॥

अन्यथा ते स्वयं शुष्का भविष्यन्ति मृताः खलु।
निर्गुणा निरुपादेया मोघजन्मान उज्झिताः॥९३॥

इयं हि वैधसी सृष्टिः कल्पिता परमेष्ठिना।
परस्परोपकर्त्र्येव नैरपेक्ष्यं न चात्र भोः॥९४॥

शाकाहारास्ततः सभ्या भवतात्मप्रतुष्टये।
पिशाचजीवनं त्यक्त्वा गृह्णीत किल दैवतम्॥९५॥

पुत्रपौत्रप्रियास्तातं स्वजनान् भक्षयाऽन्यथा।
श्रूयते यन्नृमांसो हि पशुमांसाद् विशिष्यते॥९६॥

विमुच्य राक्षसाहारं क्तमांसादिसङ्कुलम्।
पौष्टिकं सात्त्विकं भद्र! गृह्णीतैव निरामिषम्॥९७॥

अन्यथा यं हि क्रन्दन्तं वेपमानमशक्तिकम्।
प्रसह्य भक्षयस्यद्य श्वोऽसौ त्वामपि पक्ष्यति॥९८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अलं हीनबलं हत्वा जिह्वास्वादाय पक्षिणम्।
पशुं वा त्वद्दयाऽधीनं किन्नु पापमतः परम्॥९९॥

समस्तेनैव विश्वेन जिनधर्मावलम्बिना।
भाव्यमेव, कृमिञ्चापि घातयन्ति न ये क्वचित्॥१००॥

अहिंसैव परं मुख्यं दशाङ्गधर्मलक्षणे।
अहिंसको मतो लोके, नरः सन्नपि देवता॥१०१॥

हिंसकस्य वृथा सत्यं, वृथा शौचं, वृथा तपः।
वृथा दानोपकारौ च सर्वमेव कृतं वृथा॥१०२॥

आनृशस्यं परो धर्मः सर्वभूतहितावहम्।
नृशंसता परं पापं राक्षसं कर्म निन्दितम्॥१०३॥

यो हि प्राणहरः पापी नारकं तस्य जीवनम्।
जीवनं प्राणदातृणामिहैव स्वर्गसन्निभम्॥१०४॥

जानताऽपि मया नाथ! जीवो नाद्य हतः क्वचित्।
इति सम्प्रार्थ्य शर्वर्यां स्वापो ग्राह्यो निरन्तरम्॥१०५॥

यथाऽभीष्टास्तव प्राणाः त्वत्कृते हे नराधम।
तथैव सर्वजीवानां प्राणास्तेषामतिप्रियाः॥१०६॥

सन्ति हीनबला यद्वा त्वच्छलेन प्रवञ्चिताः।
तत एव निहन्यन्ते युष्माभिः पशुपक्षिणः॥१०७॥

अन्यथा ते क्षणेनैव हन्तुं युष्मानपि क्षमाः।
मिथ्यागर्वं ततो हित्वा धर्मवृत्तिं समाचर॥१०८॥

इदं करोनाशतकं त्रिवेणीकविना कृतम्।
भूयात् करुणाशतकं जनानां परमार्थतः॥१०९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पशुपक्षिवधाज्जातो विषाणुरतिदारुणः।
यथाऽऽतङ्क्यते विश्वं सङ्केतस्तेन गृह्यताम्॥११०॥

स्वयम्भोः ससुखं जीव जीवयाऽन्यान् यथोचितम्।
जिह्वारसमेवादातुं मा मा प्राणहरो भव॥१११॥

समारभ्याऽपराह्णे ह्यः प्रातरद्य प्रपूर्यते।
अहो नु जयते नित्यं सेविता मे सरस्वती॥११२॥

अहमस्मि सरस्वत्या लिपिको लेखनीकरः।
साऽऽदिशत्यहमुद्ग्रीवः श्रुत्वाऽदिष्टं लिखामि च॥११३॥

वर्णा वाक्यानि भावाश्च तस्या एवाऽखिलं, न मे।
तदीय एव सन्देशः पूरितश्शतकायते॥११४॥

इदं हि शतकं प्रातः पूर्यते बुधवासरे।
अष्टादशेऽह्नि मार्चस्य मुदा खिस्ताब्दविंशतौ॥११५॥

इति श्रीमद्दुर्गाप्रसादाभिराजीमध्यमसूनुना
कविसार्वभौमपदवीकेन महामहोपाध्यायब्रह्मर्षिकवि
पण्डितादिविरुदभाजाऽभिराजराजेन्द्रमिश्रेण पद्मपुरस्कृतेन
विरचितं करुणाशतकापराख्यं करोनाशतकं पूर्णम्।

(१९.३.२०२०)

निर्देशः—१. चीनदेशे ११४ प्रकारका मांसा भक्ष्यन्ते; २. टमाटर; ३. तरोई; ४. सरपुतिया।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोनोत्सादनस्तोत्रम्

-'अभिराज' राजेन्द्र मिश्रः

ओमस्य कोरोनोत्सादनस्तोत्रस्याभिराज ऋषिः सर्वरोगघ्नी महाकालिका देवताऽनुष्टुप् छन्दः कोरोनाविध्वंसने विनियोगः।

चण्डि चण्डि महाकालि! दुर्गे दुर्गतिनाशिनि!
यथा त्वया हताः संख्येऽरयो भीमपराक्रमाः॥१॥

निशुम्भशुम्भधूम्राक्षा राक्षसा अमितौजसः।
सचण्डमुण्डमहिषा रक्तबीजादयः पुरा॥२॥

जहि मातस्तथा भीष्मं दारुणं कृतसाध्वसम्।
रोगरूपं महाशत्रुं कोरोनाख्यं भयास्पदम्॥३॥

निगीर्य सकलं विश्वं भारतेऽपि कृतास्पदम्।
भीषयन्तं देवभूमिं तीर्थपूतामनुत्तमाम्॥४॥

छिन्धि-छिन्धि द्रुतं घोरे! भिन्धि-भिन्धि महेश्वरि!
यज्ञशिष्टाशिनं रक्ष भारतं देशमंचितम्॥५॥

न वयं ते नीचाश्चीना निशाविहगभक्षिणः।[१]
गोधापिपीलवल्मीकपल्लीलूतोरगाशिनः॥६॥

वयं भूतबलौ निष्ठा निम्बाश्वत्थसमर्चकाः।
जडजंगमसृष्टौ च जगन्नाथैकभावनाः॥७॥

दनुजानामयं रोगस्संस्तभ्नाति कथं सुरान्?
कथं भीषयते राष्ट्रं हनुमद्गंगयान्वितम्॥८॥

गर्ज गर्ज्राम्ब! धिग्वाग्भिर्ज्वालयेमं दृगग्निना।
विद्रावय बहिर्देशात् नवरात्रावधौ जये!॥९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मूषिकं भुजगी यद्वत् भुजंगं नकुलांगना।
करेणुर्नलिनीषण्डं चर्व-चर्व रणोन्मदे!॥१०॥

मुचकुन्दसमं देशं शयानं सार्गले गृहे।[२]
सन्दाह्य कालयवनं करोनां रक्ष भारतम्॥११॥

नरेन्द्रं मोदिनं मातर्मोदयाशु प्रजामपि।
उभाभ्यां च सुखं तिष्ठ शंसिताथ समर्चिता॥१२॥

कोरोनोत्सादनस्तोत्रं कृतमम्बांघ्रिसेविना।
निष्ठया पठितं रक्षेत् भक्तसन्दोहमास्तिकम्॥१३॥

इत्यभिराजविरिचितं कोरोनोत्सादनस्तोत्रम्।

(१.४.२०२०)

निर्देशः १. निशाविहगः चमगादड इति बैट्स (Bats) २. Lockdown

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोना-विडम्बन-शतकम्

-डॉ. माधव देशपांडे
[निवृत्त-प्राध्यापकः, संस्कृतं भाषाशास्त्रं च, मिशिगनविद्यापीठम्,
ॲन आर्बर नगरम्, मिशिगन, यू.एस.ए.]
Email:mmdesh@umich.edu

"परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः" इति कालिदासोक्तिः।

As Kalidasa said: "O friend, this is just a joke. Don't take it seriously."

कोरोनाख्यविषाणूनां स्पर्शाद् भीतोऽस्म्यहं प्रिये।
प्रीतिस्ते मयि चेन्मा मा स्पृश मा मां कदाचन॥१॥

O my dear! I am scared of contracting the Coronavirus. If you really love me, please don't don't don't ever touch me.

न पाणिग्रहणं कुर्यां यावत्स्पर्शभयं मम।
इत्युक्त्वा निर्गतः कोऽपि मण्डपात् सत्वरं वरः॥२॥

Saying "I will not take your hand as long as I am scared of touch," the groom quickly eñited the wedding hall.

नवीनोऽस्पर्शयोगोऽयं कोरोनासंप्रवर्तितः ।
न स्पृशेयं क्वचित् किञ्चिद् विमुखः स्वमुखादपि॥३॥

This new Yoga of No Touch is brought to you by the Coronavirus. I shall not touch anything and I have turned away even from my own face.

स्पर्शस्य प्रतिषेधश्चेदावयोः किं प्रयोजनम्।
दूरतश्चिन्तया हस्तौ पश्यतोऽतः परस्परम्॥४॥

If touching is forbidden, of what use are the two of us. Therefore, with this worry, the two hands just look at each other from a distance.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दूरतस्तिष्ठ गोविन्द माऽऽयाहि निकटे मम।
इत्युक्तो राधया कृष्णो नेत्राभ्यामस्पृशत् प्रियाम्॥५॥

"O krishna, stay away and don't come near me." Thus told by Radha, Krishna touched his beloved with his eyes.

पूतना निहता पूर्वं कोरोनेह समागता।
जगद्विनाशात् प्रागेव तां जहीहि जनार्दन॥६॥

O Lord, previously you killed Putana. Now Corona has arrived here. Please kill her before she destroys the world.

वपुर्मेऽतरुणं कामं मनस्तु तरुणायते।
समीपे काव्यरमणी कोरोनातो न मे भयम्॥७॥

My body may be old, but the mind is still young. With the beauty of poetry neñt to me, I have no fear from Corona.

मा मां स्पृशेति गोविन्दमाह राधा व्रजावनौ।
प्रथमं जहि कोरोनां यथा त्वं पूतनामहन्॥८॥

In the land of Vraja, Radha said to Krishna: "Don't touch me. First go and kill that Corona, as you killed Putana before."

स्वनिवासे निरुद्धोऽहं धावामि मनसा मम।
कोरोनाग्रस्तचित्तानां व्यायामः कीदृशोऽन्यथा॥९॥

Restricted to my own house, I keep on running with my mind. Otherwise, for those with minds occupied with Corona, what other exercise is possible?

जिह्वा स्पृशति मूर्धानं नाधुना स्पर्शवारणात्।
कोरोनाग्रस्तमनसां मूर्धन्यत्वं न सिध्यति॥१०॥

Because of the avoidance of touch, now the tongue does not touch the tip of the mouth. For those whose minds are afflicted with Corona, the retroflexion is not possible.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोनास्पर्शभीतोऽसौ पाणिनिः शब्दशास्त्रविद्।
स्वीयव्याकरणस्यान्तेऽस्पृष्टं वर्णद्वयं जगौ॥११॥

Scared of the touch of Corona, the great grammarian Panini, at the very end of his grammar, uttered the "untouched" sounds "a a" [अ अ].

Note: According to phoneticians, the pronunciation of the vowel "a" [अ] has a completely clear vocal track with no contact of oral organs.

व्यञ्जनोच्चारणे भूयः स्पर्शः स्यादिति चिन्तया।
भाषितव्यं स्वरैरेव कोरोनास्पर्शभीरुभिः॥१२॥

With the concern that the pronunciation of consonants often involves contact of organs in the vocal track, those who fear the touch of Corona should speak only with vowels.

जिह्वा स्पृशति नास्यं मे नौष्ठावपि परस्परम्।
मुखमुद्घाट्य तिष्ठामि किमोकारं सदा गदन्॥१३॥

My tongue does not touch my mouth, nor do my lips touch each other. Should I just sit with an open mouth saying only "O O O O O"?

यदागच्छन्ति ते देवाः दमयन्त्याः स्वयंवरे।
स्पृशन्ति न तदा भूमिं करोनाभयविह्वलाः॥१४॥

When the gods arrive for Damayanti's ceremony of choosing the groom, being worried about the danger of the Coronavirus, they do not touch the ground.

स्वयंवरे राजकन्या वरान् दीना प्रतीक्षते।
न कोऽपि वर आयाति करोनास्पर्शचिन्तया॥१५॥

The poor princess waits for the prospective grooms at her ceremony of choosing one for her. But no grooms show up as they worry about contracting the Coronavirus.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वं स्वं रथं समारुह्य वराः सर्वे पलायिताः।
अवशिष्टा वधूरेका मालया वरयेत कम्॥१६॥

Climbing into their own chariots, all [potential] grooms fled away. Only the bride remained. Now who can she choose with her garland?

स्वयंवरे वधूराह वरये कमहं कथम्।
स्पर्शभीतिर्यदा सर्वं परिवेष्ट्य जगत् स्थिता॥१७॥

At the ceremony of choosing a husband, the bride said: "How can I choose anyone, when the fear of touch is encircling the whole world?"

कोरोनास्पर्शभीतोऽसौ सचिन्तो मण्डपे वरः।
चिक्षेप सत्वरं मालां वध्वाः कण्ठेऽतिदूरतः॥१८॥

The worried groom in the wedding hall, scared of the touch of Corona, quickly threw the wedding garland on the neck of the bride from far away.

दृशापि स्पृश मां मा त्वं तिष्ठ दूरं वरानने।
कोरोनानिर्गमादूर्ध्वं मीलनं नौ भविष्यति॥१९॥

O Beautiful Lady, please stay away and do not touch me even with your glances. We shall get together after the Coronavirus goes away.

स्वयंवरे वधूः काचिद् मालां क्षिप्त्वा विनिर्गता।
"दुर्दिनेऽस्मिन् करोनाया वरयामि न कञ्चन"॥२०॥

At the ceremony of choosing a husband, the bride threw down the garland and went away saying: "During such a difficult time due to Coronavirus, I will not choose anyone."

दमयन्ती नलं प्राह वरये त्वामहं कथम्।
कोरोनागमनादूर्ध्वं पुनरायाहि नैषध॥२१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Damayanti said to Nala: "O Nala, how can I choose you [for my husband today]. After the Coronavirus goes away, please come back."

मत्स्यं मा विद्ध्य कोन्तेय भविता न स्वयंवरः।
कोरोनानिर्गमादूर्ध्वं पुनरायाहि सत्वरम्॥२२॥

O Arjuna, don't shoot the fish [with your arrow] to prove that you are the best archer], since the ceremony of choosing the groom will not be happening. After the Coronavirus goes away, please come back quickly.

दृश्यरूपा मया पूर्वं ताडका निहता शरैः।
अदृश्यरूपां कोरोनां को मे बाणो हनिष्यति॥२३॥

Rama wondered: "Previously I killed the demoness Tadaka with my arrow. Now which arrow of mine will kill this invisible Corona?"

धनुर्मा स्पृश शैवं तद् भविता न स्वयंवरः।
कोरोनानिर्गमादूर्ध्वं पुनरायाहि राघव॥२४॥

O Rama, don't touch that bow of Shiva, since the ceremony of choosing the groom will not be happening. After the Coronavirus goes away, do come back.

गच्छ शूर्पणखे दूरं माऽऽयाहि मम सन्निधौ।
कोरोनानिर्गमादूर्ध्वं पुनरागमनं कुरु॥२५॥

Lakshmana said to Shurpanakha: "O Shurpanakha, go far away. Don't come near me. Come back after the Coronavirus goes away."

असिनापि न ते कर्णौ नासिकां वा स्पृशाम्यहम्।
कोरोनानिर्गमादूर्ध्वं पुनरागमनं कुरु॥२६॥

Lakshmana said to Shurpanakha: "O Shurpanakha, I am not going to touch your nose and ears even with my sword. Come back after the Coronavirus goes away."

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोनास्पर्शभीतोऽहं न हरिष्यामि जानकीम्।
तस्या निर्गमनादूर्ध्वमागमिष्यामि सत्वरम्॥२७॥

Ravana said:
"Scared of contacting the Coronavirus, I will not abduct Sita. Once it goes away, I will return quickly."

कोरोनाविप्लवाक्रान्तलङ्काद्वीपं विहाय सा।
रामेण सहितायोध्यां ययौ सीता विहायसा॥२८॥

Leaving the island of Lanka that was overwhelmed with the spread of the Coronavirus, Sita went to Ayodhya along with Rama by air [in the Pushpaka plane].

कोरोनास्पर्शभीतोऽहं पश्यन् द्रोणगिरिं पुरः।
कथमुत्थापयाम्येनमिति चिन्ता हनूमतः॥२९॥

"Scared about contracting the Coronavirus, I see the mountain Dronagiri in front of me, but how can I lift it?" such is the concern of Hanuman.

विंशतेर्मम हस्तानां कर्तव्यं शोधनं मया।
मुखानि दश बद्धानि हा कोरोने हतोऽस्म्यहम्॥३०॥

Ravana says: "I have to sanitize my twenty hands, and my ten faces are tied up. O Corona, I am finished."

कोरोनाविप्लवाक्रान्तं लङ्काद्वीपं निरीक्ष्य सः।
किंकर्तव्यतया मूढो युद्धं तत्याज रावणः॥३१॥

Seeing the island of Lanka being overwhelmed by the danger of the Coronavirus, confused as to what course to take, Ravana abandoned the battle.

कोरोनाभयभीतोऽसौ चिन्ताक्रान्तो दशाननः।
मुक्त्वा स जानकीं सद्यो राघवं शरणं ययौ॥३२॥

Scared of the danger of the Coronavirus, overcome by worry, Ravana freed Sita and quickly took refuge with Lord Rama.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अतिदूरं करोनातो गन्तुमिच्छन् भयाकुलः।
रामेण रक्षितोऽगच्छदयोध्यां रावणो मुदा॥३३॥

Scared of the danger and wishing to go far away from the Coronavirus, Ravana, protected by Rama, happily went to Ayodhya.

कोरोनां भीषणां दृष्ट्वा लङ्कां त्यक्त्वा बिभीषणः।
रामेण सहितोऽयोध्यां प्रायात् सोऽपि विचक्षणः॥३४॥

Seeing the frightening Corona, the wise Bibhishana, leaving Lanka, also went to Ayodhya along with Rama.

विश्वामित्रो मुनिः प्राह मेनकां स नवार्भकाम्।
कोरोनाभयभीतोऽहं जहामि त्वां प्रियामपि॥३५॥

The great sage Vishvamitra said to Menaka who had just delivered a baby: "Scared of the danger of the Coronavirus, I am going to abandon you, though I love you."

सर्वकर्माणि संन्यस्य फलानि सकलानि च।
सर्वकालं गृहस्थोऽहं कोरोनाभयचिन्तया॥३६॥

Having given up all activities and their results, I have become permanently homebound due to concern with the danger of the Coronavirus.

ब्राह्मणाः श्रमणाः द्वन्द्वयुद्धं ते कुर्वते मिथः।
कोरोनादुर्दिने तेषां समाहारः कथं वद॥३७॥

The Brahmans and the (Buddhist/Jain) ascetics engage in hand-to-hand combat with each other. Tell me how they could be bunched together during the pandemic of the Coronavirus?

Note – Paaini 2.4.9 (येषां च विरोधः शाश्वतिकः) prescribes a samahara-dvandva compound for those who are permanently

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

opposed to each other. The stock example of Samahara-Dvandva is ब्राह्मणश्रमणम्.

दैवं देवोऽथवा वैद्यः कोरोनां निहनिष्यति।
कोरोनाभयबद्धानां तदा मोक्षो भविष्यति॥३८॥

Those who are tied down by the fear of the Coronavirus will find freedom when the fate, God or a doctor will destroy it.

स्वर्गद्वारं यदाऽऽयान्ति कोरोनास्पृष्टमानवाः।
अमृतस्याभिषेकेण पुनन्ति द्वारपालकाः॥३९॥

When the human beings who contract the Coronavirus come to the gates of heaven, the gate keepers sanitize them with a shower of Ambrosia.

प्रसन्नं कमलाकान्तमब्रवीद् ध्रुवबालकः।
स्थिरां देहि स्थितिं देव कोरोना यत्र न स्पृशेत्॥४०॥

The child Dhruva said to Lord Vishnu who was pleased with him: "O Lord, give me such a firm position where Corona will not touch me." [Dhruva became the Pole Star.]

कोरोनास्पर्शभीतोऽसौ त्रिशङ्कुर्नृपसत्तमः।
स्वर्गं विहाय पृथ्वीं च मध्य एव प्रतिष्ठितः॥४१॥

Scared of contracting the Coronavirus, the great king Trishanku left the earth and heaven and situated himself in the middle.

इच्छन्नपि स इन्द्राणीं नहुषो न शशाक ताम्।
कोरोनाशङ्कया स्प्रष्टुं सुखं नासीत्तपस्विनः॥४२॥

Though Nahusha desired Indrani, due to the fear of Corona, he was not able to touch her. The poor soul had no pleasure.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अगस्त्यस्यास्पृशत् पादौ नहुषो खे रथे स्थितः।
कोरोनाशङ्कया शप्तो मुनिना सोऽपतद् भुवि॥४३॥

Nahusha, sitting in his chariot in the sky touched the feet of the sage Agastya. However, due to the fear of Corona, the sage cursed him and he fell to the ground.

निरीक्ष्य पृथिवीं सर्वां कोरोनाभयविप्लुताम्।
अन्तरिक्षं समाश्रित्य ध्रुवस्तिष्ठति शङ्कितः॥४४॥

Noticing that the earth was overwhelmed with the danger of the Coronavirus, the scared Dhruva [the pole star] sits in the space.

अयि दुष्यन्त राजेन्द्र यद्यपि त्वं प्रियोऽसि मे।
तथापि त्वं निवर्तस्व कोरोनात्र प्रसर्पति॥४५॥

Shakuntala said to Dushyanta: "O Great King, though I love you, please go back. The Coronavirus is spreading here.

प्रतिगच्छ नरश्रेष्ठ माद्य मां हर माधव।
कोरोनागमनादूर्ध्वं हर्तुं मामेहि सत्वरम्॥४६॥

Rukmini said to Krishna: "O Krishna, the best among men, don't carry me away today. Go back. After the Coronavirus goes away, come back quickly to carry me away."

कोरोना स्थगयामास स्वयंवरविधीन् कलौ।
कृते युगे करिष्यन्ते तस्या निर्गमनात् पुनः॥४७॥

The Coronavirus put a stop to all ceremonies of choosing the groom in this age of strife. They will take place again after the virus goes away in the coming age of purity.

कोरोनाऽऽगमनाऽऽरम्भेऽशान्तिरायास्यति ध्रुवम्।
कोरोनागमनाऽऽरम्भे शान्तिरायास्यति ध्रुवम्॥४८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

With the arrival of the Coronavirus, peace will certainly be lost. With the departure of the Coronavirus, peace will certainly return.

नापितस्पर्शमात्रेण कोरोनाभयशङ्कया।
नापितं वर्जयित्वासौ कुरुते केशवर्धनम्॥४९॥

With the fear of contacting the Coronavirus just by the touch of the barbar, he is avoiding the barbar and growing his hair.

चाण्डालो ब्राह्मणं दृष्ट्वा स्पर्शभीत्या पलायते।
प्रभावोऽयं करोनाया ययास्पृश्यो द्विजः कृतः॥५०॥

A low cast person [Chandala] sees a Brahmin and runs away with the fear of contact. It is the power of the Coronavirus that made a Brahmin untouchable.

दम्पती नितरां रक्तौ कोरोनास्पर्शशङ्कया।
असिधाराव्रतं कष्टं कुरुतोऽद्य निजालये॥५१॥

The husband and wife, deeply in love with each other, practice at their home the difficult vow of keeping a sword between them due to the fear of contacting the Coronavirus.

"न कुक्कुरा न मार्जाराः कोऽप्यायाति न मे गृहम्।
श्रान्ताहं ते मुखं दृष्ट्वा" काचिद् भार्याब्रवीत् पतिम्॥५१॥

"Neither dogs nor cats, no one comes to my house. I tired of seeing your face." A wife said to her husband.

कोरोनेऽकरुणे सद्यो गृहं कारागृहीकृतम्।
न कोप्यायाति निर्याति शृणोमि श्वसनं मम॥५३॥

O cruel Corona, you have turned my house instantly into a prison. No one comes or goes. I can hear my own breathing.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

बहिर्मा गच्छ गच्छेश्चेत् स्पृश मा तत्र कञ्चन।
हस्तप्रक्षालनं कृत्वानन्तरं स्वमुखं स्पृश॥५४॥

Don't go out. If you do go out, don't touch anyone. First wash your hands, and then touch your own face.

हा हा हा कोरोने क क क क किमिदं कृतं त्वया लोके।
ग ग ग ग ग ग गच्छेति ब्रूते कश्चिज्जराजीर्णः॥५५॥

A withered old man says: "Alas alas alas, O Corona, wh wh wh what did you do to the world? G g g g go away."

सौक्ष्म्याद् दृष्ट्वापि चक्षुर्भ्यां कोरोना नोपलभ्यते।
नाभावादिति जानीहि, सत्यं साङ्ख्याः पुरा विदुः॥५६॥

Know that even after looking with your eyes, you cannot find the Coronavirus because of its minute size, and not because it does not eñist. The Sankhyas knew this truth long ago.

Note: साङ्ख्यकारिका of ईश्वरकृष्ण–सौक्ष्म्यात् तदनुपलब्धिर्नाभावात्।

कृष्णायाः पञ्च पतयः प्रासादे परितः स्थिताः।
न यान्ति निकटे तस्याः कोरोनाभयविह्वलाः॥५७॥

The five husbands of Draupadi stand around her in the palace, but being scared of the danger of the Coronavirus, they do not come near her.

कोरोनास्पर्शभीतोऽहं कथं तां द्रुपदात्मजाम्।
स्पृशेयं मम हस्ताभ्यां कथयस्व कुरूत्तम॥५८॥

Duhshasana says: "O Duryodhana, being scared of contacting the Coronavirus, how do I touch Draupadi with my hands? Please tell me."

कोरोनाभयसन्त्रस्तमिन्द्रप्रस्थं विहाय ते।
पाण्डवा आत्मरक्षार्थं स्वयमेव वनं गताः॥५९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Scared of the danger of the Coronavirus, the Pandavas left Indraprastha and went into the forest just to save themselves.

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥६०॥

Dhritarashtra said: "O Sanjaya, assembled on the holy battlefield of Kurukshetra and eager to find, what did my sons and the Pandavas do?"

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
न्यवर्तन्त रणात् सर्वे कोरोनाभयविह्वलाः॥६१॥

Sanjaya said: "O King, assembled on the holy battlefield of Kurukshetra and eager to fight, they turned away from battle, being scared of the danger of the Coronavirus."

कथयस्व कथं कृष्ण स्थास्यामि तव सन्निधौ।
रथान्निर्गत्य कुर्याव कोरोनास्पर्शवारणम्॥६२॥

Arjuna said: "O Krishna, how I can stand next to you? Let us get down from the chariot and avoid contracting the Coronavirus."

मा स्पृश मा स्पृश मामिति निगदन्ती नववधूर्गता दूरम्।
प्रणयं दर्शयतु कथं वर एकाकी निषण्णोऽत्र॥६३॥

Saying "don't touch me, don't touch me," the new bride went away. How can the poor groom sitting here alone eñpress his love?

वरो न मण्डपं यातो न वधूर्निर्गता गृहात्।
अन्तर्जालेन निष्पन्नो विवाहोऽस्पर्शसुन्दरः॥६४॥

Neither did the groom go to the wedding hall, nor did the bride leave her home. The beautiful wedding, without touching, took place on the internet.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पुरोहितोऽब्रवीन्मा मा स्पृश तामधुना वर।
आयास्यति गृहं सा ते कोरोनागमनात् परम्॥६५॥

The priest said: "O Groom, please don't touch her now. After the Coronavirus goes away, she will come to your home."

विवाहमण्डपः शून्यो निरुद्योगः पुरोहितः।
वणिजामापणः पूर्णं भीतैरन्नार्थिभिर्जनैः॥६६॥

The wedding hall is empty and the priest has no business. The shops of merchants are filled with scared people looking for food.

अत्र तिष्ठ मया साकं मा गच्छास्मद्गृहाद् बहिः।
वर्जय स्पर्शमन्येषामिति भार्याब्रवीत् पतिम्॥६७॥

The wife said to the husband: "Stay here with me. Don't leave our home. Avoid the touch of others."

कोरोनास्पर्शभीतोऽयं न निर्याति गृहाद् बहिः।
प्रतीक्षते किन्तु तत्रासहाया प्रतिवेशिनी॥६८॥

Scared of contracting the Coronavirus, he does not leave his home. But the lonely lady next door is waiting.

कोरोने निर्घृणे त्वत्तो भीतो मे प्रतिवेशिकः।
न मे दृष्टिपथं याति सुखं मेऽपहृतं त्वया॥६९॥

The lady next door says: "O cruel Corona, my neighbor is scared of you. I don't get to see him. You have taken away my happiness."

कन्या वरयते रूपं माता वित्तं पिता श्रुतम्।
बान्धवाः कुलमिच्छन्ति वरो भीत्या पलायते॥७०॥

A girl chooses beauty, the mother looks for wealth, the father looks for education, and the relatives look for the lineage. However, the scared groom runs away.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कमले कमला शेते हरः शेते हिमालये।
क्षीराब्धौ च हरिः शेते कोरोनास्पर्शशङ्कया॥७१॥

Lakshmi sleeps in a lotus flower. Shiva sleeps on the Himalaya. Vishnu sleeps on the ocean. All this due to the fear of contracting the Coronavirus.

कः पस्पर्श मुखं ते चन्द्र कलङ्कः कथं त्वया लब्धः।
कोरोनाभयकाले कुतः सखे भ्रमसि रे नभसि॥७२॥

O Moon, who touched your face, and how did you get that spot? At the time of the danger of the Coronavirus, why are you wandering in the sky?

तीक्ष्णरश्मिः स्वयं सूर्य कोरोनातो न ते भयम्।
न च कश्चित् क्षमः स्प्रष्टुं कुतो दूरं पलायसे॥७३॥

O Sun, you with your sharp rays have no fear from the Coronavirus. No one is able to touch you. Then why are you running away?

यावद्भयं करोनातस्तावत् स्याद् ग्रहणं कथम्।
चन्द्रसूर्यौ भयं किं वां राहुर्दूरं पलायितः॥७४॥

As long as there is the danger of the Coronavirus, how can an eclipse take place. O Moon and Sun, what is your fear? The demon Rahu [who swallows the sun and the moon] has run away.

कोरोनाऽऽगमने जातमस्पृश्यं सकलं जगत्।
कोरोनागमने भूयान्मङ्गलं सकलं जगत्॥७५॥

With the arrival of the Coronavirus, the whole world became untouchable. With the departure of the Coronavirus, the whole world will have its wellbeing.

स्पर्शवान् रूपरहितो वायुरित्युदितं बुधैः।
वारयामि कथं वायोः स्पर्शं ब्रूहि बुधोत्तम॥७६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

The learned say that the wind has no color but has touch. O Wizard, please tell me how I can avoid the touch of wind.

स एकाकी न रमते तस्मात् स बहुधाभवत्।
कोरोनास्पर्शभीत्यासौ पुनरेवैकतां गतः॥७७॥

He [the Creator] did not enjoy being alone, and hence became many [= created the world]. However, with the fear of contacting Corona, he returned to his oneness.

"मूर्धन्यसूत्रमुत्सृज्य कोरोने वर्तसे कथम्।"
क्रोधेन पाणिनिर्हन्ति मूर्धानं पाणिना स्वकम्॥७८॥

"O Corona, how come you do not follow my rule of retroflexion?" Saying this, with his own hand Panini strikes his head with anger.

रे रे चन्द्र त्वमाकाशे ताराभी रमसे कथम्।
कोरोनास्पर्शनियमं न त्वं जानासि किं सखे॥७९॥

O Moon, my friend, how can you sport with the stars in the sky? Don't you know the restrictions on touching during the Coronavirus spread?

प्रतिबन्धं परित्यज्य चन्द्रो भ्रमति खे सदा।
आदिष्टो विरमेत्युच्चैः राहुणा नाशृणोदसौ॥८०॥

Disregarding the ban, the moon constantly wanders in the sky. He was ordered by Rahu to stop, but he did not listen.

नियमानवधूयायं चन्द्रो भ्रमति खे सदा।
इति दृष्ट्वातिकुपितो राहुस्तं जग्रसे क्षणात्॥८१॥

Seeing that the moon is constantly wandering in the sky, Rahu was very angry and he instantly devoured him.

सहस्रनयनः सूर्योऽपश्यच्चन्द्रस्य राहुणा।
ग्रसनं न तथाप्येष विरतो भ्रमणान्निजात्॥८२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

The sun, with his thousand eyes, saw the moon being devoured by Rahu, and yet he did not desist from his own wandering.

तद्दृष्ट्वाऽतिमहान् क्रोधो राहोश्चित्ते समुत्थितः।
क्रोधसंरक्तनयनो जग्रसे तं स भास्करम्॥८३॥

Seeing that, great anger arose in Rahu's mind. With his eyes red with anger, he devoured the sun.

न गच्छन्ति जनाः केऽपि कदाचिन्नापितालयम्।
प्रयोजनं किमधुना केशश्मश्रुनिकर्तने॥८४॥

No one goes to the barbershop anytime. What is the point of cutting hair and shaving beard now?

नापिता अपि कुर्वन्ति नात्मकेशनिकर्तनम्।
परस्परमपश्यन्तः कर्तने किं प्रयोजनम्॥८५॥

Even the barbers don't cut their own hair. As they don't see each other, what is the point of cutting hair?

गवाक्षेऽपि स्थितं कोऽपि न मां पश्यति मार्गगः।
प्रयोजनं किमधुना केशश्मश्रुनिकर्तने॥८६॥

Even when I stand at the window, no one on the street sees me. What is the point of cutting hair and shaving beard now?

कोरोनास्पर्शभीतिर्न वृक्षाणां पशुपक्षिणाम्।
वसन्तसमये तेषां सौन्दर्यं पश्य मा शुचः॥८७॥

Trees, animals and birds are not worried about contracting the Coronavirus. In the spring time, look at their beauty. Do not grieve.

चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च।
ध्रुवं साम्प्रतिकं दुःखं निर्यास्यति न संशयः॥८८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Like a wheel, sorrows and happiness go round and round. The current sad situation will certainly go away. There is no doubt about it.

"किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः"।
अकर्मैव मया कार्यं गृहबद्धेन सर्वदा॥८९॥

Even the wise are confused about what is action and non-action. As I am homebound, the only thing for me to do is non-action at all times.

परिहासो न कर्तव्यो यस्य बद्धं मुखं सदा।
सर्वे बद्धमुखा यत्र कः कं परिहसेद् वद॥९०॥

Don't laugh at someone whose mouth is covered. When everyone has their mouths covered, who is going to laugh and at whom?

भार्याभिः कलहायन्ते निबद्धाः पतयो गृहे।
एक एव उपायोऽत्र सर्वेषां मुखबन्धनम्॥९१॥

The homebound husbands fight with their wives. Tying up everyone's is the only solution.

मुखबन्धे हि भूयांसो गुणाः सन्तीति कथ्यते।
कलहोपशमे शान्तिः श्रूयतेऽद्य गृहे गृहे॥९२॥

There are said to be many virtues in covering one's mouth. One can hear the peace in every house when the quarells cease.

शरीरावरणे यः स्यात् स मुखावरणे गुणः।
इति वैद्योत्तमाः प्राहुर्निपुणं तन्निबोधत॥९३॥

The benefit that one gets by covering the whole body is available just by covering one's mouth. This is what the best of the doctors say. Carefully understand that.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रक्षिता सर्वभूतानामुदयास्तमयप्रभुः।
कोरोनाया विनाशाय वैद्यो नारायणो हरिः॥९४॥

Protector of all beings and the lord of creation and destruction, God Vishnu is the only doctor to destroy Corona.

कोरोनाप्रतिकाराय योद्धारो भिषजो भुवि।
तत्सहायाश्च धन्यास्ते तान् सर्वान् प्रणमाम्यहम्॥९५॥

In this world, doctors are the warriors in the fight against the Coronavirus. Also blessed are their helpers. I offer my salutations to all of them.

चिन्तातुरान् जनानत्र पश्यामि परितो हि माम्।
कोरोनायाः परित्राणं वैद्यानामपि दुःशकम्॥९६॥

Around me I see people worried sick. Even the doctors find it difficult to save their patients.

विद्यालयानि शान्तानि तथा कार्यालयान्यपि।
औषधानामभावोऽत्र दृश्यते भिषगालये॥९७॥

The schools and places of work are silent, and there is shortage of medicines in the pharmacies.

किं कर्तव्यं न जानन्ति जना दुःस्थितिविस्मिताः।
धावन्ति क्रीणनार्थं ते स्पर्धमानाः परस्परम्॥९८॥

People are shocked by the terrible situation and they do not know what to do. They run to buy things competing with each other.

न मया दृष्टपूर्वेयं जनानां स्थितिरीदृशी।
आकुलश्चिन्तया जातो वक्ष्यामि किमतः परम्॥९९॥

I have never seen such a situation previously. I am very worried. What more can I say?

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इतः करोणा च ततः करोणा
सर्वत्र लोके प्रसृता करोणा।
तथा हि सा निष्करुणा करोणा
कवेर्मनोद्वारि सदा निषण्णा॥१००॥

Corona is here and there. It has spread across the world. This Corona has no compassion and has constantly occupied the gate to the mind of this poet.

इति देशपांडेकुलजेन मुरलीधरतनूजेन माधवशर्मणा विरचितम् कोरोनाविडम्बनशतककाव्यं समाप्तम्।

Thus ends the Comedy of Corona composed by Madhav Murlidhar Deshpande.

(१८.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोना

–डॉ. महेश झा

प्रसरति विषकन्या का विदेशोद्भवेयं
स्पृशति दशति सद्यो हन्ति चान्यानुपैति।
अतिकुटिलकरोना या हि शीतस्वभावा
शिशिरमपि सहायं सुप्रभाते करोति॥१॥

गगनमपि करोनाक्रान्तमाभाति मुञ्चत्
कफमिव बहुवृष्टिं भूतले सर्वतोऽपि।
दिनकरकरतापं वारयद् वारिवाहैः
प्रियरुजहररश्मि प्रातराहो रुणद्धि॥२॥

जलधिमथनकालेऽकाण्डविध्वंसदक्षं
विषमपिब उताहो त्वन्त्वरक्षस्त्रिलोकीम्।
हर कुटिलकरोनामुल्वणं रक्ष पीत्वा
सकलममितभीतेर् द्योतयेश्च प्रभातम्॥३॥

जननिवहनिवृत्तिं स्वच्छतां साधुभोज्यं
करपुटविधिना वा सन्नमस्कारवृत्तिम्।
निजनिजगृहसंस्थां संस्कृतिं भारतीयां
कुरु कुरु नर शुभ्रं सुप्रभातं जुषस्व॥४॥

पिहितवदननासा हासमुत्पादयन्ती
चलति रतिविरक्ता काप्यहो लज्जमाना।
अयि कुटिलकरोने ते कुकृत्येऽपि शीलं
प्रसरति जनमध्ये सुप्रभातावदातम्॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वयमुपनय शीघ्रं स्वं सदाऽन्येभ्य एवं
निजपरिजनतोऽपि श्रेयसो वर्त्म नव्यम्।
इयमहितकरोना हे सखे मुक्तिमन्त्रं
दिशति परमगम्यं सुप्रभातावदातम्॥६॥

निजनिजहितचिन्तास्वीकृतानेकयत्नो
जन इह परसेवां साधु सद्यो विधत्ते।
जहि कुमतिकरोने नः समाजानुबन्धं
स्फुरति तु सततं नो ह्यात्मदीपप्रभातम्॥७॥

अतिविषमकरोना क्रूरकर्मप्रभावं
तनुत इत उदग्रा या ततोऽपि प्रचण्डम्।
द्रुततरमतितीक्ष्णैस्तां करैरायुधैस्त्वं
जहि दिनकर रम्यं द्योतयेः सुप्रभातम्॥८॥

अयि परुषकरोने भीषयन्तीह विश्वं
प्रचलसि नवमिष्टं साधु संस्पृश्य मौनम्।
विलससि बहु साकं तेन वा वारमुख्या
धरसि च नवरूपं सङ्गमेऽनुप्रभातम्॥९॥

रहसि निवस मौनं क्षालयन् भूरि हस्तौ
स्मर हरिहरदेवौ सद्भिषग्रूपिणौ तौ।
विचर न पथि भीत्या मुञ्च धैर्यं न बन्धो
दिनकररुजहर्ता चानयेत् सुप्रभातम्॥१०॥

(२३.३.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जय जय चीनसुते

–डॉ. निरञ्जन मिश्रः
एसो.प्रो. श्रीभगवानदास आदर्श
संस्कृत महाविद्यालय हरिद्वार।
मो. नं. ९४१०५०९०२३

लघुतरनेत्रसमर्जितपापमहीरुहजातविपक्वफले
विधिरचितामलसृष्टिपयोजविनाशसमुद्यतचन्द्रकले।
सकलविशिष्टबलोद्धतदर्पविभूषितमौलिविचुम्बिपदे
जय जय मानवचित्तविदारिणि वीर्यविनाशिनि चीनसुते॥१॥

जगदघशैलसमुत्थलताकुसुमाभरणे कुटिले चपले
लघुतमरूपधरे स्वविकासविदर्पितमानसमानहरे।
विवशजनार्तरवश्रवणप्रियचारणचर्चितकीर्तिलते
जय जय मानवचित्तविदारिणि वीर्यविनाशिनि चीनसुते॥२॥

निजविजयार्चनलुब्धमदोत्कटकल्पितसेवितशस्त्रवरे
अशिवपदार्चनजातनिशाचरशक्तिसमञ्चितगात्रवरे।
जनजनचारिणि हृदयविदारिणि भूतलशासनदण्डधरे
जय जय मानवचित्तविदारिणि वीर्यविनाशिनि चीनसुते॥३॥

श्रुतिविहिताचरणाम्बुजवासविलासिभयान्नमिते विकटे
निजजननीं जनिभूमिमपास्य जगद्विपिनभ्रमणार्थरुचे।
मुनिजनकल्पितजीवनवृत्तिविधानरते खरदण्डधरे
जय जय मानवचित्तविदारिणि वीर्यविनाशिनि चीनसुते॥४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तव भयभीतजनोऽद्य गृहान्न बहिर्गमने स्वमनः कुरुते
सततगतिर्धरणिर्गगनं पवनः क्षणमत्र सुखं लभते।
प्रकृतिनटीमुखधूसरतामपहर्तुमिहात्मविलासरते
जय जय मानवचित्तविदारिणि वीर्यविनाशिनि चीनसुते॥५॥

अयि भयदेऽभयदेऽप्यसुरांगनमोदरते सुरतोषरते
विधिविपरीतगतार्चितमानिनि वेदविनिन्दकमानहरे।
त्वमसि सदाशिवमानविमर्दिनि किन्तु सदाशिवकीर्तिधरे
जय जय मानवचित्तविदारिणि वीर्यविनाशिनि चीनसुते॥६॥

भवतु भयादिह किञ्च सनातनधर्मसुशिक्षणकर्मरते
त्यज वसुधां मम याहि हि जन्मधरां खलबन्धुजनैर्ललिते।
निजविपरीतचरित्रबलादयि भीतिविचित्रणकर्मरते
जय जय मानवचित्तविदारिणि वीर्यविनाशिनि चीनसुते॥७॥

(३.४.२०२०)

प्रीतो भव महेश

-डॉ. निरञ्जन मिश्रः

हे भूतनाथ कुरु भूतगणस्य रक्षां भूतेश्वरी भवभयंकरतां दधाना।
भूमौ भ्रमत्यविरतं निजरोषदग्धा ज्वालाज्वलद्रसनया पिबतीव विश्वम्॥१॥

जाने न केन हतकेन कृतं कदा किं येनाद्य चन्द्रवदनाऽभवदत्र रुद्रा।
या सर्वभूतहितचिन्तनकारिणी सा सर्वार्थभक्षणपरा रणचण्डिकाऽभूत्॥२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

हा हन्त मातृचरणाम्बुजपानपीना-स्तन्मानमर्दनरतौ निरता बभूवुः।
यस्याद्य भीषणफलागमदर्शनेन भीतं जगद्विकलतांकतलं पपात॥३॥

बुद्धिर्गता विफलतां शिथिला च शक्तिः तन्द्रां गता मतिरिहाद्भुतकर्मिणां च।
मातुः कृपा सकलविघ्ननिदानभूता कोपः परं हरति जीवनमेव तस्याः॥४॥

शम्भो करालगरलं विनिपीय पूर्वं ब्रह्माण्डभाण्डमभिरक्षितुमुद्यतस्त्वम्।
एषाणिमाद्य तव पादपयोजभृङ्गी विश्वं निहन्ति ननु रोधय तां प्रमत्ताम्॥५॥

कस्त्वां विहाय जगतो वद रक्षकः स्यात् सा त्वां विहाय गणयत्यपरं कुतो वा।
सर्वं विहाय चरणं शरणं तवैव प्रीतो महेश भव भूतलरक्षणाय॥६॥

(३.४.२०२०)

दिव्या करोना

-डॉ. निरंजन मिश्रः

न श्रूयते श्रवणरन्ध्रविभेदिनादो
नो वाऽम्बरे सरति तीक्ष्णविषाक्तधूमः।
कोलाहलस्य विषयो नहि लोकमार्गे
पश्याद्य किं प्रकुरुते भुवने करोना॥१॥

पश्याद्य मुग्धपशवो विपिनं विहाय
स्वैरं भ्रमन्ति नगरस्थितराजमार्गे।
गेहे निबद्धमनुजानवलोकयन्तः
पृच्छन्ति बन्धनमिदं रुचिरं न वेति॥२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ये जन्मभूमिमपहाय गता विदेशं
तेषां प्रवासरुचिता क्व गता न जाने।
सर्वे स्मरन्ति जननीमथ जन्मभूमिं
दिव्यार्थशिक्षणरता कुशला करोना॥३॥

रुद्धापगावदनलुञ्चनवीरवृत्ति-
र्नौ वाधुना चलति शैलविदारियन्त्रम्।
वातोऽपि वाति मकरन्दसुधारसज्ञः
सर्वं क्षणे कृतवती विमला करोना॥४॥

यद्बोधने न सफला श्रुतिसारविज्ञा
तद्बोधने फलवती सहसा करोना।
स्नेहो न यत्र सफलो भवतीह तत्र
भीतिस्सदैव सफला भवतीति शिक्षा॥५॥

(३.४.२०२०)

त्वं कथं शिवगामिनी

-डॉ. निरंजन मिश्रः

देवी त्वमेव भवभीतिमये करोने
त्वत्कीर्तिकीर्तनकलानिपुणा धरेयम्।
केयं गुणावगुणयोस्सहचारिता वा
लोका द्वयोरपि पदं प्रणमन्ति भक्त्या॥१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चित्ते न यस्य विशतीह निवेदनं सः
स्वान्ते निवेशयति दण्डगुणं सदैव।
यां शारदाद्य नहि साधयितुं समर्था
तत्साधनाय सफलो ननु दण्ड एव॥२॥

स्थैर्यं न येन मनसापि विचिन्तितं सः
शेते सुखेन शयने स्वगृहे स्ववृत्त्या।
या संस्कृतिः प्रतिपदं खलु दूषितं यै-
स्तैरेव सा प्रणमितेति न किं विचित्रम्॥३॥

ये यद्विनिन्दनबलेन हि जीवितास्ते
तत्पद्धतौ विचरणेन सुखं भजन्ते।
विश्वं कुटुम्बमिव रक्षितुमुद्यतास्ते
ये स्वार्थबन्धनगुणं न परित्यजन्ति॥४॥

ये भौतिकाननविचुम्बनधर्मधीरा-
स्ते चाप्यलौकिकलाकलने सुधीराः।
सर्वं त्वदीयकृपयेति विचिन्त्य मूर्ध्ना
भूयः प्रणम्य किमपीह निवेदयामः॥५॥

दैत्यान्निहन्ति समरे खलु या पराम्बा
देवान् रिरक्षिषति सा कृपया सदैव।
या वै द्वयोर्हननकर्मणि सम्प्रवृत्ता
सा त्वं भविष्यसि कथं शिवगामिनीव॥६॥

(३.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

करोनाषट्कम्

–रचयिता : जि.एस्. श्रीनिवासमूर्तिः
murthygss@gmail.com

मङ्गलग्रहयाननिरतश्चाणुशक्त्या दहति देशान्
गणकयन्त्रे कृतकबुद्धिं न्यस्य शङ्खं धमति नित्यम्।
भूतिमानपि शक्तिमानपि सर्वविद्यासागरोऽप्यह
किङ्करो ना वै रसानाम् किं करोनावैरसानाम्।१॥

यावदेति न भुवोऽयमासुरोऽपूर्वभीकरगदोऽत्र कोविदः।
तावदुल्बणमनोजबाधितां प्रार्थये नतशिराः न मां स्पृश॥२॥

इत्थमश्रुपतनैस्तिरोहिते भाषिते मदनपीडिते प्रिये।
किं किमापतितमित्यथाऽनयोः काव्यकोविदगिरामगोचरम्॥३॥

यदि करोनगदान्तकमञ्जसा प्रिय करोषि बहिर्न धरातलात्।
इति विवक्षितमत्र नु विस्मृतं वदति मां स्पृश मां स्पृश मां स्पृश॥४॥

तदाभूत् पूर्वाह्णे जननिबिडपार्श्वो नृपपथः
चतुश्चक्रैर्व्याप्तः सततघनघंटारवकरैः।
इदानीं सुप्तः किं नहि भयजमूर्छाप्रतिहतः
करोनाभीतोऽर्कातपजितनिशीथभ्रमकरः॥५॥

शार्वर्याह्णे वत्सरेऽस्मिन् नवीने विज्ञैर्दक्षः सृज्यतां स्वास्थ्यदाता।
कोविद्रोगस्यागदो येन भीते लोके स्यातां शान्तिहर्षौ चिराय॥६॥

(२२.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोने!तव कारणात्प्रियतमादूरङ्गतोऽयं शशी

-डॉ. शशिकांत तिवारी 'शशिधरः'
छपरा, बिहारः, दूरभाष-०९८८९१२३१२४

कान्ताया विरहाग्निदग्धहृदयोऽशान्तोऽसुखी विह्वलः
तस्याः प्रेमपिपासितेन मनसा विक्षिप्तचित्तोऽभवत्।
जातो दुःखविशेषसिन्धुपतितो जाताऽधुना दुर्गतिः
कोरोने! तव कारणात्प्रियतमादूरङ्गतोऽयं शशी।।१।।

जातो भोजनपानगानरहितो जातोऽधुना दुर्बलो
जातो लेखनपाठनादिविरतो यातोऽधुना मूकताम्।
जातश्शक्तिविहीनसत्तनुरहो जाताऽधुना दुर्गतिः
कोरोने! तव कारणात्प्रियतमादूरङ्गतोऽयं शशी।।२।।

दूरस्थोऽपि जनो गतो निजगृहं कान्तासमीपं तथा
प्रेमालापरतस्सुखेन भरितश्चानन्दयुक्तोऽभवत्।
भार्याङ्कप्रतः परं बहिरहं जातोऽधुना दुर्गतिः
कोरोने! तव कारणात्प्रियतमादूरङ्गतोऽयं शशी।।३।।

नित्यं मन्दमथ प्रगल्भचलनन्दिव्यं कटाक्षं सखे
तद्वार्तां नितरां स्मरामि मनसा व्यग्रत्वमाप्तोऽधुना।
स्मृत्वा देहसुगन्धितां विरहतो जाताऽधुना दुर्गतिः
कोरोने! तव कारणात्प्रियतमादूरङ्गतोऽयं शशी।।४।।

दृष्ट्वा दैन्यदशां दयाङ्कुरु सखे! गच्छाधुना भारताद्
यस्माद्यानमहो चलेज्जनगणो गेहाद्बहिर्निस्सरेत्।
श्रान्तत्वञ्च गतः प्ररोदनरतो जाताऽधुना दुर्गतिः
कोरोने! तव कारणात्प्रियतमादूरङ्गतोऽयं शशी।।५।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नो जानासि मदीयदुःखनिकरान्कान्तो न ते वर्तते
कुर्यात्स्नेहभरैर्वचोभिरिह यश्चित्तस्य सञ्चोरणम्।
नूनं त्वं कुरु पश्य पीडनमहो जाताऽधुना दुर्गतिः
कोरोने! तव कारणात्प्रियतमादूरङ्गतोऽयं शशी॥६॥

कष्टन्नैव ममेह केवलमिदं जातञ्जगद्दुःखितं
कश्चिद्रोगजराविपत्तिभरितः कश्चित्क्षुधापीडितः।
तस्माद्याहि निवेदनं हृदयतो जाताऽधुना दुर्गतिः
कोरोने! तव कारणात्प्रियतमादूरङ्गतोऽयं शशी॥७॥

हे हेरम्ब! महेश! विष्णुभगवन्! हे राम! कृष्णप्रभो!
हे दुर्गे! सुभवानि! वाणि! हनुमन्! हे सूर्य! चन्द्र! ग्रहाः!
शीघ्रं नाशय कष्टकारणमहो जाताऽधुना दुर्गतिः
कोरोने तव कारणात्प्रियतमादूरङ्गतोऽयं शशी॥८॥

गच्छ गच्छ करोने! त्वं गच्छ शीघ्रञ्च भारताद्।
येन सर्वे प्रसन्नास्स्युः प्रेमिकादत्तमानसाः॥

(३०.३.२०२०)

कोरोना विषाणुर्वा जैविकं शस्त्रं वा

-डॉ. शशिकांत तिवारी 'शशिधरः'

चीनेऽभवज्जनिरहो नगरे वुहाने
तस्माद्बहिश्च गतवान्खलु नो विषाणुः।
भूमौ परं प्रसरितं वदतीह चित्तं
शस्त्रञ्च जैविकमिदं ह्यथवा विषाणुः॥१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

युद्धं तृतीयमिदमस्ति च येन विश्वं
त्रस्तं सुपीडितमहो गृहवासलग्नम्।
जातञ्जनप्रमरणं वदतीह चित्तं
शस्त्रञ्च जैविकमिदं ह्यथवा विषाणुः॥२॥

देशद्वयस्य रिपुताफलमत्र भुङ्क्ते
सर्वञ्जगत्प्रियमिदं ननु दोषमुक्तम्।
श्लाघ्यन्न कार्यमखिलं वदतीह चित्तं
शस्त्रञ्च जैविकमिदं ह्यथवा विषाणुः॥३॥

सम्भूय सर्वमनुजैर्ननु दण्डनीयः
कृत्यं कृतञ्च स जनो ननु येन दुष्टम्।
ध्वस्तीकृतञ्जगदिदं वदतीह चित्तं
शस्त्रञ्च जैविकमिदं ह्यथवा विषाणुः॥४॥

जातस्सखे! च मनुजो बहु राक्षसोऽद्य
दुष्टोऽभिमाननिरतः खलपापदक्षः।
नीचप्रधूर्तदनुजो वदतीह चित्तं
शस्त्रञ्च जैविकमिदं ह्यथवा विषाणुः॥५॥

कश्चिच्छृगालनिकरो नहि पारयेत्सः
व्याघ्रेण सार्द्धमिह युद्धमहो प्रकर्तुम्।
तस्माच्छलं प्रकुरुते वदतीह चित्तं
शस्त्रञ्च जैविकमिदं ह्यथवा विषाणुः॥६॥

लघ्वी च नास्ति घटनेयमहो जगत्यां
सञ्चिन्तनीयमधुनैव समस्तदेशैः।
निर्मीयतां प्रनियमो वदतीह चित्तं
शस्त्रञ्च जैविकमिदं ह्यथवा विषाणुः॥७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अग्रे भवेन्न घटना शशिकान्तवार्ता
सच्छ्रूयतां स्वमनसा मम मित्रवर्यैः।
संरक्ष्यतां जगदिदं वदतीह चित्तं
शस्त्रञ्च जैविकमिदं ह्यथवा विषाणुः॥८॥

चिन्त्यतां चिन्त्यतां सर्वैरेकदा हृदयेन सा।
वार्ता सम्प्रोच्यते मित्र! शशिकान्तेन या मया॥

(२९.३.२०२०)

कोरोना-कविसम्वादः

-डॉ. शशिकांत तिवारी 'शशिधरः'

कविः-(जिज्ञासा)

कोऽसि त्वं किञ्च ते नाम कार्यं किं वर्तसे तव।
केनायातः कथं कस्मिन्वासो वै वर्तते वद॥

कोरोनाविषाणुः-(समाधानम्)

चीनदेशात्समागत्य सर्वत्र प्रसृतं मया।
"कोरोना" वर्तते नाम प्रकृतेः कोपरूपकः॥१॥

पीडनं मारणं कार्यं मानवानां प्रबोधनम्।
प्रकृतेश्च विरुद्धन्ते न गच्छेयुः कदाप्यहो॥२॥

मांसे वासो मदीयश्च सुरायां दुष्टकर्मणि।
नौषधं विद्यते भूमौ मदीयं जानते समे॥३॥

प्रकृत्या दीयते नित्यं चान्नं पुष्पं जलं फलम्।
भक्ष्यतां पीयतां शान्त्या स्थीयतां स्थाप्यतां समैः॥४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मन्यतां नैव देवं स्वं बलिनं गुणिनं तथा।
क्षणे कस्मिन्कदा किं स्यान्नैव केचिद्विजानते॥५॥

प्रकृतेः क्रियमाणं वै कार्यं सर्वं सुनिश्चितम्।
प्रकृतेरनुकूलं वै जगच्चलतु नित्यशः॥६॥

धन्यो मोदी त्वदीयोऽसौ तपस्वी भारते बुधः।
यं दृष्ट्वा श्रान्ततां यातः करोनाख्यविषाण्वहम्॥७॥

(२७.३.२०२०)

कोरोणाऽऽवलिः!

-डॉ. चन्द्रगुप्त वर्णेकरः

विषाणु-तरणोपायो विचित्रः 'कर्फ्यु'-नामकः।
बहिश्चरास्तु रुग्णाः स्युर्गृहबद्धा निरामयाः॥१॥
घण्टाश्च तालिकाः शङ्खान् पणवानकगोमुखान्।
नादयन्तु विषाणूनां विनाशाय प्रजाजनाः॥२॥

(२२.३.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दम्पत्योः संवादः

-डॉ. अरविन्दकुमारतिवारी
परिकल्पकः
अरमवाणीकविपरिषदः

दूरं याहि मनोरमे किमिति हे स्वामिन् भयाद् भाषसे
मुह्यन्तीमवलोक्य सारयसि मां हृद्हारिणीं गेहिनीम्?।
वैद्यैश्चुम्बनमस्ति सुन्दरि रमे घुष्टं निषिद्धं द्रुतं
कोरोना विचरत्यतो न कुरुते कश्चित् समालिङ्गनम्॥१॥

आस्ये कर्पटकं कुरुष्व सदने तिष्ठेर्गृहे नापणं
गच्छेः रक्ष सुतं प्रबोधय जनान् रक्षाविधिं सत्वरम्।
हित्वा प्रेमरसायनं चर निजं धर्मं निहन्तुं शुभे
कोरोनां जनतापदां दनुसुतां चीनोद्भवां मारिणीम्॥२॥

नो हस्तं स्पृश कस्यचित् सुवदने नासापुटं नेत्रकं
नैवास्यं वद सादरं सविनयं सर्वान् नमस्ते वचः।
स्वस्था स्थास्यसि तत्परं तव पतिर्वैद्यः प्रभाषेऽधुना
कोरोनां कुरु कामिनि द्रुतमितो दूरं प्रिये कामये॥३॥

स्वच्छं गेहमिमं विधाय सरसं भोज्यं प्रदायाचिरं
सम्पश्यादिनमेव वृत्तमखिलं भीतिप्रदं सार्थकम्।
नित्यं हन्त च दूरदर्शनसृतं लोकायसौख्यप्रदं
कोरोनागमनं दुनोति सहसा भार्ये समस्तां भुवम्॥४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सन्देशं प्रददाति यन्त्रमधुना फोनं मदीयं तव
पूर्वं कासत एव हन्त वचनात् लोकाय संश्रूयते।
शाकाहारबलं विबोध्य जनतां सम्प्रेर्य मद्गेहिनि
कोरोनां कुरु चीनदेशतरुणीं शीघ्रं प्रिये निर्बलाम्॥५॥

(१५.३.२०२०)

अरविन्दविरचितं कोरोनादण्डकम्

-डॉ. अरविन्द तिवारी

विश्वं समस्तं स्वमुखे ग्रसन्ती दैत्यात्मजेयं सुरसा सरन्ती।
विनाशयन्तीव जगद्विलासं दण्ड्या करोना कविदण्डकेन॥

विचरति भुवि चीनजाऽमेरिकास्पेनजापानभूमिङ्गता सर्वदेशस्तुतासंस्कृता दानवी सर्पिणी

विततविपदि मुक्तकेशी वियत्तुल्यदीर्घानना बाहुपाशेन कर्षन्त्यहो लङ्क्निी मानिनी दारिणी

प्रहरति किल हन्त रक्षोभवा कोरियाऽस्ट्रेलियापाकनेपालमार्गाश्रितेयं करोनाऽधुना गर्विणी

सरणकुशलवैद्यवैज्ञानिकज्ञानसम्मोहिनी तन्त्रमन्त्रप्रभाहारिणी शोकसन्ताप-सन्दायिनी॥१॥

निखिलमनुजवित्तकोषादिहर्त्री धरित्रीविपज्जालदात्री वियद्वर्तिनी प्राणसंशोषिणी धर्षिणी

दशति पृथुलकण्टकीर्णा स्पृशत्पाणिसंस्पर्शमात्रोद्भवा कोपना शोकदा पक्वशस्यान्नसञ्ज्वालिनी

अतुलविपदि शोकदात्री जगन्नाशयित्री प्रजापीडयित्री चरल्लोकदुः खादिसंवर्द्धयित्री सृता

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रकृतिविकृतिरेव नेत्रास्यनासाप्रिया फेनिलाक्षालनीया विशालासुरीयं करोनाऽधुनाशान्तिदा॥२॥

हरति सपदि रक्तबीजात्मजा कालसम्प्रेरिताऽदृश्यशक्तिं-श्रिताऽशोभना नाशमेघावृता दुर्भगा

प्रसृतभुवनमारणायोद्यता कालपाशास्त्रपाणिर्विपद्दायिनी शान्तिसौख्याशिनी साध्वसाध्वास्थिता

किमु भुवि यमदौत्यकार्ये नियुक्ता विधेः कल्पिता काचिदेषा पिशाचप्रिया रक्तसंशोषिणी पूतना

त्रिभुवनजयलाभलोभेन मन्ये नवा सृष्टिरेवाद्य लोकं दुराचारमग्नं समालोक्य किं चागता॥३॥

खगमृगकुलघातयित्रीं प्रवृत्तिं समस्तेऽपि लोके विभाव्याहता रोषरक्तानना काचिदेषा नटी

हरिततरुविनाशरुष्टा सरःकूपगङ्गापमानेन दग्धा प्रजानाशिनी दामिनी देवमुक्ताथवा

अधममनुजलक्षकर्माणि संवीक्ष्य संशिक्षयन्ती विधिं जीवनस्य प्रभो हन्त काप्यप्रियाविष्कृतिः

प्रथयति भुवि रोगजालं बलं दर्शयन्ती नूरक्तप्रिया दीर्घकालात्करोनाधुना दिव्यशक्तिश्चला॥४॥

अनुदिनमिह दृश्यते मृत्युवृद्धिस्स्वदेशे च देशान्तरे दूयते हन्त सम्प्रेक्ष्य सर्वो जनः कालजे!

प्रतिदिनमयि वर्द्धते शोकरावश्च हृद्दारको वृत्तपत्रे चलच्चित्रके दृश्यवृत्तेष्वहो संसृते!

निजनिजगृहबद्धलोकश्चिरात् खिद्यते दूरगो दूरदेशस्थितो मारितः पीड्यमानोऽधुना विश्रुते!

अपहृतजनबुद्धिकोषे प्रयाहि द्रुतं भारताल्लोकतो मन्त्रये प्रार्थये रे करोनेऽशुभे पाहि नः॥५॥

(१४/०४/२०२०; प्रातः ०८ वादने)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रयाहीतो निजं चीनम्

-डॉ. अरविन्दकुमारतिवारी

करोने! पूतने! सुरसे! प्रयाहीतो निजं चीनम्।
निरीहान् हन्सि निर्दोषान् प्रयाहीतो निजं चीनम्॥१॥

मदीयं भारतं नो पश्य दनुजे चीनजे दूरात्।
समाकर्षन्त्यये विततिं प्रयाहीतो निजं चीनम्॥२॥

नमस्तेवादिनो देशे प्रमोदन्ते नराः शिष्टाः।
अये विषकन्यके शीघ्रं प्रयाहीतो निजं चीनम्॥३॥

मुखं नासापुटं करपट्टिकाभिश्छादयित्वैते।
वयं नन्दाम इह सुखिनः प्रयाहीतो निजं चीनम्॥४॥

करौ प्रक्षाल्य भोज्यं सादरं चाद्मो वयं नित्यम्।
अये कीटाणुजे क्रूरे प्रयाहीतो निजं चीनम्॥५॥

न परकन्यां वयं भीष्मादयो लोकामहे लोके।
सलज्जे दुत्कृते दुष्टे प्रयाहीतो निजं चीनम्॥६॥

पतञ्जलियोगविद्यारक्षिते राष्ट्रे न ते वासः।
ब्रवीत्यरविन्दबालोऽयं प्रयाहीतो निजं चीनम्॥७॥

(१६.३.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

को वेत्ति कस्य हृदये रमते करोना?

-डॉ. अरविन्दकुमारतिवारी

दृष्ट्वा दशामपि समस्तभुवः स्वदेशे
ये केचिदद्य विचरन्ति विवेकहीनाः।
नूनं यमस्य सदनं किल गन्तुकामा
दण्ड्या विदेशवसुधाप्रियमानसास्ते॥१॥

एकान्तवासमधुना सुखकारिणं भो
मत्वा गृहे वस सखे न तु याहि हट्टम्।
गोष्ठीं त्यजेः भज हरिं मुनितां दधानः
शीघ्रं गमिष्यति ततो दनुजा करोना॥२॥

गोष्ठ्युत्सवादिषु गतिर्न भवेदिदानीं
विद्वत्सभादिषु भवेन्न रतिस्तु मानिन्।
मौनी जनश्च विलसेद्भवने यतिर्वा
को वेत्ति कस्य हृदये रमते करोना॥३॥

नो मन्दिरं न च नदीं विपिनं भ्रमार्थं
गन्तुं विचिन्तय सखे निजजीवनाय।
भूत्वा यमस्य गृहिणी कुपिता करोना
हा हन्त हन्ति विधिनारचिता धृतासिः॥४॥

त्यक्त्वा स्वदेशमहहा धनमाप्तुकामाः
सौख्याभिलाषिमनुजा भ्रमितुं विदेशम्।
यान्त्यानयन्ति मृतिदामिह हा करोनां
हेया विदेशवसुधा वचनं नु सत्यम्॥५॥

(२०.३.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भवानीसंस्तवः

-डॉ. अरविन्दकुमारतिवारी
(प्रधानसम्पादकः)
काव्यामृतवर्षिणी, बागपतम्

वयं गेहे बद्धा गणपतिनुते मातरधुना
स्मरामस्त्वां भक्त्या कुसुमनिचयो नैव सदने।
फलं मिष्टान्नं वा न हि नवपटं तेऽर्चनविधौ
विषाणुर्वर्षेऽस्मिन् भ्रमति भुवि संरक्ष भुवनम्॥१॥

भयं हा वृद्धानां सपदि हृदये वर्द्धत इव
भ्रमार्थं ते दूनाः सदनवशगाः खिन्नमनसः।
महाकालं काले विततविपदं वीक्ष्य सुजना
जपन्त्येते व्यग्रा अव सपदि विश्वं समयतः॥२॥

म्रियन्ते लोकेऽस्मिन् बहव इह हा कीटकसमाः
करोनाकोपैर्हा किमु वदसि नो देवि सदये।
विषाणोः संहन्त्रि प्रथितचरिते शम्भुदयिते
सुताक्रन्दं श्रुत्वा विरमति न माता विलपनम्॥३॥

करोनां वा हन्तुं विकलजनता त्वां स्मरति हा
रमाकान्तः शुक्लः पठति शमनार्थं कविवरः।
स्तवं ते हे मातर्लिखति शतकं श्रीकविवरोऽ-
भिराजो राजेन्द्रस्तदपि दयसे किन्न विपदि॥४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

क्वचिन्मन्त्रो भक्तैः क्वचिदपि च ते संस्तुतिततिः
क्वचिद् ग्राम्यैर्गीतैर्भवति तव चार्चा परमये।
प्रसुप्ते पुत्राणां हरसि न कलौ दुःखमचिरं
करोनाजातं हे जननि जनरक्षार्द्रहृदये॥५॥

जना मार्गे रुद्धाः क्वचिदयि शतं यान्ति दिवसं
विना यानं क्षुब्धा निजनिजगृहं शोकभरिताः।
रुदल्लोकं दृष्ट्वा नयनयुगलं नो निमिषसि
कलौ किं रुष्टा त्वं दनुजतनयानां कुचरणात्॥६॥

महान् मोदी मन्त्री शमयति परं केचन जना
विनेतारो व्यर्थं निदधति पदं वामदलगाः।
करोनां मन्यन्ते नहि विपदि संदग्धमतयः
विपत्तौ मूढानां भवति सुमतिः किं कलुषिता?७॥

कवीन्द्रा ये वृद्धा मम नयनयोस्तानव मुदा
करोनारोगेभ्यः कवनकुशलान् मानितपदान्।
विषण्णान् वा गेहे प्रसृतचरणे शुद्धहृदयान्
शिशून् प्रौढान् सर्वानव सविनयं कामय इतः॥८॥

अरविन्दकृतो भक्त्या महारोगविनाशकः।
भवान्यास्संस्तवो भूयात्सर्वकल्याणहेतवे॥९॥

(२६.३.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कॅरोना-गलज्जलिके

-डॉ. राम विनय सिंहः
देहरादूनम्

(१)

परीक्षा जीवनस्यैषाऽवलोक्या।
युगान्धैर्वादिता वाद्याऽवलोक्या।।

भिया शीताग्निना रचिता हिमानी।
विलोचनवारिजाततृषाऽवलोक्या।।

सखे! सम्मूर्च्छितानि सुमानि नूनं।
ऋतूनां मौनमञ्जूषाऽवलोक्या।।

दृषद्रत्नायते लोके भृशं भोः।
मणिः काचायिता दिव्याऽवलोक्या।।

स्वगेहे देवता अपि निस्सहायाः।
"करोना" पिशाची प्रबलाऽवलोक्या।।

क्व यास्यति वा कदा यास्यति न जाने।
प्रवृत्तिर्मानुषी गरलाऽवलोक्या।।

व्रणा राष्ट्रस्य सन्त्येते स्रवन्तः।
चिकित्सा कीदृशी भविताऽवलोक्या।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(२)

करिष्यति किं न जाने राक्षसीयं विप्लवं बन्धो!
हरिष्यति कियत्कालमकारणं नरजीवनं बन्धो!!

करोनेत्याख्यया ख्याता भिया हा भाययन्ती नो
मरिष्यति केन विधिना चिन्त्यते सर्वैरियं बन्धो!

अहो चीनागता भ्रमणोत्सुका विस्मृतपथैवैषा
बलाल्लोकात्सकृत्क्षेप्यास्ति किल लोकोत्तरं बन्धो!

सदाऽदूरीकरोत्यस्मत्सरागस्नेहसम्बन्धः
सदा दूरीकरोति परस्परं सुजनानियं बन्धो!

विधर्मेयं गलितविपरीतबुद्ध्या हन्ति सद्बुद्धान्
अबोधान् बालकान् हत्वा मुदा रमते परं बन्धो!

पिशाची पापजतुकानिस्सृता मत्तेव विचरन्ती
धरायामविरलं कुरुतेऽगणितमिह मारणं बन्धो!

इयं नैकेषु देशेषु भ्रमन्ती मृत्युलीलाभिः
मुहुर्विदधाति नयनासारधारातर्पणं बन्धो!

क्व यातास्ते विपदि देवा अनाथा इव विहायास्मान्
सपदि रक्षायै याचन्तेऽद्य भक्तास्ते भृशं बन्धो!

सविनयं प्रार्थये सर्वानहं विपरीतकालेऽस्मिन्
स्वकीयैर्धैर्यबुद्धिबलैरवतु निजभारतं बन्धो!

(२३.३.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

करोणामवश्यं जयेद्भारतम्

-रमाकान्त शुक्लः
sarvashukla@gmail.com

पीत्वा विषं समुद्रोत्थं जगत्त्रयभयङ्करम्।
योऽदादभीतिं सर्वेभ्यश्चन्द्रमौलिं नमानि तम्॥

दैवचोदितचीनेन जतुकारक्तजन्मनः।
विषाणोः प्रसृतिं कृत्वा विश्वमातङ्कितं ह हा॥

कदम्बकुसुमाकृतिः कपटचिंतनोदभावितो
ब्रिटेनमिटलीमथोऽनिशममेरिकां भाययन्।
अतर्कितचिकित्सितः सकलविश्वभीतिप्रदः
विषाणुरति जृम्भते ह्यकरुणः करोणाभिधः॥

फ्रांसे स्पेने चेटलीरानयोऽथो पाकिस्ताने भारते चीनदेशे।
मृत्युं श्लिष्टा लक्षशो मानवा हा कोरोणायास्ताण्डवं वीक्ष्य विश्वे॥

नास्ते यस्याभिधानं न च किमपि पुना रूपमारोग्यशान्तेः
नास्ते निर्धारितं चौषधमपि लिखितं यस्य शास्त्रेषु किञ्चित्।
यस्यास्ते नापि सूची न च किल वटिका कापि निर्धारितास्ते
कोरोणाख्यो विषाणुः प्रसरति भयदो हन्त! सम्पूर्णविश्वे॥

संयमेनाथ संकल्पशक्त्या तथा
स्वच्छतारक्षणेनाथ गेहस्थितेः।
सावधानं यदास्तेऽनुशास्तृ स्वयं
तत्करोणामवश्यं जयेद्भारतम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

घण्टिकास्थालिकातालिकावादनै-
र्दीपकज्वालनैरेकतां दर्शयत्।
दूरवृत्तिं च यत् पालयन्निर्भयं
तत्करोणामवश्यं जयेद्भारतम्॥

वैदिकान्यासते यानि मूल्यानि न-
स्तानि सेव्यानि सर्वाणि सवैर्जनैः।
स्वास्थ्यरक्षार्थमस्माभिराचर्यतां
जेष्यतीमां करोणां ध्रुवं भारतम्॥

भूमिभारो यदाधिक्यभावं व्रजेत्
स्यात्प्रकृत्याः प्रकोपः प्रवृद्धस्तदा।
भूमिमातुः सपर्यां कुरुध्वं समे
शान्तिमायास्यतीयं करोणा ध्रुवम्॥

(२४.३.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोनाष्टकम्

–डॉ. श्रेयांशद्विवेदी
कुलपतिः–महर्षि वाल्मीकि संस्कृत विश्वविद्यालयः मौनधारा (मूंदड़ी), कपिष्ठलम् (कैथल)-१३६०२७, हरियाणा सरकार
मो.नं.: +९१९७१७३९९१६९

कोरोना देशमागत्य, क्रूरकर्मा कुमार्गगः।
विषाणुर्मानवान्नित्यं, रोगग्रस्तं करोति नः॥

करोना कुरूपो विरूपोऽविवेकी
सदा स्पर्शतो याति वेगेन धूर्तः।
यदा पञ्च षड् वा जनाः सम्मिलन्ति
तदा शक्तिसम्पन्नतां याति रोगः॥१॥

स्वदेशाद् बहिः प्रेषयामः कदाचित्
समागत्य नूनं जनान् कष्टकारी।
भयाक्रान्तरूपेण नित्यं विषाणुः
करिष्यत्ययं स्वास्थ्यहानिं जनानाम्॥२॥

वुहानप्रदेशे विषाणुर्निकृष्टः
समुद्भूय वंशावलिं वर्धमानः।
चतुर्धा च अल्फा च बीटा च गामा
विशिष्टो हि डेल्टा विनाशाय सिद्धः॥३॥

उपायं हि कुर्मः नवाहेषु सिद्धाः
सदाभीष्टदं देवदेवं स्मरामः।
तथा कालिकां मातरं दिव्यरूपां
निशुम्भं च शुम्भं सदा तर्जयन्तीम्॥४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नमस्ते विधानं प्रधानं प्रकल्पम्
करौ सम्पुटीकृत्य देशेऽस्मदीये।
समादाय नित्यं सदा ह्यङ्गवस्त्रम्
प्रभुं संस्मरन्तः प्रसन्नाः तदासन्॥५॥

गृहे साम्प्रतं पठ्यतां लिख्यतां वा
ऋषीणां चतुर्मासिकं संस्मरन्तु।
व्रतं पाल्यते श्रद्धया वर्षमध्ये
वयं भारतीयाः कथन्नाचरामः॥६॥

व्रतं मासिकं सर्वकारीयमेतत्
विरामः स्वगेहे तपः सारभूतम्।
यदि श्रद्धया पालनं नः प्रकुर्मः
फलं श्रूयतां लोककल्याणकारी॥७॥

न दैन्यं न रोगो न बन्धो न दुःखम्
धनं धान्यवृद्धिः सदा ज्ञानवृद्धिः।
स्वदेशः सदा श्रेष्ठतां प्राप्य बन्धो
विरामेन स्वस्थो भवेन्नः समाजः॥८॥

कोरोनाष्टकमित्येतद्, विषाणुर्नाशकं सदा।
पठनीयं प्रयत्नेन, श्रेयांशेन विनिर्मितम्॥

(७.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोना किं करिष्यति?

–डॉ. अम्बालाल प्रजापतिः

न हि तिष्ठति रात्रिर्वै सूर्यप्रकाशने सदा।
प्रसरति शुभालोको नूतनो जगति तथा॥१॥

दीपकानां महत् तेजस्तमोनाशं करिष्यति।
पलायिष्यति कोराना तथैव नात्र तिष्ठति॥२॥

संघटिता वयं ह्यत्र विजयश्च भविष्यति।
अमृतस्य वयं पुत्राः कोरोना किं करिष्यति॥३॥

बाणः पतति रामस्य शत्रुनाशः भविष्यति।
प्रज्ज्वलिते च दीपेऽत्र पतंगः किं करिष्यति॥४॥

(७.४.२०२०)

कोरोनानिरोधकाव्यम्

-प्रो. डॉ. अम्बालाल प्रजापतिः

न भेतव्यं न भेतव्यं कोरोनाच्च महासुरात्।
निरोधस्तस्य कर्तव्यो यज्ञद्रव्यैर्विनाशकैः॥१॥

हस्तप्रक्षालनं कार्यं होतृभिश्च पुनः पुनः।
मद्यात्मकेन हव्येन यज्ञो भवतु निष्किटः॥२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कासशीतज्वरैर्युक्तो नरो रोगातुरो यदि।
शीघ्रं कुर्याच्च संपर्कं सुवैद्यऋत्विजैः सह॥३॥

प्रसरति च कोरोना जनहस्तस्पर्शेन वै।
स्वागतं तेन सर्वेषां कुर्यादंजलिना सदा॥४॥

संकल्पसंयमौ ध्येयौ दूतौ संप्रेषितौ भुवि।
कोरोनानाशकौ लोके देशप्रधानमंत्रिणा॥५॥

॥ इति शिवम् ॥

संचलनम्

-डॉ. अरविन्दकुमारतिवारी
बागपतम्
arvind490@gmail.com

संसारे निखिले विषाणुजनितं रोगं निहन्तुं बुधाः
वैद्या योगिमहर्षिसिद्धसुजना आरक्षिणः शासकाः।
लग्ना ये धनदा विपत्तिसमये मानाय तेषामयं
दृश्ये संस्कृतभारताख्यपटले काव्योत्सवो योजितः॥१॥

एतस्मिन् मुनियुग्मखाक्षिगणिते संवत्सरे सादरं
वैशाखे मधुमासि शुक्रदिवसे कृष्णे तृतीयातिथौ।
पेयं काव्यसुधौषधं सुकवयः श्रोतार एतत्प्रियं
पीयन्तां वदनारविन्दरचितं लॉक्डाउने निर्भयम्॥२॥

(१०.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रुत्वा भारतमातुरार्तवचनम्

-डॉ. कमलापाण्डेयः
दूरवाणी, ९८८९७०७९२५, ९१४०१८७२३३,
कबीर नगर कालोनी, दुर्गाकुण्ड-वाराणसी-२२१००५

श्रुत्वा भारतमातुरार्तवचनं सौख्यं त्यजन्तः स्वकं,
धृत्वा यन्त्रचयं करेषु परितो दृश्याः चिकित्सापराः।
स्वच्छीकर्तुमहर्निशं सुनियताः कृच्छ्रव्रताचारिणः,
सेवाधर्मपरायणान् सुकृतिनो वन्दामहे तानहो॥१॥

श्रुत्वा भारतमातुरार्तवचनं सीमान्तभागं गताः,
धृत्वा शस्त्रचयं सदा प्रहरिणो राष्ट्रस्य संरक्षकाः।
विस्मृत्य स्वसुतं प्रियां परिजनान् त्यक्तुं वपूंष्युद्यताः,
शूराः सैन्यबलञ्च केन वचसा वन्दामहे तानहो॥२॥

श्रुत्वा भारतमातुरार्तवचनं स्थैर्यं विहायाऽचिरं,
रक्षायै परितः पथि भ्रमणशीलाः भटा उद्भटाः।
सोढुं साहसिनः कदर्यजनितां तां थूत्कृतिं दुष्कृतिम्
तानारक्षिबलान् कृतज्ञहृदया वन्दामहे सादरम्॥३॥

श्रुत्वा भारतमातुरार्तवचनं वार्ताहरा बान्धवाः,
धृत्वा लेखनचातुरीं समुचितं नीत्वा वचःकौशलम्।
नित्यं नूतन-भङ्गभूरिभरितं वृत्तं नयन्तः स्थिताः,
तान् सञ्चारपरायणानपि वयं वन्दामहे सादरम्॥४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रुत्वा भारतमातुरार्तवचनं स्वीयाम्बिकाङ्कं त्यजन्,
धृत्वा दण्ड-कमण्डलू यतिवरः काषायचीरावृतः।
जित्वाऽसावशनापिपासनमुभे जागर्ति रात्रिंदिवम्,
आर्तत्राणपरायणो विजयताम् आदित्यनाथः सुधीः॥५॥

श्रुत्वा भारतमातुरार्तवचनं हीराम्बिकाङ्कं त्यजन्,
धृत्वा सूक्ष्ममतिं चिरं पिहितवान् देशं समग्रं निजम्।
नश्येत प्रथितो महामय इति ख्यातुं प्रवृत्तोऽनिशम्,
विश्वत्राणपरायणो विजयताम् अस्मन्नरेन्द्रः कृती॥६॥

(१०.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोना

-डॉ. लक्ष्मीनारायण पाण्डेयः
सी-२९ इन्द्र विहार, एयरपोर्ट रोड, लालघाटी,
भोपाल (म.प्र.) पिन-४६२०३२ मो.-९९२६३३९१५८

नीरं जातं विमलधवलं दूषणं न्यूनमेव,
वायुर्वाति प्रकृतमधुना शुद्धतासत्त्वयुक्तः।
दीप्तं नीलं गगनममलं पर्वताश्चापि रम्याः
कोरोनेयं प्रकृतिमभितः किन्नु शुभ्रीकरोति॥१॥

कृत्या दुष्टा निखिलभुवनं भीषयन्ती विभाति
लोके सर्वे निजगृहगता भीतिभीता भवन्ति।
मृत्योर्नृत्ये जगति सहसा नन्दनं जायते किम्?
मन्ये देवः करुणकृपया लोकलोकं पुनाति॥२॥

मन्दं मन्दं चरति भुवनेऽमूर्तरूपा कराली,
हत्वा प्राणान् हसति विकटा कालरात्रीव घोरा।
छित्त्वा जालं वयमिह यतो व्याधिमुक्ता भवेम
तावच्चैषा प्रकृतिरमला सर्वतः शं तनोतु॥३॥

स्वच्छतादूताः

कश्चित् क्लान्तोऽप्यविरलतया स्वच्छताकर्मलीनो
गेहं त्यक्त्वा नगरमखिलं निर्मलं कर्तुमुत्कः।
भूत्वा नित्यं मलिनवसनश्चानिशं स्वेदसिक्तः
कार्ये धीरं विनयविनतं स्वच्छतादूतमीडे॥४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

देवदूताः

एको वैद्यो जनहितरतश्शान्तचित्तो मनस्वी,
पुत्रं पुत्रीं स्वजनमधुना यश्च हित्वा प्रयाति।
मृत्योः पाशाज्जगति जनतारक्षणे योऽनुरक्तो
धन्यो मान्यः परहितरतो देवदूतः प्रणम्यः॥५॥

रक्षादूताः

धन्यास्ते ये शमनकुशला रक्षणे दत्तचित्ताः
प्रातः सायं नियतविधिना दण्डहस्ता भ्रमन्ति।
आपत्काले स्वहितविरताः सर्वतो गोपयन्ति
रक्षादूतान् मुदितमनसारक्षकांस्तान्नमामः॥६॥

कर्मदूताः

नित्यं देशे विपदि बहवो भ्रातरश्च स्वसारो
लग्नाः सन्ति प्रतिदिनमहो कर्मदूताः परार्थे।
कोरोनाया गरलसमये सेवने रक्षणे च,
सेवाधर्मे परमगहने सम्प्रवृत्तान् नमामः॥७॥

धर्मदूताः

नैके देशे परवशगता लक्षशः सञ्चरन्ति,
मध्येमार्गं विभवविगता दुःखिताः पीडिताश्च।
एतानार्तान् द्रवितहृदया वासभोज्यादिकल्पैः
सेवन्ते ते सततमधुना धर्मदूताः समन्तात्॥८॥

(१०.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दर्शय भगवन् द्वारम्!!!

-डॉ. अरविन्दकुमारतिवारी
बागपतम्
arvint490@gmail.com

विषमे काले कलौ कराले क्षुब्धा प्रकृतिः पूज्या
नीचचीनदौष्कृत्येनैषा नृत्यति नग्ना दृश्या।
कोरोनासंक्रमणैर्नित्यं कुरुते जनसंहारम्
दर्शय भगवन् द्वारम्॥१॥

भूमिं गगनं तोयं वह्निं वायुं जेतुं शक्तः
वैज्ञानिकवर्गः सन्दृष्टः परं करोनातप्तः।
गेहे लीनो विलपति दीनः प्रथते हाहाकारम्
दर्शय भगवन् द्वारम्॥२॥

शतकृतिसम्पादनसंलग्नो वार्तं पृच्छति नायं
स्वजनविरक्तः परजनरक्तो विहरति प्रायश्चायं
कोरोनासम्भीतो मुञ्चति निजयुगनयनविकारम्
दर्शय भगवन् द्वारम्॥३॥

वृक्षपूजकः शिलासमर्चासक्तो भारतदेशः
गङ्गायमुनाकावेरीसरितां संक्षालितवेशः
कोरोनां संरोद्धुं यतते कुर्वन्नयमुपकारम्
दर्शय भगवन् द्वारम्॥४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रामकृष्णसंरक्षितभूमिर्जैनबौद्धबहुमान्या
काशीमथुरायोध्याकाञ्चीतीर्थराजसंस्तुत्या।
सहयोगं कुर्वाणा रागात् हरते मनोविकारम्
दर्शय भगवन् द्वारम्॥५॥

जपति गृहस्थो मानवताया रक्षार्थं हरिनाम
हस्तमेलनं नितरां त्यक्त्वा कुरुते स्वयं प्रणामम्।
मोदिमहोदयवचननन्दितो ब्रूते जयजयकारम्
दर्शय भगवन् द्वारम्॥६॥

बन्धुबान्धवाः कवयः सर्वे राष्ट्ररक्षणं कुर्युः
विश्वबन्धुतां ते रक्षन्तो धरणीं संरक्षेयुः।
कोरोनां संहर्तुं जुह्वतु सदने स्वाहाकारम्
दर्शय भगवन् द्वारम्॥७॥

(१०.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोनोन्मूलनक्रतुः

-डॉ. नवलता
के-६८०, आशियाना कॉलोनी,
कानपुर रोड, लखनऊ

कोरोनोमूलनक्रतोरिह यजमानः श्रीमान्।
विजयतेतरां देशोऽस्माकं युक्तिशक्तिधृतिमान्॥
विजयतेतरां प्रधानमन्त्री युक्तिशक्तिधृतिमान्॥

रक्तबीजसममायारूपोऽनन्तछद्मतनुधारी।
जनयन् भयं समग्रे विश्वे मानवमर्मविदारी॥
महारोगरूपेण विषाणुः कोऽपि पदं धृतवान्॥१॥

चीनं स्पेनं तत इटलीदेशं ध्वंसयंश्च पाकम्।
गर्जन् तर्जन् ततोऽमेरिकादेशं लोकख्यातम्।
भ्रमन्प्रविष्टः शतद्वयमितान्निर्बाधं देशान्॥२॥

अहङ्कारमदमत्तोऽसावज्ञातशक्तिरस्माकम्
दुःसाहसी प्रविष्टो भूयो भारतमपि भूनाकम्॥
पुरस्कृत्य म्लेच्छान् स्वघातिनश्चोत्पातं कृतवान्॥३॥

जानीते नहि, देशोऽस्माकं विलक्षणं भूलोके।
यत्र राजतेऽध्यात्मचेतना संतृप्तिस्तु स्तोके।
यातुधाननाशे खलु यज्ञो मतो यत्र बलवान्॥४॥

यदा प्रवृद्धो जगत्यधर्मो धर्मग्लानिर्जाता।
त्राहि त्राहि प्रवृत्तो लोके तदा मनुजसंत्राता।
मानवरूपधरः प्रकटीभूतः स्वयं भगवान्॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विष्णुरूपराजेति प्रोक्तं शास्त्रतत्त्वमर्मज्ञैः।
निष्कण्टकं विधेयं राज्यं विहितं नीतिविधिज्ञैः।
प्रजारक्षणं ह्येक एव राज्ञो धर्मस्तु महान्॥६॥

रुग्णालयवेदिकासहस्रे दिवानिशं यतमानाः।
होतारो भिषजः परस्परं सर्वान् संजानानाः।
हावं हावं गदातुराणां रक्षन्ति प्राणान्॥७॥

गतप्रमादाः प्रजागरन्तोऽवेक्षन्तेऽसुरराजम्।
अहो यक्षरक्षांसि नियन्तुं चारक्षकाः समाजम्।
उद्गातारः प्रबोधयन्तः प्रीणयन्ति देवान्॥८॥

स्वच्छनिर्मलं विषाणुमुक्तं वातावरणं कर्तुम्।
अध्वर्योऽविकारिणो मौनं सर्वं विषमपहर्तुम्।
प्रक्षालने रता नक्तन्दिवमविगणय्य स्वजनान्॥९॥

यः सहस्रशीर्षा सहस्रमुखनेत्रकरोऽन्तर्यामी।
परमेश्वरः स्वयं ब्रह्मास्य क्रतोरनन्तोऽकामी।
यजमानं प्रेरयति प्रतिक्षणमवेद्योऽपि विद्वान्॥१०॥

एका युक्तिः राष्ट्रियैकता एकैवेच्छाशक्तिः।
एको मन्त्रो गृहेऽवतिष्ठत लक्ष्यं रोगनिवृत्तिः।
इदन्न मम राष्ट्रायेति स्वरसमवायः श्रुतिमान्॥११॥

ओमिति शब्दं प्रणववाचकं भक्त्या समुच्चरन्तः।
पञ्चजना इह स्वाहाकारं क्षणे क्षणे कुर्वन्तः।
अवस्थाय गेहेषु निर्भयं रक्षन्तु प्राणान्॥१२॥

(१०.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोनासंक्रमणम्

-डॉ. राजेन्द्र त्रिपाठी 'रसराजः'
संस्कृत-विभागः
इलाहाबाद डिग्री कॉलेजः, प्रयागराज

कोरोनायाः संक्रमणं निखिललोके समाक्रामति।
महारोगो न जाने कस्य बन्धोः जीवनं दुष्यति॥१॥

विदेशे व्याधिग्रस्ता ये स्वदेशं प्रति समायान्ति।
महामारीं श्रुत्वा चिन्तिताः हा जीवनं नश्यति॥२॥

विषाणुः चीनदेशाद् प्रसृतः सर्वत्र व्याप्तोऽयम्।
निरुपायो दुरासाध्यो जगति जनजीवनं त्रस्यति॥३॥

निरस्ता रेलयात्रायाः टिकट-चारक्षणं गोष्ठी।
गृहे मार्गे च वायुयाने विधेरनुपालनं रक्षति॥४॥

स्वदेशे घोषितः कर्फ्यू स्वजनतायाः रक्षार्थम्।
असाध्यस्योपचारार्थं कुशलमनुशासनं वाञ्छति॥५॥

पिशाचो नास्तिको देशः मनुजमृत्युं वृथा वहते।
विनाशं वैश्विकं दृष्ट्वा सुखदशक्त्या खलो दृप्यति॥६॥

वैश्विकीमापदं हन्तुं वयं सर्वेऽपि संलग्नाः।
महाकालः शिवः शम्भुः समस्तं दुष्कृतं कृन्तति॥७॥

(२३.३.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वैश्विकचिन्तनम्

-डॉ. राजेन्द्र त्रिपाठी 'रसराजः'
संस्कृत-विभागः
इलाहाबाद डिग्री कॉलेजः, प्रयागराज

वैश्विकं स्वास्थ्यसंवर्धनं कामये।
शान्तिसद्भावसौख्यं सदा कामये॥१॥

हिंसकैः कुत्सितैः दुर्जनैः दुष्कृतम्।
हन्त हर्तुं सदा मङ्गलं कामये॥२॥

स्वार्थसिद्धिं परित्यज्य लोके जनैः।
पीडितानां हितार्थं शुभं कामये॥३॥

संस्कृतेः रक्षणार्थं जनैस्सन्ततम्।
लोकसेवाव्रतं सर्वदा कामये॥४॥

विश्वबन्धुत्वभावं समासाद्य वै।
राष्ट्रभक्तिं जनानामहं कामये॥५॥

वर्णधर्माश्रमा जीवनस्याश्रयाः।
सन्तु, सत्यं शिवं सुन्दरं कामये॥६॥

दैवजामापदं विश्वव्याप्तव्यथाम्।
कोरनां नाशितुं साम्प्रतं कामये॥७॥

(२३.३.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

करोनापञ्चदशी

करोनाषट्कम् (१)

-डॉ. जयानन्द बिजयन्

हस्तयोः परस्परग्रहेण साधिता पुरा
मित्रतेति कारणात् करो न वैरसाधनम्।
साम्प्रतं परिस्थितिं विलोक्य शङ्कया जनै-
र्दत्तपाणिराकुलैररातिवत् हि गण्यते॥१॥

Earlier, a shake-hand was an instrument to create (new) friendships, and therefore it was certainly not considered a वैरसाधनम्. But these days, owing to the present circumstances, anyone who offers his/her hand is viewed as an enemy by the worried people.

पश्य पश्य रे करोनदारुणस्वरूपिणीं
सूक्ष्मदर्शनां तथापि तावतीं भयङ्करीम्।
ब्रह्मचारिणोऽपि ये चरन्ति नष्टविक्लवा-
स्त्रासिता यया द्वितीयमाश्रमं प्रवेशिताः॥२॥

Look at the dreadful coronavirus, which despite being extremely tiny is nevertheless quite fearsome. So much so that, even the usually carefree bachelors have been forced to sit at home and therefore become "गृहस्थाः" (due to the work-from-home policies all over).

भस्मासुरविनाशार्थं सिद्धा विष्णुस्वरूपिणी।
मोहिनी वञ्चिता जाता करोनास्पर्शवारणात्॥३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

All the planning of Mohini to destroy Bhasmasura went in vain, because Bhasmasura was also practicing Corona hygiene, and thus unlikely to touch his own head even if Mohini were to lead him into doing it.

मुखं मा स्पृश हस्तेन वदन्ति सकला जनाः।
किं करिष्याम्यहं हन्त! शोकेनाह दशाननः॥४॥

"Don't touch your face with your hand" says everybody around here. Nobody understands how hard this is for me! exclaimed Ravana with sadness.

सीतान्वेषणसिद्ध्यर्थं रामदत्ताङ्गुलीयकम्।
स्वच्छीकृत्यैव जग्राह स्पर्शभीत्या स मारुतिः॥५॥

Out of fear (of touching metal surfaces), Hanuman made sure to carefully wipe the ring before accepting it from Rama, which was given to him for the purpose of making his mission of finding Sita successful.

करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम्।
भीत्या यशोदा तनयं ययाच प्रक्षाल्य पादावनुवर्तयेति॥६॥

Yashoda, on seeing Krishna place his पदारविन्दम् in his मुखारविन्दम्, pleaded with him - "Dear son! Continue doing so, not a problem, but please make sure to wash your legs first!"

दृशापि स्पृश मां मा त्वं तिष्ठ दूरं वरानने।
कोरोनानिर्गमादूर्ध्वं मीलनं नौ भविष्यति॥७॥

O Beautiful Lady, please stay away and do not touch me even with your glances. We shall get together after the Coronavirus goes away.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

करोनाषट्कम् (२)

-डॉ. जयानन्द बिजयन्

१. चिक्रोड उवाच

न स्पृशेद्रघुनाथो मां करोनास्पर्शशङ्कया।
तथापि सेतुनिर्माणे भागं वक्ष्यामि सर्वथा॥

The squirrel said–"Rama may not come and pat me due to the fear of Corona. Nevertheless, I will still do my duty and participate in the construction of the bridge."

२. मयूर उवाच

द्रुतमारुह्य मां स्कन्द कुत्र गन्तुं प्रवर्तसे।
वायुयानानि सर्वाणि रुद्धानीति श्रुतं न किम्॥

नारदेन प्रतिज्ञातं फलं प्राप्तुं यदीच्छसि।
हेरम्बमनुसृत्य त्वं कुरु पित्रोः प्रदक्षिणम्॥

The peacock said–"स्कन्द! Where are you off to, having come and perched on me? Did you not hear that air travel is severely restricted? Now, if what you want is the fruit that Narada promised, then follow what Ganesha is doing, and do a प्रदक्षिणम् of your parents; there is no other way!"

३. नैव शक्यं विमानेन प्रयाणमिति दुःखितः।
सीतापहरणाकाङ्क्षां तत्याज स दशाननः॥

Having realized that it was impossible to travel by air, Ravana abandoned his plan to kidnap Sita with great sadness.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

४. निषिद्धवायुमार्गोऽपि लङ्कां प्राप्तुं समुत्सुकः।
महार्णवं स्वबाहुभ्यां ततार कपिकुञ्जरः॥

Eager to reach Lanka but disallowed from taking the aerial route, Hanuman ended up swimming across the ocean by himself.

५. अहल्या तर्कयामास
त्रस्तमिदं जगद्भाति करोनास्पर्शशंकितम्।
तथापि मां शिलाभूतां रामः स्पर्शेन मोक्ष्यति॥

"The entire world seems to be afraid of touching anything, due to the Coronavirus situation. However, I am certain that Rama will come and touch me, and liberate me from my curse" – thus argued Ahalya with conviction.

६. आचार्य उवाच
विस्मृतं किं त्वया सूत्रं नस्तद्धित इति भ्रमात्।
मद्रशब्दान्वितो राजन् मद्रराजन् कथं भवेत्॥

शिष्य उवाच
स्पर्शशब्दनाद्धि भीतोऽस्मि भाषान्तरगतादपि।
न प्रयुक्तो गुरो तस्मात् टचाख्यः प्रत्ययो मया॥

The teacher asked–"Have you forgotten the *sootram* नस्तद्धिते? How can मद्र *shabda* when combined with राजन् *shabda* result in मद्रराजन्? (Shouldn't it be मद्रराजः?)"

The student replied–"Oh Acharya! The very mention of the word स्पर्श scares me, even if it is represented in another language. Therefore, I did not use the टच्/ touch प्रत्ययः, (and thus left the compound word as मद्रराजन् itself)"

(१८.३.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'करोनात्रिकम्' (३)

-डॉ. जयानन्द बिजयन्

सर्वाश्रमेषु गार्हस्थ्यं श्रेयश्चानन्दवर्धनम्।
संन्यासात् दुष्करं दृष्टमिदानीं करुणाभयात्॥१॥

हे कोरोने नमस्तुभ्यं, विचित्रं ते फलं यतः।
मुखच्छदावृते सिद्धं बुद्ध्यावरणमेव च॥२॥

कोरोनाक्रान्तशब्देषु संहिता केन सिध्यति?
एवं विचार्य भाष्यज्ञाः संहिताभ्यासनिर्वृताः॥३॥

कोरोना कोविदः

आशुकृता कविता
-प्रो. चौडूरि उपेन्द्र रावेण
जवाहरलाल नेहरू विश्वविद्यालय वरिष्ठाचार्येण

करोनायाः प्रभावेन संसारः क्लममेत्यहो।
एकोनविंशतितमः चीनकोविदयं खलु॥१॥

हस्तचालनसंक्रान्तदुष्टोऽयं कुत्सिताशयः।
भारतीयनमस्कारजितोऽभूच्चीनकोविदः॥२॥

अप्राप्य भारते स्थानं राष्ट्रान्तरपलायितः।
इटलीरानराष्ट्रेषु जनान्हन्ति पुनःपुनः॥३॥

कोरियाकरोनयोर्मध्ये सम्बन्धः दृढतां गतः।
चीनदेशस्य दुर्बुध्या लोकोऽयं व्यथतेऽधुना॥४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तथागतस्य विस्मृत्य मार्गं कुत्सितबुद्धिना।
स्वयं विनिर्मिते जाले स्वयमेव पपात सः(चीनः)॥५॥

जनास्तु कोविदाद्भीताः यात्रास्तत्यजुरात्मनः।
गृहादपि बहिर्नैव गच्छन्ति परया भिया॥६॥

केचित्स्वपन्ति गेहेषु क्रीडन्त्यन्ये गृहांगणे।
सर्वकारेण साक्षात्तु विरामाः खलु घोषिताः॥७॥

विश्वविद्यालयास्सर्वे कार्याकार्यविमोहिताः।
त्यक्त्वैवाध्यापनं कार्यं कोविज्ज्वरप्रपीडिताः॥८॥

विमानसंस्थाः काश्चित्तु निश्शुल्कपरिवर्तनम्।
भविष्यतीति नियमैरुक्त्वा नैवाचरन्खलु॥९॥

सतां हि भारतीयानां स्वस्थजीवनयापिनाम्।
कथं चिन्ता! कुतो भ्रान्तिः? कोविदेन दुरात्मना॥१०॥

जैवायुधानि निर्मीय विश्वोपद्रवकारिणाम्।
दुश्चिन्तायाः फलमिदं? किमामिषविषागतम्?॥११॥

हरिद्रां लशुनं दुग्धं मध्वादीनांच सेवनात्।
देहेषु प्रबला शक्तिर्जायते सुखजीविनाम्॥१२॥

तस्माद्भ्रान्तिं विहायात्र भारते सुखदे शुभे।
गृहेषु पुण्यपूतेषु जीवन्तु शरदां शतम्॥१३॥

(२३.३.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

"कोरोना विषाणुः"

-डॉ. राजेन्द्र त्रिपाठी 'रसराजः'
रसराजनिवास, २ए, मिन्टोरोड, प्रयागराज, मो. ९४१५६४५७२२

विषाणुर्वैश्विको व्याप्तः करोना दृश्यते विश्वे।
महारोगः समायातः प्रभावो दृश्यते विश्वे॥१॥
न भूतश्चेदृशो रोगः कदापि प्रायशो लोके।
न जाने कीदृशो व्याधिः ह्यलक्ष्यः प्यायते विश्वे॥२॥
दुरासाध्यश्च निरुपायश्चिकित्साशून्यरोगोऽयम्।
कुतोजातः कदाऽऽयातः समस्या चिन्त्यते विश्वे॥३॥
गृहे संरक्ष्य चात्मानं सुदूरान्मेलनं कृत्वा।
करौ प्रक्षाल्य बहुवारं बुधैः संदिश्यते विश्वे॥४॥
समग्रे भारते राष्ट्रे निषिद्धं रेलबसयानम्।
विपन्ने वायुयात्रा साम्प्रतं संरोद्ध्यते विश्वे॥५॥
चिकित्सास्वच्छताकार्ये सुरक्षाकर्मिभिः सर्वैः।
दिवारात्रं च लोकार्थं हृदा तैर्यत्यते विश्वे॥६॥
समस्तोऽयं हि संसारो निमग्नः शोकशालायाम्।
सहृदयैर्विश्वरक्षार्थं सहायैर्भूयते विश्वे॥७॥
महादेशाः समर्था नो करोनारोगसंहनने।
प्रबिभ्यति हन्त सन्त्रस्ताः सखायो लोक्यते विश्वे॥८॥
प्रब्रूते शासको मोदी समग्रे भारते लोकान्।
गृहे स्थातुं प्रदातुं दानमेतत् श्रूयते विश्वे॥९॥
खलैरुल्लङ्घ्य राजाज्ञां विषाणुः सार्यते परितः।
दुर्दिने शासकैः सर्वैर्निदेशो दीयते विश्वे॥१०॥

(१०.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

एते!

-डॉ. सचिनकुमारत्रिपाठी
आदर्श इन्टर कालेज, सन्तकबीरनगरम्

गृहे सुखसाधनं सर्वं परं मूढाः भ्रमन्त्येते।
नरेन्द्रस्यानुरोधं ते न मन्यन्ते खला एते॥

न देशस्य प्रभो! चिन्ता कुटुम्बानां हृदीवेच्छा।
करोनावाहका दुष्टाः प्रवर्द्धन्ते शठा एते॥

महाप्रलयस्य कालोऽयं कृपां कुरु हे कृपासिन्धो।
स्वचक्रेणाद्य विषकन्यां वयं जहि संस्तुमश्चैते॥

महायुद्धे वयं गेहान्न निष्क्रमणं क्वचित् कुर्मः।
परं जामातिनो देशे भ्रमन्त्यधुना खरा एते॥

विदेशे वा स्वदेशे वा प्रदेशे वा गृहे ग्रामे।
करोना गच्छताच्छीघ्रं जना वाच्छाम एवैते॥

न निर्गच्छन्तु निजगेहाद् विषाणुः हन्ति हा लोकम्।
नरेन्द्राज्ञां विना रेखां नरा नो लङ्घयन्त्वेते॥

महादानेन सर्वेषां सुरक्षति मानदो मोदी।
अहं सचिनो हरिं वन्दे न वन्दन्ते कथं चैते?॥

(१०.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

महामारी कोरोनेयं, कोरोनेयं महामारी

रचयिता—डॉ. धनञ्जय-मिश्रः
प्राचार्यः, श्रीमातावैष्णोदेवीगुरुकुलम्,
कटरा, रेआसीमण्डलम्, (जम्मूकश्मीरः)

महामारी कोरोनेयं, कोरोनेयं महामारी
बहिर्मा यान्तु देशीयाः, गृहे निवसन्तु देशीयाः
येनेयं नष्टा स्यात् कोरोना...॥०॥ महामारी कोरोनेयं...

गृहेषु संस्थितेषु लाभ एव वर्त्ततेऽस्माकम्,
सुलाभो वर्त्ततेऽस्माक़म्।
न सम्पर्की भवामस्तद्-२ कथं स्यात् हन्त्री कोरोना॥१॥ महामारी...

स्वहस्तौ क्षालयामो फेनकेन साधुना विधिना।
स्वहस्तौ साधुना विधिना।
विषाक्तानां विनाशे तु-२ कथं स्यात् हन्त्री कोरोना॥२॥ महामारी..

समस्तेष्वेव देशेषु प्रचण्ड-रूपिणी एषा।
प्रचण्ड-रूपिणी एषा।
भवेत् सामाजिकी दूरी-२ कथं तदा हन्त्री कोरोना॥३॥ महामारी...

गृहे तिष्ठन्तु स्वस्थाः सन्तु एतद् भाषते मोदी।
प्रधानो भाषते मोदी।
यदा मन्यामहे वचनं-२ न हन्त्री स्यात् कोरोनेयम्॥४॥ महामारी...

(१०.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोनारक्षास्तोत्रम्

-डॉ. अरविदकुमारतिवारी
काव्यामृतवर्षिण्या प्रधानसम्पादकः

श्रुतं चेटलीं रावयन् रावणोऽयं
ततोऽमेरिकां दाहयन् स्पेनदेशम्।
समश्नन् समायात एवात्र मातः
विना ते कृपां नैव मार्योऽस्त्रशस्त्रैः॥१॥
त्वदीयागमं हा निशम्यैव दुष्टः
समायात एवैष मर्तुं विषाणुः।
स्वशूलेन दुर्गे करोनाख्यमेनं
यमस्याचिरं प्रेषयाद्यैव गेहम्॥२॥
न गन्त्री न यानं न वा साधनं तत्
जनैर्लक्ष्यते मातृके शम्भुवन्द्ये।
प्रवृद्धः पिता पुत्रका मे वराका
वराकी सुभार्या विषीदन्ति सर्वे॥३॥
अनेके मदीयाः सुहृद्बान्धवा ये
पृथिव्यां च ते सन्ति सर्वे मनुष्याः।
विषाणुप्रकोपेण रक्ष्या भवानि
सुतारोदनं हीयते किं सुमात्रा??४॥
शिवं वा गणेशं कुमारं प्रवीरं
वृषं सिंहराजं वदेः लोकमातः।
इदं भारतं सर्वलोकेन सार्द्ध-
मवन्त्वद्य सद्यो विहायेन्द्रलोकम्॥५॥
अरविन्दकृतो मातुर्दुर्गादेव्यास्स्तवश्शुभः।
कोरोनाशमने शक्तः पठनीयो बुधाबुधैः॥६॥

(१०.३.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

न हस्तमेलनं वरं न सज्जनैश्च मेलनम्

-आचार्य मिथिलाप्रसादत्रिपाठी

न हस्तमेलनं वरं न सज्जनैश्च मेलनम्
न च प्रयाणमुत्तमं बहिर्गृहादसंशयम्।
मुहुः प्रधावनं सुफेनकेन हस्तयोर्भवेत्
मुखाक्षिनासिकासु हस्तयोजनं न शस्यते॥१॥

करोनया प्रबाधितान् गृहाद् बहिःस्थितानलं
त्यजन्तु माथ मोमुहन्त्वपाकिरन्तु चापदः।
स्वदूरभाषया विदन्तु वृत्तमिष्टरागिणाम्
विनौषधं स्वरक्षणं दधत्वशेषमंगलम्॥२॥

न मां स्पृशन्तु न स्पृशाम्यहं भवन्तु दूरतः
ब्रुवन्तु वा नमंतु वा सुदूरसंस्थितिः शुभा।
समाजकार्यमुत्सृजन्तु संल्लिखन्तु साम्प्रतम्
पठन्तु वा शिवस्य भक्तिमाचरन्तु सर्वतः॥३॥

चिकित्सया बिना चिकित्सकोऽद्य चावशः पुनः
करोनया प्रपीडितानविष्यति स्वसंयमः।
यमालयस्य यन्निमन्त्रणं प्रदीयतेऽनया
स्वयोगमाध्यमेन संयमेन तन्न मन्यताम्॥४॥

अदृश्यता विषाणुजा प्रबाधते भृशं जनान्
करोनयानया न को विभीषति स्वमृत्युना।
सुबेभयीति पीडितान् दरीदृशीति वीक्षकान्
सुनन्नमीमि कालकालमार्तिनाशकं शिवम्॥५॥

(२८.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नीतिसारमवलम्ब्य कृतम्
अभिनवनीतिसारम्

-मुत्तलपुरं मोहन्दास्

प्रणम्य शैलजामाद्यम् आत्मविश्वासदायिनीम्।
नीतिसारं प्रवक्ष्यामि कोविदामयमुक्तये॥१॥

Let me, at the outset, pay my due respects to Shailaja, who gives self confidence and then shall I describe the proper things to do in escaping the hardships rendered by Covid–19 the virus, in these days.

अपारे रोगसंसारे कोविदेकः प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते॥२॥

In this world of endless diseases Covid–19 is the undisputed emporer. This world has to change itself in accordance with its whims.

श्रूयतामद्य कर्तव्यं श्रुत्वा चैव समाचरेत्।
आत्मनः प्रतिकूलाणुं* मा परेषु प्रसारयेत्॥३॥

Listen to what is the proper things that should be done during this lockdown. It is important to translate these into deeds. Corona virus* that you may have acquired should not be shared with others.

अपरीक्ष्य न कर्तव्या चिकित्सा स्वयमेव च।
कदाचित् भवति सन्देहः कोविदे 'जलदोष' वत्॥४॥

Don't administer medicines to yourself, without proper diagnosis. Covid 19, through symptoms, may sometimes be misunderstood as Common Cold.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संसर्गेण हि सिद्ध्यन्ति कोरोणा तेन बाधितैः।
नहि गुप्तस्य मर्त्यस्य प्रविशन्ति मुखेऽणुकाः॥५॥

One contracts Corona only through close contact with another who already is affected. The virus can't just rush into the mouth of anybody wearing a mask.

किं कुलेन विशालेन विद्याभ्यासेन देहिनाम्।
किं धनेन प्रतापेन कोरोणाणावुपस्थिते॥६॥

What use are family traditions, education, wealth and eminence in the wake of Corona?

मुखच्छदो* मुखे यस्य कोरोणा किं करिष्यति?
अस्थाने पतितोणुको स्वयमेवोपशाम्यति॥७॥

What can a virus do to one who wears a *mask? Germs reaching wrong places perish gradually.

अवश्यमनुभोक्तव्यः कष्टकाल* इहागतः।
नास्ति गत्यन्तरं ह्यद्य कोरोणाणुविनाशनात्॥८॥

We have to endure the hardships due to the current *Lock Down, as we have no other option except eliminating the Corona Virus.

धान्यपोषणशीलत्वं वत्सपोषः स्वयंकृषी।
पित्रोस्सेवनमुत्तमं कोरोणामयकालिकम्॥९॥

The good things that one can do during confinement to one's home, during the Lock Down include agricultural activities like growing crops and vegetables, caring for children and nursing parents etc.

सर्वकारो विजानाति जनोद्बोधनकष्टताम्।
नहि मूर्खा विजानन्ति कोरोणाणुकवैभवम्॥१०॥

Only those in the Government know the difficulty in building awareness among the public. Alas, many of the block-headed do not comprehend how fierce this virus situation actually is.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आरण्यरुदितं जातं सर्वकारप्रबोधनम्।
लीयते च जनारावे रक्षकाणां प्ररोदनम्॥११॥

The forebodings of the Government becomes mere cries in the wild. The imploring of the police too are wasted in the public noise.

अनाच्छाद्य मुखं स्वस्य हसन्तं वा भषन्तं वा।
ज्वरकफबाधितश्चेत् दूरतः परिवर्जयेत्॥१२॥

Those who laugh aloud, cough or sneeze without covering the mouth and nose, as well as those who are suffering from cold and/or fever should (compulsorily) be isolated.

अर्थाः गृहे निवर्तन्ते श्मशाने पुत्रबान्धवाः।
नूतनं वासमन्विष्य निवर्तेताशु कोविदः*॥१३॥

At the call of death, wealth deserts at home, relatives at the graveyard. The covid germ* leaves a dead body and seeks a living one.

माता पिता वा शत्रुस्स्यात् कोविदेन तु बाधितः।
सभामध्ये धरेत्तस्मात् मुखावरणमुत्तमम्॥१४॥

Once one contracts Corona, even parents will be like enemies. So make it a practice to wear a good face mask when you meet others.

एकधा दशधा चैव शतधा च सहस्रधा।
रणे पार्थशरोवृष्टिस्तथा कोविदव्यापनम्॥१५॥

The Covid spreads like the arrows from Arjun's bow. One initially, multiplies into ten, then into hundred in flight and thousand while reaching the target.

हर्तालृ् कदा भवति? कारणमस्य किं वा?
मृत्तैलमूल्यमधिकं बत! जायते वा?

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सामूहिकं सपदिकोविदव्यापनञ्च
जानाति नैव जगदीशः कुतो मनुष्यः?॥१६॥

The hike in petrol prices, outset of a *hartal* and its causes cannot be predicted. Similarly when Corona turning into pandemic proportions is not known to the Almighty. What to say then about man's helplessness!

शकटं पञ्चहस्तेषु दशहस्तेषु वाजिनम्।
गजं हस्तसहस्रेषु कोरोणां दूरतस्त्यजेत्॥१७॥

One should keep oneself away by five palm length from vehicle, ten lengths from horse, thousand from elephant. The distance should be even greater from Covid-affected.

मानवस्य लघुतामुदाहरन्
राष्ट्रदुर्मदमपि च संहरन्।
कोविदस्य च समीक्ष्य ताण्डवं
ज्ञायते ह विधिरेव शक्तिमान्॥१८॥

Observing the way the virus is running riot, proving that man is insignificant and suppressing the rudeness of the monopolies of the superpowers, feel after all destiny is omnipotent.

रूपयौवनसम्पन्ने विशालकुलसंभवे।
विद्वज्जने च मूढे वा कोविदो नहि भेदकृत्॥१९॥

Covid-19 makes no partiality among the wise and foolish, elegant and ugly, elite, lowly, young and old.

सिंहादेकं बकादेकं शिक्षेच्चत्वारि कुक्कुटात्।
वायसात् पञ्च शिक्षेच्च शतं कोविदसद्गुरोः॥२०॥

We have to learn a lesson each from lion and stork, four from chicken, five from crow and hundreds from this eminent teacher called Covid 19.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अनित्यानि शरीराणि वैभवं नैव शाश्वतम्।
नित्यः सन्निहितो मृत्युः कोविदप्रलयादिभिः॥२१॥

The body is destructible. One's skills are perishable. The only sure and eternal thing is death, which is so close to all. It can come through Covid infection or deluge etc..

परोऽपि हितवान् बन्धुः बन्धुरप्यहितः परः।
कोविदे मूर्च्छिते राष्ट्रैर्ज्ञायेतेदं सुभाषितम्॥२२॥

If an other person, though enemy, acts according to what is good for us, he is indeed the best friend. Foe is one who does what is not suited. Many countries realized the essence of this saying, when Covid 19 spread.

पुस्तकस्थापिता विद्या परदेशगतः सुतः।
परहस्तगतं वित्तं किं कृते कोविदागते?॥२३॥

Once Covid strikes, what use is there of the wisdom only in books, a son in a far away country or one's money that is in other's possession!

मरणान्तानि वैराणि प्रणतान्ता हि कोपिता।
याचितान्तञ्च गौरवम् एवं वदति कोविदः॥२४॥

Covid says: With death ends all enmity, Anger dies with humility, Self respect when forced to beg. (We have seen how many "cleverer than thou" attitude of many monopoly nations turning into humble request)

अग्निशेषं ऋणशेषं शत्रुशेषं कोरोणाणुम्।
पुनः पुनः प्रवर्धेत तस्मात् शेषं न कारयेत्॥२५॥

It is not prudent to leave alone fire, debt and Corona parasite; however miniscule they be. Such an error may result in uncontrolled growth.

(१९.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोनामेवाभिलक्ष्य कतिपयान्यभिनवानि पद्यानि

–डॉ. राम विनय सिंहः
देहरादूनम्

ब्रह्मा इवाभिनवकाव्यविशेषलोकं
स्रष्टुं सदैव विमलं कवयो यतन्ते।
संहारकारकमहेशमहात्रिशूलं
शूलाय नैव रचयन्ति मुदा कवीशाः॥१॥

आयान्ति यान्ति समयाकुलवक्रचक्रे
प्रोर्ध्वं क्वचित्क्वचिदधश्च महोत्सवास्ते।
किन्त्वद्य वीक्ष्य जगतीतलमृत्युपर्व
सीदन्ति सिद्धकवयोऽपि विषण्णभावाः॥२॥

काव्यातपत्रमपहाय कदापि लोके
शोकापहारकरणाय प्रवृत्तचित्ताः।
कोपाकुलाश्च नकुला इव सर्पहेतो-
र्व्यापादयन्ति कवयोऽक्षरशापशब्दैः॥३॥

सङ्क्रामिकेव नयनाश्रुरुजां वहन्ती
हन्तीह मानवकुलान्नतिसञ्चरन्ती।
प्राणान्निपीड्य गलवर्त्म दृढं निरुध्य
प्रायो जनांश्च विकलीकुरुषे करोने॥४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वक्षो विमृद्य जनकस्य च चीनदेशे
स्वातन्त्र्यमन्त्रमधिगच्छसि लासिनीव।
धिक्त्वामशेषजनजीवनहर्तुकामे!
वामे! न जीवति चिरं भुवि पापकर्त्री॥५॥

प्रेताधिवासजतुकाजविषाणुमूला
शूलायितासि जगति प्रलयङ्करीव।
किन्त्वन्यथैव भविता शृणु चीनपुष्टे!
दुष्टे! तवात्र मरणं लिखितं विधात्रा॥६॥

क्रीडारतासि यदि नेत्रविलापवाष्पै-
रात्मानमेव विनिहंसि विचारमूढे!
सन्तापतापपरिदग्धकथावशेषै-
श्शेषैर्न खेल खलतामपहाय गच्छ॥७॥

त्वं स्पर्शमात्रविकला चलदुश्चरित्रा
प्राणान्विनेतुमनिशं यतसे स्वलोकम्।
पश्याद्य गर्हगतिके! निजनाशदृश्यं
मन्त्रैरपास्तविजया भवितासि नूनम्॥८॥

जीवन्ति देवधरणाविह दीर्घकालं
यावत्त एव तपसाऽर्जितपुण्यदेहाः।
स्थातुं न शेकुरनिवार्यपरीतपापाः
दैत्याः पुराऽपि पुनरत्र वृथा कथा ते॥९॥

पापी स एव भुवने प्रथमस्तु चीनो
दीनायतेऽद्य कुटिलः किल लोकभीत्या।
मन्येऽवचेतननिमीलितलोचनान्धो
मौनीव तिष्ठति सदा ह्यनभिज्ञरीत्या॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

निर्म्माति जालमपरस्य विनाशहेतो-
लूता स्वकीयकुगतिं ह्यविचारयन्ती।
आपाततस्तु निजनिर्मितपाशबद्धा
प्राणान्विमुञ्चति तथैव खलोऽपि चीनः॥११॥

लोकोत्तरस्थहतभावभरानतृप्तान्
दृप्तानकालमृतिमेत्य रुजाप्रसुप्तान्।
शीर्णान्श्मशानधरणौ कुणपानसंख्यान्
दृष्ट्वाद्य जातमिह शैलमनो दयार्द्रम्॥१२॥

कस्मै प्रदेयमनिलं शुचिशास्त्ररीत्या
कस्मै च मृत्तिरिति नैव विचारयोग्यम्।
सर्वे समानमहिमानमवाप्य चैक्यम्
सन्दर्श्य भूमिशयने ह्यभवन्प्रवृत्ताः॥१३॥

हिंस्र! त्वदीयकृतकिल्विषमुक्तगेहाः
देहा अकालगमनप्रतिकूलभावाः।
पृच्छन्ति भूमितलगर्भग हे शयानाः
त्वामेव हन्त! वद कोऽस्ति मृतस्सदोषः॥१४॥

चीन! शृणुस्व तव पापविनाशनाय
नैकोऽपि लोकविधिशासितयोग्यदण्डः।
लोकोत्तराघसमवायसमापनाय
'नीचे'ति नाम समवाप्य चर स्वदेशे॥१५॥

नीच! प्रयाहि निजनिर्मितशून्यदीप-
द्वीपं त्वमश्रुलवणाश्रयतप्तसिन्धोः।
मौनं निमील्य नयने सततं निमग्नो
भूत्वा भजस्व कुणपान् खल! आयुगान्तात्॥१६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मुक्तिर्भवेन्न मनसो तव वैरबुद्धे-
यावद्भजस्व रहसि प्रथितं हि तावत्।
नान्यस्सकोपकविवर्त्म विहाय पन्थाः
सेवस्व साधुविधिना तदुपायमेव॥१७॥

नूनं तवापि कुगतिर्भंविता समन्तात्
पापोऽनुधावति सदैव विधायकन्तम्।
कालं प्रपश्य रथवृत्तकलं शृणुष्व
त्राता न कोऽपि भुवने तव 'नीचचीन'!!१८॥

(२५.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोने! धन्यवादार्हे!

-डॉ. पुष्कर आनन्दः
दूरभाष-९५२५९५६८७८, मेल-panandjha1979@gmail.com

कोरोने! धन्यवादार्हे! न त्वं दुष्टा पिशाचिनी।
स्वच्छता प्रसृता लोके जना जातास्तु निर्मलाः॥१॥
चीनदेशसमुद्भवा महामारी विभीषिका।
मानवानां विनाशाय कोरोना कल्किरूपिणी॥२॥
म्लेच्छास्सन्तु भयाक्रान्ता जतुकासर्पभक्षकाः।
न भीतिर्भारतीयेषु फलशाकादिभक्षकाः॥३॥
प्राच्यानान्तु रुचिर्योगे शाकाहारे तथैव च।
कोरोने! धन्यवादार्हे! भयाद्भीता न वै वयम्॥४॥
आतंकितं जगत्सर्वं भीतो नास्मि कदाचन।
सानन्दं गेहवासी च नास्ति चिन्ता कथञ्चन॥५॥
स्नेहेन वर्धमानेन यथा दीपः प्रकाशते।
मिथः स्नेहं पुनः प्राप्य गेहे प्रमुदिताः वयम्॥६॥
जननिजनकस्नेहः प्रियायाः प्रियभाषणम्।
बालानां क्रीडनं तथा महदानन्ददायकम्॥७॥
कदापि नानुभूतं वै कान्ताकार्यसहस्रकम्।
विना रोषं विना कोपं सेवते खल्वहर्निशम्॥८॥
वृथा गेहाद्बहिर्नेच्छा वृथाऽटनं न रोचते।
सहजेन मया लब्धमनुशासितजीवनम्॥९॥
श्रूयते त्वत्प्रसादेन खगानां मधुरो रवः।
दृष्ट्वाद्य स्वच्छमाकाशं पुनर्हि मुदितं मनः॥१०॥
आदिनं दशवारन्तु क्रियते करधावनम्।
दूरादेव नमस्कारस्त्वया वयं प्रबोधिताः॥११॥
हे कोरोने! महामारि! जनसंहारकारिणि।
सम्प्राप्य चीनदेशन्तु तं पुनः निर्मलीकुरु॥१२॥

(२८.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोनासन्देशम्

-डॉ. अरविन्द तिवारीः

सम्मर्दे मे क्वचिदयि हृतः सुन्दरो दूरभाषस्
तस्माद्वार्ता नहि भवति हा क्षम्यतां स्वामिकोऽयम्।
वार्तं भाषे शृणु सकुशलः काव्यकर्तारविन्दः
स्वल्पे काले विपदि विकलः कीदृशी वर्तसे त्वम्?॥१॥

नो भोज्यं मे मिलति समये नैव पानं न शान्तिः
यानं रुद्धं कमलनयने नो विमानं लभेऽहम्।
हाहाकारो भवति परितः श्रूयते हा विलापः
किं ब्रूयां हे सकलसुखदे त्वां स्मरन् दूरसंस्थः?॥२॥

कोरोनाख्या विचरति भुवि प्रायशो लोकहन्त्री
दैत्यादृश्या बहु वितनुते रोगजालं सुकेशि।
सर्वं देशे गृहिणि पिहितं व्याकुलं मानसं मे
किं हा कुर्यां वद सुवदने दुर्दिने दूरगेहः॥३॥

त्वं मां द्रष्टुं भवसि विकला ज्ञायते हृद्विकम्पैः
स्वप्ने स्प्रष्टुं ह्यभिलषसि हे विष्टरे मे नवोढे!
यावत् तावन्निगदति रुषा सर्वकारस्य रक्षी
दूरं दूरं भवतु निकटं नो प्रयाहि प्रिये हा!!४॥

जानामि त्वां वदसि मधुरं हे विनीते सुनीते
भ्रामं भ्रामं हृदयभवने साम्प्रतं हन्त भीते।
गानं हृद्यं तव कृतमहो जीवयद्वर्तते मां
गीतं प्रेम्णा प्रथममिलने कोकिले हे मनोज्ञे॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दुर्गापाठं कुरु कुरु प्रिये न व्रतं हे कृशांगि
प्रातस्सायं भज हरिहरौ सादरं मां विपन्नम्।
चिन्ता कार्या न हि कथमये मत्कृते प्रार्थयेऽहं
सन्तिष्ठन्तेऽसुखददिवसाः सर्वदा नो जगत्याम्॥६॥

भार्ये गेहे महितजनकः सेवनीयोऽतिवृद्धो
माता सेव्या नयनरहिता सर्वथा पूजनीया।
रक्ष्यो यत्नैश्चपलचपलो देवरः पुत्रकल्पः
कोरोनायाः कुपितनयनात् कामये कोमलांगि!!७॥

गेहाद्दूरं प्रविश न शुभे श्रूयतां वेदना मे
सेवस्वैवं प्रणयवचनं भाषमाणा दयार्द्रे!
मास्कं चास्ये विकटसमये सन्निबध्यैव प्रेम्णा
लक्ष्मि प्रायः सदनललने वर्तितव्यं यथेच्छम्॥८॥

तिष्ठेर्भार्ये सपदि च सुहृद् याचते दूरभाषं
मित्रं मार्गे मिलित इव मे राजधान्यां तु दिल्ल्याम्।
अप्यास्यासौ विरहमथिता कामिनी हा वराकी
प्रष्टुं वार्तं यतत इह भोः सूच्यते घण्टिकाभिः॥९॥

स्वामिन् भाषे ललितवचनं कम्पमानार्द्रनेत्रा
स्वस्था मार्गं कवनकुशला तावकं वीक्षमाणा।
ध्यायं ध्यायं गणपतिमहं मातरं पार्वतीं च
कल्याणार्थं विधिहरिहरान् ते प्रियालिङ्गनीया॥१०॥

कार्यं यत् तत् प्रियतम पते सर्वकारानुशिष्टं
गन्तव्यं नो क्वचिदपि पुनर्वित्तलाभाय गेहात्।
स्थास्यावः श्रीसुखदसदने बन्धुभिस्साकमेव-
मात्मीयानां नयनभवने सर्वसौख्यस्य पूर्तिः॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वामिन् रात्रौ कृतशतकृतिः शाययित्वा गुरून्नो
वार्तां मुग्धा तव मधुकरी मुह्यमाना करिष्ये।
नेत्रप्रान्तं सुभग कविराट् मीलयित्वा समक्षं
प्रेक्षिष्ये त्वां कमलनयनं कोमलं चन्द्रकान्तिम्॥१२॥

सद्यो दद्या निजनवसुहृद्यन्त्रकं प्राणदं भो
भार्यावार्तं विपदि विकलोऽयं वदेद् दूयमानः।
गेहे तेऽहं वचनवशगा यापयिष्यामि कालं
श्रुत्वा वार्तां कमलवदनात् प्रत्यहं दूरभाषात्॥१३॥

मार्गे ते स्यात् यदि कुलवधूर्मादृशी दृश्यमाना
तस्या नास्यं मुहुरयि शुभं हन्त प्रेक्ष्यं कदाचित्।
नो मां मत्वा कुरु शठ कृतं स्पर्शनं चेन्दुमुख्याः
सर्वं प्रेक्षे हृदयनिहिता साग्रहं बोधयन्ती॥१४॥

बन्धुस्तेऽयं नटति बहुशो देवरो मामनिद्रो
रात्रौ भीतः सरसवचनैः शाययन् नो शयानः।
आशंसेऽहं हृदि भयमहो वर्द्धते तस्य भर्तः
क्रोरोनासङ्क्रमणसमये किं विधेयं न जाने?॥१५॥

कुर्याश्चिन्ता शशिमुख पते नैव सम्प्रार्थयेऽहं
रक्षात्मानं विपदि समये रक्ष नैजं कुलं च।
दिल्ल्याः सङ्घे महति मनुजाः पीडिताः प्रस्थिता हा
व्यर्थं चैते विकलमनसो नैव कार्यं त्वयैतत्॥१६॥

प्रातर्ब्रूते कथमयि भवान् नोक्तवान् श्रीनिशीथे
सज्जा ह्यासं मसृणशयने नव्यलब्धोपधाना।
वारंवारं धृतकरयुगे दूरभाषं मनोज्ञ!
पश्यन्ती हा व्यथितनयनायापयं रात्रिकालम्॥१७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दोषो नायं मम प्रियतमे सत्यमेतन्न गुप्तं
जानीषे त्वं सरलहृदये नास्ति मे दूरभाषः।
विद्युत् सायं द्रुतगतिरहो प्रस्थिता दुर्दिनेऽस्मिन्
प्रायः सर्वो भवति विमुखो दुःखकाले पदार्थः॥१८॥

ऊर्जा नासील्लपनकरणे यन्त्रके दूरभाषे
तस्मान्नाहं विगलितमना उक्तवान् वार्तमेव।
क्षम्यो भर्ता सुखकरि शुभे दुर्गतो रक्षणीयः
कालः सर्वं कुरुत इह भो नो मनुष्यः कदापि॥१९॥

भुक्त्वा स्वल्पं सलिलमचिरं हन्त पीत्वा जनौघे
सुप्तस्तल्पे तृणविरचिते सावधानो निशायाम्।
भीतश्चौरात् कथमपि सुखं दृष्टवान् स्वप्नमेकं
स्निग्धं पाणिं कुसुमसदृशं वक्षसि प्रीयमाणः॥२०॥

मध्ये मध्ये निदधति पदं घोषयन्तः स्ववाचं
केचिद् रोषैरलघुलगुडा रक्षयन्तो मनुष्यान्।
मास्कं चास्ये कुरु कुरु शुभे बोधयन्तस्सुनिद्रां
कोरोनासङ्क्रमणमथिताः खण्डयन्ति प्रिये मे॥२१॥

भाषन्ते ते विपदि बहवो जल्पदक्षाः स्वतन्त्राः
व्यर्थं सर्वं भवति कृतकं नैव लाभः परन्तु।
शास्ता मोदी निगदति हृदा ह्यात्मवन्माननीयो
भूयाद् देशे युगयुगमयं शासकः कामयेऽहम्॥२२॥

मन्ये लोकः कुरुत इव नो सर्वथा यद्धि कार्यं
तस्मात् खिन्नो निगदति मुहुः सावधानं स कुर्वन्।
गेहे तिष्ठन् कुरु मनुज रे यद् दिशाम्यद्य रागात्
कोरोनासङ्क्रमणसमये नो सरेन्नैजगेहात्॥२३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रातस्सायं चलति दयिते रम्यरामायणं तत्
पश्यन्ती त्वं गुरुजनवशा जानकीवृत्तलोकम्।
शोकं दुःखं गणय न हि भो जीवने सर्वमेतद्
यात्यायाति प्रतिदिनमहो चक्रतुल्यं नराणाम्॥२४॥

श्रीमन् दिल्ल्यामहह दनुजैर्दुष्कृतं श्रूयते किं
वार्तायां तत् प्रतिपलमिदं क्षोभते हृन्मदीया।
कोरोनासङ्क्रमितदनुजैस्सारितं रोगजालं
नो जानेऽहं किमिह भविता भारते पूज्यभर्तः॥२५॥

देशेभ्यो ये गणनरहिता आगता राजधान्यां
स्थित्वा रुग्णा मतिकरगृहे सारयित्वा करोनाम्।
याता देशे प्रचुरगरलं धारयित्वा स्वदेहे
हन्तुं नूनं निखिलजनतां हे प्रिये कल्पयामि॥२६॥

किम्भाग्ये नौ लिखितमहहा वेधसा सर्वकर्त्रा
जाने नाहं दिवसगणनादत्तचित्ताधुना हा।
प्रत्येकं संसरति दिवसे मोदते मानसं मे
श्रुत्वा वृत्तं पुनरपि पते म्लायतीत्याननं मे॥२७॥

क्वाराण्टाइन्क्रियत इति न ग्राम एषोऽस्मदीय
आशङ्केऽहं विशतु न पते चीनजैषा करोना।
ग्रामान्ते नः लगुडकुशला वर्तमाना युवानो
हन्तायातं निजजनमहो तर्जयन्ति प्रवेशात्॥२८॥

नैवागच्छेरिह मम पते तिष्ठ तावत्तु दिल्ल्यां
कोरोनेयं सरति भुवने यावदेषा नृहन्त्री।
स्वस्थाहं ते कुशलगृहिणी भावये श्रीभवानीं
रक्षां कुर्याद् विपदि जननी पूज्य गौरी प्रसन्ना॥२९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्नानं भार्ये भवति न हि कण्डूयते मे शरीरं
वस्त्रं जातं मलिनमधुना वर्धितः केशराशिः।
वर्धन्ते मे शृणु हृदयगे दर्शनेच्छास्त्वदीयाः
किं कालेऽस्मिंश्चपलनयनो मारितात्मा प्रकुर्याम्॥३०॥

ध्यायं ध्यायं श्वसिति पतिकस्तेऽत्र दिल्ल्यां विनिद्रो
घ्रात्वा घ्रात्वा पिबति सलिलं भोजनं चात्त्यकाले।
चित्वा चित्वा विरमति सुखं चासने भाग्यलब्धे
चिन्तां कुर्या न हि प्रियतमे दूरसंस्थस्य मे त्वम्॥३१॥

दृष्ट्वादृश्यं द्रवति हृदयं श्रूयतां प्रार्थनैषा
वेधोलेखा भवति समये जानते सर्वलोकाः।
सिञ्चन्ती त्वं सदनतुलसीं भोजयन्त्यन्यजीवान्
रामं रामं स्मर कुदिवसे स्मर्यते रामनाम॥३२॥

रात्रौ निद्रा स्वपिति निलये मन्यतां स्वे मनोज्ञे
नायातीति क्वचिदपि गता वा प्ररुष्टा प्रसुप्ता।
कोरोनायाः सरणसमयो वर्द्धते वह्निवद् हा
रोद्धुं शक्तो न भुवि गदविद् भारतीयो विदेशी॥३३॥

सिद्धो मान्यो रचयति कविर्मिश्रवर्योऽभिराजो
राजेन्द्रोऽयं कविकुलगुरू राजमानः स्वगेहे।
स्तोत्रं दिव्यं सजलनयनः पीड्यमानो दयालुः
सम्पीड्यन्ते जगति सुजना लोकदुःखैः प्रबुद्धाः॥३४॥

तत्स्तोत्रं त्वं पठ सुनयने ध्याययन्ती प्रभाते
चित्वा पुष्पं सदनविपिनान्नासिकां छादयित्वा।
कोरोनासंव्यथितचरणे ज्वालयित्वा प्रदीपं
धूपं गन्धं सुलभमतुले मोदकं चार्पयित्वा॥३५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

देवा देव्यो लघुकटितटे प्रस्तरे नो पदार्थे
राराज्यन्ते कुसुमकमने प्राणदा भावनायाम्।
अर्चा कार्या मुदितमनसा मानवैर्देवतानां
प्रीताः शीघ्रं ददति सुफलं श्रूयते धर्मशास्त्रे॥३६॥

मन्त्रं जप्त्वा स्तुतिततिमये श्रावयित्वा भवानीं
भावैर्ब्रूया विगलितहृदा रक्षितुं जीवलोकम्।
नूनं माता भुवनमहिता सिद्धिदात्री शिवानी
वाञ्छां हृत्स्थां तव सहृदये पूरयेत् कामयेऽहम्॥३७॥

प्रह्लादं वा ध्रुवमयि शुभे ग्राहवृत्तं पुराणे
सञ्जानीषे सततपठने संरता ज्ञानरूपे।
अम्बां बाले महितजनकं श्रावयैतत् सरागं
श्रुत्वा व्यस्ता मम विरहजां वेदनां विस्मरन्तु॥३८॥

वारंवारं यदि मम पिता पुत्रकं मां स पृच्छेत्
माता वा मे कुशलमयि हा ज्ञातुमिच्छेद् विपन्ना।
स्वस्थः स्वामी सुखदभवने वर्तते ब्रूहि दिल्ल्यां
बुद्धे देवि त्वमसि सरला नो वदेः सत्यवृत्तम्॥३९॥

प्रातर्वार्तां यदि सुसमयो लभ्यते कर्तुमीहे
पित्रा मात्रा सह निगडितो बन्धुना पृच्छ्यमानः।
कोरोनासङ्क्रमणसमये कोपने कामदक्षे
प्रायः सर्वो भवति विकलो ज्ञानवान् वा विमूढः॥४०॥

शेथाः काले त्वमसि शरणं चैकमात्रं मदीयं
दृश्यो गेहस्तव प्रियतमे रक्षणीयाश्च सर्वे।
सीतां देवीं जनकतनयां भावयन्ती स्वचित्ते
सेवाभावैरव निजजनान् दुर्दिने रक्ष रागात्॥४१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भिक्षुः कश्चिद् विपुलभवनात् प्रेक्ष्यते पूजनीयः
सन्तप्तोऽसौ विगतदिवसाद् भोजनं लब्धुकामः।
दद्यास्तूष्णीं प्रसृततमसि प्रायशः सावधाना
भ्रात्रा साकं करुणहृदये रक्षिभिर्लीयमाना॥४२॥

स्वल्पं भोज्यं कुरु सुसमये भारते नः करोना
दुष्टा दैत्या कृतशतपदी मोदते पूतनेयम्।
एकां रोटीं त्यज विपदि भो देहि चार्ताय देवि
दानं श्रेष्ठं भवति भुवने रोटिकायाः सुनीते॥४३॥

मोदी मन्त्री पिबति सलिलं निम्बुना मिश्रितं यो
नो भुङ्क्तेऽयं निखिलजनतासेवको माननीयः।
भाग्याद्देशे सुनयनिपुणः शासकश्चाद्वितीयो
दृष्टो लोकैर्निगदति मनो मामकं धर्ममार्गी॥४४॥

आदित्योऽयं स्वपिति न हि भो मुख्यमन्त्री दयाद्रो
नित्यं द्रष्टुं परहितरतः शासनेऽस्मिन् विरक्तः।
सन्न्यासं यो लभत इह ना तस्य देशः समस्तः
रक्ष्यो मान्यो भवति गतिमान् बोधयन् वर्ततेऽयम्॥४५॥

भ्रामं भ्रामं सलिलनयनस्तर्जयन् हन्त सुप्तान्
कोरोनासङ्क्रमितमनुजारक्षणे बद्धदृष्टिः।
यानैर्याति प्रमतिरिह सन्दृश्यते दूरभाषे
पूज्या देवी सकलजनतामोदिने योगिनेऽस्मै॥४६॥

अन्ये सर्वे निजनिजपदे वर्तमाना अनिद्राः
सेवन्ते ये प्रतिपलमये स्वप्रयत्नैः प्रकामम्।
भोज्यान्नेन प्रतिदिशमहो भोजका दानशीलाः
तेभ्यः प्रीते वद सविनयं मातरं सिद्धिदात्रीम्॥४७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वृक्षे रात्रौ नदति विहगरशाययन् त्यक्तनिद्रे!
श्रृण्वन् वार्तां चतुर इति नौ पालितस्तेऽन्नपानैः।
दर्शं दर्शं कुकलिजनितां हा दशां चीनदत्तां
रौतीत्येवं शुकशिशुरहो श्रावयन् वेदनां स्वाम्॥४८॥

दृष्टा वृत्ते ह्यगणितमृता हे पतेऽमेरिकायां
स्पेने चान्ये प्रसृतकुगदैर्जर्मनीजा विदेशे।
चीने चेट्लीभुवि जनमृतिर्भारते जायतेऽस्मिन्
रक्ष्याः प्राणा विपदि मनुजैरात्मनो येन केन॥४९॥

साधुः सेवी जनगदहरो रामदेवश्च योगी
वान्येऽसङ्ख्याः परजनहृदस्तापनाशार्थमत्र।
कोशाद् वित्तं परमसदयाः श्रेष्ठिनो भारतीया
दानं देशे ददति बहवो नायका मुक्तहस्ताः॥५०॥

दातुं चेहे स्वधनमधुना गोपितं गोपनीयं
पित्रा दत्तं गमनसमये बन्धुभिर्बान्धवैर्यत्।
भर्तः स्यूतात्तव हृतमहो दुर्दिनेऽस्मिन् समस्तं
दत्तं दानं भवति सफलं निष्फलं रक्षितं तत्॥५१॥

जल्पत्येषा करदलगताध्यक्षतां निर्वहन्ती
नेतुः पत्नी मुहुरिह मुदा मोदिनं बोधयन्ती।
शुष्कास्याहो विपदि रटति द्राग् यथेच्छं स्वदेशे
श्रुत्वा चेतो दहति सहसा भारतीयास्मि नारी॥५२॥

व्यर्थं चैते वचनधनिका नायका नायिका वा
जल्पन्त्येते निजमतकृते नो जयं भाविकाले।
लप्स्यन्ते ते श्रुतिविरहिता हारमेवं विनष्टाः
काले सर्वे कुपितजनतापादुकागुम्फितं वै॥५३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोनेयं दनुजतनया कारयन्ती विभेदं
गेहे गेहे सरति मृतिदा हे पते मारणीया।
अम्बां सूनुः पलितचिकुरां कासमानां प्रवृद्धां
दृष्ट्वा दूरं चलति किमिदं हा करोनाविभीतः॥५४॥

छिक्कन्तं स्वं पितरमचिरं पूज्यमानं गृहस्थं
श्रुत्वा पुत्रो वदति सभयं हे पितश्छादयित्वा।
कुर्याश्छिक्कां सपदि सलिलैः फेनिलैः क्षालयित्वा
नासां चास्यं जनक मतिमन् पाणिपादं च तिष्ठेत् ॥५५॥

प्रातर्दृष्टं यदहमखिलं वृत्तजातं स्वयन्त्रे
फोने स्वामिन् दहति तदहो मामकं चित्तमेतत्।
कोरोनासङ्क्रमितमनुजान् वीक्षितुं हन्त वैद्या
याता वीथ्यां दनुजतनयैस्ताडिताः किं विचित्रम्?॥५६॥

नीत्वा रोगं दनुजकुलजा भारते वा विदेशे
संस्था गेहे विपदि बहवो मृग्यमाणा विषाक्ताः।
अन्विष्यन्ते परमिह न ते कारयन्ते चिकित्सां
लीना दीना मरणमतयो वञ्चयन्ते वराकाः॥५७॥

मुम्बय्यां वा किल जयपुरे रामपूरे बिहारे
इन्दौरे वा सकलजनताराजधान्यां च दिल्ल्याम्।
कौकृत्यं हा दनुजविहितं लोक्यते मुक्तनेत्रैः
कोरोनासङ्क्रमणसमये कृत्यमेतद्विचित्रम्॥५८॥

आस्ये केचित् त्विह विमतयो नीयमानास्तु यानैः
निष्ठीवन्ति प्रधृतमनुजा रक्षिणां वैद्यकानाम्।
दुष्टा नेत्रे विपदि किमहो वर्धयन्तो विषाणुं
श्लाघ्यन्ते नो क्वचिदपि जना ईदृशा दृश्यमानाः॥५९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मास्केनास्यं कमलसदृशं छादयित्वैव पूर्णं
यातव्यं भोः क्वचिदपि पते प्रार्थयेऽहं विदूरात्।
को जानीते वसति दनुजो भारतं हन्तुकामो
विश्वास्यं नो जगति मतिमन्नीदृशे दुष्टकाले॥६०॥

वन्द्यो मोदी प्रतिजनमयं बोधयन् नम्रवाचा
शास्ता मन्त्री गदति करुणं सर्वरक्षार्थकामः।
सोत्साहं भो मम प्रियजना देशभक्ताः करोना-
मुच्छेत्तुं वै भवत निखिला भारतीयास्तु सज्जाः॥६१॥

गेहे स्थित्वा प्रणतमनसा ज्वालयित्वा प्रदीपान्
पञ्चाप्रैले रविदिनमये रात्रिकाले भवद्भिः।
हन्तुं चैनां नवपलमहो दिव्यदीपप्रकाशैः
कोरानाख्याममरतनयैर्दर्श्यतामेकभावः॥६२॥

श्रुत्वा प्रायो मम विगलितं मानसं मन्त्रिवाक्यं
मुग्धं भर्तर्भवति हृदयं फुल्लतामेति नूनम्।
जेतुं शक्ता वयमपि सृतां दानवीं लोकहन्त्रीं
मन्वानाः श्रीनृपसुवचनं सौख्यमायान्ति सर्वे॥६३॥

राजाज्ञां ये कुमतिविभवा द्रोहिणो मन्वते नो
ये वा तन्त्रं नृपकृतमहो तन्त्रयन्ते न देशे।
तेषां स्थानं भवति वसुधायां क्वचिन्नैव ते वै
कारागारे स्वजनरहिता यापयन्ति स्वकालम्॥६४॥

धिग् धिक्चैतज्जगति रचितं लोकतन्त्रं यथेच्छं
स्वातन्त्र्यं संलभत इह ना मारणीयो दुरात्मा।
दौष्कृत्यं वा कुरुत इव यो नेतृभिः पाल्यमानो
मुक्तः प्रायो भवति महतां हन्त लब्ध्वाश्रयं सः॥६५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पश्यन् शास्ता न हि वदति यत् सत्यमस्तीव देशे
तत् किं तन्त्रं बुधवरकृतं लोकतन्त्रं कुतन्त्रम्।
केचिन्मत्ता लगुडमनुजा रक्तबीजात्मजा वा
मन्यन्ते नो बुधविरचितं संविधानं सुपूज्यम्॥६६॥

जृम्भन्ते ये सलिलममलं शुल्कशून्यं निपीय
भुक्त्वा चान्नं जनकरहृतं भिक्षमाणा दरिद्राः।
चेष्टन्ते ते शुभवसुमतीं दानवा मातृकल्पां
हन्तुं हं हो प्रथितजननीदुष्टपुत्रा अशिष्टाः॥६७॥

कोरोनाया हननसमये त्रोटयन्ते नृपाज्ञां
सन्तिष्ठन्ते न च निजगृहे शान्तिसद्भावशून्याः।
थुत्कुर्वाणा विपदि शतशो देवयन्ते व्यवस्थां
दृष्टं रूपं पठितमधुना दैत्यजानां पुराणे॥६८॥

धावन्ते हा विषमसमये वैद्यरूपेण देवाः
कोरोनासङ्क्रमणहरणे युद्ध्यमानाः यमेन।
त्यक्त्वा गेहं त्वहह बहवः पूजनीयाः स्वदेशे
दृष्टं रूपं विधिविरचितं देवतानां पुराणे॥६९॥

कस्स्यात् त्राता कलिजकलिले मानवानां विषाणोः
ध्यायं ध्यायं विकलहृदयं धुक्षते मामकीनम्।
स्वस्मिन् ध्यानं कुरु सुभग मे स्रंसते दूरभाषो
भार्याचेतो द्रवति सहसा स्वामिनो दुःखकाले॥७०॥

शून्यं सर्वं जगति कथितं ब्रह्म सत्यं परं यत्
तत् सत्यं सम्भवति नितरां प्रसृतेऽस्मिन् विषाणौधरायाम्।
मार्गाः शून्या उपवनमहो शून्यमेतत् समस्तं
प्रेक्षे स्वामिन् शयनसमये वृत्तजाते स्वफोने॥७१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

साङ्ख्ये प्रोक्तं कपिलसुमतं मूलमेकं हि तत्त्वं
यस्माल्लोकः प्रभवति पते त्रैगुणः सृष्टिकाले।
संहारेऽयं क्रमश इह संलीयते कारणे स्वे
मन्ये कार्यं सरति तु लये कारणे मूलतत्त्वे॥७२॥

योगे चोक्तं यमनियमजं चिन्तनं मानवेभ्यो
लब्धुं मोक्षं सुभग मुनिना रोचते पावनं मे।
यावच्चित्तं भ्रमति विषये सेवमानं जगत्यां
वैराग्यं नोदयत इव हा नो समाधेश्च सिद्धिः॥७३॥

आपन्नानां सततचरतां मानुषाणां सतां वा
सिद्धानां वा परमकृपणानां द्विषां चित्तवृत्तिः।
मन्ये विद्युद्गतिरिव बलात् पातयन्ती प्रयाति
संरोद्धव्या सपदि मनुजैस्साधकैर्मुक्तिकामैः॥७४॥

मायामोहे विषयविषभुङ्मानवो नित्यबद्धः
प्राप्तुं वित्तं स्वजनविभवं हर्तुकामो निषिद्धः।
व्यग्रोऽसुप्तो भजति भगवन् नो रुणद्धि स्वचित्तं
वित्तस्थाने जपति न कथं चित्तयन् शम्भुमेव॥७५॥

योगो गेहे गृहिणि सुखदः संविधेयः समोदं
कोरोनासङ्क्रमणसमये स्वास्थ्यलाभाय भार्ये।
मन्त्रो जप्यो विमलमनसा लोककल्याणदक्षे
शम्भोर्विष्णोर्जपनकुशले सन्निरुद्ध्य स्वचित्तम्॥७६॥

प्राणायामो निखिलकलुषं चेतसो हन्त हृत्वा
चित्ते शीघ्रं स तु वितनुते ज्ञानविज्ञानराशीन्।
प्रत्याहारो हरति चरतश्चेन्द्रियाण्येव युक्तः
काले सर्वं लभत इह ना धारणायां प्रवृत्तः॥७७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ध्यायं ध्यायं हृदि मनसि वा साधको ध्येयरूपं
सूक्ष्मो भूत्वा विशति विवते विश्वरूपे प्रसन्नः।
तेजःपुञ्जः शशिसममुखे लक्ष्यते तस्य दिव्यः
किं सिद्धानां सुलभमिह नो वर्तते माननीये?॥७८॥

अस्मिन् कस्मिन्नसुखसमये साध्यतां श्रीसमाधिः
युक्त्या भक्त्या विरहजशतं सन्त्यजन्तीव तापान्।
विष्णोर्मन्त्रं जप मनसि यः सर्वसिद्धः सुमन्त्रो
मन्त्रैः सिद्धिर्भवति दयिते क्षीयते दुःखजालम्॥७९॥

स्वामिन् चित्तं भ्रमति सततं मामकं गेहकार्ये
वार्तां प्रष्टुं तव विगलितं केन योगं प्रकुर्याम्।
दीपः स्थातुं जगति मतिमन् चक्रवाते समर्थो
दृष्टो लोके क्व वद रमते मानसं नैव योगे॥८०

यातः कान्ते दशमदिवसो मोदिवर्यस्य भार्ये
पत्युस्ते मे विरहविमतेर्जल्पतः शास्त्रवाक्यम्।
एकादश्यां विपुलजनतासेवकस्यास्य मत्या
दीपान् सौधे रचय रुचिरान् ज्वालयित्वा सरागम्॥८१॥

दीपः शीघ्रं हरति विततं चान्धकारं जगत्या
रोगान् शोकान् सकलविपदः संसृतं वा विषाणुम्।
प्रत्येकं सञ्जनयति मुदा दीपकश्चन्द्रकान्तिं
तस्मादुक्तं सरसवचनैर्मोदिना शासकेन॥८२॥

दीपावल्यां पतिवर मया दीपका दीर्घकायाः
क्रीतास्तेषु प्रतिदिनमये पूजने सम्प्रयुक्ताः।
शिष्टा अर्चाभवनवशगाः सन्ति शुद्धाः विशुद्धाः
संशुद्धानां भवति सकलं चिन्तितं पूर्णमेव॥८३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संयाचन्ते परजनकृते सज्जना अन्नवित्तं
सायं घोषैर्हरिहरगृहे भिक्षुकेभ्यो जनेभ्यः।
दातुं यास्याम्यमितविभवाल्लक्षमेकं समोदं
सम्पन्नानां भवति सकलं वैभवं याचकेभ्यः॥८४॥

मात्रा प्रोक्तं सपदि सदनादन्नराशीन् प्रदातुं
कोरोनासङ्क्रमणजनतारक्षणे प्रातरेव।
कृत्वा स्वास्ये पटविरचितं गुण्ठनं देवरेण
सायं साकं प्रियवर गमिष्याम्यहं सावधाना॥८५॥

घण्टाशङ्खस्वरसुखमहो स्थालिकानां च घोषं
सायङ्काले मुदितजनतासंस्कृतं श्रद्धयेह।
दिव्यं नव्यं प्रतिदिशमये लब्धवद् भारतं नः
सञ्जानीते विततगगनं चैकमत्यं प्रजानाम्॥८६॥

अस्यां मन्ये विपदि बहवो लुण्ठका चौरपुत्रा
लुण्ठन्तीव व्यवसितजनाः सेवका हन्त भूत्वा।
दर्शं दर्शं कुजनकृतकं क्रन्दतीवेति देशो
लज्जा लोके भवति न पते दुर्जनानां कदापि॥८७॥

संसारेऽस्मिन् प्रतिपलमहो संसरन्ती करोना
हन्ति प्रायो ननु दश जनान् नौषधं वर्ततेऽस्याः।
जानन्तोऽपि प्रकृतिसरला भारतीया विनम्रा
गेहाद् गन्तुं भवनकुपिता चिन्तयन्ते विचित्रम्॥८८॥

गेहे बद्धा भ्रमणकुशला भारतीयास्त्वधीरा
श्रुत्वा वार्तां नहि निदधते केऽपि पादान् बहिर्गाः।
अन्तःथास्ते सचलमनसः पूर्णकामा करोनां
गर्जत्सिंहा इव करनखैः पञ्जरे दर्शयन्ते॥८९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

निद्रा नेत्रं हरति कुलटा स्पन्दते श्रान्तपाणिः
बुक्कन्तीव प्रहरिण इमे सारमेयाः प्रकृत्या।
सुप्तास्सर्वे प्रियतम गृहे रक्षिकाहं ब्रवीमि
शेष्व प्रीतः कुरु नहि पते मे प्रियायास्तु चिन्ताम्॥९०॥

निद्रासि त्वं सुभग वद किं दर्शनीयप्रभाते
वारंवारं ननु कृतवती दूरभाषं सहर्षम्।
स्वप्नं त्यक्त्वा भव सुमुख हे शान्तचेता विवक्षु-
राप्यायन्ते विरहमथिता भर्तृवृत्तेन भार्याः॥९१॥

पार्श्वे भाग्याद् यदि कुसमये कामिनी हाभविष्यं
चार्वङ्गी वै कुसुमशयने संस्पृशन्ती प्रियास्यम्।
प्रातःकाले खगकलरवे मोदमाना निचुम्ब्य
सन्तापांस्ते हृदयनिहितं चाकरिष्यं तु दूरम्॥९२॥

सृष्टा स्वामिन् व्यथयति मुहुर्दीर्घवेणी मदीया
भूत्वा प्रायो निशि मदन मे सर्पिणी त्वां विनैषा।
संस्पृष्टा ते करकमलयोः शान्तिमेति स्म जाने
किन्तु प्रायो दशति कुचयो राजमाना मदङ्गम्॥९३॥

भर्तः किं त्वं स्मरसि न च मे चुम्बनं चुम्बितायाः
प्रेमालापं सरसमखिलं केलिकाले यथेच्छम्।
स्मारं स्मारं दहति हृदयं मामकं तूलरूपं
शृङ्गारो मे विलपति पते त्वां विना दीर्घकालम्॥९४॥

सञ्जायन्ते प्रमदललना विष्टरे भर्तृहृत्स्थाः
चैकान्ते हा विरहसमये प्रेमिणं भावयन्त्यः।
निन्दन्त्यस्ता विधिविरचितं श्रीवसन्ते प्ररूढे
श्रावं श्रावं पिकसुमधुरं कूजनं हा युवत्यः॥९५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रक्तौष्ठं मे विततमुकुरे रोचते नैव सत्यं
सौन्दर्यं वा मदयति मनो नो पते त्वां विनैतत्।
कुप्याम्येवं तव विरहजं यापयन्तीव दुःखं
कोरोने त्वां दनुजतनयां रे हनिष्यामि शापैः॥९६॥

नो मे चित्तं रमत इव भोः कार्यकाले व्यथायां
संरुद्धायाः प्रियवर पते कथ्यतां वाचिकं स्वम्।
जाने निद्रा निजकरयुगे कुर्वती त्वां रतीशं
शेते मुग्धा वदसि न ततो भाषमाणां महात्मन्॥९७॥

रुष्टा मा भूरयि प्रियतमे संश्रुतं हृद्गतं ते
दोषो नायं तव बलवती भाग्यलेखा विशिष्टा।
आवां खिन्नौ विपदि सुभगे वार्तया वेदनां नौ
दूरीकुर्वो विधिविरहितौ मा व्यथिष्ठाः शुभाङ्गि॥९८॥

सर्वं दुःखं प्रियजनकृते मानवोऽयं प्रसह्य
किं लोके नो हसति बहुधा दह्यमानोऽश्रुकण्ठः।
कर्तुं शक्यं भवति न हि तद् यद् विधेः सृष्टमत्र
दूरं भार्ये भव न कुपिता चिन्तयेश्शान्तचित्ते॥९९॥

यूट्यूबे त्वं ह्यमृतवचनं रिक्तकाले सरागं
मध्याह्नेऽद्य व्यथितदयिते श्रोष्यसीवेति शुद्धे।
बुद्धे श्रीमद्हरिचरणयोर्बद्धरागोऽद्वितीये
श्रोतव्यं तद् विपदि महतां भाषितं भावनीयम्॥१००॥

श्रव्यो नित्यं भुवि बुधवरैर्माननीयोऽत्र वाग्मी
वन्द्यो दीक्षागुरुवर इनो वासुदेवो महात्मा।
यः संसारे प्रसृततमसां नाशको भास्कराख्यस्
तं संस्तौति त्रिगुणरहितं ते पतिश्चारविन्दः॥१०१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

एकं दीपं रचय रुचिरं सैनिकेभ्यः सगर्वं
वैद्येभ्यो हे घृतविलसितं दीपकं च द्वितीयम्।
हे सुश्रोणि प्रियमयि नवं बान्धवेभ्यस्तृतीयं
दीपं रात्रौ सपदि तु मुदा मोदिने वा चतुर्थम्॥१०२॥

मान्ये कान्ते सजलनयने दीपकः पञ्चमोऽयं
राष्ट्रोन्नत्यै भवतु भवने योगिने षष्ठ एव।
दीपो दृश्यः कमलवदने सप्तमस्तैलपूर्णः
कोरानायाः प्रसृततमसां भेदकः कल्पनीयः॥१०३॥

दानिभ्यस्संरचय महितं चाष्टमं स्वर्णदीपं
सन्तप्तेभ्यो नवममतुलं गेहिनि प्रीतितैलम्।
एते दीपा विपदि शुभगे काशमानाः स्वदेशात्
कोरोनाया व्यथितजनतां तोषयिष्यन्ति नूनम्॥१०४॥

हे विष्णो हे भगवति शिवे हा भवाब्धौ निमग्नान्
अस्मान् मातर्विपदि विकलान् रक्ष मन्त्रं स्मरन्ती।
मौनं धृत्वा नवपलमये भारतीये प्रहृष्टे
तिष्ठेर्नम्रे भवनवलभौ दीपयन्ती त्रिलोकम्॥१०५॥

नूनं काले नवपलमहं ज्वालयिष्यामि दीपान्
स्वामिन् प्रोक्ता तव सुगृहिणी मोदिनो वाक्यगाहम्।
देशोऽयं नः सुखयतु जनान् सेव्यमानः प्रकाम-
मामोदन्ते विबुधजनता सेविते रम्यदेशे॥१०६॥

दृष्टा दीपा निखिलजनताज्वालिता भारतेऽस्मिन्
रात्रावस्यामगणितगृहेष्वद्य सन्दर्शनीयाः।
दर्शं दर्शं जनविरचितं दीपपर्वावलोक्यं
कोरोनाया भवति विलयो भाषते मानसं मे॥१०७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भार्ये चास्यां नवकिरणभाभासितायां निशायां
खेऽसौ दृश्यो ननु घनसमे चावगुण्ठे निलीनः।
पश्यन् भीतोऽभ्रमदिह मुहुर्लज्जमानः सुधांशुः
दीपैर्मन्ये विजित इव वा चन्द्रमाः क्लान्तकान्तिः॥१०८॥

कोरोनाया विततहृदयं स्फालयद् दीपपर्व
सन्तप्तानां मनसि विपुलं सम्बलं सन्ददानम्।
विस्फोटैस्तां जयति दनुजां दीपकान्त्या त्वलक्ष्यां
देशो भर्तर्विपदि सुखशान्तिप्रदाताद्वितीयः॥१०९॥

जेष्यत्येतत् प्रशमनकरं भारतं नः पवित्रं
कोरानां संसरणचतुरां दानवीं दाहयित्रीम्।
सङ्गच्छध्वं दिशति मनुजान् ऋक्श्रुतिर्यत्र मन्त्रैः
तस्मिन्नस्मिन् दनुजतनयायाः पते नैव वासः॥११०॥

मालिन्यं या हरति सततं पावनी दिव्यगङ्गा
देशेऽस्माकं सुखदसलिला पोषयन्तीव सर्वान्।
माता पुण्या वहति यमुना तोषयन्तीव जीवान्
कावेरी वा मनुजसुखदा मानवान् रक्षयन्ती॥१११॥

काशी काञ्ची महितमथुरा तीर्थराजप्रयागोऽ-
योध्या भास्वद्-रघुवरमनोहारकश्चित्रकूटः।
दृश्या लोके विलसति हरिद्वारमेतत् सुरम्यं
तं देशं स्वं नमति भुवि को भारतीयो न मुग्धः॥११२॥

राराज्यन्ते विभवविरताः साधवो दिव्यनेत्राः
कोरोनायाः शमनविषये दत्तचित्ताः स्वदेशे।
सर्वे भार्ये विपदि तरसा नाशयिष्यन्ति नूनं
कोरोनां, त्वं निवस सदने मा शुचः शोकहर्त्रिं॥११३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दुर्गावत्या विपदि तनयो मुक्तचिन्तस्तृतीयः
हृत्संस्थाया रघुवरप्रियायाः सुनीते सखेदम्।
प्रायो भार्ये परहितरतः सालिकस्यात्मजोऽहं
नो शोचामि प्रभुरिह शुभं यत् प्रकुर्याद् वरन्तद्॥११४॥

रक्ष्या रम्या सुतनु मटिहानी प्रिये जन्मभूमिः
शाण्डिल्यं नः प्रसरतु सदा गोत्रमेतज्जगत्याम्।
कोरोनासङ्क्रमणजभिया चण्डिकां पूजयेस्त्वं
शीघ्रं गेहं तव हृदयजिल्लप्स्यते हारविन्दः॥११५॥

वामा वध्वो गृहगुरुजनान् सेवनीयान् न मत्ताः
शुश्रूषन्ते धनिजनसुता भर्तृभारस्वरूपाः।
प्रोक्ता एताः प्रथितकविना कालिदासेन व्याधि-
रूपास्ताभ्यस्त्वमसि गृहिणीभिर्नमस्या प्रियाङ्गि!!११६॥

धौतं शुक्लं निजकररुहेणेह संक्षाल्य प्रीत्या
वार्द्धक्ये यो जनकहृदयं प्राविशन् सेवतेऽस्याम्।
भूमौ कीर्तिस्सरति विमला चन्द्रभावत् प्रशस्ता
सेवा शीघ्रं फलति विहिता सादरं वेत्सि हृत्स्थे॥११७॥

पुत्री लोके तनयपदवीं प्राप्नुवन्ती स्वकृत्यैः
पित्रोर्दुःखं भुवि गुणवती दन्दहीति प्रजाने।
भार्ये प्रेक्षे त्वयि पतिरहं दक्षतां योग्यताञ्च
कोरोनाया दमनसमये मोमुदीति मनो मे॥११८॥

अद्याहम्भोः सपदि गतवान् वित्तमाहर्तुकामः
कोषागारं बत सुनयने हट्टदेशं तु शून्यम्।
अद्राक्षं सम्पिहितमखिलं यत्र कोलाहलं वै
पूर्वं तत्रारमति विपुलं प्रेक्षणीयं स्म मौनम्॥११९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शृण्मो याता युवतिजनभूषाविरावं सुरम्यं
मध्याह्ने सञ्चरणमनसो वस्तुनां च क्रयार्थम्।
यत्रैतद्धा चरति विपदां सुन्दरीवान्धदृश्या
कोरोनैषा स्वरविरहिता मौनिनां मौनरूपा॥१२०॥

श्रीमन् दिल्ल्यां दनुजतनयास्सारयन्तः करोनां
केचिच्चैते व्यपगतभया हा हदन्ते बहिर्ये।
ते संशिक्ष्या मनुजहतकास्ताडनादिप्रदण्डैः
लोके सम्यङ्निदधति पदं दण्डिता नापरे वा॥१२१॥

रात्रौ कश्चित् शृणु मृतमतिर्यावनोऽसौ चिकित्सा-
गेहाद् यातः क्वचिदपि शुभे चौरवत् वज्रमूढः।
कोरोनासङ्क्रमितकृतकं सर्वकारोऽवलोक्य
क्षुब्धो जातो द्रुततरगतिर्लब्धवांस्तं तु काले॥१२२॥

इत्थं देशे प्रचलति सतां मानिनां दीर्घवेणि!
स्वातन्त्र्यं किं किमहमधुना व्याकुलो वा वदेयम्?
मा भूर्भर्तः! व्यथितहृदयो कालचक्रेण खिन्नः
कालं कालो जयति तु महाकालमेवं भजस्व॥१२३॥

वर्षं यावत् सकलभुवनं शून्यतां सन्दधानं
स्वं स्वं कार्यं व्यपगतधनं क्षीणशक्ति प्रदग्धम्।
कोरोनासङ्क्रमणनिहतं कर्तुकामं न शक्तं
दग्धो वृक्षो जगति फलदो रोहति प्रायशः क्व?॥१२४॥

कूजन्तीयं शमयति मुहुः कोकिला चाम्रवृक्षे
सन्तापं मे मदनजनितं सान्त्वयन्ती नवोढा।
पुष्पाणां संसरति मधुरो हा परागः सरागं
यास्यत्येष प्रथम इह नौ सेवनीयो वसन्तः?॥१२५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चैत्रे शुक्ले कविकुलवटोः प्रेर्यमाणस्य वाण्या
कोरोनाख्यं मधुरशतकं जातमस्तीति पूर्णम्।
किन्तु प्रीतः पुनरहमिदं वर्द्धयामि प्रियाग्रे
सद्भावानां किमिह रुचिरे दुर्लभं जीवलोके??॥१२६॥

स्वामिन् क्षेत्रे विलसति सुखं पक्वगोधूमराशिः
ग्रामे ग्रामे कृषकवनिताकर्षणं वर्द्धयन् हा।
दृश्यं प्रायः कनककपिशं श्रूयते शस्यजातं
कोरोनाया व्यथितकृषका नो भयाद् यान्ति चेतुम्॥१२७॥

गावश्श्वानो महिषपशवः पक्षिणो वानरा वा
सन्दृश्यन्ते कतिपयदिनेभ्यो विपन्ना जगत्याम्।
घासं चान्नं न हि समयतस्ते लभन्ते करोना-
रुद्धा दूना विपदि निखिला जन्तवो दूयमानाः॥१२८॥

गेहे संस्था अपि कतिपये स्वादुलोभेन भार्यां
सम्भाषन्ते मधुरमशनं देहि पूर्णं त्रिवारम्।
भोजं भोजं सरति विपुलं चोदरं देहकोशात्
मन्ये लोकः सपदि भविता पीवरोऽदर्शनीयः॥१२९॥

श्रीमन्मन्ये महितनृपतेः पूर्णतामेति वाक्यं
हे स्वामिंस्ते त्वरितगमनं चिन्तयेऽहं सहर्षम्।
लब्ध्वा यानं कथमपि भवानीश्वरं वन्दमानः
सम्प्रस्थानं सदननयनः श्वः करोतु ब्रवीमि॥१३०॥

श्रुत्वा त्वां हे सुमुख तनयं मातृका पितृवर्यः
स्पृष्ट्वा चास्यं व्यथितजननी तोषमायास्यतो नौ।
शुष्को वृक्षो घनजसलिलं ग्रीष्मतप्तस्तु लब्ध्वा
त्यक्त्वा तापं दिनकरकृतं विस्मरन् मोदते नो?॥१३१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

किं सम्भाषै द्रवति हृदयं वक्तुकामस्य कान्ते
श्रीमान् मोदी धृतजनरतिश्चिन्तयित्वैव कार्यम्।
कोरोनासङ्क्रमणसरणं वर्द्धते सुस्थिरं वा
सर्वं सम्यग्जनहितधिया निर्णयं दास्यतेऽयम्॥१३२॥

राज्यैः कैश्चित्कृतमयि शुभे पाक्षिकः पूर्णरोधः
पञ्जाबाख्यैः श्रुतमिदमितः कर्णभेद्यन्तु वृत्तम्।
दिल्ल्या मन्त्री वचनधनिको केजरीवालनामा
कर्ता भव्यं विपदि हितकृत् किं प्रिये नैव जाने॥१३३॥

सत्यं देशे सरति सुरसारूपिणी राक्षसीयं
कोरोना हे वर प्रतिपलं लोक्यते मृत्युवृत्तैः।
जाता सङ्ख्या ह्युपदशशतं भारते रोगिणां मां
तस्माच्चित्रे कतिपयदिनान्याहता प्रेक्ष्य नन्द॥१३४॥

सर्वं जाने पतिवर हृदा नेह भाषे तु यन्त्रे
गच्छेच्चित्तं तव विकलतां हा निशम्यार्द्रनेत्र।
पूर्णो रोधः सकलजनतारक्षणार्थं विचिन्त्य
श्वोऽयं वक्ताविचलितमनाः शासको दुःखकाले॥१३५॥

दूरस्थानां मनसि न भवेद् दुःखलेशोऽपि कश्चित्
तादृग्भाष्यं मुनिजनमतं संश्रुतं प्राणनाथ।
इत्थं मत्वा हृदयवसतिस्ते न भाषे यथेच्छं
भार्यामोदं भुवि वितनुते नैव शोकं कदापि॥१३६॥

भग्नो रोषो भवतु दयिते श्वस्तदाहं स्वगेहं
द्रष्टुं शीघ्रं गगनशकटं वायुयानं तु लब्ध्वा।
आगन्तास्मि प्रियकटितटे पाटलीपुत्रमेव
गन्त्र्या तस्मात्तव विरहितो वा पदातिः प्रसन्नः॥१३७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्मारं स्मारं विधुमुखसुखं ते प्रफुल्लं मदन्त-
श्चेतः प्रीत्या भ्रमति ललने भ्रामरीभूय नूनम्।
नाहं वेद्मि प्रतिहतमतिर्दिव्यकान्ते वसन्ते
कोरोनैषा विरहकरणं वर्तते शक्तिहन्त्री॥१३८॥

रात्री चेयं प्रिय वितनुते वेदनां वह्निरूपां
हृन्मे मन्ये ज्वलति नितरां सत्वरं तूलराशिः।
प्रातर्मोदी महितनृपतिर्दास्यतीवेति कालं
गन्तुं गेहं विरहविधुराणां मनो मे ब्रवीति॥१३९॥

तस्मिन् काले गणय भगवन् नो व्यथां लभ्यमानां
पक्षी मुक्तो विततगगने डीयते हस्तमुक्तः।
तद्वद् याहि द्रुततरगतिर्वायुयानेन सद्यो
यान्ति प्रायो विरहमथिताः सत्वरं येन केन॥१४०॥

दृष्ट्वा भार्ये हसति शयने मां पतन्तं विपन्नं
वार्तं पृच्छन्तमिह सुचिरं हार्दिकं शाययन्ती।
एषा निद्रा नयनहरणी त्यज्यते चार्द्धरात्रौ
प्राप्ते मोक्षे त्यजति सदनं को न लोकं विमुग्धः॥१४१॥

कुर्यान्मोक्षं यदि जनहतिर्मन्यतां सत्यवाक्यं
नो कुर्याच्चेत् तदपि जनतापीडनं कल्पनीयम्।
कोरोनाया गरलभरितैर्मारितैर्ना शरैर्हा
कश्चिल्लोके श्वसिति मनुजो वैद्यकै रक्ष्यमाणः॥१४२॥

ब्रूया अम्बामनुजमचिरं पूज्यमानं प्रसन्ने
वृद्धं भीरु प्रणयवचनं जन्मदातारमेव।
रात्रिं चैनां गमय विपदां नाशिनीं मोक्षदात्रीं
शम्भुं शीघ्रं भज गिरिजया राजमानन्तु साकम्॥१४३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दास्ये प्रीता कनकखचिते कंसपात्रे सदुग्धं
पक्वान्नं हे वर खगकुले काकशावाय तस्मै।
काकायास्मै तरुषु शयनं यः करोति प्रियायाः
दूरं यातो मम तु करयोर्दत्तमन्नं ह्यवाप्य॥१४४॥

गावो वन्द्या विमलचरणा वेदमन्त्रप्रपूता
विप्रा द्वित्राः किल सुदिवसे सेवनीयाः सहर्षम्।
त्वय्यायाते सुखदभवनं नेत्रकान्ते मयात्र
लब्ध्वा प्राणान् जगति सुजनाः पूजयन्ते प्रपूज्यान्॥१४५॥

ग्रामस्थोऽसौ गिरिवरसुतापार्वतीशस्तडाग-
कूले शम्भुस्त्वशुभहतकोऽभ्यर्चनीयोऽस्ति भर्तः।
सिद्धं सर्वं भवति कृपया चिन्तितं यस्य कार्यं
त्वय्यायाते तव सुगृहिणी पूजयिष्ये तु देवान्॥१४६॥

श्रोष्यामो हे सुभग सदने सत्यनारायणस्य
सानन्दं तां मनुजसुखदां श्रीकथां मोददात्रीम्।
काले षष्ठीव्रतमपि पते धारयिष्यामि भार्या
पत्यौ प्राप्ते द्रवति कमना विप्रलब्धा नवोढा॥१४७॥

प्रोक्तं पित्रा गुरुवरमुखात् श्रोतुकामः पुराणं
मात्रां साकं निजसुतनयं प्राप्य गेहे मुहूर्त्ते।
थावेदेवी कुसुमनिचयैरर्चनीयास्ति सर्वैः
लब्ध्वा लोके मुदितजननी किं विधत्ते न पुत्रम्?॥१४८॥

ग्रामे भोजः सपदि भविता प्रोच्यते पितृवर्यै-
रित्थं श्रुत्वा मनसि भगवन् जायते सम्प्रमोदः।
प्रायो लोको रचयति मुदा बन्धुभिः कथ्यमानो
दिव्याभोगैर्मधुरमशनं सिद्धकामः प्रजार्थम्॥१४९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

होराः पञ्च प्रणयचतुर प्राणनाथाद्य शिष्टाः
यावत् तावत् त्वमपि मनसा भावयेर्देववृन्दम्।
स्नात्वा चार्चामहमपि गृहे कर्तुकामास्मि शीघ्रं
काङ्क्षा पूर्णा भवति कृपया मन्यते देवतानाम्॥१५०॥

कोऽयं शापो ग्रसति सततं हे मनोज्ञे प्रिये नौ
सञ्जानीषे यदि वद हृदा धर्मशीले पतिं माम्।
यावत्कालः सरति निकषा पूर्णतां तावदेव
श्रीमान् मोदी निजमतमहो सारत्येव चाग्रे॥१५१॥

प्रस्थातुं हा मुदितमनसा सज्जितोऽहं वराको
मूढः प्रातर्वचनमहहा ज्ञातवान् श्राव्यमाणम्।
वृक्षान्नीचैरिह निपतितं मानसं मामकीनं
किं वा भाषै वद सपदि मां दूयमानं सुनीते?॥१५२॥

हृच्छोकं त्वं शमय समये संसृतेऽस्मिन् विषाणौ
यास्यन्त्येते गणितदिवसा प्रीयतोर्नौ द्रुतं भोः।
तावद् भूयो गणय कुसुमैर्भावयन्ती विभावान्
यावद् दिल्ल्यां विरमति पतिस्तावकोऽयं वराकः॥१५३॥

वक्तव्या मे शृणु सविनयं कोटिशः श्रीप्रणामाः
मात्रे पित्रे त्वयि पुनरिदं चार्प्यते दीर्घभारः।
कोरोनासङ्क्रमणवचनै रक्षणीयाः प्रवृद्धाः
पक्वं शीघ्रं निपतति फलं स्वल्पवायुप्रवेगैः॥१५५॥

सुप्रातं मां मृदुलसचिवे पद्मगन्धेऽनिलोऽयं
सस्नेहं सन्नुदति पवनश्शीतलश्शान्तवेगः।
ग्रामे वासो भवति रुचिरः काकशावादिरावैः
व्यूढोरस्को दधिघृतमहो ग्रामजोऽनष्य मत्ति॥१५६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सौहार्दं मे हरति हृदयं पाकभार्ये सदैव
दृश्यन्ते ते प्रियशुकवकाः ग्रामभूमौ विचित्राः।
केशाकेशि प्रहरणरता मोहयन्तीव चेतो
दण्डादण्डि प्रतिदिनमये लोक्यते ग्राम्यलोके॥१५७॥

ग्रामे वासः किल न सुखदो मन्यते साधुसद्भिः
स्वल्पः कैश्चित् प्रिय कथमये ज्ञायते नैव मूलम्॥
जिज्ञासां मे शमय भगवन् दर्शनीयस्वरूप
ग्रामेवासाद् भवति जडता ग्राम्यदोषस्तु हेयः॥१५८॥

दासीपुत्राः परममधुरं भाषमाणाः समोदं
मुष्टामुष्टि प्रतिगृहमये कारयन्ते प्रयुद्धम्।
दीयन्ते हा विषरससमा गालिका ग्रामवीरैः
तस्मादुक्तं कतिपयबुधैर्ग्रामवासो न कार्यः॥१५९॥

पीत्वा मद्यं विचरति जनो भाषते चापशब्दं
सिस्नासुर्नो सलिलमहहा स्प्रष्टुकामः प्रभाते।
ताम्बूलास्यो रुचिरसदने वा तमालं च भुक्त्वा
थुत्कुर्वाणो भ्रमति तदहो रोचते नैव मह्यम्॥१६०॥

ग्राम्या नार्यो निजनिजवधूं दूषयन्तीव रागात्
संस्था सर्वाः क्वचिदपि पते वोपविष्टा विशिष्टाः।
मध्याह्ने हा कृतशिवसमर्चा गृहिण्यो विदूनाः
वेधस्सृष्टिर्भुवि गुणवती योषितां प्रेक्षणीया॥१६१॥

सञ्चोर्यन्ते बहुनिशिचरैः प्रायशो वैभवानि
शालाबद्धाः अधनपशवो वा ह्रियन्ते नृचौरैः।
खट्वारूढा निजनिजकृतिं हन्त हित्वा विदग्धा
ग्राम्याः केचिल्लपनचतुरा यापयन्तीव कालम्॥१६२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पायं पायं प्रतिपलमिमे धूमवर्तिं मुखाग्रे
वा मुञ्चन्तो निदधति पदं दूषयन्तीव वायुम्।
व्यर्थालापे निखिलदिवसं ये नयन्तीव ते मे
रोचन्ते नो कथमपि नराः ग्रामवीरा महान्तः॥१६३॥

भार्या गेहाद् वदति मुखरा प्रेरयन्तीव गन्तुं
हट्टं क्रेतुं प्रियपतिजनं द्यूतमग्नं परं सः।
नायातीति प्रणिहितमनाः शाकमानेतुमेव
दर्शं दर्शं स्रवति नयनात् वाष्पमेनं सुपत्नी॥१६४॥

ग्राम्याः पूज्याः परमिह शतं सन्त्यसङ्ख्याः प्रवीणा
भाषन्ते ये रघुवरकथां भारतं वेदवाणीम्।
नीतिज्ञास्ते मुनिजनसमाः शिक्षयन्तीव सर्वान्
तस्माच्चित्तं मम तु रमते काव्यशास्त्रादिलीनम्॥१६५॥

शुद्धं दुग्धं मिलति सुभगे शुद्धशाकं वराकि
शुद्धं तोयं सुखदमनुजाः सम्मिलन्तीव मन्ये।
आम्रं पक्वं तरुषु समये हे प्रिये प्राप्य चेतो
ग्रामे नृत्यद् रमत इव मे दुर्लभं राजधान्याम्॥१६६॥

बाल्ये स्नातं सरसि मधुरं वा गतं चागतं मे
मित्रैस्साकं क्वचिदपि शुभे वा भ्रमार्थं तदत्र।
मन्ये दृष्टं रचितनगरे दुर्लभं कृत्रिमं किं
दातुं शक्तं भवति सुभगे वा सरो वा वनं वा॥१६७॥

मान्ये ग्रामो भुवनमहतां सेवनीयो मतो वै
यत्रायान्ति प्रथितयशसः साधवो दिव्यवाचः।
भिक्षां लब्धुं ह्यमृतवचनं दातुकामाः सुपुण्यैः
तस्माद् ग्रामो मम तु हरते मानसं सत्यवक्तुः॥१६८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भर्तश्चर्चां सुखयति मनो मामकं तावकं वा
कोरोनासङ्क्रमणसमयं यापन्तीव कान्त।
रीत्या प्रीत्या नय तु समयं चानया प्रार्थये त्वां
स्वस्थो लोको भवति नितरां वार्तया भोज्यपानैः॥१६९॥

धृत्या नित्यं सदनगुरवः सेवनीयाः समोदं
रोषो नाहो कथमपि रुषा स्वप्नकालेऽपि दर्श्यः।
सेवन्ते ये जगति महितान् मानवास्ते प्रवृद्धा-
नायुर्विद्या बलमिह यशो जीवने संलभन्ते॥१७०॥

कालो यातो बहुनिगदतोश्चावयोः सुप्रभाते
उष्णो जातो मम प्रियतमे कैतवो दूरभाषः।
काव्यं कर्तुं लषति मुदिता लेखनी वर्णनाढ्या
सायं रात्रौ कुरु प्रियकथां ग्रामजां श्रोत्रपेयाम्॥१७१॥

बान्द्रायां ह्यः सपदि भवता लोकितं निन्दनीयं
कृत्यं भर्तः! कुजनरचितं येन दग्धं मनो मे।
कोरोनासङ्क्रमणसमये हीदृशं पादितं यैः
दण्ड्या नूनं प्रबललगुडैस्तेऽधमाश्शीघ्रमेव॥१७२॥

दिल्ल्यां कैश्चित् त्वसितयमुनायास्तटे हन्त साय-
मायाता ये विकलमनुजाः क्षुत्तृषार्ता असङ्ख्याः।
भोज्यं येषामुदर इह नो वर्तते ते विपन्ना
वाञ्छन्तीव व्यथितमनसः के न गन्तुं स्वगेहम्॥१७३॥

मन्ये देशे सरति सहसाऽकल्पनीयो विषाणुः
कोरोनाख्यो निखिलजनताघातको दूरगामी।
किन्त्वेते ये सदनपिहिता अन्नशून्योदरास्ते
प्राणान् योगैर्वद सनयिके धारयेयुः कथं हा॥१७४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सङ्ख्या देशे यदि सुमहती वर्तते भीरु कान्ते
मन्ये सत्यं तदपि वचनं तावकं हार्दिकं तत्।
कुर्वन्त्वेते कुनयकुशला नायका दाहनोत्काः
कोरोनाया विपदि किमियं राजते राजनीतिः?॥१७५॥

धीमन् वाच्यं न हि कुसमये वाक्यमेतत्कथञ्चित्
सद्भिर्मान्यं तव न वचनं मे मनः कर्षतीव।
अस्मिन् काले यदि कतिपये लङ्घयिष्यन्ति रेखां
कोरोना किं सपदि जनतां मारयिष्यत्यहो नो?॥१७६॥

कञ्चित्कालं कथमपि जना दुःखिनो गेहबद्धाः
कारावासं निजगृहमिमे सादरं हन्त मत्वा।
लब्ध्वा भोज्यं क्वचिदपि बहिस्सर्वकारप्रदत्तं
कोरोनां ते गिरिशकृपया केचिदेते जयन्तु॥१७७॥

सर्वे ग्रामे चतुरमनुजा नाटयन्तो बुभुक्षां
गोधूमं च द्विदलमधुना तण्डुलान् वा लभन्ते।
गत्वा चैतेऽपिहितविपणौ विक्रियन्ते धनेन
कोऽयं ब्रूते मिलति किल नो भोजनं भारते नः॥१७८॥

एते केचित्सदनगमनं पीडिताः कामयन्ते
सम्प्रार्थ्यन्ते सरसवचनैरन्नपानप्रदानैः।
गेहं गत्वा किमिह सकलाः सारयिष्यन्ति रोगं
तस्मादेवं गणितदिवसान् यापयन्त्वत्र भर्तः!॥१७९॥

यो वा कश्चित्कुपितमनसा लक्ष्मणाख्यां स रेखां
विज्ञो मूढः परमबलवान् लङ्घयिष्यये ना।
तं नेतुं श्रीयमभवनतो हागतः प्राणहर्ता
सद्यः प्राणान् निजकरयुगे नेष्यतीति बलिष्ठः॥१८०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भर्तर्वार्तन्तव कुशलतां मातुलानी मदीया
वारंवारं शशिमुख सुखं पृच्छतीवेति दूना।
प्रोक्ता पूज्या मम सविनयं वर्तसे त्वं प्रसन्नो
दिल्ल्यां रुद्धः सुखदभवने भाषसेऽनारतं माम्॥१८१॥

आचार्ये त्वं जगति निपुणा भाषणे शुद्धबुद्धे
वक्तुं पूर्णं मधुरमधुरं लक्ष्यसे लोकरीत्या ।
ज्ञानैर्नित्यं जयसि विनते मां पतिं दूरभाषे
भार्या भर्तारमिह वचनैः कं जयत्येव नेह?॥१८२॥

साङ्ख्ये दुःखत्रितयमतुलं कापिलोक्तं पुरा यद्
आध्यात्माख्यं जगति युगलं मानसं दैहिकं तत्।
भूतेभ्यो यद् भवति किल तद् भौतिकं चाधिपूर्वं
ताभ्यां पश्चान्मुनिवरमतं दैविकं चाधिपूर्वम्॥१८३॥

पूर्णाकाङ्क्षा भवति यदि नुर्मानसं दुःखमेतत्
श्लेष्मादीनां विषमविषयाज्जायते दैविकाख्यम्।
आभ्यां मुक्तः क इह भवता प्रेक्ष्यते शास्त्रवीर
दुःखेभ्यो को भवति मनुजो मुक्त एवात्र लोके॥१८४॥

भूम्याकाशानलजलकृतं कुग्रहेभ्यः समुत्थं
यद्यल्लोके व्यथयति जनान् दैविकं यद्धि घुष्टम्।
दुःखं साङ्ख्ये कपिलमुनिना सम्मतं तत्तृतीयं
ब्रूहि श्रीमन्कमिह सुजनं मुञ्चते दाहशीलम्॥१८५॥

प्राप्तुं मोक्षं विपुलजगतः सेवनीयं विवेक-
ज्ञानं देव! प्रतिपलमये स्मारयामि प्रिया ते।
औदासीन्यं त्रिगुणरहितो ज्ञानवान् ज्ञस्तटस्थो
लीलां लोके प्रकृतिललितां लोकते साक्षिभूतः॥१८६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

धर्मैर्जीवो लभत इह वा चोर्ध्वयात्रामधर्मैः
पातः प्रोक्ते जगति चरतः पापवृत्तेरथो वा।
सत्कार्यं यः कृतिकरणयोरद्भुतं वेत्ति बोधं
सिद्धान्तेन ष्शमितमतिर्वेत्ति साङ्ख्यञ्च योगम्॥१८७॥

छायापत्त्या भवति पुरुषो भोगकर्ता न साक्षात्
सिद्धान्तोऽयं परमविमलो मन्यते कापिलाख्यः।
भोक्ता ज्ञोऽयं भवति मनुजा व्यर्थमेवालपन्ति
द्रष्टा साङ्ख्ये विकृतिविरतः केवली निर्गुणश्च॥१८८॥

चार्वङ्ग त्वं हरसि हृदयं शास्त्रबोधप्रदानैः
साधु ज्ञानं त्वयि तु रमतेऽब्धौ यथा वीचिनृत्यम्।
कोरोनाख्यं कपिलमुनिना दैविके गण्यते किं
दुःखं येनागणितमनुजा मृत्युमेवाश्रयन्ते॥१८९॥

सत्यं भर्तः! मतमिदमहो तावकं सिद्धशास्त्र
श्रावं श्रावं नयनमधुना स्पन्दते दक्षिणं मे।
नेत्रं निद्रा स्पृशति भगिनी हे पते याह्यहं किं
रात्रौ वार्ता दहति नितरां सेवानीयां सुनिद्राम्॥१९०॥

विन्दे ज्ञानं श्रुतिजमहहा दुर्लभं दुःखकाले
सम्प्रोक्तं यन्मुनिशतमतैः साङ्ख्यसूत्रेषु बद्धम्।
दिव्यं चैतन्मम तु पवते श्रीस्वरूपं मनोज्ञं
सञ्जाता त्वं गुरुरिव शुभे चोत्तमास्ते विचाराः॥१९१॥

वेदान्ते किं तव रुचिरये ज्ञातुमिच्छा मदीया
चार्वाकेऽपि प्रियशुचिमुखे कीदृशी न्यायशास्त्रे।
मीमांसायामपि च रमते तावकं चित्तमेतत्
गार्गीकल्पे वितर विपुलं बोधराशिं यथेच्छम्॥१९२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वल्पं स्वल्पं विदितमखिलं श्रीगुरूणां मुखेभ्यः
काश्यां स्थित्वाऽध्ययनसमये विश्वविद्यालयेऽहम्।
हिन्दूनाम्ना महति महता स्थापिते मोहनेन
कीर्तियस्य प्रसरति सदा चन्द्रिकावत् सुनीते॥१९३॥

किन्तु त्वं मां जयसि वचनैर्निर्मलैस्साररूपैः
कोरोनासङ्क्रमणजनितं दुःखकालं हरन्ती।
इत्थं प्रातर्वद शुचिमुखि प्रार्थये प्रीयमाणो
भार्या लोके मिलति गुणिनी यस्य कस्यापि भाग्यैः॥१९४॥

वर्ते स्वामिन् कथमपि तु नो पण्डिता धर्मपत्नी
नाहङ्कारो मनसि च नरीनृत्यतेऽज्ञानजन्यः।
लब्धो भर्तस्तव सुमुखतः शास्त्रबोधस्समस्तोऽ-
लङ्कारोऽयं विदित इह यस्तद्गुणः काव्यशास्त्रे॥१९५॥

नाहं भार्या प्रलपनरता नैव वा पीडयित्री
श्वश्रूहन्त्री न खलु कुलटा नापसंवादलीना।
श्वश्रूवादीनां मधुरवचनं या तिरस्कृत्य याति
शिष्टाचारं ह्यनुसरति नो सा वर्धूर्नैव भर्तः!॥१९६॥

सूते भार्या कलहमधुनाहर्निशं या गृहेषु
भर्तारं वाश्रयत इह वा दुश्चरित्रापवित्रा।
पित्रादीनां भुवि न कुरुते सेवनं श्रीकुलघ्नी
स्वाच्छन्द्यं हा व्यवहरति वा जीवने नापि साहम्॥१९७॥

यस्याश्चित्ते निजपितृगृहं केवलं प्रेक्षते वा
स्थानं स्वल्पं पतिगृहकृते दृश्यते नैव नूनम्।
सेवाऽभावः परुजहृदयेऽकल्पनीयस्सदैव
तस्या नाम्ना विलपति पतिर्बान्धवोऽमोदमानः॥१९८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोनासङ्क्रमणसमये जायते सम्परीक्षा
सत्पुत्राणां सुखदगृहिणीनां तथा मान्यवध्वाम्।
सन्मित्राणां कवनकुशलानां प्रियाणामरीणां
भार्याणां वा जनकजननीबान्धवानां सतां वा॥१९९॥

या वा वध्वः पतिजनमतं सादरं नाश्रयन्ते
तास्सम्मूढा जगति सततं न त्रपन्ते विलज्जाः।
लोके निन्दामहितपदवीं प्राप्नुवन्त्यश्चिरण्ट्यः
कोरोनावन्निखिलमनुजान् नाशयन्तीव काश्चित्॥२००॥

शास्त्रार्थो नौ विरमतु शुभे भद्रबुद्धे विशिष्टा
लुप्यन्तीमाः कुलपतनया भारताद् विश्वतो वा।
सावित्रीवज्जनकदुहिता दुर्लभा हा वरेण्याः
सम्प्राप्यन्ते पुनरपि मुहुस्त्वं सुनीते तथासीः॥२०१॥

कालः सर्पेदनुदिनमयं वार्तया शुद्धवृत्त्या
सच्चर्चायां विमलचरिते शास्त्रसूक्त्यादिभिर्वा।
सार्थालापश्रवणविकलं श्रोत्रयुग्मं सुपाके
व्यर्थालापे कथमपि पदं श्रोतुमेतीव नो मे॥२०२॥

केचिन्मग्ना लपनधनिका दूरभाषे प्रभाते
सायं रात्रौ रचितकवितां श्रावयन्तीव नव्याम्।
कोरोनायाः सरसकवनं चर्करीतीव सर्वः
श्रुत्वा भूयो हृदि चरति मे स्पर्द्धमानो विभावः॥२०३॥

मध्याह्नेऽहं मधुरकवितां फेसबूके नवीनां
दातुं कञ्चित्समयमतुलं चार्पयामीव मुग्धः।
दूरात्प्रायो मम तु सुहृदो दत्तचित्ताः करोना-
काव्यं पीत्वा सपदि निखिला मन्त्रमुग्धा भवन्ति॥२०४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

केचिद् व्यर्थं मम सुसमयं मित्रभावेन नित्यं
हृत्वा द्वित्राः सरसरचनारोधिनस्सम्भवन्ति।
कोरोनाप्रव्यथितसुहृदां वृत्तजातेऽवशिष्टं
कालं भार्यारहितमखिलं यापयामीव नैजम्॥२०५॥

अद्य प्रातः रघुपतिशरैर्मारितो दानवेन्द्रः
सङ्ग्रामेऽयं दनुजकुलपो मैथिलीदुःखदिग्धैः।
नारीं योऽसौ जगति हरते रौत्यहो हन्यमानः
पातिव्रत्यं त्वनलसदृशं भृज्जते वा सुरेन्द्रम्॥२०६॥

कन्यानां हा भवति बहुशो भारते या हृतिर्वा
मार्यन्ते वा विभवमतिभिर्मानवैः कामिवृत्तैः।
दर्शं दर्शं दहति हृदयं दानवैः कृत्यमेतत्
हन्तव्यास्ते सपदि भुवने रक्षणीया न केऽपि॥२०७॥

दामिन्या ये हरणमहहा राक्षसाः येऽप्यकुर्वन्
दिल्ल्यां दृष्टं निखिलमनुजैः दुष्कृतं निन्दनीयम्।
न्याये चास्याः विगतदशकं यापितं सर्वकारै-
रित्थं श्रुत्वा नयनसलिलं जृम्भते प्यायमानम्॥२०८॥

भर्तः! कृत्यं मनुजविहितं लोक्यते विश्वमञ्चे
कोरोनेयं भुवि मृगयते देवसृष्टा किलैषा ।
नूनं मान्या प्रकृतिविकृतिः साङ्ख्यराद्धान्तसूता
हन्त्री कापि प्रिय जगदिदं लुम्पमाना नवीना॥२०९॥

नष्टा भूमिर्विपिनमखिलं जन्तवः पक्षिणो वा
वृक्षा नद्यो विमलसलिलाः खं च वायुः सुगन्धिः।
यज्ञो भव्यो जगतिबहुभिर्विस्मृतः पूर्णविज्ञैः
विध्यत्येतत् हृदयमधुना मानवानां कुकृत्यम्॥२१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चार्वाकानां मनसि सुपते केवलं हा पिपासा
वित्तादीनां प्रतिपलमियं वर्द्धते पाशयन्ती।
धर्माधर्मप्रमतिमननं वञ्चकं वा पुराण-
माभात्येषां मुनिबुधसतां निन्दकानां तु चित्ते॥२११॥

शिष्टाः केचित्परमविदुषो माननीयान् कवीन्द्रान्
मञ्चे नत्वा तदनु भवने निन्दनार्थं प्रवृत्ताः।
आत्मानं ये विबुधमहितं मानयन्तः सभायां
साहित्यस्य सरसमधुरां नाशयन्तीव रीतिम्॥२१२॥

विज्ञः कश्चिद् भुवि न मनुजो मादृशो विश्वमञ्चे
काव्यं हृद्यं रचयति जनो मत्समानश्च कोऽत्र?
वक्ता नान्यो जगति ललितो वर्तते गल्भवाचो
ये वा के स्युः मम न हृदयं ते स्पृशन्तीवति जाने॥२१३॥

लब्धुं मानं यदि स यतते काव्यकृत्सर्वकारात्
पादौ चुम्बत्यवहितमनाः काव्यतत्त्वाद्विमुक्तः।
कीर्तिस्तं नो स्पृशति कुकविं क्रीतवेश्येव रागात्
किं वा लोके प्रभवति शुभे कज्जलैः कीर्तिरेखा?॥२१४॥

कोरोनाया विकटसमये दानवेन्द्रा महान्तः
दानं दत्वा जनहितरताः दर्शयन्ते न चित्रम्।
किन्त्वेते ये कृपणकृपणाः स्वल्पदानं च कृत्वा
नीत्वा चित्रं निदधति पदं लोकलोकान्तरेजु॥२१५॥

सत्यं भार्ये तव सुवचनं ज्ञानदं ज्ञानरूपे
मन्ये भर्ता विनतशिरसा तावकं क्षोभमानः।
हन्मे नव्यं वयति रुचिरं काव्यकल्प्यं वितानं
यस्मिन् केचित्प्रचितकवयः आश्रयिष्यन्त एव॥२१६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सन्देशं ते प्रतिदिनमयं यन्त्रतन्त्रेण भर्तः
श्रावं श्रावं कुरुत इव नः सर्वकारस्तु यत्नम्।
ये वा केचित् निजनिजगृहाद्दूरसंस्थाश्च दूनाः
तानानेतुं सपदि ददते सादरं यानमेवम्॥२१७॥

पूर्णः कालो विरहजनितश्चावयोरद्य वृत्त-
पत्रे दृष्ट्वा हृदयकुसुमैरर्घ्यदानं प्रकुर्वन्।
शास्त्रे भर्त्रे परमविदुषे मोदिने धीमतेऽहं
लोकिष्ये त्वां मिहिरगमनात्प्रागये द्वारसंस्थाम्॥२१८॥

इत्थं चोक्ता मनसिजसुखं भावयन्ती सहर्षं
द्वारोपान्ते विहितनयना वेपमानाङ्गयष्टिः।
लब्ध्वा काले स्वपतिमचिरं चुम्बितास्या स्ववाष्पं
पत्युः पाणी धृतवती वधूः कल्पितेयं सुनीता॥२१९॥

नत्वा ज्येष्ठाननुजमनिशं सुस्तनीं सेवमानः
काव्ये लीनो परमरमणीं सम्पिबन् श्रीनवोढाम्।
कोरोनासङ्क्रमणविपुलं विप्रलम्भं विनाश्य
हर्षोल्लास्यैर्निखिलदिवसेऽदृश्यताऽसौ रिरंसुः॥२२०॥

मुग्धः कायेष्वनुपलमहं संविशन् कश्चिदेतत्
भावं भावं कविकुलगुरुं सत्कविं कालिदासम्।
लब्धुं कीर्तिं विततभुवने कल्पनासम्प्रसूतं
प्रत्यग्रं हे कवनधनिका सन्ददानोऽस्मि काव्यम्॥२२१॥

काव्यं चेदं मुनियुगवियत्सूर्यचन्द्रान्विते(२०७७ वि.)ऽस्मिन्
वैशाखेऽहं त्वलिखमतुलं वत्सरे सम्प्रयुक्ते।
एकादश्यां शनिशुभदिने कृष्णपक्षेऽप्रमत्तः
सायं प्रातर्लिखननिरतो भारतीं वन्दमानः॥२२२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संस्मर्तव्यस्त्विह मतिमतां शास्त्रवाचां वरिष्ठो
गुण्यो गण्यो गुणिजनमतोऽयं समीक्षाप्रवीणः।
धीमान् मान्यो रहसि रहसश्श्रीविहारी द्विवेदी
संस्मर्यन्ते विमलमतयः पूर्णकार्ये कृतज्ञैः॥२२३॥

नित्यं काव्ये निदधतु पदं हे कवीन्द्रा रसज्ञा
रिक्ते काले घटितघटनां कीर्तये कीर्तयन्तः।
दृष्ट्वा दृश्यं यदि सुकवयो न द्रवन्तीव दग्धा
वैदग्ध्यं किं भवति न मृतं सत्वरं दुर्लभं तत्॥२२४॥

सप्ताहानां त्रितय इह मे काव्यबन्धः प्रणीतो
धृत्या प्रीत्या कविकुलमुदे भारतीसम्प्रसादैः।
शक्तिर्नेयं प्रियसहृदयैमनिनीया मदीया
सन्तुष्टा वाग् रचयति शुभं काव्यमेवं कविर्नो॥२२५॥

(२८.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अरविन्दोपज्ञम् ईशदण्डकम्

-डॉ. अरविन्दः तिवारीः

त्रिभुवनजनजन्मसंस्कारसंहार सञ्चारविज्ञानसर्वस्वबोधप्रबोध-प्ररोहप्रदानोत्सुक प्राज्ञपूज्यप्रभाऽभ्यर्थये भावये हीश नृन् पाहि विश्वम्भर प्रार्थये सर्वकृत् सर्वजित् विश्वजित् दीनबन्धो दयालो कृपालो जगज्जालनिर्माणदक्षस्तुत श्रीप्रभ त्रैगुणैर्वैकृतैर्मुक्तमुक्तिप्रदातः पितः बालवृद्धादिभर्तः विपज्जालकर्तः विपज्जालहर्तः स्वमायाजबाणप्रहर्तः विधातः खलोत्पातभीतीतिपातः करोना-प्रकोपप्रभावप्रणाशादिभर्तः भवानीशचीभारतीचञ्चलादेवतामानकर्तः महेन्द्रावनीन्द्रेश गोगोपगोपीगवीशप्रियायाह्यहो दुःखकाले जनौघौघसम्पूज्यमान प्रभो हे विभो पश्य नः पाहि नः। चक्रपाणे रणे शस्त्रपाणे वने दण्डपाणे गृहे रक्ष नः पश्य नः दूयमानान् द्रुतं संश्रुतं नो श्रुतं किं श्रुतं पूजये विश्रुतं त्वां पुनर्लोकलोकान्तरे वा भृशं भावगम्यं हरे हे मुरारे खलारे शठारे कलौ रावणारे भवारे महीपुत्रिकाचोरकारे जरासन्धकंसासुरारे जले वर्तसे सर्पके राजसे पीडयापीडितान् प्रेक्षसे दूयसे नैव विज्ञायते लोक्यते साधुभिस्तूयसे वन्द्यसे भारतैः साधकैः पूज्यसे रोचते ते यदा मानवानां मृतिः कालकालाधुना हे महाकाल रक्ष प्रजाः भक्तकान् भावकान् पाहि नः पाहि नः पाहि नः॥ ईश तुभ्यं नमः श्रीश तुभ्यं नमः।

पाहि प्रभो सज्जनान्!

साधोर्हन्त निपीडनं च हननं दृष्ट्वा महद्दुःखदं
मूर्च्छत्येव मनोऽस्मदीयमधुना हे बन्धवः साधवः!
विश्वासो हृदयेऽभवद् भुवि पुनर्दैत्यावली वर्द्धते
क्षीयन्ते सुजनाः कलावनुदिनं पाहि प्रभो सज्जनान्॥

(२८.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नवीनसूर्यः

-डॉ. प्रीतिः पुजारा
(डीसीएम आर्ट एण्ड कॉमर्स कॉलेज,
वीरामगाम, अहमदाबाद)

भूतलेऽस्मिन् महासुरः कोरोना नाम्नोऽजायत
यथा ध्वंसाय विश्वस्य समुद्यतो विभाव्यते
भैरवोऽयं दिने दिने रचयति नवां लीलाम्॥१॥

The great demon named corona is born on the earth now. He seems to eñist to destroy the universe. Everyday this demon conjures up new specters of death.

क्षीयते शान्तिसाम्राज्यं संहारलीलयाऽस्य
विखण्डितं यथा विश्वं स्तंभितमेव भासते
प्रकम्पिता वसुन्धरा विरौति भीषणाकाशः॥२॥

The peace of the world is broken by his acts of destruction and the whole world is as if broken into pieces and turned still. The earth is shaken by the act of this demon and the vast sky is howling.

निर्जना राजमार्गा निर्जनाः पाठशालाः
समस्ताः प्रेक्षागाराः क्रीडांगणानि सकलानि
वयोजीर्णानि ते यथा गृहाणि भूतप्रेतानाम्॥३॥

All the roads and all the schools are deserted. All the theatres and playgrounds are vacant and they are like dilapidated haunted places.

पिहिताः पण्यशालाः प्रमोदवाटिकास्सकलाः
समुन्नतानि भवनानि यथा श्मशानद्वाराणि
अश्रूणि मुञ्चति प्रिया प्रियस्य दर्शनं विना॥४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Haunted markets, empty gardens and skyscrapers are almost changed into burial ground. The beloved is shedding tears without seeing her lover.

भविष्यति पुनः कदा धरा विमोहिनीव मे
सकलविश्वस्य नायिका विलासरागरञ्जिता
पङ्कजश्रीः हसिष्यति कदा रसान्विते सरसि॥५॥

When will this land turn into t a beautiful damsel like the heroine of the universe filled with romance and when this lotus will bloom again in the nectar like lake.

यानचक्राणि मार्गेषु सरिष्यन्ति कदा पुनः
विमानानि पुनः कदा विभेत्स्यन्ति महागगनं
वैश्विका आपणाः कदा गतिशीला भविष्यन्ति॥६॥

When the vehicles will move again on the roads, when the airplanes will penetrate the wide sky and when all the world markets will reopen again?

मन्दिराणि पिहितानि न जाने कुत्र देवाः
कथं विरोषिता अथो शेरेते गर्भगृहे ते
शवायिता जीवा भुवि कथं मौनास्तथापि ते॥७॥

All the temples are closed and nobody knows where the Gods are. Either they are angry or sleeping in the basement of the temple or they are indifferent to the deaths of the people.

श्रूयते देवाः सकला रुग्णालये वसन्त्यधुना
चिकित्सका वा मातृकाः श्वेतगणवेशधारिणः
स्वयं देवास्ते सेवायामतो न मन्दिरे देवाः॥८॥

It is heard that nowadays Gods are living in the hospitals. All the nurses and doctors in white uniforms are none other than Gods. They are busy in serving people in this pandemic and that is the reason that they are not in the temples.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सन्देशं दातुमद्याहं सभामध्ये समायाता
मिलित्वा हा मिलित्वा हा वयं सर्वे मिलित्वा हा
परास्तं कर्तुं शक्नुमः प्रचण्डदानवमिमम्॥९॥

I have come to address this assembly to deliver an important message on how we can beat this demon with our collaborative efforts.

अकारणं न लङ्घनीया लक्ष्मणरेखा गेहस्य
गृहे वयं सुरक्षिता मन्त्रोऽयं स्वीकरणीयः
चिकित्सकैः समादिष्टा नियमाः पालनीयाः॥१०॥

We must not transgress the line of safety. We should also realize why the home is the safest place for us. We must follow all the guidelines devised by doctors.

चण्डलीलाविमर्दिनि जगज्जननि हे अम्बिके!
प्रभञ्ज भयविभीषिकां विचूर्णय महादैत्यम्
समुद्धर सकलविश्वं करोति प्रार्थनां प्रीतिः॥११॥

Oh, universal Goddess Amba!, the destroyer of the evil acts of demons, Please break the fear of terror, crush this demon and redeem the universe. This is the prayer made by the poetess Preeti.

सन्धार्य धैर्यशस्त्राणि हृदि निधाय माधवम्
महायुद्धमिदं जेतुमुत्तिष्ठतु हे अर्जुनाः!
अयं कालोऽपि यास्यत्युदेष्यति नवीनसूर्यः॥१२॥

O Arjunas! get ready to win this great war, seize the weapon of patience keeping Lord Krishna in the heart. I am sure this time shall also pass and new dawn shall rise again.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सप्तकसप्तकम्

प्रथमं वृद्धसेवासप्तकम्

-डॉ. बुद्धेश्वर षडंगी

संस्कृतिर्महनीया नो या सदा भद्रदायिनी।
श्रद्धा वृद्धेषु कर्त्तव्या वदति राष्ट्ररक्षिणी॥१॥

आयुर्विद्यायशोवृद्धिः तेषां च सेवया बलम्।
नीतिविदां सदुक्तीयं स्मर्यते मन्त्रिभिर्मुदा॥२॥

करोणा प्राणशक्तिं नो क्लिश्नाति गात्रदाहिनी।
वृद्धेषु विशति शीघ्रं रक्षितव्यास्ततस्तु ते॥३॥

वयोज्येष्ठा यदा राष्ट्रे भवन्त्यनादृतास्तदा।
विपदां महती लीला दृश्यते जीवभीतिदा॥४॥

वृद्धे विशन्ति दुःसाध्या रोगा यतो पदे पदे।
तस्माच्छुश्रूषया वाचा तोषणीया गृहे गृहे॥५॥

करोणाणुर्विशेद्वासे वर्षीयसां कफादिभिः।
तेन स्यान्महती हानिः तस्मान्मतिर्भवेद्गुरौ॥६॥

वृद्धानां रोगरोधिन्यः शक्तयस्सन्ति दुर्बलाः।
भोजने सन्तु तेषां तच्छक्तिदं फलमूलकम्॥७॥

वृद्धसेवाख्यपद्यानि सप्तकस्थानि यानि भो।
पालकास्तु सदा घ्नन्ति करोणातापदां कलाम्॥८॥

इति राष्ट्रभद्रकामिबुद्धेश्वरकृतं वृद्धसेवासप्तकम्॥

(१६.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

द्वितीयं मुखावरणसप्तकम्

-डॉ. बुद्धेश्वर षडंगी

करोणाभीतिनाशाय मुखावरणसप्तकम्।
शिवदं मानवानां यद्गदितं राष्ट्रनेतृभिः॥१॥

कासादायाति रुग्णानां कफो विषाणुसंयुतः।
करोणावाहको यस्मात् तद्दूरे सन्तु मानवाः॥२॥

मुखावरणमेवास्य रोधकमस्ति रोगिणाम्।
सुस्थानाञ्च ततः सर्वे भवेयुश्शिर्शतबन्धनाः॥३॥

चक्षुर्घ्राणमुखेष्वेव भूताणवः सरन्तीह।
स्पृशन्त्यङ्गानि तान्यत्र भवन्त्येभिर्हि रोगिणः॥४॥

इदानीं मुखरक्षां ये कुर्वन्ति कारयन्ति वा।
त एव राष्ट्रप्राणा नः पूजनीया गृहे गृहे॥५॥

कुटीरशिल्पविद्याया वन्दनं भवतात् सदा।
पट्टिकानिर्मितिप्रेम्णि सन्तु नो गृहिणो मुदा॥६॥

गृहभोज्यं प्रियं नित्यं स्वास्थ्यदं श्रीप्रदं यथा।
तथैवावरणे श्रीदा पट्टिका गृहनिर्मिता॥७॥

(प्राणारक्षाकरं स्यान्नो मुखावरणसप्तकम्।
पठनं पालनं नृणां करोणाहानिकारकम्॥)

इति राष्ट्रप्रेमिबुद्धेश्वररचितं मुखावरणसप्तकम्॥

(१७.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तृतीयं गात्रावनसप्तकम्

-डॉ. बुद्धेश्वर षडंगी

गात्रावनाय वैद्यैर्यो विधिः प्रोक्तः स्वशास्त्रतः।
पालनीयस्सदा सर्वैः करोणात्रासहारकः॥१॥

नराः कुर्वन्ति गात्रस्य रक्षणमौषधेन ये।
सुस्थास्तिष्ठन्ति ते लोके घृणीशशशिपोषिताः॥२॥

श्लेष्माहारिण एवैते त्वङ्मधुजीरकादयः।
लवङ्गेनोष्णपानीयं सर्वदा कफनाशकम्॥३॥

हरिद्रादियुतं भोज्यं रोगहारीति सर्वदा।
वदान्यायुर्विदां वाणी पालनीया हिताय हि॥४॥

तुलसीदलमाहात्म्यं प्रथितं नो गृहे गृहे।
हरीतकी मातृकल्पा ततस्सेव्या नरैर्मुदा॥५॥

च्यवनप्रासलेह्यं नः कफं हन्ति दिने दिने।
रक्षासामर्थ्यवर्द्धके घृततैले तथैव ते॥६॥

रोगरोधिफले श्रद्धा यान्यम्लमिष्टकानि भोः।
भोजने ग्रहणीयानि प्रीत्या स्वसुस्थकामिभिः॥७॥

(गात्रावनपरा नित्यं पठेयुस्सप्तकं मम।
करोणात्रासमुक्तास्ते सुखिनस्स्युर्महीतले॥)

इति राष्ट्रभद्रकामिबुद्धेश्वरविरचितं तृतीयं
मोदिवचनसारणात्मगात्रावनसप्तकम्।

(१८.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चतुर्थम् आरोग्यसेतुसप्तकम्

-डॉ. बुद्धेश्वर षडंगी

सप्तपदीति भारत्यां व्याख्यातं सेतुबन्धनम्।
रक्षोपायकलाजालं भिषगुक्तं सुरक्षितम्॥१॥

आरोग्यसेतुनामेयं योजना परिकल्पिता।
यस्या ज्ञानं हरेन्नूनं करोणाणुभयं सदा॥२॥

सर्वे निगडितास्सन्तु सेतुनानेन मानवाः।
ज्ञातुमर्हन्ति भूताणोश्चलनं कुत्र वा कथम्॥३॥

कति मृतास्तथा रुग्णाः कति सुस्थाः गृहं गताः।
प्रभावितानि राष्ट्राणि सन्ति कथं महीतले॥४॥

स्थितिं ज्ञात्वा सदा कार्यं करिष्यन्ति जना यदा।
करोणाभीतिमुक्तास्ते सुखभाजः पदे पदे॥५॥

भवद्गृहसमीपे तु करोणाचलनं यदा।
झटित्येवाभिधा शक्त्या सूचयिष्यति वो मुदा॥६॥

जनानां रक्षणायैव कल्पिता ज्ञानिभिर्यतः।
तस्मादचिरमेवेयं सुहृत्स्यात् फलदायिनी॥७॥

(आरोग्यसेतुसप्तकं गुम्फितं भद्रदं मया।
पाठकाशिवघातीदं भवताद्धि पदे पदे॥)

इति मोदिवाक्यसारणरसिकेन राष्ट्रहितकामिना
बुद्धेश्वरेण रचितमारोग्यसेतुसप्तकम्।

(१९.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पञ्चमं दरिद्रान्नसेवासप्तकम्

-डॉ. बुद्धेश्वर षडंगी

श्रितश्रुतिनीतीनां तद्वाक्यं विश्रुतमेव नः।
अन्नं वै ब्रह्म यन्नित्यं स्मरन्तु हितकामिनः॥१॥

कलौ दानं सदा पुण्यं दीयतेऽनुपकारिणे।
गीतामृतरसं पीत्वा गच्छामोऽक्षयकीर्त्तये॥२॥

करोणात्रस्तमित्राणि कार्यं विना गृहे गृहे।
निराहारा वसन्त्यत्र श्रमिका राष्ट्रसेवकाः॥३॥

तेषां पोषणमन्नेन विविधभोजनेन च।
कारयित्वा समर्थास्स्युर्देशहिते सुयोजकाः॥४॥

धनमुपार्जितं यत्तु दानेन हीयते यदि।
जीवनं सफलं स्याद्भोः यशोंऽशुशुक्लभाक् सदा॥५॥

जीवमात्रे दयां कृत्वा कृन्तति पापमण्डलम्।
विद्वान् तदन्नदानेन क्रियतां पापखण्डनम्॥६॥

दरिद्रास्ये स्मितं दृष्ट्वा नन्दितास्युस्सदा सुरः।
तस्मादन्नादिभिस्सर्वे कुर्वन्तु राष्ट्रपूजनम्॥७॥

(अन्नसेवात्मशब्दस्रक् नोदयेद्राष्ट्रवासिनः।
येनान्नतापकष्टस्य विनाशस्स्याद्धरातले॥)

इति मोदिवाक्यसारणसरणिप्रियराष्ट्रावनतत्परबुद्धेश्वरविरचितं
पञ्चमं दरिद्रान्नसेवासप्तकम्।

(२०.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

षष्ठं वृत्तिरक्षासप्तकम्

-डॉ. बुद्धेश्वर षडंगी

सेवकानां कृते नित्यं दयावन्तो भवन्ति ये।
स्वामिनस्ते यशोभाजो भुञ्जते कीर्त्तिचञ्चलाम्॥१॥

बध्नन्ति स्नेहपाशेन मतिमन्तः स्वसेविनः।
तेषां श्रमेण वर्द्धन्ते धनधान्यादिकं यतः॥२॥

श्रमिकाणां श्रमेणैव लक्ष्मीर्हसति सर्वदा।
तस्मात्तेषां कृते दया धनादिभिः शिवप्रदा॥३॥

देवालये सदेड्यास्ते द्वारपालाः विधानतः।
तन्नोदयतु नो नित्यं सेवकवृत्तिरक्षणे॥४॥

कर्मजीवी न सामान्यो गृहकर्मपरो नरः।
नारी वाऽस्तु हितायैव नित्यमायाति नो गृहम्॥५॥

पत्यभावस्य दुःखात्तु सदाढ्यतरमेव तत्।
सेविकाभावजं कष्टं नागराणां विशेषतः॥६॥

गृहोद्योगे सदा वृद्धिश्चञ्चलायाः पतिर्यदा।
वृत्तिभाजः सुरक्षायै मतिं दधाति सर्वतः॥७॥

(स्वामिनां श्रमिकाणाञ्च हितदं सप्तकमिदम्।
हिनस्ति भृत्यकष्टं च पुष्णात्युद्योगचञ्चलाम्॥)

इति श्रीमोदिवचनसारणव्रतिराष्ट्रभद्रकामिबुद्धेश्वरविरचितं वृत्तिरक्षासप्तकम्।

(२१.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सप्तपदीसप्तकम्

-डॉ. बुद्धेश्वर षडंगी

करोणाकवचं प्राहुर्मुदा प्रधानमन्त्रिणः।
मोदिवर्या भारतस्य हिताय दूरदर्शिनः॥१॥

गृहाद्बहिः करोणा स्यात् तद्वासे सन्तु सर्वदा।
आत्मरक्षा हि राष्ट्रस्य सेवा स्यान्महती बुधाः॥२॥

प्रथमं प्रेम वृद्धेषु द्वितीयं मुखबन्धनम्।
उष्णोदकादिपानं हि तृतीयं शक्तिदायकम्॥३॥

सामर्थ्यं महदेवात्र भिषग्भिर्गदितं यतः।
आरोग्यसेतुबन्धे तद् विश्वासस्स्याच्चतुर्थकम्॥४॥

दरिद्रभोजने श्रद्धा पञ्चमी परिकीर्त्तिता।
ग्रामे ग्रामे धनाढ्यानां मतिस्स्यात् तत्र कीर्तिदा॥५॥

सेवकान् प्रति करुणा वृत्तेश्च परिरक्षणम्।
षष्ठं ज्ञेयं ततो नित्यं रक्षन्तु प्रभवो मुदा॥६॥

तृणीकृत्य सदा वासं युध्यन्ति ये भिषग्जनाः।
रक्षिणश्च पूजा तेषां सप्तमी शिवदायिनी॥७॥

(सप्तपदी सदा नृणां निरामयप्रदायिका।
तस्मात्तदनुगाः सर्वे यान्तु देशस्य रक्षकाः॥)

इति राष्ट्रहितकामिबुद्धेश्वरविरचितं करोणासप्तपदीशतकम्।

(१४.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

करोणा मायेयम्

-डॉ. बुद्धेश्वर षडंगी

करोणा मायेयं कविकुलकलामाप्य जगतः
सदावस्येन्नूनं प्रशमितबला दुष्टचरिता।
सरेद्वाङ्मूलस्था स्वकरनिकुरुम्बैर्यदि परा
प्रयायात्कम्पेन प्रणवरवजेनैव महता॥१॥

महामारी मायामलमयमदो विश्वमखिलं
विधायेयं सर्वं प्रहरति बलं मानवकुले।
नरान् नित्यं हन्ति भ्रमति यमतुल्या जगति यद्
विजेतुं कीनाशं किमिह नरसंहाररसिका॥२॥

महाकाली मन्ये धृतगरलमूर्त्तिर्जगति सा
निहन्त्री दैत्यानामगनगलतारक्षणपरा।
धरात्रासं हन्तुं जनयति भयं मोहवशिनां
सदा स्वार्थान्धानां प्रकृतिहितकामा हि परमा॥३॥

किरन्तीमङ्गेभ्यो बहुगरलगर्भान् स्वतनयान्
करोणां तां हन्तुं कथमपि समर्था न भिषजः।
ततो नॄन् हन्तीयं कफसरणलीलां नरकुले
विधायास्मिन्विश्वे शमनभयदा भीतिरहिता॥४॥

प्रकृत्याः क्रीडेयं भगवति रतिर्नास्ति नगरे
न वा ग्रामे नृणां विषयसुखभाजो हि मनुजाः।
स्वधर्मं हित्वाद्य प्रचलति नृजातिः प्रतिदिनं
कथं मोहान्धानां न विषसदृशा स्यात् क्षितितले॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

करोणाभूताणुर्न सरति कदाप्येकवसतौ
समर्दे नृणां तु श्रितशरगतिर्याति हि सुखी।
कफावासे श्रद्धा चलति नरवासं करमुखै-
स्ततो बन्धस्तुण्डे हितकर इह क्षालनविधिः॥६॥

गृहे सर्वे सन्तु प्रियजनकलापैर्विपदि तत्
प्रकुर्वन्तु श्रद्धां श्रुतिविहितमार्गे प्रतिदिनम्।
करोणा नश्येत् सा कलिकलितकालस्य हि गति-
र्न लाभो भीत्या तत् प्रणवशरणं यान्तु मनुजाः॥७॥

(२३-२५.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

हटे करोना विषकीट राष्ट्र से

–डॉ. युवराजभट्टराई

२३.०३.२०२०

महान आपत्ति प्रचण्ड है अभी, त्रिलोक में ये लगती भयावनी।
अजीब-सी व्याधि प्रवर्धमान है, अतः रहो रे गृह में प्रजा सभी॥१॥

बता रहे हैं इटली व चीन में, कई मरे लोग, बचे सभीत हैं।
न जानते क्या तुम ये उदन्त को, विभीषिका ये अब तो विचार लो॥२॥

सत्रास हैं लोग कि भागते फिरे, पुकारते हैं अब तो बचाइए।
समष्टि में व्याप्त विषाणु ने यहाँ, किया समुत्पन्न विनाश-ताण्डव॥३॥

कठोर है मृत्यु-विभीषिका यहाँ, निषिद्ध है सञ्चरणादि कर्म भी।
विभीषिका का सब सामना करो, सतर्क हो साहसपूर्ण वीर हो॥४॥

विषाणु क्यों तू इतने कठोर से, मनुष्य को मार रहा स्व-क्ष्वेड से।
अजस्र क्रीड़ा यमराज की यथा, हुआ बहिर्भूत तुझे सम्हालना॥५॥

स्वभाव से तू अति दुष्ट नीच है, शरीर से तू अति क्षुद्र देह है।
अवार्य पीड़ाप्रद शक्तियुक्त है, नृलोक में तू बहु-त्रास-हेतु है॥६॥

महाविषाणो! अब जा स्वयं तू, पुनः न आना इस आर्यखण्ड में।
अरे! करोना अब भाग शीघ्र ही, तिलाञ्जली दे निज-दुष्ट कर्म के॥७॥

कुकीट तेरे भय से नृलोक में, पड़े सभी हैं जनवृन्द गेह में।
अतीव अज्ञेय न शोधगम्य तू, नितान्त अव्यक्त विषाणु क्षुद्र तू॥८॥

पड़ा पड़ा तू नरदेह धाम में, शनैः शनैः तू हरता कि प्राण है।
कहाँ छिपा है सब दृश्यहीन है, सभी जनों का मन दुःखपूर्ण है॥९॥

नरेन्द्र संचालित राष्ट्र में यहाँ, स्वराष्ट्र-रक्षा सुविचार के प्रजा।
सभी प्रसन्ना गृह में विराजते, हटे करोना विष-कीट राष्ट्र से॥१०॥

(६.४.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोरोना

-डॉ. जनार्दन प्रसाद पाण्डेय 'मणिः'
E-mail : janardanmani@gmail.com

इदं विश्वं कोरोना सर्वतो व्याप्नोत्यहो विष्णो।
जगद् दुःखं दधत्सद्वन्द्वमिह रोदित्यहो विष्णो।

कथं क्रुरः करालः क्रोधमित्थं धारयत्येषः।
महाभीतिः भृशं नृत्यत्यकालं चाह्वयति विष्णो॥१॥

इयं ते कीदृशी माया प्रभो संरम्भलीला का।
अतित्वरयात्र सर्वो मानवो ग्रस्तोऽस्त्यहो विष्णो॥२॥

समोदं सर्वदिक्षु प्रैति रोगोऽयं सफूत्कारम्।
कथं स्वास्थ्यं प्रयास्यति लोकसर्गः साम्प्रतं विष्णो॥३॥

महाज्योतिर्विदां नष्टा भविष्यत्कालिनी वाणी।
गतं धैर्यं हतं सम्बलमतो राष्ट्रस्य हे विष्णो॥४॥

भविष्यति कीदृशी गतिरत्र सर्वप्राणिनामेषा
समोदं ब्रूहि भगवन् क्रन्दनं श्रुत्वाधुना विष्णो॥५॥

प्रगतमुत्साहसौख्यं जगज्जीवानां हृदयतो हा।
इमं सङ्क्रामकं रोगं नु दृष्ट्वा सर्वथा विष्णो॥६॥

अहो क्षीणाः समग्राः शक्तयो हा महाशक्तीनाम्।
समे देशा दधति दौर्बल्यमेवं सर्वतो विष्णो॥७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दिनं प्रीणाति नो चित्तं हरति नो शर्वरी दैन्यम्।
समे शोकातुराः क्रन्दन्ति भाग्यं कम्पितं विष्णो॥८॥

सुखी सर्वो भवतु नो लसत्येतत् यन्महावाक्यम्।
मृषा भवतीति सूक्तिः पश्य करुणाकार हे विष्णो॥९॥

दयासिन्धो जगद्बन्धो दयां कुरु निश्चितं लोके।
मणिस्ते विग्रहं प्रणमत्ययं विलपत्यहो विष्णो॥१०॥

(२९.५.२०२०)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कामयेऽहम्

(१)

न याचे पदं नापि वित्तं मनोज्ञं, न वा स्वर्गमेवाश्रये रम्यरम्यम्।
परं सर्ववन्द्ये सुधासारभूते, पवित्रे स्वदेशे जनिं कामयेऽहम्॥

(२)

सदा यच्च संशोभितं भव्यमर्त्यैरमर्त्यैश्चरित्रैस्तथा पुण्यकृत्यैः।
विवेकप्रदीपैः सदा शोभमाने, सुरम्ये स्वदेशे जनिं कामयेऽहम्॥

(३)

सुधामूर्तिभिर्वारिवेगैः पवित्रैर्युताभिर्नदीभिश्चिरं रक्ष्यमाणे।
सुतीर्थैरनेकैर्विपन्नाशकेऽस्मिन् सुमेध्ये स्वदेशे जनिं कामयेऽहम्॥

(४)

अहो! यत्र देवाः स्वकीयं निवासं परित्यज्य नूनं जनिं कामयन्ते।
शिवाराधनैकाग्रचित्ते प्रहृष्टे, प्रफुल्ले स्वदेशे जनिं कामयेऽहम्॥

(५)

दयाशीलशोभासदाचारयुक्ते, घृणाद्वेषमात्सर्यपारुष्यमुक्ते।
प्रभोः केलिलीलाविहारे मनोज्ञे, विशिष्टे स्वदेशे जनिं कामयेऽहम्॥

(६)

अपारं सुखं वैभवं चैव हित्वा, नृपा यत्र सम्यग् विरागं भजन्ते।
प्रजापालकैर्नित्यलोकानुरक्तैः समृद्धे स्वदेशे जनिं कामयेऽहम्॥

(७)

अहिंसापरे सत्यमार्गाधिरूढे, दयाधर्मनिष्ठे गरिष्ठे, वरिष्ठे।
शिवे सुन्दरे दैवतैः प्रार्थ्यमाने, वरेण्ये स्वदेशे जनिं कामयेऽहम्॥

(८)

अनाचारमाला यदीयं प्रकृष्टं मनः सम्बलं भङ्क्तुमर्हन्ति नैव।
सदा स्वाभिमानैकरक्षापरेऽस्मिन् विमुक्ते स्वदेशे जनिं कामयेऽहम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(९)

अजं निर्गुणं निर्विकल्पं निरीहं परं ब्रह्म गोपीजने यत्र रक्तम्।
अपारे कृपापुण्यपीयूषपूर्णेऽभिरामे स्वदेशे जनिं कामयेऽहम्॥

(१०)

न वा यत्र शोको न मोहो न दर्पो नवाकाण्डरोषो न दोषप्रसर्पः।
सदा शान्तिदे हर्षदे मोददेऽस्मिन्नखण्डे स्वदेशे जनिं कामयेऽहम्॥

(११)

जडे नश्वरे व्याधिकेन्द्रे शरीरे रुचिं यत्र विज्ञा न कुर्वन्ति नित्यम्।
सदा चेतनोपासनापण्डिते वै विशोके स्वदेशे जनिं कामयेऽहम्॥

(१२)

अमेध्येऽविनाश्येऽविशोष्ये ह्यदाह्ये तथा चिन्तनीयेऽमले चान्मतत्त्वे।
सदा कृष्णदेवस्य वाणीविबुद्धे विशुद्धे स्वदेशे जनिं कामयेऽहम्॥

(१३)

परा निर्वृतिर्यत्र काव्ये कवीनां मुदा प्राप्यते भावकैर्भावुकैश्च।
सदा भारतीवल्लकीघोषयुक्ते ललामे स्वदेशे जनिं कामयेऽहम्॥

(१४)

महाधैर्ययुक्ता जना यत्र नित्यं स्वकीयेषु धर्मेषु सक्ताः सतोषम्।
प्रियैर्भक्तिभावैः समुद्वेलितेऽस्मिन्नुदारे स्वदेशे जनिं कामयेऽहम्॥

(१५)

क्वचिद्धास्ययुक्ते क्वचिल्लास्यसक्ते, क्वचित्काव्यरक्ते क्वचिच्छास्त्रभक्ते।
क्वचिद्दर्शने वन्दने दत्तचिते, सुविद्ये स्वदेशे जनिं कामयेऽहम्॥

(१६)

क्वचिद्रामचन्द्रे, क्वचित्कृष्णचन्द्रे, क्वचिच्छक्तिपादे क्वचिच्छक्तिनाथे।
क्वचित्कर्मकाण्डे, क्वचिज्ज्ञानकाण्डे, विनम्रे स्वदेशे जनिं कामयेऽहम्॥

(१७)

विभिन्नेऽप्यभिन्ने, कृतघ्नेऽप्युदारे, करालेऽपि नम्रे, हताशेऽपि साशे।
अधन्येऽपि धन्ये, विनिन्द्येऽप्यनिन्द्ये, प्रशस्ते स्वदेशे जनिं कामयेऽहम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(१८)

चले वित्तजाते वितृष्णां दधाने, स्थिरे कीर्तिपुञ्जे चिरं श्रद्धधाने।
सदाचारगम्ये गिराग्रामरम्ये, गभीरे स्वदेशे जनिं कामयेऽहम्॥

(१९)

मृषाभाषिणां स्वार्थसंसाधकानामहङ्कारभारैरलं तुन्दिलानाम्।
विचारा नं यं मूढतां प्रापयन्ति स्वतन्त्रे स्वदेशे जनिं कामयेऽहम्॥

(२०)

प्रजातन्त्रभक्ता जना जागरूकाः स्वकीयैर्मतैः क्रान्तिमाहूय मौनम्।
चमत्कृत्य विश्वं स्थिता यत्र तस्मिन् विदग्धे स्वदेशे जनिं कामयेऽहम्॥

(२१)

प्रकृत्या नवैर्वैभवैः शोभमाने तथा मातृभूभक्तकृत्यैः समाने।
त्रिरङ्गध्वजेनाखिलं मण्ड्यमाने, तटस्थे स्वदेशे जनिं कामयेऽहम्॥

(२२)

हृदा प्रेमभावैः सहिष्णुत्वपूर्णैरशेषेषु देशेषु कान्तिं दधाने।
प्रमोदैः प्रभावैः सदा सेव्यमाने प्रबुद्धे स्वदेशे जनिं कामयेऽहम्॥

(२३)

विकासैरशून्ये, विलासैस्तु शून्ये, वदान्यैरलुप्ते, स्ववीर्येण गुप्ते।
सदा दोषमोषे, भरद्राष्ट्रकोषेऽविपन्ने स्वदेशे जनिं कामयेऽहम्॥

(२४)

स्वरूपस्थिते, ध्वस्तनिद्राप्रपञ्चे, समर्थे, स्थिरे, राजनीतिप्रवीणे।
अपारे, ससारे, सुरूपे, सुशोभे, नयज्ञे स्वदेशे जनिं कामयेऽहम्॥

(२५)

गिरं संस्कृतां भाषमाणेऽनवद्ये, विचारेषु रम्येष्वहो राजमाने।
सहिष्णुत्वशोभे, समे धर्मभावे, कृतज्ञे स्वदेशे जनिं कामयेऽहम्॥

(२६)

उदारैर्गुरूणां गणैः शासितेऽस्मिन् विनेयप्रभाद्योतिते कर्मजाले।
अमेयां स्थितिं सर्वतो धार्यमाणे सुविद्ये स्वदेशे जनिं कामयेऽहम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(२७)

सतां मानदे, सर्वथोत्कोचशून्ये, बलात्कारहीने, सुवृत्तप्रधाने।
निसर्गाजिरे सर्वदा मोदमाने, ललामे स्वदेशे जनिं कामयेऽहम्॥

(२८)

सदा न्यायरक्षाविधानैकदक्षे, परार्तिप्रणाशाय वै बद्धकक्षे।
स्ववीर्येण गुप्ते, प्रकर्षेण युक्ते, प्रचण्डे स्वदेशे जनिं कामयेऽहम्॥

(२९)

विकासं निजैः साधनैर्गाहमाने, विशिष्टां स्थितिं विश्वमञ्चे दधाने।
जगन्मङ्गले चानिशं चेष्टमाने, बलिष्ठे स्वदेशे जनिं कामयेऽहम्॥

(३०)

विवेकप्रियैः साधुवृत्तैरमात्यैश्चिरं शासकैः शासितेऽभीष्टवृत्ते।
बकैर्वञ्चकैश्चाटुकारैर्विमुक्ते प्रकृष्टे स्वदेशे जनिं कामयेऽहम्॥

(३१)

गुणानां गणा यत्र पूजां भजेयुर्धनं पक्षपातादयोऽस्तं व्रजेयुः।
समाना च प्रीतिर्भवेत्तादृशेऽस्मिन् गुणज्ञे स्वदेशे जनिं कामयेऽहम्॥

(आकाशवाणी, रामपुर से २९.१.८७ को 'साहित्यसुधा' में प्रसारणार्थ।
२.४.१९८७ को पुनः प्रसारित)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मुक्ताकणिकाः

डॉ. कृष्णकान्त शुक्लः

जगति जयन्ति कवीनां दिव्या रम्याः सुधामुचो वाचः।
यासां भङ्गिविशेषैः सहृदयलोका नु माद्यन्ति॥१॥

सञ्जीवनीस्वरूपः सरसो ललितो गिरां सुनिस्यन्दः।
भागीरथीप्रवाहः कवितापाकश्चिरं जयति॥२॥

सा कविता सा वनिता या हृत्तन्त्रीं सुझङ्कृतां कुरुते।
अन्या विडम्बनास्ते ययका भारायते लोकः॥३॥

हृदयस्थानथ भावान् यः सविशेषं सुचित्रितान् कुरुते।
वाग्देव्याः प्रियतनयः कविरिति प्रख्योचितो धीरः॥४॥

प्रातःस्मरणीयोऽसौ प्राणपणेनापि यो हि सेवेत।
सुजलां सुफलां सुखदां जननीमथ जन्मभूमीं च॥५॥

परदोषे कृतलक्ष्या एके जीवन्ति हन्त! कृतकृत्याः।
निजदोषेषु सुविज्ञा विरला लोके जगद्वन्द्याः॥६॥

अतिविषमं खलहृदयं को विज्ञातुं विशेषतः शक्तः?
स्मृतिरपि यस्य सुतीक्ष्णा हृदयं गाढाहतं कुरुते॥७॥

सज्जन! खलभुजगैस्त्वं दष्टः खिन्नोऽसि किं महासत्त्व!
चन्दनतरुरथ जातो भुजगवृतः किं न दृष्टान्तः॥८॥

दुष्टः प्रविशति गेहं भुजग इवात्यन्तमन्दसञ्चारः।
पश्चाद्दशति च तीक्ष्णं विश्वस्तान् वञ्चनाकुशलः॥९॥

विषवमने किल दक्षं कुटिलगतिं भूरि वञ्चनाचतुरम्।
गुप्तपदं सर्पन्तं खलं द्विजिह्वं मुहुर्वन्दे॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आरुह्य प्रासादान् हतका ये पातयन्ति निःश्रेणीम्।
कौशलमेतत्तेषामुपकर्ता यन्न लक्ष्येत॥११॥

अय्यवसरवादिंस्त्वं परमकृतार्थोऽसि मे मतिर्भवति।
शुष्कप्रायाः सर्वे हरितः संस्त्वं सदा भासि॥१२॥

अयि लालाटिकबन्धो! लोकत्रितयं त्वया विना शस्त्रम्।
ननु हेलयैव विजितं तस्मादनिशं प्रणम्योऽसि॥१३॥

क्षुद्रजनैः क्रियमाणं बत! सत्कर्मापि वाच्यतां याति।
अल्पज्ञैर्व्याख्यातं सच्छास्त्राणां यथा मर्म्म॥१४॥

त्वयका सार्धं स्पर्धा सिंह! शृगालैस्तु या क्रियते।
आत्मविनाशार्थमसौ तेषां सर्वः समारम्भः॥१५॥

अय्यारकूट! निस्त्रप! किमिति सुवर्णं स्वकं मुधा मनुषे।
यत्तव मौलिकरूपं परीक्षकास्तन्नु जानन्ति॥१६॥

उड्डनिके! व्योम्नि त्वं यं यं भव्यं विलासमाधत्से।
सामर्थ्यं तव तन्नो नूनं सा सूत्रधारेच्छा॥१७॥

मृदुरपि रसने! क्रूरं जल्पसि कोऽयं तवास्ति सम्मोहः?
निजमाधुर्यविशेषं मन्ये त्वं नैव जानीषे॥१८॥

कृष्णा वा शुक्ला वा प्रोन्नतिभाजो भवन्ति लोके वै।
असिताः सिताश्च केशा मूर्धानमिहाधिरोहन्ति॥१९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मुक्ता-कणिकाः

डॉ. कृष्णकान्त शुक्लः

(२७.७.१९८४)

कस्मै किं कथनीयम्, कथितः को वा करोति विश्वासम्?
अन्धा मूका बधिराः श्रोतारो यत्र राजन्ते॥१॥

उपदेष्टारो लोका नत्वाचरणे कदापि संलग्नाः।
कुर्युर्यत्र निवासं तस्य समाजस्य माधवः शरणम्॥२॥

जाने जगतो रीतिं, प्रीतिं वित्तेषु भूयसीं जाने।
निखिलसफलतादात्रीं, लालाटिकतां न जानेऽहम्॥३॥

निर्धनता मे वन्द्या, मानवमूल्यानि यत्र विलसन्ति।
निन्द्या सा तु धनिकता, यस्यां कवलायते लोकः॥४॥

(३१.७.१९८४)

परदोषे कृतलक्ष्या एके जीवन्ति हन्त! कृतकृत्याः।
निजदोषेषु सुविज्ञा विरला लोके जगद्वन्द्याः॥५॥

अतिविषमं खलहृदयं को विज्ञातुं विशेषतः शक्तः?
स्मृतिरपि यस्य सुतीक्ष्णा, हृदयं गाढाहतं कुरुते॥६॥

विषमा खलु परवशता, दैन्यं लोकाय या दत्ते।
सुखदा स्वतन्त्रतास्ते, स्वर्गं मोक्षं च या हसति॥७॥

हालाहल! महिमानं गुरुतरवेगं निजं कथं मनुषे?
त्वदपेक्षयापि घोरा दुर्जनवाचो नु सर्पन्ति॥८॥

अधरीकृतमाध्वीका विशदा, सुखदा, प्रियंवदा रम्या।
सरसानुग्रहकर्त्री कान्ता कविता चिरं जयति॥९॥

धन्या भारतमाता यत्क्रोडे निर्गुणं ब्रह्म।!
सगुणं रूपं बिभ्रत् खेलति बहुशो भृशं रम्यम्॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यत्कृपया दुरितानामन्तो झटिति प्रजायते नूनम्।
तमहमलौकिसत्त्वं ब्रह्मानन्दं गुरुं सदा वन्दे॥११॥

(१.८.१९८४)

दाम्भिक दम्भेनालं, तत्त्वं परमात्मनो नु जानीहि।
साक्षात्कृते हि तत्त्वे भेदोऽज्ञानं न वा तिष्ठेत्॥१२॥

नृपनीतिर्मे माता जनको दुःशासनं महाघोरः।
छलकपटादिसहायो, भ्रष्टाचारोऽस्मि तत्तनयः॥१३॥

सज्जन! खलभुजगैस्त्वं, दष्टः खिन्नोऽसि किं महासत्त्व!
चन्दनतरुरथ जातो, भुजगवृतः किं न दृष्टान्तः॥१४॥

दुष्टा दुष्टाः, सन्तः सन्तश्च तथा भवन्ति तत्त्वज्ञाः।
का गणना किल तेषां, सन्तो लोके सदा वन्द्याः॥१५॥

ब्रह्माद्वैतसतत्त्वं लोकातिक्रान्तभावनागम्यम्।
वेद्यान्तरपरिशून्यं निर्वृतिरूपं मुदा वन्दे॥११॥

हे चेतस्त्वं हित्वा तृष्णां भोगेषु बन्धनं छिन्धि।
तं वा देवं त्यक्त्वा, कोऽस्ति सहायः सुहृद्बन्धुः?॥१६॥

शिक्षाजगति प्रसिद्धाः सिद्धाः स्वार्थेषु पण्डितम्मन्याः।
अर्थपिशाचा घोराः शिव! शिव! केषां न ते निन्द्याः?॥१७॥

संस्कृतभाषा पतिता येषां हस्ते विरौति दयनीयम्।
ते सुरभाषावणिजः कथयत केषां न हा! निन्द्याः॥१८॥

नेतारः स्वार्थान्धा जनतां परिमोहयन्ति सततं ये।
तेषां कस्मिँल्लोके किं स्थानं स्यान्न जानेऽहम्॥१९॥

उत्कोचैः परिपुष्टास्तुष्टा अर्थैरनर्थपरिपूर्णैः।
ये ते मानवरूपा मनुजादाः क्रूरताभरिताः॥२०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यौतुकहेतोर्विवशां वधूं भर्यार्तां दहन्ति क्रौर्याद्यो।
तान् बिभ्रती कथन्नो वसुधा दीर्येत भग्नाशा॥२१॥

हृदयस्थानथ भावान् यः सविशेषं सुचित्रितान् कुरुते।
वाग्देव्याः प्रियतनयः कविरितिसञ्ज्ञोचितो धीरः॥२२॥

प्रातःस्मरणीयोऽसौ प्राणपणेनापि यो हि सेवेत।
सुजलां सुफलां सुखदां, जननीमथ जन्मभूमीं चः॥२३॥

सा कविता सा वनिता या हृत्तन्त्रीं सुझङ्कृतां कुरुते।
अन्या विडम्बनास्ते ययका भारायते लोकः॥२४॥

आन्दोलयति नितान्तं म्रियमाणं जीवनं यदीयेहा।
तदहमपारमघृष्यं दिव्यं शान्तं महो वन्दे॥२५॥

(३.८.१९८४)

आरुह्य प्रासादान् हतका ये पातयन्ति निःश्रेणीम्।
कौशलमेतत्तेषामुपकर्ता यन्न लक्ष्येत॥२६॥

दुष्टः प्रविशति गेहं भुजग इवात्यन्तमन्दसञ्चारः।
पश्चाद्दशति च तीक्ष्णं विश्वस्तान् वञ्चनाकुशलः॥२७॥

अयि रे कथं हृणीषे न दुष्टकृत्येषु साधितस्वार्थ!।
उपकर्तृनवजानन् कृतघ्नतां स्वां प्रकाशयसि॥२८॥

ज्ञातिर्वसति समीपे यदि सा हृदयं दहत्यविश्रान्तम्।
सम्बन्धीपदवाच्यो जनः कृशानुर्नु मूर्तोऽयम्॥२९॥

अन्धः स्यां बधिरः स्यां, मूकः स्यां कामना ममैषैव।
दर्शनमथवा श्रवणं स्यान्नैव कथा च दुष्टानाम्॥३०॥

निर्माय तुच्छसदनं हे क्षुद्र! कथं प्रमत्तोऽसि?
पूर्वं किमपि न दृष्टं त्वयकेति ज्ञायतेऽनेन॥३१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दुर्जन या तव तुलना साकं सरमासुतेन क्रियतेऽत्र।
सा हि नितान्तमयुक्ता, स हि सुकृतज्ञः, कृतघ्नस्त्वम्॥३२॥

अथवा

लोकः शुना त्वदीयां दुर्जन! तुलनां करोत्ययुक्तं तत्।
नितरामसौ कृतज्ञः, परं कृतघ्नोऽसि नीच! त्वम्॥

नीचो यदि किल सरसः, सोऽप्युपकर्ता भवेद्धि लोकानाम्।
मधुरजलानां दाता कूपस्त्वत्रास्ति दृष्टान्तः॥३३॥

रदनप्रसक्तं तृणकं रसनानारी द्रुतं त्वपाकुरुते।
सा द्विजपुरुषैर्बाध्या, भेदः स्त्रीपुंसयोरेषः॥३४॥

सञ्चारिणा हि भाव्यं, स्थायी भावः कदापि नो ग्राह्यः।
भावशबलता वन्द्या, निन्द्या शान्तिसु भावानाम्॥३५॥

श्लाघ्या प्रतिनायकता, नायकलक्ष्माणि तानि हेयानि।
बिन्दुच्युतकं ग्राह्यं, त्याज्यं वृत्तं हि गुणयुक्तम्॥३६॥

स्वीयारतिस्तु हेया परकीयायां रसस्तु संग्राह्यः।
नान्दी निन्द्या ग्राह्यौ संफेटो विद्रवश्चैव॥३७॥

नारायणो न सेव्यो नरस्तु सेव्यः सुसाधनैर्युक्तः।
वन्द्या लोकप्रीतिर्निन्द्या परलोकभीतिस्तु॥३८॥

पैशुन्यं पाण्डित्यं, हिंसा धर्मस्तथा सुहृद्द्वेषः।
विघटनमूला वृत्तिर्लोकविरुद्धा प्रवृत्तिश्च॥३९॥

एकं मे नयनं स्यात् स्फुटितं प्रतिवेशिनस्तु तद्द्वितयम्।
आत्मप्रीतिर्नव्या भव्याशंसा मदीयेयम्॥४०॥

कूर्दति, वल्गति, घूर्णति, विलसति तावच्छृगालसंघोऽसौ।
यावत्तन्द्रिलनेत्रः स्वपिति सुखं केसरी चण्डः॥४१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कृत्वा बह्वारावं क्रोष्टारो घोषयन्ति महिमानम्।
सिंहे गर्जति तेषामारावः कुत्र संलीनः॥४२॥

तुच्छो जम्बुकसंघस्त्वामाक्रान्तुं यदीहते वनराट्।
आत्मविनाशार्थमसौ तेषां सर्वः समारम्भः॥४३॥
(त्वयका सार्धं स्पर्धा सिंह! शृगालैस्तु या क्रियते।
आत्मविनाशार्थमसौ तेषां सर्वः समारभः॥)

अय्यारकूट! निस्त्रप! किमिति सुवर्णं स्वकं मुधा मनुषे।
यत्तव मौलिकरूपं परीक्षकास्तत्तु जानन्ति॥४४॥

येषामखिला प्रगतिः पृष्ठद्वारेण हन्त! सञ्जाता।
सम्प्रति सम्प्राप्य पदं विद्वांसस्तेऽप्यहो जाताः॥४५॥

केयं मतप्रणाली यस्यां सिंहोऽपि शशकोऽपि।
एकस्यां हि तुलायां विना विशेषं तु तोल्येते॥४६॥

अय्यवसरवादिंस्त्वं परमकृतार्थोऽसि मे मतिर्भवति।
शुष्कप्रायाः सर्वे हरितश्च त्वं सदा भासि॥४७॥

अयि लालाटिक बन्धो! लोकत्रितयं त्वया विना शस्त्रम्।
विजितं हि हेलयैव, प्रणम्यतां त्वं गतस्तस्मात्॥४८॥

वदनं प्रसादमधुरं, हृदयं मृदुलं, वचश्च रमणीयम्।
संभाषणं च हृद्यं येषां तान् नित्यशो वन्दे॥४९॥

विषवमने किल दक्षं कुटिलगतिं भूरिवञ्चनाचतुरम्।
गुप्तपदं सर्पन्तं खलं द्विजिह्वं मुहुर्वन्दे॥५०॥

उड्डनिके व्योम्नि त्वं यं यं भव्यं विलासमावहसे।
तन्नहि तव सामर्थ्यं सास्ते किल सूत्रधारेच्छा॥५१॥
(उड्डनिके व्योम्नि त्वं दूरं याता हि गर्वमाधत्से।
उन्नतिमूला निश्चितमास्ते सा सूत्रधारेच्छा॥)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पूर्वदिशातः प्रचलन् हिनस्ति वातोऽङ्गकानि निष्पीड्य।
पौरस्त्यः किल मनुजस्तद्वल्लोकान्समाहन्ति॥५२॥

संस्कृतकार्ये भैक्ष्यं, दैन्यं, दास्यं तथापमानोऽपि।
स्वीकार्यं मे बन्धो! विद्वच्चरणानुरक्तस्य॥५३॥

(२२.८.१९८४)

शुभकार्ये गमनीयं विनाप्यपेक्षां निमन्त्रणादीनाम्।
योग्यानामवमवमन्ता वचनीयस्तत्र नागन्ता॥५४॥

क्षुद्रजनैः प्रारब्धं बत सत्कर्मापि वाच्यतां याति।
तुच्छधिया व्याख्यातः सच्छास्त्राणां यथा सारः॥५५॥
(क्षुद्रजनैः क्रियमाणं बत सत्कर्म्मापि वाच्यतां याति।
तुच्छधिया व्याख्यातं सच्छास्त्राणां यथा मर्म॥)

सज्जन! दुर्जनसंघस्तव यां निन्दां करोति सानन्दम्।
तेनोद्विग्नो मा भूस्तथ्यं लोको नु जानाति॥५६॥

वाराणसी न गम्या महाश्मशानं तु सा हि विख्याता।
श्रेयस्कामः को वा तत्र स्थातुं समीहेत?॥५७॥

भूताधिपनगरी सा भूतैः प्रेतैः सदा समाविष्टा।
यैराविष्टः को वा सुखं च शान्तिञ्च विन्देत॥५८॥

साधितकार्य! कुबुद्धे कथं हृणीषे न दुष्टकृत्येषु।
उपकर्तृनवजानन् कृतघ्नतां स्वां प्रकाशयसि॥५९॥

वर्ण्य-विषयाः

मङ्गलाचरणम्–१०, ११, ११(सी), २५, ४९
कविः कविता च–९, १०(ए), ११(ए), २२, २४
अपात्रेषु स्वाभिप्रायनिवेदनम्–१
आत्मप्रकृतिः–३, ४, ३०, ५३
आत्मबोधः–१६
शिक्षाजगत्–१७, १८
दाम्भिकः–१२
देशभक्तः–२३

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सज्जन-दुर्जनौ–६, ८, १४, १५, २६, २७, २८, ३२, ३३, ५०, ५६
स्वतन्त्रता/परतन्त्रता–७
भ्रष्टाचारः–१३
नेतारः–१९
मतप्रणाली–४६
उत्कोचोपजीविनः–२०
यौतुकम्–२१
ज्ञातिः–२९
क्षुद्रगृहनिर्माणम्–३१
स्त्रीपुरुषौ–३४
लालाटिकः–४८
अन्योक्तयः–४१, ४२, ४३, ४४, ४५
अवसरवादी–४७
प्रकीर्णकानि–२, ५, ३५, ३६, ३७, ३८, ३९, ४०, ५५
उड्डनिका–५१
पौरस्त्यः–५२
सत्कार्यप्रवृत्तिः–५४

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कोऽहम्

डॉ. कृष्णकान्त शुक्लः

'सोऽहं सोऽहमिति' ख्यातं तत्र वेदान्तदर्शने।
कोऽहमित्यत्र वै वच्मि स्वरूपं परमार्थतः॥१॥

नत्वहं कामये राज्यं, न स्वर्गं नापुनर्भवम्।
कामये सुखितानां वै, प्राणिनां शान्तिनाशनम्॥२॥

नेत्रमेकं मदीयं चेत्, स्फुटितं तोषदं तदा।
नेत्रद्वयं विलुप्तं स्याद् यदि मे प्रतिवेशिनः॥३॥

अन्येषां सुखराशिर्मे दाहाय पीडनाय वा।
विपत्पातं परेषां वै मोदाय च हिताय च॥४॥

येन केन प्रकारेण स्वार्थसिद्धिर्भवेद् ध्रुवा।
परार्थश्च विनश्येतेत्येषा मे हार्दिकी स्पृहा॥५॥

अन्तः शाक्तो बहिः शैवः सभामध्ये च वैष्णवः।
इत्येवं नटकृत्यं मे केवलं स्वात्मपोषकम्॥६॥

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोध इति मे शत्रुमण्डलम्॥७॥

दम्भोऽमर्षोऽभिमानश्च पैशुन्यं परपीडनम्।
धौर्त्यं धाष्ट्र्यं विरोधित्वमधमत्वं नवं नवम्॥८॥

क्रौर्यं प्रवञ्चत्वं च परदारोपसेवनम्।
तथा मिथ्याभिभाषित्वं, शठत्वं चैव हिंसनम्॥९॥

देवकार्यविघातित्वं, पितृकार्यनिपातनम्।
सद्भ्यो द्रोहो घृणा क्रोध ईर्ष्यासूया तथैव च॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अमेध्यभक्षिता चैव, मिश्रणं सर्ववस्तुषु।
प्रतारणपटुत्वं च मदीयं मित्रमण्डलम्॥११॥

रतिश्च चाटुकृत्येषु, प्रीतिः क्षुद्रेषु कर्मसु।
स्तुतिश्च नेतृवर्गेषु, नुतिश्चामोदसद्मसु॥१२॥

श्रवणं चित्रगीतानां, कीर्तनं दुष्टकर्मणाम्।
स्मरणं नर्तकीनां तु, रामाणां पादसेवनम्॥१३॥

धनिनामर्चनं दास्यं, वन्दनं सख्यमेव च।
नित्यं समर्चनीयासु बालास्वात्मनिवेदनम्॥१४॥

जीवनं बिन्दुपातेन, मरणं बिन्दुधारणात्।
मिथ्या ब्रह्म जगत्सत्यं, प्रत्यक्षं परमं मतम्॥१५॥

कर्तव्याच्च विरामस्तूपरामश्च सदाशयात्।
धर्मात्प्रमादः पुण्याच्च जुगुप्सा, दर्शनं मम॥१६॥

स्नेहपात्रं विदेशीयाः, घृणापात्रं स्वसंस्कृतिः।
अन्धानुकरणं प्रेयः, परानुकरणं तथा॥१७॥

मह्यं न शेचते सैंही श्रैगाली वृत्तिरीप्सिता।
ततोऽपि मे वरतरा बकवृत्तिरुदाहृता॥१८॥
(अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः।
शठो मिथ्याविनीतश्च बकवृत्तिचरो नरः॥ इति वचनात्)

न हि मे किमपि स्वत्वं, न निष्ठा, न च धारणा।
लोकेन चाल्येऽहं यद्वत्तथैव प्रचलाम्यहो॥१९॥

वन्दनाकाशवाण्यां च, निरोधः सन्ततिग्रहे।
वृत्तौ तत्त्वावबोधस्तु, दर्शनं दूरदर्शने॥२०॥

आत्मारामो जितक्रोधः सम्प्रज्ञातसमाधिकः।
स्थितप्रज्ञस्तथा चाहं सततं स्वार्थसाधने॥२१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust. Funding by MoE-IKS

निर्लेपो निर्विकारश्च निरीहोऽसक्त एव च।
कूटस्थो निरपेक्षश्च वर्ते ब्रह्मेव साधुषु॥२२॥

निरुपादानसम्भारमभित्तौ प्रतनोम्यहम्।
मिथ्याचित्रं सदा रम्यं जगद्भ्रान्तिकरं परम्॥२३॥

नहि मे कोऽपि विश्वस्तः सुहृच्चैव सखापि वा।
केवलं सत्यमित्रं मे स्वार्थ एवास्ति भूतले॥२४॥

वृद्धिः परविपत्तौ च, गुणश्च परसङ्कटे।
अङ्गता दुष्टसंघे च, कपटे पररूपता॥२५॥

आदेशः सद्गुणावल्यामागमो धूर्तमण्डले।
द्वयोर्विप्रतिषेधे तु ह्यसतः परकार्यता॥२६॥

लोपो गुणिगुणग्रामे, संहिता निम्नसंहतौ।
स्थानिवत्ता च दोषेषु, दीर्घता परनिन्दने॥२७॥

पूर्वरूपं त्वसद्वृत्तेऽपवादो साधुकर्मणि।
निष्ठा चरित्रहनने, वितथे सम्प्रसारणम्॥२८॥

अव्ययश्चास्मि निन्दासु, निपातोऽनाप्तकर्मसु।
उपसर्गश्चास्मि मित्रेषु, निर्मूलश्चास्मि प्रत्ययः॥२९॥

प्रकृतिर्दोषजातस्य, विकृतिर्गुणसम्पदः।
सन्धिर्विरुद्धभावस्य, विग्रहो मूर्तिमान् स्मृतः॥३०॥

अदर्शनञ्च शौर्यस्य विरामः पुण्यकर्मणाम्।
एको गोत्रे च धूर्तानां यथासंख्यप्रवर्तकः॥३१॥

कर्तास्म्यपूर्वकार्याणां, दुष्क्रिया-कर्म एव च।
करणं खलवृत्तीनां, सम्प्रदानं विषस्य च॥३२॥

अपादानं त्वसद्वृत्तात्, सम्बन्धो निम्नकर्मणाम्।
तथाधिकरणं पापतापमोहादिकस्य च॥३३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सम्बुद्धिश्च विकाराणां, कुकृत्यानां तथैव च।
गुणानामपलापश्च, सतां च हृदि शङ्कुकः॥३४॥

अव्ययीभाव एवास्मि सुजनद्वेषकर्मणाम्।
राज्ञस्तु पुरुषो भूत्वा तत्पुरुषोऽहमनिन्दितः॥३५॥

कण्ठेकालो बहुव्रीहिर्द्वन्द्वो दारुणयुग्मयोः।
द्विगुस्तु कृतकृत्योऽहं 'दशताप' मितीदृशे॥३६॥

असिद्धः पुण्यबीजेषु, विरुद्धः श्रेष्ठकर्मसु।
ज्ञानेऽनैकान्तिकश्चास्मि नितान्तोऽनाप्तभूमिकः॥३७॥

सत्प्रतिपक्ष एवास्मि, सदाचारविचारणे।
कालात्ययापदिष्टोऽस्मि प्रत्यक्षं बुधमण्डले॥३८॥

साक्षादहं वितण्डास्मि च्छलं निग्रह एव च।
वाद-जल्प-समारूढस्तर्कः सिद्धान्तदूषणे॥३९॥

समाधिर्बकचेष्टायां, साधना कूटकौशले।
विभूतिश्छद्मकृत्येषु, कैवल्यं पदरक्षणे॥४०॥

पञ्चमश्चान्यथासिद्धः समवायः कुकर्मणाम्।
अभावश्चास्मि शास्त्राणां सन्निकर्षश्च कामिनाम्॥४१॥

नहि तिष्ठामि कुत्रापि स्थायी भूत्वा कदाचन।
सर्वेष्वेव च लोकेषु सञ्चारीव भ्रमाम्यहम्॥४२॥

भेदबुद्धिश्च सिद्धान्ते समदृष्टिश्च भाषणे।
कर्मण्यन्यद्वचस्यन्यन्मनस्यन्यच्च मूर्तिमान्॥४३॥

नवनीतसमालेपे चाटूक्तौ निपुणोऽस्म्यहम्।
अन्येषां गुणगाने च सततं कृपणः परम्॥४४॥

वृक्षं यमेव छायार्थं, पीडितः संश्रयाम्यहम्।
तमेवोत्खातमूलं तु सुखितः प्रकरोम्यहम्॥४५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

न मे लज्जा, न च ग्लानिस्तापश्चाप्यपकर्मसु।
धृष्टो धूर्तः कृतघ्नश्च सततं कार्यसाधकः॥४६॥

आदौ नम्रः पुनर्नम्रः कार्यकाले च निष्ठुरः।
साधनस्येव मे कृत्यं विकारान्वेषिणः सदा॥४७॥

विश्वासयामि लोकांस्तु, न च विश्वसिमि क्वचित्।
पण्डितम्मन्य एवास्मि, चतुरम्मन्य एव च॥४८॥

सर्पदष्टो नरो जीवेत् कदाचिद्विधियोगतः।
मद्दष्टस्तु विमुच्येत प्राणैः क्लेशार्दितः परम्॥४९॥

भ्रष्टाचारः सखा मे जगति सहचरी वञ्चनाचातुरी च,
ह्युत्कोचादिः सहायः परधनहरणं जीवनस्यास्ति लक्ष्यम्॥
निन्द्या सत्सङ्गतिश्च प्रहसनपटुता सज्जनानां, विनोदो
ग्राह्यानाचारमाला, किमिव वरतरं सम्पदोऽस्यां जगत्याम्॥५०॥

धर्मेऽतत्परता, मुखेऽमधुरता, कामेऽसमुत्सारिता,
मित्रे वञ्चकता, गुरौ कुटिलता, चित्ते त्वगम्भीरता।
आचारेऽशुचिता, गुणेऽरसिकता, शास्त्रेऽप्यविज्ञानिता,
हृद्येऽसुन्दरता, हरावपरता ह्येतन्मदीयं व्रतम्॥५१॥

एष धर्मो मया प्रोक्तो लोक उन्नतिकारकः।
येन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥५२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कदा?

डॉ. कृष्णकान्त शुक्लः

(१)

विशेषज्ञः–

कदा साक्षात्कारे कपटकुटिले, वञ्चनपरे,
विशेषज्ञो भूत्वा प्रकटितविशिष्टात्मविभवः।
प्रपञ्चैस्तैस्तैस्तान् विविधविदुषो धर्षितमुखान्
विधायान्तः प्रीणन् सुसुखमिव नेष्यामि दिवसान्॥

(२)

शोधनिर्देशकः–

कदा शोधच्छात्रान् बलिपशुनिभान् पीडनपरो।
विचित्रान् मार्गान् वै निजप्रतिभयोद्भाव्य बहुशः॥
सरस्वत्या भक्तान् कुटिलकुटिलं तत्र विहसन्।
दधानः कौबेरीं द्युतिमिह विनेष्यामि दिवसान्॥

(३)

स्वदुर्दैवाद् बद्धान् मम गुरुगुणैः पीडनपरैः
समायातान् जाले हरिततृणलुब्धान् परवशान्।
कदा शोधच्छात्रान् बलिपशुनिभान् वीक्ष्य रुदतो
हसन् हिंसन् क्रूरं मुदित इव नेष्यामि दिवसान्॥
(कदा शोधच्छात्रान् बलिपशुनिभान् वेपथुमतो
विशस्य क्रौर्याद्वै प्रमुदितमनाः स्यां प्रतिदिनम्॥?)

(४)

शोधपरीक्षकः–

कदा शोधग्रन्थेऽनुकृतिपरमेऽशुद्धिबहुले
नियुक्तोऽन्वीक्षार्थं सुरगुरुधिया स्वं विगणयन्।
प्रसादैः सम्प्रीतो विवृतिमनुकूलां च प्रदद-
च्छलैश्छद्मैश्छन्नः समुदमिव नेष्यामि दिवसान्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(५)

मौखिकी-परीक्षकः–

कदा मौखिक्यां वै हतविधिगृहीतान् मृगनिभान्
परीक्ष्यान् निष्पीड्य प्रमुदितमनाः शौनिक इव।
प्रियाभ्यो बालाभ्यो निजहृदयसारं प्रवितर-
न्नखण्डं पुण्यानां फलमिह समश्नामि मधुरम्॥

(५)

अध्यापकः–

कदा विद्याशून्यो वितथविरुदोपाधिसहितः,
सदा दम्भैर्युक्तोऽविनयबहुलः शाठ्यपरमः।
स्वयं नष्टोऽन्यान्यानपि खलु विनष्टान् विधदहं
प्रसादं वै गन्ताऽशुभकरणभावैः परिवृतः॥

(६)

अध्यापकनेता/राजनीतिकनेता वा–

कदा निर्मर्यादो विदलितसदाचारनिचयः,
कुचक्रैर्दुर्वृत्तैः क्षपितसुजनाशेषगरिमः।
यथेच्छं सर्वत्र प्रसरणपरो धौर्त्यनिपुण-
स्त्रपामेकां त्यक्त्वा सततमिह जेष्यामि जगतीम्॥

(७)

नेतृविरुदः कार्यसंसाधकः–

उपायानां व्रातैः कपटपरमैर्धौर्त्यभरितैः,
स्वकार्यं संसाध्य, प्रमुदितमनाः प्राप्तविभवः।
स्वकीर्यर्दुष्कृत्यैरुपकृतिपरानाप्तपुरुषान्,
कदा संक्लेश्याहो! परमसुखमाप्स्यामि सततम्॥

(८)

शुभाशंसनम्–

कदा स्वोद्देशेऽस्मिन् पुनरपि प्रतिष्ठा कृतधियां
कदा वा भूयोऽपि प्रथितप्रसरा स्यात् सुरगवी?

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कदाथो वात्रत्या सरणिरुचिता स्यात्प्रचलिता,
कदा स्याल्लोके श्रीहरिभजनधारा प्रवहिता?

(९)

ममास्ते नो द्वेषो न च किमपि दुर्भावलसितम्,
न चास्ते मात्सर्यं न गुणगणनाऽशक्तिरपि वा।
तथाप्येतत्सर्वं यदिह भणितं साधुसमितौ,
तदेतच्छुद्ध्यर्थं निजपरिकरस्यास्ति निखिलतम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust. Funding by MoE-IKS

ते के न जानीमहे!

डॉ. कृष्णकान्त शुक्लः

(१)

येषां कौशलमस्ति नैजप्रभुतासंरक्षणे सर्वथा,
येषां कार्यकलाकलापकलना स्वस्यैव मोदाय वै।
मायूरीं गिरमुत्सृजन्ति जनतां सम्मोहयन्तीव ये,
कालेऽस्मिन् धृतदेवताप्रकृतयस्ते के न जानीमहे॥

(२)

ये निष्ठां परिवर्तयन्त्यविरतं मिथ्याचणा दम्भिनो
ये वा कैतवकञ्चुकावृतमहागात्राः प्रपञ्चाश्रिताः।
विध्वस्ताखिलमान्यजीवनविधाः स्वार्थैकसम्मूर्तयो
गृध्नाग्रस्तविवेकशीलकरुणास्ते के न जानीमहे॥

(३)

अस्माकं प्रियसंस्कृतिर्विशसिता यैः क्रूरतापूर्वकं,
यैर्वा नाशितमात्मकृत्यकलनं निर्वासितं गौरवम्।
देशीयाः परकीयतां हि गमिता देशे स्वकीयेऽपि यै-
रात्मोच्छेदकरा विनाशितधियस्ते के न जानीमहे॥

(४)

यं वृक्षं समुपासते सुविततं छायार्थमागत्य वै
निर्मूलं तु तमेव येऽत्र सततं मोहात्समाकुर्वते।
लिप्साभ्रंशितबुद्धयोऽहितमहामारीबलाद्धर्षिता
भूमेर्भारकरा द्विजिह्वसदृशास्ते के न जानीमहे॥

(५)

पूर्वं प्राणपणेन चाटुशतकैराराध्य भद्रान् जनान्
कार्यं कौशलपूर्वकं च नितरां सम्पाद्य नैजं पुनः।
तेषामेव विधाय वञ्चनमहो! येषां न लज्जा मनाग्
हंहो! क्रूरकृतघ्नभावभरितास्ते के न जानीमहे॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(६)

यैः साकं निवसन्ति निर्घृणतया निघ्नन्ति तानेव ये
यस्मिन् पत्रपुटे त्वदन्ति तमहो छिद्रान्वितं कुर्वते।
तैस्तैः कृत्यशतैः स्वकार्यकरणे दक्षाः प्रकामं पराः
कौटिल्याहतचेतसोऽह्यकरुणास्ते के न जानीमहे॥

(७)

यामारुह्य प्रयान्ति सौधशिखरं सोपानमालां मुदा,
ये तामेव निपातयन्ति हतकाः स्वार्थास्तसद्बुद्धयः।
हृन्मर्मव्रणतां गता वसुमतीसन्तापमूलाः शठा
विध्वस्ताखिलपुण्यलोकरचनास्ते के न जानीमहे॥

(८)

क्षुत्क्षामान्, विवशान्, कुरीतिनिहतान्, दीनान्, विपन्नान् जनान्,
दग्धा यौतुककारणाच्च पतितैरत्यर्थलुब्धैर्वधूः।
शुष्कानस्तसुखान् स्तनन्धयवरानप्राप्तदुग्धांस्तथा
संवीक्ष्यापि न येषु हास्ति करुणा ते के न जानीमहे॥

(९)

दैवीं वाचमधीत्य प्राप्य पदवीं सम्मानसन्दायिनीं
लोकेऽस्मिन् प्रथितप्रशस्तिधनिनो विद्याधुरीणा अपि।
ये कुर्वन्ति दृढां रतिं न विमले गीर्वाणवाणीपदे
मातृद्रोहपरायणा हतधियस्ते के न जानीमहे॥

(१०)

सौभाग्यात्सुरदुर्लभं प्रभुकृपापीयूषपाकोद्भवं
ये चिन्तामणिपारिजातसदृशं प्राप्यापि पुंजीवनम्।
आत्मानं विनियोजयन्ति नितरां निन्द्येषु कार्येष्वहो,
तत्तत्त्वं समुपेक्षयन्ति सततं ते के न जानीमहे॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(११)

मृद्वीकाप्रतिमे, निसर्गमधुरे, विश्रान्तिदे, मोददे,
कान्तावत्सरसोपदेशचतुरे, दिव्ये, सुधास्यन्दिनि।
काव्ये शिञ्जितभारतीपदयुगे, रामाधरस्पर्धिनि
ये मात्सर्यजुषो विवेकरहितास्ते के न जानीमहे॥

(१४.१२.१९८३)

(आकाशवाणी रामपुर से 'साहित्यसुधा' संस्कृत-कार्यक्रम के अन्तर्गत दिनांक ५.१.८४ को प्रातः पौने आठ बजे प्रसारित संस्कृत में काव्यपाठ)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जीवनं सारभूतम्

डॉ. कृष्णकान्त शुक्लः

(१)

यदि मिलति सुखं भोः! कायकष्टं विनैव,
मिलति च परितोषोऽकारणं कूटकृत्यैः।
भवति च परिचर्याऽक्रान्तदेवप्रतिष्ठा,
ननु सुललितमेतज्जीवनं सारभूतम्॥

(२)

त्रपुणि यदि नियुक्तं दूयते रत्नजातं,
यदि च मुकुटशोभामीहते गुञ्जमाला।
यदि कपटप्रवीणैर्वञ्च्यते विज्ञलोको
निखिलमिदममूल्यं जीवनं सारभूतम्॥

(३)

कथमपि दुरुपायैरात्तसत्तैः सदैव
यदि च बुधवरेभ्यो दीयते ज्ञानदीक्षा।
'जगदिदमिति सत्यं, ब्रह्म मिथ्ये'ति सिद्धिः,
क्रियत इह तदा तज्जीवनं सारभूतम्॥

(४)

'यदपि यदपि पुण्यं तद्धि सर्वं निरर्थं,
यदपि च परिदुष्टं सार्थकं तत्तदेव'।
सरभसमिति येषां घोषणा वर्धतेऽत्र,
निखिलजगति तेषां जीवनं सारभूतम्॥

(५)

एतस्माद्विपरीतम्–
गुरुजनपरिचर्या, संस्कृतिर्भारतीया,

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मनसि वचसि कायेऽभिन्नता श्लाघनीया।
अनुपमकरुणार्द्रा भूतमात्रेषु मैत्री,
यदि भवति सखे! तज्जीवनं भारभूतम्॥

(६)

श्रवणमननपूर्वं शास्त्रचर्चा मनोज्ञा,
विधिविहितसपर्याराधिता देवमूर्तिः।
विषमविषयमालानाशिनी तत्त्वचिन्ता,
यदि भवति सखे! तज्जीवनं भारभूतम्॥

(७)

अस्मात्–
जहत जहत शीलं शोषकं सद्गुणानाम्,
भजत भजत भोगं तत्त्वभूतं जनानाम्।
पिबत पिबत सोमं जीवनं जीवनानाम्,
भरत भरत नित्यं जीवनं सारभूतम्॥

(८)

तथा च फलश्रुतिः–
निरतिशयप्रचारं, साधकं जीवनस्य,
सरलसरलरूपं, पोषकं सौख्यराशेः।
अकठिनपरिचर्यालालितं श्रीसमृद्धं,
भजत भजत तूर्णं धर्ममेनं युगस्य॥

(अर्वाचीनसंस्कृते (४/२) प्रकाशितम्)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सुधा

डॉ. कृष्णकान्त शुक्लः

(१)

यदि समर्जितमत्र धनं पुन-
र्यदि च गौरवमद्भुतमस्ति मे।
यदि च वैभवसंग्रहणं कृतं
वितथमस्ति न चेत्सुलभा सुधा॥

(२)

न रुचिरा खलु लोकहितैषणा,
न च प्रिया बहुवित्तगवेषणा।
न विपुला वसुधास्ति किलेप्सिता,
यदि मिलेत् सरसा कविता सुधा।

(३)

किं वित्तेन समर्जितेन, विपुलैः किं वा वृथाडम्बरैः?
किं वा लौकिकसंग्रहैरनुपमैस्तैस्तैः क्रियाकौशलैः?
दिव्यानन्दप्रदायिनी, रसमयी, कान्ता, मनोहारिणी
नैवाप्ता यदि प्रेयसी, यदि न वा लब्धा प्रकाशं सुधा॥

(२४.३.१९८४)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जीवनं तस्य जीवनम्।

डॉ. कृष्णकान्त शुक्लः

श्वसितं भणितं यस्य चिन्तितं चरितं तथा।
नोद्वेगाय न तापाय, जीवनं तस्य जीवनम्॥१॥

यस्य पुण्यैः शुभैः कृत्यैः शोभमाना वसुन्धरा।
सत्कृतातितमां भाति जीवनं तस्य जीवनम्॥२॥

करुणा, मुदिता, मैत्री, मार्दवं गुणसंग्रहः।
यस्य नित्यं समाराध्या जीवनं तस्य जीवनम्॥३॥

यस्य सर्वे समारम्भा लोककल्याणकारकाः।
सर्वथा सर्वदा हृद्या जीवनं तस्य जीवनम्॥४॥

परेषामुपकारं यः कृतज्ञः संस्मरत्यहो।
कृतघ्नश्च न यस्तिष्ठेज्जीवनं तस्य जीवनम्॥५॥

सारल्यं विनयश्चैव, शोभमाना गुणावली।
राजते यत्र शीलाढ्या, जीवनं तस्य जीवनम्॥६॥

पापाज्जुगुप्सते यस्तु न च धर्मात्प्रमाद्यति।
दक्षोऽनुरक्तलोकश्च जीवनं तस्य जीवनम्॥७॥

निष्ठा यस्य दृढा नित्यं स्वसिद्धान्ते विराजते।
बकभक्तश्च यो नास्ते, जीवनं तस्य जीवनम्॥८॥

जननीं जन्मभूमीञ्च स्वर्गादपि गरीयसीम्।
निःस्वार्थं सेवते यो ना जीवनं तस्य जीवनम्॥९॥

स्नेहं दयाञ्च सौख्यञ्च विपुलं भूतिसञ्चयम्।
स्वदेशार्थं विमुञ्चेद्यो जीवनं तस्य जीवनम्॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भ्रष्टाचारैर्विरज्येत मानसं यस्य पावनम्।
लोकाराधननिष्ठो यो जीवनं तस्य जीवनम्॥११॥

मर्यादां च व्यवस्थाञ्च यः पालयति नित्यशः।
रक्षकः स्वस्य धर्मस्य जीवनं तस्य जीवनम्॥१२॥

उपास्ते भारतीयां यः संस्कृतिं दिव्यरूपिणीम्।
कर्तव्यं परमं मत्वा जीवनं तस्य जीवनम्॥१३॥

अहिंसाकरुणाभावैः समताराधनापरः।
नित्यं कृत्येषु रज्येत जीवनं तस्य जीवनम्॥१४॥

दीनहीनांस्तु सेवेत प्राणानां च पणेन यः।
आत्मारामश्च नित्यं स्याज्जीवनं तस्य जीवनम्॥१५॥

वाचं वै संस्कृतां यश्च लोकानुग्रहकारिणीम्।
सेवते परया भक्त्या, जीवनं तस्य जीवनम्॥१६॥

अत्रत्यां सेवते भूषां भाषां चैव परम्पराम्।
भूमिं गिरीन्नदीश्चैव जीवनं तस्य जीवनम्॥१७॥

नरं नारायणाद्यश्च नापरं योऽभिमन्यते।
सिद्धान्तेष्वविकम्पः स्याज्जीवनं तस्य जीवनम्॥१८॥

दीनोऽहङ्कारकृत्येषु नदीनो गुणराशिसु।
हीनो कैतवदम्भेषु जीवनं तस्य जीवनम्॥१९॥

आस्तिक्यमथ पाण्डित्यं सारल्यञ्चातिशोभनम्।
यस्मिन्नित्यं विराजेत जीवनं तस्य जीवनम्॥२०॥

शिवसङ्कल्पवान् यस्तु विश्वकल्याणमीहते।
यस्य च श्रेयसी सन्धा, जीवनं तस्य जीवनम्॥२१॥

कवितामाधुरीं पीत्वा, ब्रह्मानन्दं समश्नुते।
योऽसौ हर्षातिरेकेण, जीवनं तस्य जीवनम्॥२२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अन्यायोपार्जितं वित्तं प्रसभं धिक्करोति यः।
न्यायार्जितं समश्नाति, जीवनं तस्य जीवनम्॥२३॥

वृत्तं वरतरं वित्तान्मानः प्राणसमो मतः।
यशोऽप्रतिहतं यस्य जीवनं तस्य जीवनम्॥२४॥

सुखमिच्छति सर्वेषां, कुशलं चापि कांक्षति।
नित्यं यः शान्तचित्तः स्याज्जीवनं तस्य जीवनम्॥२५॥

(२२.३.१९८४ ई. को रचित)

[आकाशवाणी रामपुर से संस्कृतकविगोष्ठी कार्यक्रम में २९.३.१९८४ को रात्रि ९.३० से १०.३० बजे के मध्य तथा 'साहित्यसुधा' कार्यक्रम के अन्तर्गत २०.५.१९८९ को प्रातः ७.५० पर प्रसारित।]

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

हा हन्त!

डॉ. कृष्णकान्त शुक्लः

(२२.५.१९९१)

नेहरोरिन्दिरायाश्च प्रयाणे विषमेऽपि या।
द्रवीभावं न सम्प्राप्ता, राजीवस्याद्य हिंसनम्-
विज्ञाय, विवशा, मूढा भृशं शोकाकुला सती।
मदीया लेखनी सैषा स्वीयान्यश्रूणि मुञ्चति॥

धर्मग्लानिविनाशायाधर्मस्योन्मूलनाय च।
दुष्टानां सर्वनाशायादुष्टानां रक्षणाय च॥
नानारूपेषु सत्त्वेषु दिव्यासु च विभूतिषु।
ईश्वरोऽवतरत्यत्र देशेऽस्माकं पुनः पुनः॥
केयं विडम्बना घोरा यद्दिव्या योगमूर्तयः।
अत्रत्यैरेव लोकैर्हि विलोप्यन्ते मुहुर्मुहुः॥

पुनरावृत्तिमायाता सैव गाथा पुरातनी।
यस्या स्मरणेनापि हृदयं परिवेपते॥
अहो! कृतघ्नतास्माकं या निहन्त्युपकारिणः।
आश्रयाशा वयं जाताः पिशाचा इव रक्तपाः॥

(२३.५.१९९१)

एष राजीवगान्धी ह्यः कथामात्रवपुः कृतः।
केनापि दुष्टदैत्येन धरणीभारकारिणा।
जवाहरस्य दौहित्र इन्दिरायाः सुतस्तथा।
गौरवं देशभूमेर्हा! सहसैव व्यलुप्यत॥

नेहरूणामयं वंशः सोऽस्ति दिव्यतमो भुवि।
योगभ्रष्टा इमे सर्वे जन्मभूमिपरायणाः॥
मानी, दानी तथा वाग्मी मोतीलालोऽत्र संबभौ।
यस्य कीर्तिकथाद्यापि लोकान् पुष्णात्यसंशयम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust. Funding by MoE-IKS

मालिकां जननीकण्ठे समायोज्य विशेषतः।
मज्जं गच्छन् हतः क्रूरं श्री पेदुम्बूरपत्तने॥

(२४.५.१९९१)

विषमापरिहार्यतामयी विधिलीला सुतरां बलीयसी।
शुभमप्यशुभं यया भवेदशुभं वा शुभतामियात्तथा॥१॥

चरमे निमिषे हि किं भवेदिति को वेत्ति जनो विशेषतः।
हृदये क्रियते किमप्यहो! फलमन्यत्प्रददाति वै विधिः॥२॥

(२५.५.१९९१)

जगतामुपकारका हि ये प्रसभं तान्हरतीह दुर्विधिः।
धरणीहृदयस्य शल्यकाः फलिता बिभ्रति कामपि श्रियम्॥३॥

निजगन्धविशेषसम्पदा विहिताशेषजगत्प्रसादनाः।
कुसुमावलयोऽल्पजीवनाः परिजीवन्ति चिरं च कण्टकाः॥४॥

अयि दैव! तवास्ति को नयः, मृदुलां तां विनिहंसि वल्लरीम्।
सततं परिपीडनापरां परिपुष्णासि भृशं च कण्टकीम्॥५॥

अनुरञ्जितलोकमानसः स हि राजीवपरागनिर्झरः।
करुणारहितेन हा विधे! पलमात्रेण चिराय शोषितः॥६॥

स हि दिव्यगतिस्तपोधनो निजदेशोन्नतये कृतश्रमः।
विचचार भुवं सदागतिर्जनतातापनिवारणे क्षमः॥७॥

कृतवान्न दुरुक्तकीर्तनं जनतन्त्रं न कदाप्यदूषयत्।
गतवान् स यमेव नीवृतं तरसा तं स्वगुणैर्व्यभूषयत्॥८॥

निजदेशपरायणो युवा कपटाचारविचारभीतिदः।
जननीपरमः प्रतापवानथ गङ्गाचरणेषु भक्तिमान्॥९॥

भरतावनिसंस्कृतिप्रियः सरलः सौम्यविचारदर्शनः।
कुटिले नृपनीतिचत्वरेऽसदृशो मार्गनिरूपणः सदा॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कुटिलैरभिसन्धिसाधनैर्घृणितैः साधुनिबर्हणैः परैः।
स विकासविधानपण्डितः परिभुक्तश्छलतो नृपुङ्गवः॥११॥

प्रथिता भुवनेषु शर्मदा द्रविडानां परमा मनोरमा।
बत सा खलु दक्षिणा दिशा निजनाम्नस्तु चकार सत्यताम्॥१२॥

तदलौकिकभाप्रभाविता ननु मन्ये किल मृत्युदेवता।
प्रथमं चरणाववन्दयत् तदनु प्राणमकर्षयच्च सा॥१३॥

नवनीतसमानकोमलं क्व वपुः, क्वाथ विनाशसम्भरः?
मृदुतां खरतां च दारुणां विषमां तां बत! कोऽनुमोदयेत्?॥१४॥

(२९.५.१९९१)

हृदयं परिवेपते मुहुः परिमोहं च प्रयाति चेतना।
धरणी किल कम्पते भृशं श्वसितैद्यौर्विषमं विषीदति॥१५॥

क्व भविष्यति साम्प्रतं हहा! गुणमूर्तिः समुदारदर्शनः।
जनतापरिपालनक्षमो ननु राजीवसमानमानवः॥१६॥

कविते! भव मौनमाश्रिता, विगता भूतिविभूतिरीदृशी।
असमञ्जसकारिणा हृता विधिना पुण्यपरम्परा हि सा॥१७॥

(२२-२५.५.१९९१ दिनाङ्केषु प्रणीतानि पद्यानि)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

साहित्य-सुधा

डॉ. कृष्णकान्त शुक्लः

(१)

जयति किमपि तत्त्वं काव्यसन्माधुरीणा-
मथ च प्रियतमानां भङ्गिभावैभवानाम्।
स्मरणमिह यदीयं दर्शनं सेवनं वै
मनसि निबिडसान्द्रां मोदधारां तनोति॥

(२)

जगति विशदपुण्याः सर्वतस्ते जयेयु-
र्निर्जभणितिविशेषैर्ये मनो मोहयन्ति।
सकलकलनशीलो दुर्जयश्चापि चण्डः
प्रभवति नहि छेत्तुं यान् करालोऽपि कालः॥

(३)

अयि कमल! तवायं कोऽस्ति दम्भो विचित्रो
यदतिशयविरुद्धं भावमाविष्करोषि।
सलिलकणविरतिं दर्शयस्येकतः स्वाम्
अपरत इह सूर्ये प्रेम, खेदं चं चन्द्रे॥

(४)

परकरकृतखेला मातरं ये स्वकीयां
निजकुमतिकठोरैर्हेतिभिः शातयन्ति।
प्रवतरति यदीशः सोऽपि मार्ष्टुं न शक्तो
निरतिशयजघन्यां तत्कृतां पापमालाम्॥

(५)

निखिलभुवनमध्ये निर्धनः सोऽपि नूनं
विलसति हृदि यस्य स्वार्थबुद्धिर्विशाला।
विकलकरणचित्तो निर्धनश्चापि दीनः
परहितकृतकृत्यो भूतिमान् वन्दनीयः॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(६)

भवसि सुजन! खिन्नः किं खलोक्तैः कठोरै-
र्निजकलुषमयीं ते दर्शयन्ति प्रवृत्तिम्।
विषमनिकषपट्टे कर्षितास्ते त एव,
स्वविमलगुणवन्द्यः संस्त्वमेव त्वमेव॥

(७)

प्रमदवन! विनोदं मा चिरं सन्निधत्स्व,
तव निरुपमशोभा मे मनः शङ्कयन्ति।
विदलितखगजालः, कम्पितारामालः,
प्रहततरुतमालश्चण्डवातोऽभ्युपैति॥

(८)

सततमतिविशाले स्वार्थजाले कराले
निजजठरनिमित्तं भ्राम्यताशेषकाले।
अयि मनुज! विमूढ! क्वापि लब्धा त्वया किं
सुखसालिलविशाला शान्तिधारा कदापि?

(९)

अनुपलमतिघोरान् पञ्चभूतेषु दोषान्
अहह! निहितवांस्त्वं क्रूरबुद्ध्या दुरात्मन्।
तव विषमयकृत्यैर्दीर्यमाणा धरित्री
शिव! शिव! करुणां कां दुःस्थितिं सम्प्रयाति?

(३१.७.१९९२)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्त्रीशक्तिशतकम्

—रमाकान्तशुक्लः

ब्रह्मशरीरस्यार्धं हृदययुतं सदयमस्य लोकस्य।
सृष्टिस्थितिलयहेतुर्नारीरूपं सदा जयति॥१॥

आद्या शक्तिर्नारी निखिलामरसारघटितनिजरूपा।
विविधरूपधर्त्री सा दैत्यविपद्भ्योऽमरानवति॥२॥

सौन्दर्यशक्तिसीमा परमौदार्येण सततसंयुक्ता।
ब्रह्मविष्णुशिववन्द्या नारीरूपा जयति देवी॥३॥

साद्या नित्या नारी युगलं स्वीयं विधाय निजशक्त्या।
ब्रह्माण्डकोटिसर्जनरक्षणलयकारणाय जागर्ति॥४॥

मधुकैटभमहिषासुरनाशार्थं चण्डमुण्डमथनार्थम्।
शुम्भनिशुम्भवधार्थं सा शक्तिर्भवति किल नारी॥५॥

सा वाणी सा कमला सा गौरी सर्वदेवरूपा सा।
त्रिपुरसुन्दरी वरदा सा नारी सा महामारी॥६॥

नारी शक्तिस्वरूपास्ते सृष्टिस्थितिलयंकरी।
विना नारीं पुमान् शून्यं नार्या युक्तो पुमान् पुमान्॥७॥

सन्तानजन्मदात्री सा तत्पालनकरी च सा।
पुंसः पुष्टिकरी नारी नारी नुरवलम्बनम्॥८॥

तामसी शक्तिरूपा चेन्नारी विश्वविनाशिनी।
राजसी सात्त्विकी चेत्सा जन्मदा पालिका च सा॥९॥

नारी माता स्वसा नारी जाया नारी सुता तथा।
पितृश्वसा ननान्दा च याता मातृश्वसा स्नुषा॥१०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्वश्रूः श्याली सपत्नी च नारी सर्वत्र गोचरा।
नरस्य शक्तिर्नार्यैव स्पन्दशक्तिस्तथैव सा॥११॥

वन्द्याभिनन्द्या नार्यास्ते नूनं सा जगतो मता।
नार्यास्ते चेतनारूपं सा शक्तिर्हि स्वभावतः॥१२॥

दया माया तथा श्रद्धा नार्यामेव कृतास्पदाः।
स्त्रीलिङ्गबोधिताः शब्दा विभूते रूपमासते॥१३॥

वाङ्माया ब्रह्मसूर्नारी दशविद्यात्मिका च सा।
बुद्धिर्नारी धृतिर्नारी सा सिद्धिः सा च साधना॥१४॥

लज्जा पुष्टिस्तथा तुष्टिः सर्वा नार्यात्मिकाः स्मृताः।
भक्तिर्भुक्तिस्तथा मुक्तिः शक्तिर्नारीस्वरूपिणी॥१५॥

कीर्तिः श्रीर्वाक् च नार्यास्ते धृतिरर्चा क्षमापि सा।
सर्वाधारावनिर्नारी सृष्टिस्थितिलयात्मिका॥१६॥

स्त्री स्वयं शक्तिरूपास्ते पुंसो जीवनदायिनी।
कुरूपा वा सुरूपा वा क्रियाशक्त्यात्मिका हि सा॥१७॥

स्त्री सहिष्णुर्धरेवास्ते गृहिणी सचिवः सखी।
न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते॥१८॥

नारीमेवावलम्बन्ते व्यापारा जगतः समे।
नारी प्रकृतिरूपास्ते जगदाधाररूपिणी॥१९॥

द्रुहिणस्य गृहे वाणी विष्णोर्गेहे रमा प्रिया।
शिवस्य शरणे गौरी त्रिलोचनकुटुम्बिनी॥२०॥

यस्या वशवर्त्यास्ते कोटिब्रह्माण्डनायकः।
श्रीकृष्णः सापि नार्यैव श्रीराधा वृषभानुजा॥२१॥

अपरा च परा विद्या प्रकृतिश्च परापरा।
नारीरूपेण शोभन्ते ज्ञानिनां शंविधायिकाः॥२२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

परा कुण्डलिनी नारी मूलाधारनिवासिनी।
पश्यन्ती मध्यमा नारी वैखरी स्त्री तथा मता॥२३॥

श्रुतिर्नारी स्मृतिर्नारी नार्यथोपनिषत्परा।
मातृका सैव वर्णानामष्टौ विकृतयोऽपि सा॥२४॥

स्त्रीलिङ्गवाच्या विद्यन्ते ग्रन्था मुख्या विलोकय।
अष्टाध्यायी मता नारी, नारी सिद्धान्तकौमुदी॥२५॥

या मध्यकौमुदी सापि स्त्रीस्वरूपधरा मता।
स्त्री साङ्ख्यकारिका, नारी लघुसिद्धान्तकौमुदी॥२६॥

वेदान्तपरिभाषाथो तर्कभाषा मनोरमा।
लीलावती भामती च प्रत्यभिज्ञाविमर्शिणी॥२७॥

मुक्तावली तथाद्वैतसिद्धिः संन्यासिनां प्रिया।
मीमांसापरिभाषाथो छन्दःपूर्वा च मञ्जरी॥२८॥

कादम्बरी काव्यमाला नीलकण्ठी च ताजिकी।
गादाधरी जागदीशी चित्सुखी दीपिका स्त्रियः॥२९॥

आनन्दलहरी नारी सौन्दर्यलहरी तथा।
श्रीगङ्गालहरी नारी रोटिकालहरी तथा॥३०॥

चौरपञ्चाशिका चेतःस्मृतिपञ्चाशिका तथा।
प्रमद्वरा सर्वशुक्ला सर्वशुक्लोत्तराः स्त्रियः॥३१॥

दुर्गासप्तशती गीता गाथासप्तशती तथा।
मङ्गल्या स्फाटिकी माला गीतमन्दाकिनी तथा॥३२॥

नीरजा शाश्वती निःस्यन्दिन्यथो कापिशायनी।
कामायन्युर्वशी नारी तथा भारतभारती॥३३॥

प्रतानिनी त्रिवेणी च काव्यालङ्कारकारिका।
सन्ध्या वीणा सुधर्माथो पद्यकादम्बरी स्त्रियः॥३४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चन्द्रिका यूथिका राका सिनीवाली च मानसी।
उपदेशशती स्फूर्तिसप्तशत्यथ शेमुषी॥३५॥

अमीनाजाशती नीराजना चाङ्गेरिका तथा।
लघिष्ठाग्निशिखा छन्दोमाला नाम्ना समाः स्त्रियः॥३६॥

टीका व्याख्या लिपिर्नारी लेखनी तूलिका मसी।
टिप्पणी पुष्पिका नारी वृत्तिः सूचिस्तथैव सा॥३७॥

टीका सञ्जीवनी सर्वङ्कषा नारायणी तथा।
वटुतोषिण्यथ ख्याता बाल-प्रौढ-मनोरमा॥३८॥

प्रियंवदाम्बाकर्त्री च विमला सरला रमा।
मिताक्षरा तथा लक्ष्मीधरा च मधुसूदनी॥३९॥

नारीरूपेण कीर्त्यन्ते वृत्तानि विविधानि च।
दण्डकाख्या च मालास्ते दीर्घाकारास्ति या मता॥४०॥

उक्तानुक्ता तथा मध्या प्रतिष्ठा सा सुपूर्विका।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च॥४१॥

त्रिष्टुप् च जगती चैवातिपूर्वा जगती तथा।
शक्वरी सातिपूर्वाथोऽष्टिश्चात्यष्टिर्धृतिस्तथा॥४२॥

कृतिस्तथा च प्रकृतिराकृतिर्विकृतिस्तथा।
संकृतिश्चातिपूर्वाथाकृतिरुत्कृतिरेव च॥४३॥

इन्द्रवज्रोपेन्द्रवज्रा शालिनी मालिनी रमा।
वसन्ततिलका चैव हरिणी स्रग्धरा तथा॥४४॥

शिखरिण्यथ पृथ्वी च मन्दाक्रान्ता रथोद्धता।
पुष्पिताग्रेन्द्रवंशा च स्रग्विणी सुन्दरी शिखा॥४५॥

स्वागता रुचिरा गौरी जलोद्धतगतिस्तथा।
विद्युन्माला सुवदना नारीरूपधराः समाः॥४६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

गीता गङ्गा च गायत्री यमुना च सरस्वती।
कावेरी तुङ्गभद्रा च नारीरूपधराः समाः।।४७।।

गोदावरी तथा कृष्णा नर्मदा च महानदी।
शुतुद्री च परुष्णी च विपाशा सिन्धुगामिनी।।४८।।

शिप्रा च सरयूश्चैव गोमती ताम्रपर्णिका।
पुष्णन्ति पयसा नार्यो नदीमातृकभारतम्।।४९।।

अयोध्या मथुरा माया काशी काञ्ची ह्यवन्तिका।
पुरी द्वारावती चैव नगर्यः स्त्रीस्वरूपिकाः।।५०।।

अहल्या द्रौपदी कुन्ती तारा मन्दोदरी सती।
दमयन्ती तथैवान्याः स्मृता नार्योऽघनाशिकाः।।५१।।

संनियम्येन्द्रियग्रामं त्यक्तसर्वपरिग्रहाः।
मुनीन्द्रा यां समीहन्ते सिद्धिर्नारी जयत्यसौ।।५२।।

सङ्गीते ये नरा रागास्तेषां कालस्तु निश्चितः।
भैरवी रागिणी नारी सर्वकालाधिकारिणी।।५३।।

वीणा घोषवती नारी स्वरश्रुतिमनोहरा।
तस्या अनुसृतिं कुर्वन्मृदङ्गो मोदते नरः।।५४।।

त्रिकटुस्त्रिफला नारी गुडूची च शतावरी।
अश्वगन्धा मूसली च सर्वाः शक्तिप्रदाःस्त्रियः।।५५।।

आन्विक्षिकी त्रयी वार्ता दण्डनीतिस्तथा स्त्रियः।
शक्तिरूपास्समा एता जयन्ति भवरक्षिकाः।।५६।।

रतिश्च विरतिश्चैव समस्या च समाहितिः।
रिक्तिः पूर्तिरुषा सन्ध्या संख्या नाडी समाः स्त्रियः।।५७।।

होलिका दीपमालाथो विजयादशमी तथा।
श्रावणी तिथयश्चान्याः स्त्रीस्वरूपधरा मताः।।५८।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ओषधिः स्त्री पुमान् रोगः स्त्री चिकित्सागदङ्करी।
विकारः पुरुषः शान्तिर्नारी कल्याणकारिणी॥५९॥

त्रिलोक्याकाशगङ्गा भूर्भ्रमिश्चाथ प्रदक्षिणा।
त्रिज्या त्रिकोणमित्याद्याः सर्वाः स्त्रीलिङ्गबोधिताः॥६०॥

असिपुत्री भुशुण्डी च शतघ्नी तुपका स्त्रियः।
प्रक्षेपणी नभोवाणी दूरवाणी तथा स्त्रियः॥६१॥

जनिर्मृतिः क्षुधा निद्रा मुमूर्षा च जिजीविषा।
जिज्ञासा विजिगीषा च चिकीर्षा च मताः स्त्रियः॥६२॥

स्त्रीलिङ्गं शक्तिपर्यायः कोषान् पश्य मनाक् सखे!
विष्णोर्माया भगवती यया संमोहितं जगत्॥६३॥

पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा।
आहोपुरुषिकासज्ज्ञा जयन्ति पुरुषांस्त्रियः॥६४॥

स्वाधीनभर्तृका वा स्यात्कलहान्तरिताथवा।
प्रवत्स्यपतिका वा स्यान्नारी शक्तेर्निधिर्ध्रुवम्॥६५॥

प्रोषितभर्तृका किंवाऽऽगमिष्यद्भर्तृकाथवा।
आयातभर्तृका वा स्यान्नारी शक्तेर्निधिर्ध्रुवम्॥६६॥

सरला कुटिला मुग्धा मध्या प्रौढाथ खण्डिता।
वृद्धा सौम्या प्रगल्भा वा नार्यास्ते शक्तिरूपिणी॥६७॥

असती वा सती वा स्यात् सलज्जा निस्त्रपाथवा।
पठितापठिता वा स्यान्नारी शक्तिस्वरूपिणी॥६८॥

विद्याः शक्तिस्वरूपिण्यो देवीरूपाः समाः स्त्रियः।
ताः शक्तिहीना दृश्याश्चेद्दौर्भाग्यं जगतस्तदा॥६९॥

अशेषजन्तुभीतीनां हर्त्री दुर्गास्वरूपिणी।
नारी विश्वेश्वरी शक्तिर्यया व्याप्तं चराचरम्॥७०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पुरुषस्योपकर्त्री स्त्री शक्तिहीना न सा भवेत्।
अर्धनारीनटेशस्य मूर्त्यां स्त्रीपुंसयोः स्थितिः।।७१।।

स्त्रीपुंसयोस्तु सम्बन्धः संसाराय शिवावहः।
शक्तिर्जागरिता भाति स्त्रीसांनिध्यान्नरेष्वपि।।७२।।

आत्मशक्त्या ततं देव्या जगत्सर्वं चराचरम्।
ब्रह्मविष्णुमहेशानां साविर्भावविधायिनी।।७३।।

ये बुद्धिजीविनः ख्याताः स्त्रीविमर्शविधायिनः।
ते स्वलेखप्रचारार्थं शक्तिहीनां स्त्रियं जगुः।।७४।।

स्त्रियामुपरतायां ना परिवारावनेऽक्षमः।
परलोकगते पुंसि क्षमा स्त्री वंशपालने।।७५।।

आजीविकापि स्त्रीरूपा यां विना न सुखी नरः।
स्त्रीरूपा राजनीतिश्च नेतृणां शक्तिवर्धिनी।।७६।।

नारीशक्तेः प्रमाणार्थमितिहासोऽवगम्यताम्।
यत्र विश्वस्य रक्षार्थं नार्याः शक्तिरुदाहृता।।७७।।

अरुन्धत्यनसूया च लोपामुद्रा मदालसा।
ऋषिपत्न्यो लोकवन्द्या मैत्रेयी ब्रह्मवादिनी।।७८।।

आत्रेयी किञ्च मैत्रेयी तथापाला च गौतमी।
लक्ष्मीबायी तथा दुर्गावत्यहिल्येन्दिरा लता।।७९।।

सरोजिनी सुभद्रा च झलकारी तथा रमा।
सुनीताकल्पनेत्याद्या ज्ञानविज्ञानशक्तयः।।८०।।

सम्राज्ञो राजलक्ष्म्यश्च क्षत्राण्यश्च रणं गताः।
व्यापारकर्त्र्यो विश्वस्मिंस्त्रियो वन्द्या मनस्विभिः।।८१।।

राष्ट्रनेत्री राष्ट्रदूती क्रान्तिकर्त्री च लेखिका।
श्रमिका कृषिकर्त्री च नारी वन्द्या मनीषिभिः।।८२।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्त्री शिक्षिकाभियन्त्री चाधिकोषस्याधिकारिणी।
जलस्थलनभःसेनादर्शितात्मपराक्रमा॥८३॥

नास्त्येकोऽपि विभागो यो नैव नार्या विभूष्यते।
लोके पत्युः प्रतिष्ठाया रक्षार्थं स्त्री भवेत्क्षमा॥८४॥

गृहीत्वा भाटकं गेहं सपत्नीकनराय वै।
गृहस्वामी निवासाय दत्ते नैकाकिने क्वचित्॥८५॥

धर्मपत्नीं विना पूजा तीर्थयात्रा च निष्फला।
धर्मपत्नीसहायस्य पूजा साफल्यमश्नुते॥८६॥

नास्त्यशक्तो नरो वा स्त्री शक्तिमन्तावुभावपि।
शक्तिमान् पुरुषो वाच्यः स्त्री तु शक्तिस्वरूपिणी॥८७॥

अभावे निःस्वतायाञ्च स्त्रियाः शक्त्या सनाथिताः।
जीवनं यापयन्त्येव सुखदुःखात्मकं नराः॥८८॥

तेजापोबाधिता वा स्यात्ताडिताथो बलात्कृता।
तितिक्षारूपिणी नारी ध्रुवं साऽऽस्ते जिजीविषा॥८९॥

ये बलात्कारिणो नार्या येऽपमानकराः स्त्रियः।
ये शोषणकराश्चास्या धिक्तान् धिक्तान्नराधमान्॥९०॥

नार्यां सह जगत्सत्यं मिथ्या नारीं विना जगत्।
सा शक्तिर्जीवमात्रस्य सा नोऽशक्ता कदाचन॥९१॥

लोकसेवासुदक्षा सा कलासाहित्यरक्षिणी।
अध्यात्मविद्यादात्री सा रणाङ्गणभयङ्करी॥९२॥

अद्यापि विश्वपटले सर्वकार्यविधायिनी।
दृश्या विजयिनी नारी विश्वकल्याणकारिणी॥९३॥

अभियन्त्री चिकित्साकृद्वायुयानस्य चालिका।
अध्यापिका न्यायकर्त्री राजनीतिविचक्षणा॥९४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

व्यापारकर्त्री सञ्चारमाध्यमेषु कृतश्रमा।
नेत्री तथाभिनेत्री च धर्मप्रवचनक्षमा॥९५॥

अन्तरिक्षगता नारी विज्ञानोत्कर्षधारिणी।
ग्रहप्रदक्षिणां कृत्वा भूमिमागत्य मोदते॥९६॥

शक्तेः स्रोतस्विनी नारी वर्णितास्ते कवीश्वरैः।
दृष्टान्तास्तत्र लभ्यन्ते शतशोऽथ सहस्रशः॥९७॥

कल्याणपत्रिकायास्त्वं नार्यङ्कं पठ पाठक!
सामर्थ्यं येन नार्यास्त्वमंशतो ज्ञातुमर्हसि॥९८॥

विश्वसिद्धेस्तु या हेतुस्स्वतन्त्रा चितिरूपिणी।
जयत्युन्मील्य सापि स्त्री स्वभित्तौ स्वेच्छया जगत्॥९९॥

शेषो वा शारदा वापि नारदो वा कथं भवेत्।
समर्थो गणने नाम्नां सन्नारीणामशेषतः॥१००॥

अबला नैव सा ज्ञेया सास्ते शक्तिस्वरूपिणी।
सशक्तीकरणं तस्याः को नु कर्तुमिहार्हति॥१०१॥

माता रक्षति कौमारे भार्या रक्षति यौवने।
स्नुषा रक्षति वार्धक्ये जनं सौभाग्यभाजनम्॥१०२॥

अथवा किं बहूक्तेन नारी शक्तिस्वरूपिणी।
सा रक्षिकास्ति विश्वस्य सा लोकस्यावलम्बनम्॥१०३॥

नारी शक्तिस्वरूपास्ते शृण्वस्मत्परमं वचः।
अस्याः शक्त्या नरो जीवेत् कोऽस्यै शक्तिं प्रदास्यति?॥१०४॥

अतः सखे! त्वं नो नारीं शक्तिहीनां विचारय।
पूजयेर्जीवने तां सा स्यात्ते शक्तिप्रदायिनी॥१०५॥

तस्याः सम्मानरक्षार्थं सदा यत्नो विधीयताम्।
श्रेयस्कामैर्नरैर्नित्यं जयेत्स्त्री शक्तिरूपिणी॥१०६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रुदती वा हसन्ती वा क्रोशन्ती वा श्वसन्त्यपि।
श्लिष्यन्ती ताडयन्ती वा स्त्री शक्तिर्नात्र संशयः॥१०७॥

जगदम्बास्वरूपेण जगद्दृष्टं महर्षिभिः।
भारताम्बास्वरूपेण भारतं दृश्यते बुधैः॥१०८॥

जगदम्बा-भारताम्बा-प्रीत्यर्थं भवतादिदम्।
रमाकान्तकृतं काव्यं स्त्रीशक्तिशतकामिधम्॥१०९॥

नारीशक्तिं नमन् दिल्ल्यां रमाकान्तो रमालये।
लोककल्याणकाङ्क्षी सन् स्त्रीशक्तिशतकं जगौ॥११०॥

स्त्रीशक्तिशतकं काव्यं श्रद्धया यः पठेज्जनः।
वर्धन्तां तस्य लोकेषु शक्तिविद्यासमृद्धयः॥१११॥

रमालयः, आर-६,
वाणी विहारः, नयी दिल्ली-११००५९
ई-मेल : sarvashukla@gmail.com
दूरभाषः-०११-२८५६१८४६
मो. : ७०४२४३१६०८, ९५६०५३२३९२

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रकृतिः सुरम्या

हरिदत्तशर्मा

ग्रीष्मे वहन्ति पवनाः सततं सुगन्धाः
स्नानं जलेषु सुखदं दिवसेषु नित्यम्।
छायाश्रयाच्च शयनं सुलभं नराणाम्।
रम्या भवन्ति समदा दिवसाः प्रदोषे॥१॥

श्रुत्वा ध्वनिं जलमुचां गगने मयूराः,
नृत्यन्ति चाधिकमनोज्ञतया वनेषु।
नद्यो वहन्ति जलधिं प्रति वै समस्ताः,
भान्ति स्त्रियो मदयुताः पुरतो नराणाम्॥२॥

भूमौ सुरम्यशरदः कमनीयतास्ति,
नीलं नभः सुखकरं नयनाभिरामम्।
उत्फुल्लपुष्पहरिता प्रकृतिः सुरम्या,
चन्द्रच्छटा नयनयोः सुखदा वियद्भा॥३॥

वाप्यां प्रफुल्लकमलच्छविरद्वितीया,
प्रायाति शीतलमरुत् हिमतुङ्गजातः।
आशासु तिष्ठति दिवापि तमः प्रभूतम्,
दृष्टिं न नन्दयति मे हिमयुक्तराका॥४॥

दृश्यास्तुषारधवलाः शिशिरे समाशाः,
भोग्या हिमांशुकरकान्तनिशाः सकामैः।
नद्यो विभान्ति करनादसुशोभिता मे,
सर्वं निमग्नमिव भाति हिमप्रपाते॥५॥

मन्दं वहन्ति सुखदाः पवना वसन्ते,
वृक्षेषु कोकिलरवो मधुरो वसन्ते।
ईषच्च शीतलदिनानि ऋतौ वसन्ते,
शोभातुला भवति दिक्षु सदा वसन्ते॥६॥

सहायक आचार्य संस्कृत
देवनागरी महाविद्यालय, गुलावठी, बुलन्दशहर उत्तरप्रदेश

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीमहाशिवरात्रिमहोत्सवे वि.सं. २०७७

श्रीनटराज-शिवाष्टकम्

(सर्वसिद्धिप्रदं स्तोत्रम्)

आचार्य पं. नथमल शास्त्री दाधीचः
छापर (चूरू)

श्रीवैष्णवानां प्रथमो हि शम्भु-
र्यस्तन्त्रशास्त्रादिकतत्त्ववेत्ता।
मन्त्रोपदेष्टा हरिभक्तिसिद्ध्यै
पूज्यस्त्रिलोकैकगुरुर्गरीयान् ॥१॥

अनादिशक्तेरविलुप्तशक्तेः
स्वतन्त्रशक्तेः परमञ्च धाम।
योगीश्वरं ज्ञानघनं निरीहं
सदाशिवं नौमि तमीशमीड्यम् ॥२॥

गौरं जटाजूटधरं गभीरं
गङ्गाधरं व्यालविभूषणञ्च।
गौरीपतिं स्कन्दगणेशतातं
मृत्युञ्जयं त्र्यम्बकमानतोऽस्मि ॥३॥

नन्दादिगोपार्चितपादपद्मं,
व्रजे महादेवमनाथनाथम्।
गोपेश्वरं रासरसाभिषिक्तं
गोपीस्वरूपं शिवमानतोऽस्मि ॥४॥

विश्वेश्वरं तत्पुरुषञ्च रुद्र-
मोंकारमूलं गिरिशं गिरीशम्।
भस्माङ्गरागं धृतभालचन्द्रं
वृषध्वजं नौमि शिवं शिवेशम् ॥५॥

शिव शिव शिव-मन्त्रः सर्वकल्याणकारी,
हर हर हर-मन्त्रः सर्वदुःखापहारी।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust. Funding by MoE-IKS

भव भव भव-मन्त्रो भक्त-सौभाग्यकारी,
शिवहरभव-मन्त्राः सन्तु सिद्धिप्रदा नः ॥६॥

सुरनरमुनिसिद्धैर्योगिभिर्वन्दिताङ्घ्रिः,
सकलनिगमगुह्यः शङ्करो मुण्डमाली।
परशुपरिघढक्काशक्तिशूलासिहस्तो,
भवतु मयि दयार्द्रः पञ्चवक्त्रस्त्रिनेत्रः ॥७॥

संज्ञानविज्ञानविरागमूर्तिं,
विद्याधियं वेदमयं महेशम्।
आनन्दरूपं खलु निर्विकारं,
नमामि भक्त्या नटराजराजम् ॥८॥

नीलकण्ठो महादेवः कामारिस्त्रिपुरान्तकः।
आशुतोषः स्तुतो भक्त्या प्रीयतां मे सदाशिवः ॥९॥

यज्ञेशो यज्ञभोक्ता च दक्षयज्ञविनाशनः।
व्याघ्रचर्माम्बरो देवः प्रीयतां मे सदाशिवः ॥१०॥

आयुष्कामश्च श्रीकामो विद्याकामस्तथैव च।
सिद्धिकामः पठेन्नित्यं स्तोत्रमेतच्छिवाष्टकम् ॥११॥

जय जय पं. नथमल शास्त्री दाधीच-विरचितं
श्रीनटराजशिवाष्टकस्तोत्रं सम्पूर्णम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सरस्वतीद्वादशनाममाला

-डॉ. बुद्धेश्वरषडङ्गी

जगद्भद्रे नित्यं रचयति विपञ्चीं श्रुतिपरां
परोत्थानप्राणा कविकुलकलां जीवयति या।
दृगस्या भारत्या लसतु सततं बुद्धिसदने
सवित्री वाचां योपहरति च शास्त्राशिवकलाम् ॥१॥

असावीन्मातस्ते वरकरुणया दिव्यचरिताद्
रसानां सम्भारं दशरथकुलादादिमकविः।
जनोत्कर्षे मग्ना कविकुलमतिस्त्वच्छुभदृशा
सरस्वत्या अर्चा तदिह वसुधायां बहुकृता ॥२॥

ह्रियाद्विद्याध्वान्तं जितकुमुदकान्तिर्भगवती
गिरां देवी नित्यं श्रुतिमधुरधारासृतिपरा।
शरज्ज्योत्स्नाशुभ्रा वसति वसतौ या मतिमतां
तटे तुङ्गानद्याः कलयति च या शारदकलाम् ॥३॥

विचित्रे संसारे विविधरुचिमन्तस्सुरनरा-
श्चिदानन्दाब्धिं तान् गमयसि मरालासनपरे!
सदोत्कृत्य प्रज्ञां जरयसि धनोत्थां मदततिं
न नीरे तु क्षीरे रतिरिह हि हंसस्य मधुरा ॥४॥

सरिद्धारा याति श्रितशिवपथारण्यहितकृद्
धृतज्ञानापस्त्वं जगति! जगति प्रैषि मधुरा।
जगत्यादीनां च श्रुतिसुखगुणं पोषयति तन्-
महच्छन्दोमार्गे प्रसरति कवीनां रससरित् ॥५॥

सुरेन्द्राणां वासे सरति महती यामृतसरित्
श्रुतिस्मृत्यादीनां तदपि भगवत्याः करुणया।
ततो वाग्वैविध्येऽप्रतिहतगतिर्नश्शिवदृशा
भवेद्वागीश्वर्य्याश्श्रितसितगुणाया भुवि सदा ॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust. Funding by MoE-IKS

कुमुद्याश्चेद्दृष्टिः पतति मनुजे मूढमतिके
त्वनायासं शास्त्रं सरति वदनान्मङ्गलमयम्।
ततस्सेव्या सेयं धृतकुमुदधर्मा भगवती
विभाति ज्ञानेशी जगति कुमुदीति श्रुतिमयी ॥७॥

स्वयं ब्रह्मास्वादे विचरति तथा चारयति या
विपञ्च्यास्तानेनापरिमितसुखं वर्षयति या।
अविद्याध्वान्तोत्थं हरति कषणं पापशमनी
सवित्री वाचां सा निगमपथतुष्टावतु सदा ॥८॥

हरेद्बुद्धेर्मान्द्यं मनुजशिवकृत्सा भगवती
यदालोके लोकः सरति सततं विघ्नरहितम्।
घृणीशो ह्रीणस्सन् वसति पुरतो यस्य तमसः
सुदात्री बुद्धेस्तु श्रुतिकिरणरम्या विजयते ॥९॥

वराणां दात्री सा भवतु शिवदा ज्ञानफलदा
जिताशेषापद्या श्रुतिसरणलीलापरवरा।
स्वनैस्साम्नां नित्यं हरति विबुधापायमखिलं
शरज्ज्योत्स्नाकान्तिर्धृतवरदमुद्रा भगवती ॥१०॥

यथा कान्तिर्नन्दं कलयति मृगाङ्कस्य सततं
तथाज्ञानत्रस्ते भवतु भगवत्या नयनभा।
महामायाकोपाज्जगति लयलीलोत्पतति या
स्वकान्त्या वाग्देवी शमयति सदा चन्द्ररसिका ॥११॥

अहार्षीद्या बुद्धिं भुवनजननी शुभ्रतटिनी
मुनीन्द्राणां मन्दामसुरकमलाद्विट् कृतयुगे।
सुरेन्द्रैर्वन्द्या सा श्रुतिसरटिना पापसरणं
हरेच्चन्द्रार्काग्निज्वलनजयिनी ज्ञानसरणी ॥१२॥

इति वशिष्ठगोत्रोत्पन्नसुरवाक्सेवकेन बुद्धेश्वरषडङ्गशर्मणा विरचिता सरस्वतीद्वादशनाममाला।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मनोहरपद्यानि

–डॉ. मनोहर लाल आर्य

[१४/११/२०२०, १२:२० रात्रिः]

दीपाद्दीपो ज्वलति चपलं दीपमालानिशायां
पुण्यात्पुण्यं वितरतु जनः सर्व एवं सदैव।
अज्ञानारिव्रज इह शठः सत्वरं यातु नाशं
ज्ञानद्योतैर्धरणिरखिला द्योतिता स्यादितीहे॥

[२०/०१, १०:४२ रात्रिः]

जो बाइडननामाद्या-मेरिकादेशमण्डले ।
राष्ट्राधीशपदं प्राप्य सुशोभते महीतले॥

ट्रम्पवर्यो रुषा क्लिष्टो म्लानो ग्लानो हतप्रभः।
निर्वास्यतःप्रदीपस्य शिखेव मान्द्यमेति हा॥

[२६/०१, ११:१७ प्रातः]

नश्यन्तु वैरिहतकाश्च विधर्मिणो द्राक्
सौहार्दसौख्यसरितः परितो वहन्तु।
प्राप्नोतु देश इह विश्वगुरुत्वकान्तिं
शान्तिञ्च दान्तिमतुलामुपकारवृत्तिम् ॥१॥

इत्याकलय्य मनसि प्रणमन्तु राष्ट्रं
सत्पौरुषामृतजलेन च सिञ्चयन्तु।
कोरोनिकादव उपैतु शमञ्च येन
माङ्गल्यकारि गणतन्त्रदिनञ्च भूयात् ॥२॥

[२६/०१, ७:०७ रात्रिः]

आन्दोलनं कृषकगौरवनिष्ठमेत-
द्धिंसादिकर्मचिकिले विनिमग्नमद्य।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आरक्षिसम्मुखमहो बत शोणदुर्गे
प्रोड्डायिता निजकसंघगता पताका ॥१॥
तेनाद्य देशगरिमा प्रविखण्डितस्तै-
र्देशारिभिः कथमहो सुधियोऽत्र मौनाः।
राष्ट्रास्मिता प्रलपति प्रविहाय धैर्यं
हे रक्ष देव गणतन्त्रदिने पवित्रे ॥२॥

[२७/०१, २:३३ रात्रिः]

राष्ट्रध्वजो भवति राष्ट्रवरप्रतिष्ठा
तस्यावनीपरिसरोऽन्यपताकया किम् ।
प्राबाधितो बत विधर्मिजनैर्वदन्तु
हे देशनेतृनिवहाः किमु ते न दण्ड्याः॥

[३१/०१, १०:५४ प्रातः]

आसीत्पूर्वं कृषकनिवहःस्वाभियाने विशुद्ध
आतङ्केनाथ च समगमत्लोकशङ्कास्पदत्वम्।
पश्चादैक्यं समभजदसौ राजनेत्राश्रयर्द्धं
नो जाने का खलु परिणतिर्हा वरीवर्त्तितास्य॥

देशास्तित्वं भविकमनघं लक्ष्यमाद्यं समेषां
स्यादित्येवं सकलमनुजाश्चिन्तयेयुः सधैर्यम्।
गर्वातङ्कैर्न खलु सुलभा जातुचिद्देशशान्तिः
सौहार्देन प्रचलति सुखं लोकयात्रा सदैव॥

[०४/०२, १०:२९ रात्रिः]

प्राचीरशूलचयदुर्गमयी सुरक्षा-
भित्तिर्व्यधायि कृषकव्रजवारणाय।
या साम्प्रतं कथमसौ न कृता हि शोण-
दुर्गे तदारिदमनाय न बोबुधीमि ॥१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आतंकिनोऽत्र कृषका उत केचिदन्ये
जाने न निर्णय इति क्व कदा कथं स्यात्।
हे मान्य मोदिवर चिन्तय नो विलम्ब
आन्दोलनेऽत्र खलु देशहिताय मन्ये ॥२॥

[२२/०२, ४:१६ रात्रिः]

प्रयाता कोरोना न मतमिति केषाञ्चन मत-
मियं नो याता भोः क्वचन पुनरायाति विदितम्।
अतः सर्वैरद्धा सयतनमनावश्यकमिह
बहिर्नो गन्तव्यं समवत निजञ्चान्यमनुजान् ॥१॥

न रक्षोवक्षोवै सरलमपितु क्रूरमुदितं
न विश्वासश्चीनप्रजनितजने भोः समुचितः।
मताःपृष्ठाघाते जगति विदिताश्चीनिहतकाः
कथं कोरोनायां भजति जनता प्रत्ययमहो ॥२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust. Funding by MoE-IKS

गुजरातदेशः

अंबालाल प्रजापतिः

सरस्वतीसिन्धुयुगान्तसाक्षी
वेदज्ञनरैः ननु वंदनीयः।
एको वरेण्यः सदा वर्धमानो
धन्यो हि रम्यो गुजरातदेशः ॥१॥

जन्मप्रदाता गुरोर्वै च गान्धेः
महामनाहिंसकः सत्यनिष्ठः।
स्वातंत्र्यसंग्रामधुरन्धरो वै
धन्यो हि रम्यो गुजरातदेश; ॥२॥

देशस्कृतो येन चैक्ये समस्तो
विभाजितो दुर्बलो छिन्नभिन्नः।
एकः सुपुत्रो महाभारतीयो
धन्यो हि रम्यो गुजरातदेशः ॥३॥

साहित्य संगीत कला विशिष्टः
संस्कार वाणी विचारप्रशिष्ट।
वाणिज्य विद्याकृषिकर्मदक्षो
धन्यो हि रम्यो गुजरातदेशः ॥४॥

महीनदीनर्मदावारिपुष्टः
सरस्वती साभ्रमतीसुसिक्तः।
रत्नाकरालंकृतदीर्घकण्ठो
धन्यो हि रम्यो गुजरातदेशः ॥५॥

आरासुरशक्तिपीठेन सिद्धः शत्रुंजयजैनतीर्थप्रसिद्धः।
जूनागढालंकृतदत्तशृंगो धन्यो हि रम्यो गुजरातदेशः ॥६॥

सोमेश्वरीयः सदा सोमनाथे योगेश्वरीयः खलु द्वारिकायाम्।
डाकोर देशे च पलायनेशो धन्यो हि रम्यो गुजरातदेशः ॥७॥

४/१०/२०२०

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सहकारं विना बन्धो! कथं कोविदमर्दनम्?

–अंबालाल प्रजापतिः

संघटिता वयं देशे सावधानाश्च भारते।
अमृतस्य वयं पुत्राः विषाणुध्वंसकारिणः ॥१॥

कोविदं च हनिष्यामः निकटे ननु भाविनि।
हन्तारश्च महारोगे सेविकाः खलु भारते ॥२॥

अपेक्ष्यते न सम्मानः सहकारश्च वीक्ष्यते।
सहकारं विना बन्धो! कथं कोविदमर्दनम् ॥३॥

अत्र चिकित्सकाः सिद्धाः दक्षाश्च परिचारिकाः।
सूचिकर्मकराः सुज्ञाः सूरक्षिणः प्रबन्धकाः ॥४॥

शासकैये सदा पूज्याः परार्थे त्यक्तजीविताः।
प्रतिष्ठिताश्च सर्वत्र ते पंचायतनो हरिः ॥५॥

कुर्वन्ति ते महापापं ये दुराचारिणः खलु।
प्रक्षिपन्ति हविस्थाने यज्ञे मल-मूत्रास्थीनि ॥६॥

कुर्वन्ति स्वागतं दुष्टाः शिलाखण्डशकलैर्यदा।
आत्मघ्नाश्च ते यान्ति न शान्तिं शाश्वतीः समाः ॥७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

केयं हि लोकविडम्बना

(गलज्जलिका)

–डॉ. राधावल्लभशर्मा

संस्थाप्य या निजमानसे किं किं न सहते स्वेच्छया।
दुःखानि सा ननु पीड्यते केयं हि लोकविडम्बना ॥

वंशगौरवरक्षणाय नैजं हि जीवनमर्पितम्।
नहि तेन सह कश्चिदपि केयं हि लोकविडम्बना॥

शास्त्राणि पठितानि च येन नित्यशः खलु श्रद्धया।
नाधिगता व्यवहारशिक्षा केयं हि लोकविडम्बना॥

सम्पूज्यते वाराङ्गनाऽद्य जनैः कामुकलिप्सया।
अपमानिताऽत्र कुलाङ्गना केयं हि लोकविडम्बना॥

भवति नु कन्यापूजनं नवरात्रिकाले सर्वदा।
सा हन्यते गर्भस्थिता केयं हि लोकविडम्बना॥

मर्दिता नवमालिका मृदुला विनम्रा पुष्पिता।
मातङ्गजेनानेन हन्त! केयं हि लोकविडम्बना॥

रात्रिन्दिवं परिश्रम्य येन निर्मिता नववाटिका।
स्वार्थकीटैः दंशिता वै, केयं हि लोकविडम्बना॥

घोरकालेऽस्मिन्

(गलज्जलिका)

मदायन्ते जना भूयः प्रचण्डे घोरकालेऽस्मिन्।
अप्यसौ भङ्गुरो लोकः दुरूहे घोरकालेऽस्मिन्॥

मराला व्याकुलीभूताः स्वदन्ते पायसं काकाः।
हन्त! दौर्भाग्यमस्माकं कराले घोरकालेऽस्मिन्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

समेऽपि पक्षिणः प्रीत्या कानने गहनेऽवसन्।
नाशितं नीचव्याधेन निष्ठुरे घोरकालेऽस्मिन्॥

पिकास्तु नैव कूजन्ति मयूरा नैव नृत्यन्ति।
क्रन्दति क्रौञ्चीयं तारं दुष्करे घोरकालेऽस्मिन्॥

परित्राणाय साधूनां विनाशार्थञ्च दुष्टानाम्।
भासते वैपरीत्यं नु भीषणे घोरकालेऽस्मिन्॥

शुनका आसनारूढा भयाद् भीताश्च शार्दूलाः।
अश्नन्ति मर्कटाः स्वादु दारुणे घोरकालेऽस्मिन्॥

गोष्ठ्यां लशुननिन्दायां कुशलोऽयं मया दृष्टः।
गृहे भुङ्क्ते स मांसानि, विषमे घोरकालेऽस्मिन्॥

भुजङ्गा नु पलायन्ते त्यक्त्वाऽद्य चन्दनद्रुमान्।
प्रत्येकमालयेष्वेते कराले घोरकालेऽस्मिन्॥

पीत्वा दिवानिशं रागं पुष्पस्थो भ्रमरोऽधुना।
पलायते गते काले प्रचण्डे घोरकालेऽस्मिन्॥

कोरोनाक्रमणे काले कौतुकीकृष्णं कलय।
कलावेकं हि तत् सत्यं निदाघे घोरकालेऽस्मिन्॥

सहायकाचार्यः, साहित्यविभागे,
हरियाणासंस्कृतविद्यापीठम् (केन्द्रीयसंस्कृतविश्वविद्यालयेन सञ्चाल्यमानम्)
बघौला, पलवलम्, हरियाणा।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मानवता

–म.म. डॉ. कैलाशनाथ द्विवेदी

हृदये येषां न दया - करुणा, नहि शीलयुता मैत्री-ममता।
दानवगुणपूर्णा दानवता, मानवगुणपूर्णा मानवता॥१॥

चित्ते न वसति वैरं सततं, हिंसाकार्ये न कुमनो निरतम्।
यत्रास्ति क्षमा ममता-समता, मानवगुणपूर्णा मानवता॥२॥

सन्मानं दानं दीनेभ्यो दयया, दोषान् नहि पश्यति यः क्षमया।
हृदये सत्यं शुचिता नमिता, मानवगुणपूर्णा मानवता॥३॥

कुटिलं न कदाचरणं कृत्यम्, सरलं च सदाचरणं सत्यम्।
आचरणे सदा धर्ममयता, मानवगुणपूर्णा मानवता॥४॥

सत्प्रेम-प्रतीतिमये हृदये, सद्भावयुते सरसे निलये।
प्रेम्णैव च पोषिता पावनता, मानवगुणपूर्णा मानवता॥५॥

येषामहिंसाऽस्ति सुपुण्यव्रतम्, सदैव दयाकरुणा-निरतम्।
अभयं सहितं हिंसा विरता, मानवगुणपूर्णा मानवता॥६॥

दानिदधीचिहरिश्चन्द्रसमाः, आसन्निर्लोभिनः सूदारमनाः।
जीवनतस्ते परोपकाररता, मानवगुणपूर्णा मानवता॥७॥

दशरथरामपवित्रकथा, शान्तनुसुतगांगेयादि तथा।
श्रीकृष्णपाण्डुसुत-भास्वरता, मानवगुणपूर्णा मानवता॥८॥

तत्तेजः कुत्र परशोर्धरस्य, तच्छौर्यं कुत्रेह धनञ्जयस्य।
क्व सीता-सावित्रीव पवित्रता मानवगुणपूर्णा मानवता॥९॥

गौतमगान्धि-गौरवगाथया, संसारोऽस्त्यवनतोऽतिश्रद्धया।
मानवस्य सद्गुणसुपूर्णता, मानवगुणपूर्णा मानवता॥१०॥

दूरीभवन्तु दुर्गुणा नश्येच्चाशु दानवता।
सद्गुणाः सुसमृद्धाः स्युः भव्या भवेन्मानवता॥११॥

'कुसुमकुलाय', अजीतमल (औरैया) उ.प्र.–२०६१२१
चलभाष्यम्–९७५९३४१८७८; ८०७७६९१८५४

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पण्डितप्रेमनारायणद्विवेदि-प्रणीता

पद्य-कादम्बरी

सम्पादकः – डॉ. रमाकान्तशुक्लः
अन्वेषणकर्ता – पं. सूर्यकान्तद्विवेदी

प्रणम्य वाणीं मनसा प्रवीणां मनाःस्थितां वादयतीं च वीणाम्।
बाणेन भावैर्ललितैः प्रवृद्धां कादम्बरीं तां रचयामि पद्यैः॥

नारायणं सलक्ष्मीकं गुरूणां परमं गुरुम्।
गोविदं परमानन्दं भूयो भूयो नमाम्यहम्॥

राज्ञो वर्णनम्–

आसीत्पृथिव्यां प्रथितो नरेन्द्रैः समर्चिताङ्घ्रोऽन्यमहेन्द्रतुल्यः।
चतुःसमुद्रान्तसुमेखलायाः भर्ता भुवः शूद्रकनामधेयः॥१॥

समग्रसामन्तकुलैः प्रपूज्यः सामुद्रिकैर्लक्षितचक्रवर्ती।
शंखेन चक्रेण करस्थितेन सशंखचक्रः स यथैव विष्णुः॥२॥

शिवेन तुल्यो जितमन्मथोऽसौ शक्त्या महत्या त्विव कार्तिकेयः।
स्वयं विधानीकृतराजहंसः साक्षात् स आसीद् भुवि पद्मयोनिः॥३॥

लक्ष्मीप्रसूतिश्च यथामहाब्धिर्निजप्रजायाः स समृद्धिहेतुः।
भगीरथेनेव पथप्रदेष्ट्रा यमन्वगच्छन् हि जनाः सदैव॥४॥

दिने दिने यस्य नवोदयोऽभूद् भास्वानिवासौ शुशुभे पृथिव्याम्।
सर्वोपजीव्यश्च यथा सुमेरुर्दानैश्च लज्जीकृतदिग्गजेन्द्रः॥५॥

आश्चर्यकारी नववीरकृत्यैः कर्ता क्रतूनां बहुदक्षिणानाम्।
आदर्शभूतश्च स शास्त्रवित्सु हेतुः कलानां भवनं गुणानाम्॥६॥

मित्रस्य हेतोरुदयाचलेन्द्रः उत्पातकेतुः परिपंथिनाञ्च।
प्रवर्तको रम्यमहाकथानां सदाश्रयो वा रसिकैर्गृहीतः॥७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

धनुष्मतां श्रेष्ठतरः स धन्वी धुर्यश्च यः सत्त्ववतां जनानाम्।
विदग्धमध्ये च सदाग्रगण्यः प्रमोददः संनतमानवेभ्यः॥८॥

यथा च वैन्येन निराकृतास्ते कुलाचलाश्चापमुखेन पूर्वम्।
तथैव सर्वे रिपवः ससत्त्वा उत्सारितास्तेन च दिङ्मुखेषु॥९॥

नाम्नैव निर्भिन्नविपक्षवक्षाः जहास विष्णुं नरसिंहरूपम्।
एकेन चाक्रान्तसमस्तलोकस्त्रिविक्रमं तं निजविक्रमेण॥१०॥

संसर्गजं यस्य च दुर्नृपाणां पापं महच्चाशु विनाशयन्ती।
चिरं भुजैरर्जितराजलक्ष्मीः कृपाणधारा सलिले ह्युवास॥११॥

राजा–

उवास धर्मो हृदये च यस्य कोपे कृतान्तो धनदः प्रसादे।
बलिः प्रतापे वसुधा च बाहौ दृष्टौ च लक्ष्मीर्वचने च गीर्वाग्॥१२॥

मुखे शशी चास्य बले मरुत्वान् गुरुश्च मत्यां मदनोऽस्य रूपे।
दिवाकरस्तेजसि सर्वदेवमयो नृपः सोऽनुचकार विष्णुम्॥१३॥

कुंभाँश्च भित्वा बहुशस्त्विभानां दृढेन मुक्ताफलशोभिनाऽस्य।
बृहत्कृपाणेन निकृष्यमाणा गता समीपं नृपराजलक्ष्मीः॥१४॥

उरःकपाटैश्च महाभटानां दृढावृता सा कवचैः सहस्रैः।
घनान्धकारेष्विव वर्तमाना समागता तत्सविधे समुत्का॥१५॥

मतंगजानां मदवारिपूर्णास्वतीव वर्षासु भयंकरासु।
संग्रामरात्रिष्वभिसारिकेव समागता मा स्वयमेव तत्र॥१६॥

यस्य प्रतापस्य च पावकोऽन्तर्वियोगिनीनां रिपुसुन्दरीणाम्।
जज्वाल भर्तृनिव दग्धुमिच्छुरहर्निशं तद्धृदयेषु तासाम्॥१७॥

राज्यम्–

चित्रेषु वर्णैः कृतसंकरत्वं रतेषु केशग्रहता न युद्धे।
काव्येषु बंधो दृढशास्त्रचिन्ता जनेषु सुप्तेषु च विप्रलंभाः॥१८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

छत्रेषु दण्डा न जनेषु केचिद् गीतेषु रागा विलसन्ति नान्याः।
ध्वजेषु कंपोऽय मदो गजेषु चापेषु छेदः प्रथितो गुणानाम्॥१९॥

चन्द्रे कलंकाः कवचेषु खड्गेऽथ दौत्यकार्यं रतिविग्रहेषु।
सदा गवाक्षेषु च जालमार्गा अक्षेषु शून्यानि गृहाणि चासन्॥२०॥

भयं च लोकात्परतो न चास्मात् भंगाः सदांतःपुरिकाकचेषु।
मौखर्यमासीत्पदकिंकिणीषु विवाहकाले ग्रहणं करस्य॥२१॥

कशाभिघाताश्च तुरंगमेषु यज्ञाग्निधूमेन तदाश्रुपातः।
चापध्वनिर्वा मकरध्वजस्य तस्मिन् महीं शासति पार्थिवेन्द्रे॥२२॥

अवंतिकायाः पुरसुंदरीणां पयोधरोत्पीडितवीचिमाला।
कादम्बकोलाहलरम्यकूला सरिद्वरा वेत्रवती च तत्र॥२३॥

विगाहनार्थं च समागतानां मदच्युतानां जयकुंजराणाम्।
सिंदूरमिश्रं सलिलं च यस्याः संध्यायमानं ह्यरुणं बभूव॥२४॥

राजधानी–

तस्याश्च विस्तीर्णतटे सुरम्ये तद्राजधानी विदिशाभिधाना।
पुंजीकृतं सत्ययुगं च यत्र निविष्टमासीत् कलिकालभीतम्॥२५॥

राजा–

सर्वाणि जित्वा भुवनानि यश्च राज्यस्थितो निर्वृतराज्यभारः।
द्वीपान्तरायातमहीन्द्रमौलि-मालासमालालितपादपद्मः॥२६॥

अमात्याः–

स्निग्धैरमात्यैः परितः प्रबुद्धैर्वृतः सदालोचितनीतिशास्त्रैः।
बुद्ध्या सुराणां च गुरुं हसद्भिः कुलक्रमेणैव समागतैश्च॥२७॥

सुनिर्मलैर्निर्मलवृत्तिभृद्भिर्गुणैश्च लोके प्रचितैरलुब्धैः।
दधार भारं भुवनस्य सर्वं भुजेन बलवान् स यथांगदं तैः॥२८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मित्राणि–

विद्यावयोलंकरणादिकेषु समैरनेकैर्नृपवंशजातैः।
कलाकलापे कुशलैः प्रगल्भैः स्नेहानुरक्तैश्च सुकालविज्ञैः॥२९॥

प्रातैः सदा नर्मवचोविलासे
ष्वाकारचेष्टादिविशेषविद्भिः।
आख्यायिकाऽख्यानकलेख्यनाट्य
व्याख्यानकाव्यादिकलाप्रवीणैः॥३०॥

कठोरवक्षःस्थलपीनबाहु
भृद्भिः सुपुष्टैः रिपुमानभिद्भिः।
वीरैर्विनीतैरिव सिंहशावैः
स राजपुत्रै रममाण आसीत्॥३१॥

स्वभावः–

अमात्यवर्गेण च वंशवृद्ध्यै संतप्तकामार्थमपेक्षितस्य।
महाबलत्वाद् विजिगीषुभावादाद्ये वयस्येव न कामरागः॥३२॥

सतीषु चांतःपुरसुंदरीषु भक्त्या महत्या विनयान्वितासु।
रूपैर्विलासैः रतिविभ्रभासु रतेः सुखे द्वेष इवास्य दृष्टः॥३३॥

कलादयः–

गीतप्रसंगेन च यः कदाचित् स्वयं समारब्धमृदंगवाद्यः।
रराज चंचत्कररत्नशोभी वेगेन चान्दोलितकर्णपूरः॥३४॥

वने कदाचिन्मृगयासु बाणासारैविशून्यीकृतदुष्टसत्त्वः।
कदाचिदाबद्धविदग्धगोष्ठ्यां काव्यप्रबंधेषु स दत्तचितः॥३५॥

शास्त्राणि–

प्रश्नैश्च शास्त्रेषु कदाचिदुत्कः कदाचिदालेख्यविनोदनेन।
पुराणकाव्यादिकसेतिहासाख्यानादिकानां श्रवणैः कदाचित्॥३६॥

विलोकनार्थं च समागतानां शुश्रूषया वा विदुषां कदाचित्।
मात्राच्युतैर्वाथ स विंदुमत्या वर्णच्युतैर्गूढचतुर्थपादैः॥३७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रहेलिकाद्यैर्ललितैः कदाचिद् वीणाविनोदैश्च दिनान्यनैषीत्।
क्रीडासु दक्षैः परिहासविद्भिः सार्धं सुहृद्भिः स निशां तथैव॥३८॥

प्रतीहारी–

मरीचिमालिन्युदिते कदाचित् प्रत्यग्रकह्लारभिदि प्रसन्ने।
लता ससर्पेव सुचंदनस्य पार्श्वेऽसिना भीषणरम्यरूपा॥३९॥

आलेपगौरस्तनमंडलाभ्या
मुन्मज्जदैरावतगंडकुंभा।
चक्रांगशुभ्राम्बरशोभमाना
मंदाकिनीवातिरुचं दधाना॥४०॥

कुठारधारेव च जामदग्नेर्वशीकृताशेषमहीपवर्गा।
आज्ञेव भूपालशिरोभिधार्या रत्नेषु मूर्ध्ना प्रतिबिंबिता च॥४१॥

राज्याधिदेवीप्रतिमा प्रतीहार्यागत्य पृथ्व्यां धृतजानुपद्मा।
बद्धांजलिर्वेत्रवती सभायां स्थितं महीपं समुवाच नम्रा॥४२॥

चाण्डालकन्या–

आरोहतः स्वर्गमिव त्रिशंकोः क्रुद्धेन्द्रहुंकारनिपातितेव।
समागता दक्षिणमुख्यमार्गान्निवासहेतोरिव राजलक्ष्मीः॥४३॥

चाण्डालकन्या रमणीयरूपा शुकं गृहीत्वा खलु पंजरस्थम्।
द्वारस्थिता ज्ञापयतीह देवं प्रतीक्षमाणा नरदेव किंचित्॥४४॥

आश्चर्यरूपो भुवने समग्रे सुरत्नभूतो हि विहंगमोऽयम्।
मतिं विधायात्र समागताहमादाय देवस्य हि पादमूलम्॥४५॥

सर्वेषु लोकेषु समग्ररत्न-सुभाजनं देव यथा समुद्रः।
सुरत्नजातस्य भुवि स्थितस्य भवाँस्तया किं कथनीयमत्र॥४६॥

निशम्य संजातकुतूहलोऽसौ राजा समालोक्य महीपवर्गम्।
दूत्यादिदेशाथ तदा सभायां प्रवेश्यतां सा नहि कोऽपि दोषः॥४७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust. Funding by MoE-IKS

आकर्ण्य सा शीघ्रतया प्रतीहार्यादेशभूतं वचनं तु राज्ञः।
मातंगकन्यामतिसुंदरीं तां प्रावेशयत्तद्भवनं सभायाम्॥४८॥

राज्ञः वर्णनम्–

प्रविश्य सा राजसहस्रवृन्दे गतं नृपं मेरुमिवाद्रिमध्ये।
इन्द्रायुधाभैश्च सुरत्नकांतैर्विभूषणैः शोभितदिग्विभागम्॥४९॥

प्रस्थूलमुक्ताफलजालकस्य मंदाकिनीफेनसुपांडुरस्य।
अधोवितानस्य सुचंद्रकांत-सुशोभिपर्यंकतले निषण्णम्॥५०॥

उद्धूयमानं च सुवर्णदण्डप्रकीर्णकै रूपवतां गृहीतैः।
चंचन्मयूखैः शशिनीव शुभ्रे पीठं मणीनां धृतवामपादम्॥५१॥

नतारिनिःश्वासमलीमसैस्तं श्यामायमानैर्मणिकुट्टिमानाम्।
संसर्गतः कोमलपन्नखानां मयूखजालैरुपशोभमानम्॥५२॥

शुभासने टंकितपद्मरागप्रभारुणेनाहतकैटभारिम्।
रक्तारुणेनोरुयुगेन विष्णुमिवातिरम्यं सुविराजमानम्॥५३॥

गोरोचनाभिः कृतहंसयुग्मपर्यंतदेशेऽमृतफेनशुभ्रे।
प्रवर्तिते चामरमारुतेन सूक्ष्मे दुकूले वपुषा दधानम्॥५४॥

सुगंन्धिना चन्दनलेपनेन किंचिच्च मध्येऽरुणकुंकुमेन।
बालातपच्छेदविराजितेन बिभ्राजमानं रजताद्रितुल्यम्॥५५॥

सुबंधनायैव हि राजलक्ष्म्याः सुगंधिलुब्धेन सुचंदनस्य।
भोगिद्वयेनेव सुनीलरत्नकेयूरसंवेष्टितबाहुयुग्मम्॥५६॥

नक्षत्रपंक्त्येव सुहारवल्ल्या ह्यन्येन्दुशंकां परिवर्धयन्तम्।
सुरम्यघोणं सितपद्मनेत्रं निलम्बिकर्णोत्पलशोभमानम्॥५७॥

सुवर्णपट्टायतमष्टमीन्दु-तुल्यं सुकान्तं विमलं विशालम्।
साम्राज्यचित्रांकितमध्यभागं ललाटदेशं च समुद्वहन्तम्॥५८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आमोदिजातीकुसुमार्चितांगं पर्यस्ततारं त्विव पश्चिमाद्रिम्।
कान्त्या पिशंग्या किल भूषणानामनंगतुल्यं हरवह्निसंस्थम्॥५९॥

आगत्य सेवार्थमुपस्थिताभिरासन्नदेशे परिवर्त्तिनीभिः।
स्निग्धाभिराशंकितदिग्वधूभिः पर्यावृतं वारविलासिनीभिः॥६०॥

सर्वत्र भास्वन्मणिकुट्टिमेषु संक्रान्तदेहप्रतिबिम्बरूपैः।
समुह्यमानं हृदये पृथिव्या प्रेम्णेव सौम्येन नवस्य पत्युः॥६१॥

समग्रलोकैरुपभोगयोग्या या राजलक्ष्मीः कथिता कवीन्द्रैः।
विशिष्टरूपेण तयैव नून-मालिङ्गितं वा स्वयमेव भक्त्या॥६२॥

जनैरसंख्यैः परिवारमुख्यैः सेव्यं तथापीह सदाऽद्वितीयम्।
अप्यश्वहस्त्यादिषु साधनेषु सत्स्वव्रतं खड्गसहायमेव॥६३॥

एकत्रसंस्थं ह्यपि लोकव्याप्तं भद्रासनस्थं खलु कार्मुकस्थम्।
उत्सादितस्वद्विषदिन्धनं तं ज्वलत्प्रतापानलमर्चियुक्तम्॥६४॥

विसारिनेत्रं ह्यपि सूक्ष्मदृष्टिं विशालदोषं च निधिं गुणानाम्।
भुवः पतिं चापि शुभांगनानां सुवल्लभं चापि कुवल्लभं तम्॥६५॥

प्रवृत्तदानं च मदेन हीनं शुद्धस्वभावं ह्यपि कृष्णकृत्यम्।
करैर्विहीनं त्वपि हस्तमध्येऽखिलाधिराज्यं नृपतिं ददर्श॥६६॥

चाण्डालकन्यायाः राज्ञा निरीक्षणम्–

आलोक्यरूपं वलयावृतेन करेण पद्माकृतिकोमलेन।
सुवंशयष्ट्या नृपबोधनार्थं सकृत् सभाकुट्टिममाजघान॥६७॥

तेनैव सद्यो नृपमंडलं तद् यूथं गजानामिव संमुखस्थम्।
तस्या हि जातं ननु तालशब्देनाकृष्य चक्षूंषि मुखात्तु राज्ञः॥६८॥

नृपस्तयोक्तां ह्यवलोकनार्थं चाण्डालकन्यां ललितां ददर्श।
अग्रे च यस्याः पुरुषो मतंगः सुश्वेतकेशोऽरुणकंजचक्षुः॥६९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सुपुष्टदेहोऽतिपरिश्रमेण स्वभावतोऽसौ निजवार्धकेऽपि।
मतंगजातोऽप्यनृशंसवेषः प्रशुभ्रवस्त्रेण स चार्यवेषः॥७०॥

सुपंजरं स्वर्णशलाकरम्यं श्यामायमानं शुककांतिमिश्रम्।
चाण्डालवंशोद्भवदारकेणानुगम्यमानां वहता करेण॥७१॥

दैत्यैर्गृहीतामृतपात्रहर्तुश्छलेन संमोहिनिविग्रहस्य।
कृष्णस्य रूपं निपुणस्य चैवाऽ नुकुर्वतीं श्यामतया हि विष्णोः॥७२॥

शुभेन्द्रनीलैर्मणिभिर्विचित्रां संचारशीलामिव पुत्रिकां ताम्।
गुल्फान्तनीलाम्बरधारयित्रीं रक्तांशुकेनाथ कृतावगुण्ठाम्॥७३॥

संध्यातपे नीलचलारविन्दच्छविं दधानां कमनीयरूपाम्।
कर्णावलंबिच्छुभदन्तपत्रप्रभाविशुभ्रीकृतसत्कपोलाम्॥७४॥

उद्यच्छशांकप्रभया विभातां निशामिव स्वच्छमुखीं मनोज्ञाम्।
गोरोचनायास्तिलेकन मन्ये किरातवेषामिव वा भवानीम्॥७५॥

नारायणोरःस्थलवासायोगाद् देहप्रभाश्यामलितां श्रियं वा।
क्रुद्धेशवह्नौ पतिदेहधूमान्मालिन्यमाप्तामिव कामपत्नीम्॥७६॥

हलेर्हलाकर्षणभीतिभीतां पलायितां तामिव सूर्यपुत्रीम्।
पिंडालकालक्तकरक्तपादां युद्धे भवानीमिव माहिषेण॥७७॥

करांगुलीनां प्रभया नखानां मयूखदीप्त्या च विभिन्नशोभाम्।
सुबद्धभूमाविव पत्रखंडान् निक्षिप्य निक्षिप्य नवान् चलन्तीम्॥७८॥

प्रसारिणा नूपुररत्नकान्ति-जालेन संभिन्नकलेवरेण।
नूनं स्वजातेरिव शोधनार्थं सुवह्निनालिंगितदेहयष्टिम्॥७९॥

अनंगमातंगसुगंडकांतिनितंबदेशे मणिदामबद्धाम्।
प्रस्थूलमुक्ताफलहारकण्ठां गंगामवाप्तां यमुनामिवोत्काम्॥८०॥

शरत्सदृक्षां नवपद्मनेत्रैः वर्षर्तुकान्तिं घनकेशजालैः।
प्रायेण चित्रश्रवणावभूषां नक्षत्रमालामिव राजमानाम्॥८१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

लक्ष्मीमिव स्वीकृतपद्मशोभां मूर्छामिवान्तर्नृमनो हरन्तीम्।
संपन्नरूपां वनभूमितुल्यां कुलेन हीनामिव दिव्ययोषाम्॥८२॥

निद्रामिवालोचनसंगृहीत्रीं मातंगदुष्टामिव वन्यमालाम्।
आलेख्यलिप्तामिव दर्शनीयां वसंतसंपत्तिनिभामजातिम्॥८३॥

अनंगपुष्पायुधमुष्टिग्राह्यमध्यामिवाप्ताचिरयौवनाढ्याम्।
कुबेरलक्ष्मीमलकावभासिनीमिवातिरूपाकृतिशोभनीयाम्॥८४॥

तस्या लावण्यं दृष्ट्वा राज्ञो मनसि विविधाः कल्पनाः–

दृष्ट्वा महीपस्य सविस्मयस्य नूनं मनस्येवमभूत्तदानीम्।
सौन्दर्यनिष्पादयितुर्विधातुरहो प्रयत्नोऽस्त्वपदे विभाति॥८५॥

लोकोत्तरेयं यदि रूपसंपदुत्पादिताशेषजनप्रिया चेत्।
किमर्थमस्याः खलु जन्म तेन कृतं कुले स्पर्शसुभोगहीने॥८६॥

मातंगजातेर्बहु बिभ्यता वा न कुर्वता स्पर्शमियं विधात्रा।
मन्ये कृता तेन सुरम्यताया अक्लिष्टता वा कथमन्यथा स्यात्॥८७॥

क्लेशात्करस्पर्शकृताद्धि लोके न ह्यंगकान्तिर्भवतीदृशीव।
धिग्धिग् विधातारमिमां विधातुमयोग्यसंयोगकरं प्रमुग्धम्॥८८॥

येनासुरश्रीरिव मोहनीयाप्युत्पादिता क्रूरकुले शठेन।
निरन्तरं निन्दितमैथुनेयमुद्वेजयित्री रमणीयरूपा॥८९॥

इत्थं विधातू रचनां विचित्रां विचिन्तयन्तं मनसा चलेन।
राजानमीषच्चलकर्णपत्रा प्रगल्भकान्तेव ननाम कन्या॥९०॥

कृते प्रणामे मणिकुट्टिमेषु तस्यां स्थितायां पुरुषः शुकं सः।
आदाय किञ्चिद्धयुपसृत्य राज्ञे न्यवेदयत्पञ्जरगं खगं तम्॥९१॥

शुकवर्णनं राज्ञे समर्पणञ्च–

ततोऽब्रवीदेवमयं खगोऽपि समस्तशास्त्रार्थकलासुदक्षः।
पुराणवार्तासु कथासु विज्ञो नीतिप्रयोगे कुशलश्च राज्ञाम्॥९२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri Sarayu Trust. Funding by MoE-IKS

सुवेदिता गीतकलाश्रुतीनामाख्यायिकाख्यानकनाटकानाम्।
काव्यादिकानाञ्च सुभाषितानां स्वयं च कर्ता ननु पाठकश्च॥९३॥

सुपेशलो हास्यकथास्वतुल्यः श्रोता च वीणामुरजादिकानाम्।
नृत्यप्रयोगस्य च दर्शने तु दक्षः प्रवीणो नवचित्रकार्ये॥९४॥

गजतुरगनरस्त्रीलक्षणानामभिज्ञः
सकलभुवनमध्ये रत्नभूतः शुकोऽयम्।
इह विलसति वैशंपायनो नाम यस्य
जलधिरिव नु देवो भाजनं रत्नराशेः॥९५॥
इति मनसि निधायैवैनमादाय हस्ते
मम पतिदुहितैषा ह्यागता पादमूलम्।
अथ नृपतिसमक्षं पंजरं तं निधाय
भुवि स अपससार स्वीकुरुष्वेति चोक्त्वा॥९६॥

राज्ञ आश्चर्यं मन्त्रिणं प्रति तस्य कथनं सभाविसर्जनं च।
गते च तस्मिन्नु विहंगराजः पादं समुन्नम्य तु दक्षिणं स्वम्।
विस्पष्टवाण्या जयशब्दमुक्त्वा पपाठ राजाभिमुखः स आर्याम्॥९७॥

"स्तनयुगमश्रुस्नातं समीपतरवर्ति हृदयशोकाग्नेः।
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम्॥"९८॥

नृपस्तु सञ्जातकुतूहलः स तां सहर्षमाकर्ण्य समीपवर्तिनम्।
महार्घहेमासनसंनिवेशितममात्यमुख्यं निजमन्त्रिमण्डले॥९९॥

द्विजाग्रगण्यं नृपनीतिपारगं वयोऽधिकं सर्वगुणैः समुन्नतम्।
रम्येण नाम्ना हि कुमारपालितं समब्रवीत्तं स यथा बृहस्पतिम्॥१००॥

श्रुता भवद्भिस्तु विहंगमस्य विस्पष्टवाणी मधुरः स्वरश्च।
आश्चर्यमेतत्परमं शुकोऽपि ब्रवीति वाणीं यदयं विशिष्टाम्॥१०१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पुनश्च तत्राभिमते तिरश्चो ह्यर्थेऽपि दृष्टा नु विचित्रतेयम्।
संस्कारयुक्तस्य यथा नरस्य प्रवृत्तिरेषा खलु बुद्धिपूर्वा॥१०२॥

पादं समुन्नम्य तु दक्षिणं स्वमुद्दिश्य मां वा प्रथमं त्वनेन।
सुस्पष्टमुच्यार्य जयेतिशब्दमार्या प्रगीता मधुरस्वरेण॥१०३॥

आहारनिद्राभयमैथुनज्ञा भवन्ति लोके पशवः खगाश्च।
इदं महच्चित्रमभूत् किलेति प्रोक्तेऽब्रवीन्मन्त्रिवरो विहस्य॥१०४॥

किमत्र चित्रं शुकसारिकाद्याः वैशिष्ट्ययुक्ता हि विहंगमास्ते।
यथाश्रुतं वाचमुदीरयन्ति ज्ञातं च देवेन हि पूर्वमेव॥१०५॥

संस्कारबन्धेन च पूर्वजन्मोपात्तेन तत्रापि नरप्रयत्नैः।
उत्पद्यते वातिशयोऽपि नूनं सामान्यमेतत्त्विह नातिचित्रम्॥१०६॥

लोके पुरासीद्धि परिस्फुटा वागेषां
नराणामिव वै शुकानाम्।
अस्पष्टताऽभूच्च ततोऽग्निशापा-
ज्जिह्वापवृत्तिश्च तथा द्विपानाम्॥१०७॥

उच्चारयत्येव तथेति तस्मिन्नावेदयन्मध्यगतं पतंगम्।
नादानुसारी पटहादिकानां मध्याह्न-शंखध्वनिराबभूव॥१०८॥

ततः समाकर्ण्य भुवः पतिस्तं स्वस्नानवेलामवगत्य तस्मात्।
आस्थानतो राजसभां विसर्ज्य सिंहासनात्स स्वयमुत्थितोऽभूत्॥१०९॥

राज्ञामुत्थानम् चतुर्भिः श्लोकैः-

महीपतौ संचलिते च तस्मिन्नाक्षेपदोलयितकण्ठदाम्नाम्।
अंसस्थलोल्लासितकुङ्कुमानां परागपीतीकृतदिङ्मुखानाम्॥११०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अन्योन्यबाह्वंगदपत्रकोटिविपाटिताच्छांशुककर्पटानाम्।
आलोलजातीकुसुमौघमध्यत्वरोत्पततत्षट्पदसंहतीनाम्॥१११॥

कर्णावलंब्युत्पलचुम्ब्यमान-गंडस्थलानां चलनेन वेगात्।
किरीटमालामणिशेखराणां मयूखजालैरतिभास्वराणाम्॥११२॥

अहं हि पूर्वं त्वितिलालसानां वक्षःस्थलप्रेंखितहारकाणाम्।
उत्तिष्ठतां तद्गमनप्रणामे संमर्द आसीद् वसुधापतीनाम्॥११३॥

आस्थानभवन-कोलाहलः—

संचारतश्चामरधारणीनां नितम्बविम्बाश्रितमेखलानाम्।
सहस्रशो वारविलासीनां झंकारशब्दैर्मणिमेखलानाम्॥११४॥

आकर्षितानां मणिनूपुरोत्थ-रवेण सोपानक-संस्थितानाम्।
शुभ्रीकृतास्थानक-मंडपानां प्रासाद-वापी-कलहंसकानाम्॥११५॥

कोलाहलेनातिसमुत्सुकानां विराविणां तद्गृहसारसानाम्।
मिथो बलाद् दीर्घ-विघृष्ट-कांस्य-क्रेंकार-दीर्घेण सुकूजितेन॥११६॥

गंभीर-वेगेन चलत्सहस्र-प्रवीर-सामन्त-पदाहतस्य।
सुविस्तृतास्थानक-मंडपस्य घोषेण संकंपयतेव पृथ्वीम्॥११७॥

पश्यन्तु पश्यन्तु जना इतीव दूरं समुत्सारित-मानवानाम्।
सुदण्डहस्तप्रतिहारिणां तु स्वरेण वा तारतरेण दीर्घम्॥११८॥

प्रासाद-कुञ्जे भवन-प्रदेशे गुञ्जायमानेन, सुमञ्जुलेन।
चूडामणीनां नमतां नृपाणां किरीट-रत्नावलिनिःस्वनेन॥११९॥

जयेति जीवेति दिगन्त-यातैः शब्दैः शुभैर्मंगलपाठकानाम्।
क्षोभाज्जनानां चलनात्प्रसून-पुञ्जान् विहायोत्पततामलीनाम्॥१२०॥

हुंकार-शब्देन चलन्नृपाणां केयूररत्नैर्वलयैरमूल्यैः।
घृष्यन्मणिस्तंभ-समुद्भवेन ह्यास्थानकं क्षुब्धमिवाबभूव॥१२१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विश्रम्यतामित्यभिधाय तां स चाण्डालकन्यां स्वयमेव चान्तः।
प्रवेश्यतां सद्भवने शुकोऽपीत्यादिश्य तांबूल-करंक-धात्रीम्॥१२२॥

सभाविसर्जनम्–

अथो विसृष्टाखिल-राजलोको वृतः सदाप्तैः किल राजपुत्रैः।
कैश्चित्तदभ्यन्तरमाविशत्स विशिष्टसत्त्वो नृपतिर्गृहस्य॥१२३॥

व्यायामभूमि-प्रवेशः–

भानुर्यथा स्रस्त-मरीचिमालो नभो हि नक्षत्रसमूह-शून्यम्।
तथापनीताभरणो विवेश व्यायामभूमिं श्रमसाधनाढ्याम्॥१२४॥

स्वेदविन्दुभिः शोभा–

कृतश्रमस्तुल्य-वयोभिरेवं रराज तस्यां सह राजपुत्रैः।
कपोलयोर्मर्दितसिंन्दुवार-लताप्रसूनैरिव सून्मिषद्भिः॥१२५॥

दीर्घश्रम-च्छिन्न-सुहार-स्रस्त-मुक्ताफलाभैर्हृदये लसद्भिः।
ललाटपट्टे सुनवेन्दु-खण्डान् स्रवत्सुधाविन्दु-विडंबिभिश्च॥१२६॥

राज्ञः स्नानभूमिं प्रति गमनम्–

अलंकृतः स्वेदजलैस्तदानीमितस्ततो राजकुले चलद्भिः।
तत्स्नानसंसाधन-दत्तचितैरुत्सारणाकार्यमनाकुलेन॥१२७॥

समाचरद्भिर्ह्युपदिश्यमान-मार्गे जनैस्तत्र गतैः प्रमुख्यैः।
सुगंधिकृष्टालिकुलैः प्रगाढ-कृष्णायमानानशोभमानैः॥१२८॥

सुरम्यगंधोदक-पूर्ण-हेम-कुम्भैर्जल-द्रोणिसनाथमध्याम्।
व्याप्तां ध्रुवं चारण-मंडलैश्च स स्नानभूमिं समवाप हृष्टः॥१२९॥

स्नानम्–

सुगन्धि-धात्रीफल-चूर्ण-लिप्त-कलेवरस्योदक-कुण्डिकायाः।
जलेवतीर्णस्य नृपस्य विष्वग् दूरे समुत्सारितकंकणाद्याः॥१३०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उत्क्षिप्त-कर्णाभरणाः सुरम्या दृढं निबद्ध-स्तनमंडलाश्च।
गृहीत-कुम्भा अभिषेक-देव्य इवोपतस्थुर्नव-वारनार्यः॥१३१॥

ताभिर्जले पीनपयोधराभिः करीव मत्तो वनहस्तिनीभिः।
हृष्टः प्रविष्टः परितो वृतोऽसौ रराज राजा किल सुन्दरीभिः॥१३२॥

द्रोण्याश्च तोयादतिनिर्मलात्स ततः समुत्थाय रुहोह रम्यम्।
तत्स्नानपीठं स्फटिकोपशुभ्रं तदा प्रचेता इव राजहंसम्॥१३३॥

मरकत-मणि-कुंभेभ्यः स्फुरन्नीलभाभि-
रिव खलु कतिचित्ता मूर्तिमत्यो नलिन्यः।
रजत-कलश-हस्ताः काचिदन्या रजन्य
इव शशधरविम्बात्पूर्णकान्तिप्रवाहैः॥१३४॥

अपि हि कतिचिदन्याः स्फाटिकैर्वारिकुंभै-
रिव तु सलिलदेव्यः स्वेदवार्यार्द्रदेहाः।
मलयसरित इवान्या वारिणा चंदनस्य
विविधविध-सुगंध्यामिश्रितेनैव नूनम्॥१३५॥

कनक-कलश-हस्ताः कुंकुमानां जलेन
श्रिय इव दिवसस्याक्षिप्तबालातपेन।
इव तु कतिचिदन्या जाड्यमाहर्तुकामा
अभिषिषिचुरितस्तं स्वामिनं वारमुख्यः॥१३६॥

भवन-प्रवेशः-

प्रहत-पटह-वीणा-झल्लरी-वेणुगीत-
मुरज-पटु-मृदंगस्नान-शंखादिकानाम्।
ध्वनिरतिमुखरोऽसौ बंदिकोलाहलैश्च
भुवनविवरमाप्तः स्फोटयन् कर्णमार्गम्॥१३७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राज्ञो वस्त्रधारणम्–

क्रमेण चैवं विहिताभिषेकः सुसर्प-निर्मोक-समेऽतिशुभ्रे।
प्रधार्य वस्त्रे लघुनी जलेन विशुद्ध-देहः शरदभ्रकान्तः॥१३८॥

विशुभ्र-धाराधर-खंड-शुभ्र-दुकूल-पट्टेन शिरःस्थितेन।
आकाश-गंगाजल-धारयेव सुवेष्टितोऽसौ तुहिनाचलाभः॥१३९॥

राज्ञो नित्यकर्म–

पितृ-क्रियां तर्पणमाशु कृत्वा पवित्र-तोयाञ्जलिभिश्च देवम्।
वेदोक्तमंत्रैश्च स चण्डरश्मिं प्रणम्य वै देवगृहं जगाम॥१४०॥

भक्त्या सपर्यां च विधाय शंभोर्निष्क्रम्य तस्माच्च कृताग्निकार्यः।
विलिप्तदेहो रुचिराङ्गरागैः कस्तूरिका-कुंकुम-चन्दनाद्यैः॥१४१॥

आमोदिजाती-कुसुमैः सुरम्यैर्नवैस्तदालंकृत उत्तमाङ्गः।
सुत्नकर्णाभरणावभूषः पर्यावृतो नूतनवाससा च॥१४२॥

भोजनम्–

सुभोजनैर्भूपतिभिश्च सार्धं क्षितेः पतिः प्रीतिकरं नृपाणाम्।
आस्वादयन् भिन्नरसं सुमिष्टं निर्वर्तयामास तु भोजनं सः॥१४३॥

ततो ह्युपस्पृश्य च पीतवर्तिर्गृहीत-ताम्बूललवंगकादिः।
उत्थाय देशान्मणि-कुट्टिमानां तस्मात्प्रयातुं स मनश्चकार॥१४४॥

आस्थानमण्डपं प्रति गमनम्–

प्रसारितं धावितया प्रतीहार्यालम्ब्य बाहुं ह्यनुगम्यमानः।
विश्वासिनां वेत्रवतां जनानां वृन्देन चान्तःपुरचारिणां सः॥१४५॥

शुभ्रांशुकप्रान्ततयोपदृष्टं कुड्यं नवस्फाटिकरत्नबद्धम्।
हिमांशु-रत्नावलि-रम्यभूमिं कस्तूरिकाचंदन-वारि-सिक्तम्॥१४६॥

विराजमानं गृहदैवतेनेवोत्कीर्णनानाविधपुत्रिकेन।
आमोदिवार्भिः परिपावितेन चामीकरस्तंभचयेन सम्यक्॥१४७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तुषार-बालाहक-खण्ड-कल्प-पट्टोपधानैश्च सुवासिपुष्पैः।
सुरत्नपादैः शयनैः सुपूर्णं ययौ तदास्थानक-मण्डपं सः॥१४८॥

मुहूर्तं विश्रामः-

शनैः पृथिव्यामुपविष्टयाऽथ सुखङ्कयोत्संगकृताऽसियष्ट्या।
स पादयोः कोमलहस्तया वै संवाह्यमानः कर-संपुटेन॥१४९॥

मित्रैरमात्यैः क्षितिपैः सुहृद्भि
स्तदागतैर्दर्शनकांक्षयैव।
तास्ताः कथाः संकथयन् मुहूर्तं
सुष्वाप किंचिच्छयने निषण्णः॥१५०॥

शुकानयनादेशः-

शीघ्रं वैशंपायनं तं स्वहस्ते नीत्वागच्छान्तःपुरादत्र नूनम्।
इत्येवं तामादिदेश प्रतीहारीं वृत्तान्तेच्छुस्तदा तत्र संस्थाम्॥१५१॥

ततो यथाज्ञापयतीह देवो बद्धाञ्जलिः प्राह नता पृथिव्याम्।
धृत्वा तदाज्ञां शिरसि प्रहृष्टा कर्तुं यथादिष्टमथो जगाम॥१५२॥

शुकागमनम्-

ततो मुहूर्तादिव पंजरस्थस्तया गृहीतोऽप्यनुगम्यमानः।
सुश्वेतवासःपरिसज्जितेन जराविशुभ्रीकृत-मौलिना वै॥१५३॥

जीर्णेन हंसाभ-सितेन हेम-वेत्रेण मंदं चलताऽवनम्रम्।
केनाऽपि वा कंचुकिना सहैव शुकः स राजान्तिकमाजगाम॥१५४॥

कंचुकिना निवेदनम्-

क्षितितल-धृतपाणिः कंचुकी भूमिपाल-
मकथयदिति नूनं देव देव्यो वदन्ति।
ननु शुक इह सुस्नातः कृताहार एष
तव च समुपनीतो ह्याज्ञया पादमूलम्॥१५५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राज्ञा भोजनप्रश्नः–

इति मृदु कथयित्वा संप्रपातं च तस्मिन्
नरपतिरथ वैशंपायनं चेत्यपृच्छद्।
अभिमतमशनं वास्वादितं किं त्वयान्तः
प्रतिवचनमदात् किं देव नास्वादितं मे॥१५६॥

शुकद्वारा भोजनवस्तुवर्णनम्–

प्रकाममायत्त-पिकाक्षि-नील-विपाटलो वै मधुरः कषायः।
जम्बूफलानां मधुरो मनोज्ञो रसो निपीतः पृथिवीपते मे॥१५७॥

हरेर्नखाऽऽभिन्न-मतंग-कुंभ-रक्तार्द्र-मुक्ताफल-विभ्रमानि।
सुबीज-खंडानि सुदाडिमानां मया सुरुच्या परिभक्षितानि॥१५८॥

नीलानि पंकेरुह-कोमलानि
द्राक्षाफलानीव-सुचूर्णितानि।
स्वादूनि मृद्वामलकी-फलानि
स्वन्नानि चान्यानि फलानि वापि॥१५९॥

किं वा प्रलापेन निरर्थकेन हे राजराजेन्द्र! भणामि सत्यम्।
देवीभिरेतत् किल यत्प्रदत्तं सर्वं स्वहस्तैरमृतायते तत्॥१६०॥

राज्ञोऽधिक्षेपः प्रश्नाश्च–

प्रवादमास्तामखिलं तु तावन् नृपोऽब्रवीत्तं त्वधिक्षिप्य मध्ये।
कुतूहलं संहरतां भवान् नः कात्स्न्र्येन यत्किंचिदपि स्थितं यत्॥१६१॥

कस्मिन् प्रदेशे च कथं जनिस्ते कस्ते पिता वा जननी च का ते।
वेदागमः कुत्र च शास्त्रबोधः कुतः कलास्त्वं समवाप्तवांश्च॥१६२॥

जन्मान्तराऽनुस्मरणं कथं ते वरप्रदानं त्वथवा कुतश्चित्।
विहंग-वेषेण हि कश्चिदन्योऽथवा निगूढं चरसीह पक्षिन्॥१६३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust. Foundation Delhi.

क्व ते निवासश्च कियद् वयस्ते कथं च वा पञ्जर-बन्धनं ते।
चाण्डाल-हस्ते गमनं कथं वा कथं तवेहागमनं विहंग॥१६४॥

शुकेन स्ववृत्तान्तवर्णनम्–

स्वयं तु संजात-कुतूहलेन पृष्टः शुकोऽसौ बहुमान-पूर्वम्।
ध्यात्वा मुहूर्तं समुवाच देव निशम्यतां मे महतीकथेयम्॥१६५॥

शुकद्वारा निजवृत्तान्तकथनम्–

विराजते भारत-मध्यदेशालंकारभूता क्षिति-मेखलेव।
वनद्विपानां मदवारि-सेक-प्रवृद्ध-वृक्षा शिखरप्रदेशे॥१६६॥

विन्ध्याटवी-वर्णनम्–

नक्षत्रतुल्यातिविफुल्ल-श्वेत-प्रसूनगुच्छैरुपशोभमाना।
मत्तेभशावैः परिमृद्यमान–तमालपत्रैर्हि सुशोभिता च॥१६७॥

मध्वासवैः केरल-सुन्दरीणां कपोल-बिम्बच्छवि-पाटलेन।
संचारतोऽरण्यक-देवतानामलक्तकेनेव सुरञ्जितेन॥१६८॥

संच्छादिता पल्लव-संचयेन शाखोपविष्टैर्हरितैः सुकीरैः।
विदारितानां मृदुदाडिमीनां फल-द्रवार्द्रीकृत-मध्यभागा॥१६९॥

शाखामृगाणां चलनाद्विधुन्वत्-कक्कोल-वृक्ष-च्युत-पल्लवाद्यैः।
श्यामायमाना बहुपांशुला च निरन्तरापातित-पुष्पधूल्या॥१७०॥

मरीच-पत्राणि च भक्षयद्भिः शब्दायमानैः कुररैः सशब्दा।
लवंग-पत्रै रचिताश्च पान्थैः सुसंस्तरा यत्र भवन्ति नित्यम्॥१७१॥

कठोर-पूगीफल-नारिकेल-करीरवृक्षैर्वन-केतकीनाम्।
प्रान्तैश्च ताम्बूल-लता-प्रतानैः सुमण्डिता मण्डप-शोभमाना॥१७२॥

अरण्य-लक्ष्मी-विनिवासगेहैर्विराजमानेव सुकान्तिमद्भिः।
उन्मत्त-मातंग-कपोल-वारि-प्रसिञ्चितैलावन-गन्धि-पूर्णा॥१७३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शबर-युवक-सेना-स्वामिभिश्चातिलुब्धै-
र्नखमुखतट-लग्नानां हि मुक्ताफलानाम्।
विनिहत-शतसंख्याकैर्मृगेन्द्रैर्जनेभ्यो
ह्यतिशयभय-युक्ता संततं नागरेभ्यः॥१७४॥
प्रेताधिपस्य नगरी संयमनीव संस्थिता।
महिषाधिष्ठिता नित्यं महामृत्युविभीषणा॥१७५॥

समरोद्यत-सेनेव बाणार्पित-शिलीमुखा।
विमुक्त-सिंहनादा च सर्वतः शब्दसंकुला॥१७६॥

कात्यायनीव या देवी प्रचलत्खड्ग-भीषणा।
चन्दनेन सुरक्तेनालंकृता व विशेषतः॥१७७॥

कर्णीतनय-भूपाल-कथेव शशसंगता।
चौर्याद्यैरभिसंयुक्ता समीप-विपुलाचला॥१७८॥

कल्पान्त-रात्रि-संध्येव प्रनृत्यन्नील-कण्ठकाः।
धीयूषमन्थ-वेलेव श्रीद्रुमैरुपशोभिता॥१७९॥

प्रावृडिव-घनश्यामानेकशतह्रदावृता।
चन्द्रमूर्तिरिव मृगेणार्क्ष-सार्थानुसंगता॥१८०॥

राज्यस्थितिर्वा चमरीमृगीणां विशुभ्रवालव्यजनैः सुरम्या।
स्तम्बेरमाणां मदवाहिनां च कदम्बकैः संपरिपालिता सा॥१८१॥

गिरिकन्येव च स्थाणु-संगता सिंहसेविता।
कुशलवा च सीतेव निशाचर-समावृता॥१८२॥

कामिनीव च कस्तूरीचन्दनगंधवाहिनी।
रुचिरागुरुतिलकाद्यैर्भूषिता नित्यमेव हि॥१८३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सकामेव च सोत्कण्ठा पल्लव-वायु-वीजिता।
बालग्रीवेव शार्दूल-नख-पङ्क्ति-सुमण्डिता॥१८४॥

पानभूमिरिवाकीर्ण-मधुकोशशतावृता।
प्रकीर्ण-चित्र-पुष्पा च तदामोदसुवासिता॥१८५॥

महावराहोद्धृत-भूमि-मध्या कल्पान्त-वेलेव समुन्नता सा।
क्वचित्तु शाखामृग-भुज्यमान- प्रोत्तुंगशालानगरीव लंका॥१८६॥

हरित्कुशैर्या कुसुमैर्विचित्रैः क्वचित् समिद्भिश्च शमीपलाशैः।
तत्काल-निष्पन्नविवाहभूमिरिव प्रवृत्ता विविधैः कलापैः॥१८७॥

सदा प्रवृतैर्हि-मृगेन्द्र-नादै रोमाञ्चिता क्वापि यथा विभीता।
क्वचित् प्रमत्तेव रुतैः पिकानां मरुत्प्रवाहैः कृत-तालशब्दा॥१८८॥

उन्मुक्त-पत्रा मृतभर्तृकेव क्वचिच्छराच्छादितयुद्धभूमिः।
क्वचिन्महेन्द्रस्य शरीरतुल्या सहस्र-नेत्र-प्रतिसंकुलेव॥१८९॥

क्वचिच्च नारायणमूर्तितुल्या तमालनीला क्वचिदर्जुनस्य।
चलत्पताकेव रथस्य नूनं शाखामृगाक्रान्ततरूच्चशाखा॥१९०॥

सुवेत्र-वल्लीशत-दुष्प्रवेशा
पृथ्वीपति-द्वारनिभा कुतश्चित्।
क्वचिद्विराटस्य पुरीव नित्यं
वृन्दैर्वृता वा शतकीचकानाम्॥१९१॥

आकाशलक्ष्मीरिव वा कुतश्चिद् व्याधानुगच्छन्मृगतारका च।
क्वचिच्च या वल्कल-चीर-दर्भ- जटाकलापैर्हि धृतव्रतेव॥१९२॥

असंख्यपर्णाऽपि हि सप्तपर्णा सक्रूरसत्त्वा मुनिसेवितापि।
नित्यं सपुष्पापि सदा पवित्रा विंध्याटवी नाम पवित्रभूमिः॥१९३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अगस्त्याश्रमः–

तस्यां च दण्डकारण्यं यत्रान्तःपाति प्रोन्नतम्।
धर्मस्य भगवतः क्षेत्रमिवाख्यातं धरातले॥१९४॥

सूर्यमार्गमपाकर्तुं वर्धमानेन खे तदा।
मेरु-मत्सरतो यत्र सहस्रशिखरेण वै॥१९५॥

दूरीकृत-सुराज्ञेव विन्ध्येन धरणीभृता।
सततं पालिताज्ञस्य महातेजस्विनो मुनेः॥१९६॥

सुरेन्द्र-प्रार्थनापीत-पाथोधिसलिलस्य यत्।
जठरे जीर्ण-वातापि-दानवस्य तपस्विनः॥१९७॥

सुरासुर-शिरोरत्नचुम्बितांघ्रियुगस्य च।
ललाटतिलकस्येव दक्षिणाशावधूमुखे॥१९८॥

हुंकारादेव स्वर्लोकान्नहुषस्य निपातिनः।
महामुनेरगस्त्यस्य बभूवाद्भुतमाश्रमम्॥१९९॥

राजितं भार्यया लोपा-मुद्रया करसिंचितैः।
स्वयं कृतालवालैश्च पादपैः सुत-सन्निभैः॥२००॥

तस्यैव प्रिय-पुत्रेण व्रतिना ब्रह्मचारिणा।
भस्मना कृतपुण्ड्रेण कुशचीवर-वाससा॥२०१॥

धृत-पालाश-दण्डेन हरित्पर्ण-पुटेन च।
प्रत्युटजं च भिक्षार्थं भ्रमता दृढदस्युना॥२०२॥

अतिशयेध्माहरणादिध्मवाहाभिधेन वै।
कटौ मेखलया मौञ्ज्या भूषितेन पवित्रितम्॥२०३॥

श्यामायितं प्रतिदिशं हरितैः कदलीवनैः।
अब्धिमार्गानुगामिन्या गोदावर्या सनाथितम्॥२०४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

निजपितृवचनानां पालकस्त्यक्तराज्यो
दशवदन-सुलक्ष्मी-नाशको यत्र रामः।
रचित-रुचिर-शालः सीतया लक्ष्मणेन
मुनिमनुगतभावः पंचवट्यामुवास॥२०५॥

कपोतश्रेणयः शाखा-संलीना यत्र लक्षिताः।
मुन्यग्निहोत्रधूमानामुन्नता इव राजयः॥२०६॥

बलि-पुष्पाणि चिन्वन्त्याः सीतायाः पाणि-पल्लवात्।
राग इव समुत्क्रान्तो लतापत्रेषु राजते॥२०७॥

महाह्रदेषु यत्रैव स्वाश्रयोपान्तभूमिषु।
पीतोद्गीर्णाब्धि-पानीयमिव मुनिविभाजितम्॥२०८॥

निशित-शर-निपातैर्यत्र रामस्य तीक्ष्णै-
र्विनिहत-बहुसंख्यानां हि रात्रिंचराणाम्।
बहल-रुधिर-सेकाज्जात-पालाश-पुष्प-
मिव वनमखिलं तद् वर्धितं रक्तपर्णम्॥२०९॥

संवर्धिता यत्र विदेहपुत्र्या विशीर्ण-शृंगा हरिणाः सुजीर्णाः।
अद्यापि वर्षा-समये गभीर-नवाम्बुदानां रसनं निशम्य॥२१०॥

व्याप्तं हि लोके खलु राम-चाप-घोषं स्मरन्तोऽश्रुजलेन पूर्णाः।
शष्पं न गृह्णन्ति दिशश्च शून्या इवाभिपश्यन्ति पुनर्निराशाः॥२११॥

प्रोत्साहितो यत्र हतावशिष्टैर्मृगै रुषा स्वर्णमृगोऽतिधूर्तः।
वनेऽतिदूरं हि जहार रामं सीता-वियोगाय कृत-प्रयत्नः॥२१२॥

तद् विप्रलंभादतिदुःखदुःखै सौमित्रि-रामौ हि कबंधग्रस्तौ।
सुधांशु-सूर्याविव यत्र दृष्टौ लंकेशनाशाय भवं दधानौ॥२१३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अत्यायतो योजन-हस्त-बाहुर्निपातितो रामशरेण यत्र।
अगस्त्यशापात् पतितस्य राज्ञो भुजंग-देहस्य चकार शंकाम्॥२१४॥

वियोग-शोकार्ति-निवारणार्थं भर्त्रोटजान्तर्लिखिता हि सीता।
पृथ्वीतलादुल्लसतीव रामं द्रष्टुं पुनर्यत्र विलोक्यते च॥२१५॥

पंपासरः—

जलनिधिजलपानान्मत्सरात् कुंभजस्य
प्रकुपितवरुणेनोत्साहितेनेव यत्र।
अतिशय-रमणीयं नातिदूरे निवासा-
दपर-जलधितुल्यं निर्मितं वेधसेव॥२१६॥

प्रलय-समय-घट्टादष्ट-दिग्भाग-संधि
निपतितमिव पृथ्व्यामम्बरं वा विशालम्।
जलनिधि-जल-मध्यादादि-वाराह-मूर्त्यो-
द्धृतमिव वसुधाया मण्डलं वारिपूर्णम्॥२१७॥

विकसित-कुमुदानां फुल्ल-कह्लारकाणां
कुवलय-कुसुमानां गन्धि-किंजल्क-पूर्णम्।
अनवरतसुमज्जद्धिल्ल-कन्या-कुचेभ्यो
लुलित-सलिलभागं केलिदोलायितं यत्॥२१८॥

जलरुह-मधुपानान्मत्त-कादम्ब-पत्नी-
कृत-सुमधुर-शब्दं सारसैः कूजितं च।
क्वचिदलि-कुल-वृन्दैर्गुंजितं कृष्णवर्णं
जलचर-खग-चाराज्जात-दीर्घोर्मिमालम्॥२१९॥

अनिल-चलन-वेगादुच्च-कल्लोलसंघात्
सलिल-कण-निपातैर्जात-वर्षा-दिनं यत्।
जल-गत-नव-देवीनां तु केलीरतानां
कच-विलुलित-पुष्पैर्वासितं स्नानकाले॥२२०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

क्वचिदवतरतां वै मज्जनार्थं मुनीनां
कर-धृत-जल-पात्राणां मनोहारि-शब्दैः।
कुवलय-वन-मध्ये मंजु-शब्दानुमेयै-
रतिशय-धवलैः संसेवितं हंसवृन्दैः॥२२१॥

अनवरत-पुलिन्द-स्त्रीजनानां क्वचिच्च
कुच-मलयज-धूल्या धूसरं मज्जनेन।
उपतटमुपजातैः केतकीनां रजोभिः
कृतबहु-पुलिनं तत् सर्वतोबद्धकूलम्॥२२२॥

निकटतरनिवासादाश्रमादागतानां
मुनिजन-बटुकानां तापसानामृषीणाम्।
अरुणमिव तु किंचित् क्षालनाद् वल्कलानाम्
तटगतविटपानां पल्लवैर्वीजितं यत्॥२२३॥

सलिल-विहग-पक्षैः प्राकृताद् वारिसेका-
न्नवकिसलय-वल्लीभिः प्रनृत्यन्मयूरैः।
निविडतम-तमालैः श्यामलं देवताभि-
र्नव-कुसुमसुवासैराहताभिः सुरम्यम्॥२२४॥

अपरजलधि-शंकैर्वारिवाहैरिवेभैः
सलिलमवगृहीतुं ह्यागतैः पंकश्यामै।
अनवरतमनल्पं पीयते यत्सुवारि,
विलसति हि गभीरं चारु पंपासरस्तत्॥२२५॥

विकचकुवलयाभश्यामपक्षाणि यत्र
सरसि तु मिथुनान्यद्यापि रामस्य शापात्।
सपदि परिगृहीतानीव कोकाभिधान-
मनवरतमरण्ये चारिणां पक्षिणां च॥२२६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शाल्मलिवृक्षः–

एवंविधस्य तस्यैव सरसः पश्चिमे तटे।
रामबाण-विभिन्नस्य तालवृक्षस्य सन्निधौ॥२२७॥

दिग्गज-कर-दण्डानुकारिणाजगरेण च।
सततं वेष्टित-मूलत्वान्महालवाल इवेक्षितः॥२२८॥

तुंग-स्कन्धावसंलग्नैररण्यानिल-वेल्लितैः।
बहुभिर्व्याल-निर्मोकैर्धृत-वस्त्र इव स्थितः॥२२९॥

दिक्चक्रपरिमाणं वा गृह्णता भुवनान्तरम्।
सर्वत्रैव प्रकीर्णेन शाखानां संचयेन यः॥२३०॥

संहारायोद्यतं ह्यूर्ध्वं सहस्रभुज-शोभितम्।
चन्द्रचूडं महादेवं तिरस्कर्तुमिवोद्यतः॥२३१॥

निपातभीत्या जीर्णत्वाद् वायोः स्कन्धमिवाश्रितः।
शिराभिरिव वल्लीभिः सर्वतः परिवेष्टितः॥२३२॥

तिलैरिव जराव्याप्तैः शरीरे कंटकैर्वृतः।
निपीतोदधिपानीयैः खगैरिव नभोगतैः॥२३३॥

शाखान्तरे लीयमानैः क्षणमम्बुभरालसैः।
मेघैरदृष्ट-शिखरो जलार्द्रीकृत-पल्लवैः॥२३४॥

इन्द्रोद्यान-श्रियं द्रष्टुमिव तुङ्गतयोद्यतः।
खेचारादतिश्रान्तानां सूर्यस्यन्दनवर्तिनाम्॥२३५॥

अश्वानामोष्ठनिस्यूतैः फेनानां पटलैश्च यः।
सन्देहिततूलराशि-धवलीकृतशेखरः॥२३६॥

कण्डूयनैर्मदेभानां लग्नया भृंगमालया।
इव शृंखलया लौह्या बंधस्तम्भ इव स्थिरः॥२३७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सजीव इव भृंगौघैः कोटरान्तश्चारिभिः।
शकुनि-पक्ष-पातेन दुर्योधन इवोहितः॥२३८॥

वनमालोपगूढत्वात् पद्मनाभ इवेक्षितः।
नवाम्भोद इवाकाशे सततं दर्शितोन्नतिः॥२३९॥

विलोकनाय सर्वेषां जनानां भववर्तिनाम्।
स प्रासाद इवारण्ये देवतानां सुशोभितः॥२४०॥

औषधीनामिवाध्यक्षः स दण्डकवनाधिपः।
सखेव खलु विन्ध्यस्य शाखाबाह्ववगूहितः॥२४१॥

विंध्याटवीमुपागुह्य परितो नायिकामिव।
महान् जीर्णो विटपिराट् संस्थितः शाल्मलीतरुः॥२४२॥

शाखासु तस्यैव च कोटरेषु, स्कंधेषु पत्रेषु च वल्कलेषु।
महावकाशं प्रविलोक्य तत्र सर्वैर्दुरारोहतया समन्तात्॥२४३॥

देशेभ्य आगत्य विभिन्नदिग्भ्यो विश्वासभावेन शुकाः शकुन्ताः।
नीडान्यनंतानि निवास-हेतोः कुर्वन्ति नित्यं सुखिनो विशंकाः॥२४४॥

विरल-दल-संहतिरपि वनस्पतिर्यैरहर्निशं लीनैः।
अविरल-दल-निचय-श्यामल इवोपलक्ष्यते लोकैः॥२४५॥

तत्रात्म-नीडेषु निशां विरम्य प्रातः समुत्थाय समुत्सुकाश्च।
दिशासु चाहार-विलोकनाय ते प्रत्यहं व्योम्नि सुपङ्क्तिबद्धाः॥२४६॥

रामेण कृष्टां बहुधारयाम्बरे कलिन्द-कन्यामिव दर्शयन्तः।
ऐरावतोन्मूलित-शुभ्रगंगा-सुपद्मिनीभ्रान्तिमुदाहरन्तः॥२४७॥

रथाश्व-कान्त्येव विलिप्तमभ्रं प्रदर्शयन्तो नु दिवाकरस्य।
बद्धस्थलीं दीप्त-हरिन्मणीनां संचारिणीं वाऽत्र विडम्बयन्तः॥२४८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रसारयन्तो हि नभस्तडागे शैवालवल्लीमिव वा प्रवृद्धाम्।
सुव्याततैः पक्ष-पुटैश्च खिन्नान्याशामुखानीव सुवीजयन्तः॥२४९॥

निषादयन्तो नव-शष्प-वीथीमिवान्तरिक्षे प्रविसारिणीं च।
कलाप्रवीणा इव खे विचेरुः सेन्द्रायुधं स्वम्बरमादधानाः॥२५०॥

विहित-बहुविधाहाराश्च ते सन्निवृत्य
विविध-फलरसान् वा मंजरीस्तण्डुलानाम्।
प्रखर-तर-तराभिश्चंचुभिः पाटलाभि-
रददुरखिलनीडेष्वर्भकेभ्यः स्थितेभ्यः॥२५१॥

वसतो भार्यया तस्य ह्येकस्मिञ्जीर्णकोटरे।
एकः सूनुरहं भाग्याज्जातो वयसि पश्चिमे॥२५२॥

ममैव जायमानस्य जननी मे प्रपीडिता।
प्रसव-वेदनयाऽत्यन्तं स्वर्लोकमगमत्तदा॥२५३॥

जाया-विनाश-शोकेन दुःखितोऽपि पिता मम।
सुत-स्नेहात् तन्निरुध्य मत्पालनपरोऽभवत्॥२५४॥

जीर्णौ पक्षौ च बिभ्राणः कुशचीरानुकारिणौ।
परिणतवया वृद्ध आसीन्नोत्पतन-क्षमः॥२५५॥

जातकम्पः स्वांग-लग्नां जरामिव विकम्पयन्।
स्व-कलेवर-संभारं कथंचिदवहद् ध्रुवम्॥२५६॥

मंजरीणां तु धान्यस्य दलनान्मसृणेन हि।
प्रक्षीणोपान्त-लेखेन स्फुटिताग्रेण सर्वथा॥२५७॥

शेफालिका-पुष्प-नाल-पीतेन घृष्ट-कोटिना।
कणान्नीवार-वल्लर्या नित्यं चञ्चुपुटेन च॥२५८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पातितान्परनीडेभ्यो वृक्षमूलेषु भूरिशः।
शुकाननेभ्यो भ्रष्टानि फल-खंडानि चैव वा॥२५९॥

आहृत्याहृत्य मह्यं तान्यशक्तोऽपि ददौ तदा।
प्रत्यहं भुक्तशेषं स आहारमकरोत् स्वयम्॥२६०॥

वनवर्णनम्–

अथैकदा स्वच्छतलेऽन्तरिक्षे प्रभात-संध्यारुण-राग-ताम्रे।
कुरंग-रोमावलि-पाण्डुरे च विशालतां गच्छति दिग्विभागे॥२६१॥

सुपद्मिनीनां मधु-रक्त-पक्ष-पुटे प्रवृद्धे कलहंस-कल्पे।
मन्दाकिनीसैकत-मध्यतोऽब्धेरन्यं तटं गच्छति-शीतरश्मौ॥२६२॥

रक्ताक्त-पंचास्य-सटारुणाभिः प्रतप्त-लाक्षारस-पाटलाभिः
सुपद्म-रागाकृति-मार्जनीभिरिवेह मार्तण्ड-कर-प्रभाभिः॥२६३॥

उत्सार्यमाणे ह्युडु-मंडले तु गतेऽथ सप्तर्षि-गणे सुदूरम्।
संध्यामिवोपासितुमुत्तराशां सरोवरस्येव हि मानसस्य॥२६४॥

तारागणैः संपतितैरिवात्र सूर्यार्चिभिन्नैः पुलिने तटेऽब्धेः।
परिस्फुरच्छुक्ति-विनिर्गतानां मुक्ताफलानां निकरैर्विशुभ्रे॥२६५॥

तुषार-वर्षासु च पादपेभ्यो मयूरवृंदेषु च जागृतेषु।
विंजृभमाणेषु मृगाशनेषु प्रबोध्यमानेषु च कुञ्जरेषु॥२६६॥

निशातुषारैर्जड-केसरं तत् प्रसूनवृन्दं नवपत्रहस्तैः।
उद्दिश्य भानुं ह्युदयाचलस्थं किरत्सु सर्वत्र च काननेऽस्मिन्॥२६७॥

होमधूमः–

चलत्पताकास्विव देवतानां प्रासाद-तुल्येष्विव पादपेषु।
तपोवनानां मुनि-होम-धूम-लेखासु पारावत-सन्निभासु॥२६८॥

त्रिविधो वायुः–

तुषार-वर्षाम्बु-कणावधारिण्यरण्य-कुञ्जेषु च पद्मराजौ।
भिल्लांगनानां रति-खेद-वारि-कणापहारिण्यखिले च तस्मिन्॥२६९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आन्दोलितानां चलपल्लवानां सुलास्य-शिक्षा-कुशले लतानाम्।
प्राभातिके तत्र सुगंधवाहे प्रफुल्ल-पुष्पार्पितभृंगजाले॥२७०॥

भृंगाणां पद्मेषु संचारः–

पद्म-प्रबोधे स्तुति-पाठकानामिवेभगंडस्थल-डिंडिमानाम्।
निरुद्ध-पक्षच्छद-संहतीनां मधुव्रतानां कुमुदोदरेषु॥२७१॥

भृंगाणां शब्दः मृगाणां प्रबोधः संचरणं च–

हुंकारशब्देषु समुच्चरत्सु मृगेषु सर्वत्र वनेचरेषु।
मंदप्रभाते पवनेन नेत्रे ह्युन्मीलयत्सु प्रचरत्सु वापि॥२७२॥

पक्षिणो हस्तिनश्च–

पंपासरस्तीर-सुमंजुमंद-कोलाहलं कुर्वति हंसवृन्दे।
प्रारब्धनृत्ते च शिखण्डिवर्गे वनेभ-कर्णोद्गत-ताल-शब्दे॥२७३॥

सूर्योदये सूर्यशोभा–

आकाशमार्गं ह्यवरोहतोऽस्य क्रमेण पूर्वं रविवारणस्य।
मञ्जिष्ठरागे बहुचामराणां कलापतुल्ये च मरीचिजाले॥२७४॥

शनैः शनैः भास्वति तिग्मरश्मौ पंपासरः प्रान्त-तटं प्रयाते।
महीध्र-शृंगोच्छ्रित-पादपेषु प्रत्यूषसि[1] स्पष्टतया विभाते॥२७५॥

प्रहीणतारे दिवसेशसूनौ[2] पुनर्वनं सम्पततीव कीशे।
शीघ्रादिवाप्यष्टम-भागभाजि सुस्पष्ट-भासैव विभास्वरे च॥२७६॥

पक्षिणां नीडानि त्यक्त्वा गमनम्–

शुकेषु यातेषु दिगन्तराणि कुलायवृन्दे शिशुभिः सनाथे।
द्रुमे च निःशब्दतया विशून्ये नीडस्थिते तत्र च वृद्धतातेः॥२७७॥

आखेटक-ध्वनिना शुकशावकस्थितिः–

बाल्यादसंजातबले समीप-स्थिते तदानीं मयि कोटरस्थे।
महावनेऽस्मिन् निविडे ह्यकस्मादाखेटकस्य ध्वनिरुच्चचार॥२७८॥

चीत्कार-शब्दैः करिशावकानां संत्रासितानां च कलैः खगानाम्।
क्वणैश्च सर्वत्र मधुव्रताना-मुद्घोण-वाराह-रवैश्च तीक्ष्णः॥२७९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

महीध्र-गंभीर-गुहा-प्रसुप्त-प्रबुद्ध-पंचास्य-कृतैर्निनादैः।
भयंकरोऽरण्यक-देवताभिर्गंगा-प्रवाहेण समः श्रुतोऽभूत्॥२८०॥

ध्वनिं समाकर्ण्य न जातपूर्वं संजात-कम्पोऽर्भतया भयेन।
व्यग्रोऽविशं पक्ष-पुटान्तरेऽहं जरातिजीर्णस्य पितुः समीपम्॥२८१॥

मृगयार्थमागतानां शबराणां कोलाहलः—

ततो महाकुञ्जर-यूथपानां संचारतो मर्दित-पद्मिनीनाम्।
गन्धोऽप्यहो सूकरदश्यमानमुस्तारसामोद इतोऽतिरम्यः॥२८२॥

गजेन्द्र-शावैः परिभक्षितानां कषायगन्धो नव-शल्लकीनाम्।
बल्मीक-धूलिर्महिषैरितश्च पर्णैर्विशुष्कैरतिमर्मरश्च॥२८३॥

इतो महारण्य-कुरंग-वृन्दमितः समूहो मृगयूथपानाम्।
वराह-यूथं वनसैरिभाणां कदम्बकं केकिरुतं तथेह॥२८४॥

इतः श्रुतं चातककूजितं च मत्स्याशनानां क्वणितं तथेह।
इतश्च पंचास्यनख-प्रभिन्नस्तंबेरमाणां रणितं च घोरम्॥२८५॥

इतो नवा शष्परसेन नीला रोमन्थ-फेनस्य ततिर्मृगाणाम्।
वाराह-मार्गस्त्विव एष आर्द्रो मत्तेभकुंभेषु रुतं ह्यलीनाम्॥२८६॥

पन्था रुरूणां खलु रक्त-बिन्दु-प्रसिक्त-पर्णैर्ननु पाटलोऽयम्।
प्रचूर्णितैषा किल हस्तिपादैर्महीरुहाणामिह पत्रराशिः॥२८७॥

अयं नखाग्रैः कृत-पत्रलेखो विकीर्णमुक्तो गजसिंह-मार्गः।
भूमिर्मृगीणामिह गर्भरक्ता वार्धीणसानामिह चेष्टितं च॥२८८॥

अरण्यभूमिः समुदायचारिगजेन्द्रदानैर्मलिना तथैषा।
परंपरैषा चमरीकुलानां संचारिणामत्र च वानुमेया॥२८९॥

उच्छुष्क-वातायु-करीष-कृष्णा वनस्थलीयं ह्यनुगम्यतां च।
आरुह्यतामत्र च शाखिशाखा विलोक्यतां भो दिगियं प्रशस्ता॥२९०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आकर्ण्यतां शब्द इव श्रुतिभ्यां चापश्च सद्यः परिगृह्यतां भो।
भो स्थीयतां वावहितैश्च सर्वैरन्योन्यमेवं वदतः समन्ताद्॥२९१॥

सान्द्रास्वहं वै मृगयारतस्य शाखासु चान्तर्हितविग्रहस्य।
संघस्य तत्राशृणवं जनानां कोलाहलं क्षोभितकाननं तम्॥२९२॥

मृगया–

महीघ्र-छिद्र-प्रतिगर्जिनेन महामृदंगध्वनि-संनिभेन।
पुलिंदसंघाशुग-ताडितानां वृहन्निनादेन मृगाशनानाम्॥२९३॥

यूथाद् वियुक्त-द्विप-यूथपानामेकाकिनां संचरतां भयेन।
गंभीर-मेघस्तनितानुकारि-चीत्कार-शब्देन भयावहेन॥२९४॥

वेगात् प्रधावद्बहु-सारमेयविलुप्यमानांगलता-ततीनाम्।
प्रधावतां चंचलतारकाणामथो मृगाणां भयकूजितेन॥२९५॥

(पद्य-कादम्बर्याः हस्तलिप्यां प्रायः **'अनुस्वारस्य ययि परसवर्णः'** इत्यस्य पालनं कविना न कृतम्। पञ्चमवर्णस्य कृते प्रायोऽनुस्वारस्यैव प्रयोगः कृतः। अनुष्टुभं विहाय प्रायः सर्वाणि पद्यानि चतसृषु पङ्क्तिषु लिखितानि सन्ति। अस्या लेखनकालः कवेर्जीवनकाल एवास्ति अग्रे हस्तलिप्याः कश्चनांशः प्रदीयते। –रमाकान्तशुक्लः)

१३.४.२०२१

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्राज्वलयमहमपेक्षादीपम्

-डॉ. पुष्पा झा

सुप्रकाशितं भवेज्जीवनं
प्राप्नुयाद् हृदयमपि परितोषम्।
इतीहया सम्पूर्णचेतसा
प्राज्वलयमहमपेक्षादीपम् ॥१॥

सर्वत्रान्धतमिस्रं व्याप्तं
दुःखमपूपुरच्च परिवेशम्।
दूरीकर्तुं तमन्धकारं
प्राज्वलयमहमुद्योगदीपम् ॥२॥

कामं गर्जन्तु वारिवाहा
भवेच्च भूमिर्जलप्लाविता।
तज्जन्यभियः त्रातुं सुतरां
प्राज्वलयमहं साहसदीपम् ॥३॥

जीवनस्य सोपलरथ्याया-
माहतयः प्राप्यन्ते प्रायः।
व्रणकष्टं सोढुं निश्शब्दं
प्राज्वलयमहं प्रशान्तिदीपम् ॥४॥

जे.एल. झा भवनम्
७६०,ब्यौहारबाग
जबलपुरम् (मध्यप्रदेशः)
पिन :४८२००१

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

डॉ. विमलढौंडियाल-कृतं खण्डकाव्यम्

॥ राजमणीयम् ॥

(ऐतिहासिक-राजवंशानां वर्णनम्)

डॉ. विमल ढौंडियालः

॥ श्रीः ॥

केदारेशं नमस्कृत्य शिवतत्त्वं शिवाप्रियम् ।
वर्णनं मेदिनीशानां करोमि सुमनोहरम् ॥१॥

मायाविदां परमकारणब्रह्मतत्वं
संख्यावतां च पुरुषस्त्रिगुणाद्ययुक्तः ।
यज्ञादिजन्यशुभसाधनमस्ति योऽस्मै
भूयो नमः परमकारणकारणाय ॥२॥

विविधसंस्कृतिदायकभारतं
रविसमानविभारतभारतम् ।
विविधपण्डितमण्डलमण्डितं
सुमनसा प्रणमामि सुभारतम् ॥३॥

नृपतिभिर्विविधैः खलु सेवितं अवितपूजितशासितभारतम् ।
निखिलदेवगणैरपि पूजितं सुमनसा प्रणमामि सुभारतम् ॥४॥

श्रुत्वेदं भारतं गीतं रम्यं द्रुतविलम्बितम् ।
धृत्वा मनसि जिज्ञासामुवाच पितरं सुता ॥५॥

प्रप्रच्छ पितरम् बाला सर्वशास्त्रविशारदम् ।
विषये राजवंशानां भारतानां सदिच्छया ॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रुत्वा वाचस्तु कन्यायाः जिज्ञासोर्मिनिमज्जिताः ।
जगाद जनकस्तस्यै ह्यैतिहासिकवर्णनम् ॥७॥

वर्णनेऽत्र नृपालानां वंशनामादिभिस्सह ।
वीरतादिगुणानां च विद्यते कथनं क्वचित् ॥८॥

पितोवाच–

जिज्ञासां तव विज्ञाय संक्षेपेण करोम्यहम् ।
वंशानां वंशजातानां भूपतीनां च वर्णनम् ॥९॥

मगधराष्ट्रादारभ्य प्रधाना राजवल्लभाः ।
कश्यपावनिपर्यन्ता वर्ण्यन्तेत्र मया सुते! ॥१०॥

मगधोत्कर्षः–

शृणु त्वं प्रथमं पुत्रि! मगधेश्वरवर्णनम् ।
वैशाली-कोशलादीनां पाटलीनां च वैभवम् ॥११॥

बिम्बिसारोऽभवद्राजा मागधे क्षितिमण्डले ।
हर्यकानां कुले जातः सौगतीनीतिपालकः ॥१२॥

ब्रह्मदत्तं पराजित्य जिगायांगं स्वसेनया ।
राजगृहं पुरं तेन राजधान्यात्मनः कृता ॥१३॥

तथागतस्य बुद्धस्य सेवायामपि जीवकम् ।
प्रेषयामास स्वं वैद्यं बिम्बिसारः क्षितीश्वरः ॥१४॥

कुणिकोपनामधेयश्च बिम्बिसारसुतो महान् ।
जघानाजातशत्रुस्स पितरं राज्यलिप्सया ॥१५॥

उदायिनः सुतो जातोऽजातशत्रोर्गृहे शुभे ।
अर्हत्पथानुयायी स मगधस्याधिपोऽभवत् ॥१६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उदायिनसुतो नागदशको मानवेश्वरः ।
अमात्यशिशुनागेन राज्यान्नागो निराकृतः ॥१७॥

बालोवाच

उदायिनस्यामात्योऽयं कस्य वंशस्य शासकः ।

पितोवाच

शिशुनागेनसंबद्धः शिशुनागमहीपतिः ॥१८॥

शिशुनागवंशः

वंशेऽस्मिन्शिशुनागानां भूपतित्रयभूषणम् ।
प्रथमः शिशुनागोऽथो कालाशोको द्वितीयकः ॥१९॥

वैशाली राजधान्यासीदंतिमो नंदिवर्धनः ।
पतनाच्छिशुनागानां नंदवंशसमुद्भवः ॥२०॥

नंदवंशः

आनंदो वर्धको नंदो नंदवंशस्य नंदनः ।
निनादैर्मुदिता रम्यैर्मागधेयाः हि शासने ॥२१॥

धननंदाभिधेयस्तु नंदवंशस्य ह्यंतिमः ।
चणकात्मजशत्रुश्च शशिगुप्तात्पराजितः ॥२२॥

बालोवाच

चणकात्मज आसीत्कः शत्रुमगधभूपतेः ।
कथं चंद्रेण गुप्तेन नंदसूनुः पराजितः ॥२३॥

पितोवाच

समस्तविद्यार्णवपारदृश्वा
चंद्रस्य गोष्ठ्यां शशिवत् समर्च्यः ।
कर्ताऽर्थशास्त्रस्य च राष्ट्रभक्त-
श्चाणक्य आसीत् चणकस्य पुत्रः ॥२४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चाणक्यशिक्षितश्चंद्रो मगधे शासकोऽभवत् ।
बलेन नीतिज्ञानेन नंदस्तेन पराजितः ॥२५॥

मौर्यवंशः

भारतीयेतिहासेषु प्रख्याता मौर्यवंशजाः ।
चंद्रर्वकांतिमांस्तेषां चंद्रगुप्तः प्रशासकः ॥२६॥

वितस्तातटिनीक्षेत्रे चंद्रोऽजयन्निकेटरम् ।
यूनानोद्भववीरं च सैन्यपं ह्यरिसूदनम् ॥२७॥

कार्नेलियेतिसंज्ञासीन्निकेटरसुता प्रिया ।
चंद्रेण परिणीता सा सुंदरी वरवर्णिनी ॥२८॥

ददौ तस्मै चतुःप्रांतान्प्रमुदा कन्यया सह ।
चंद्रगुप्ताय मौर्याय जामात्रे श्वसुरः स्वयम् ॥२९॥

पंचशताधिकान्हस्तींश्चंद्रगुप्तोऽददान्मुदा ।
यूनानसैन्याधीशाय श्वसुराय प्रियात्मने ॥३०॥

दूतो निकेटरस्यासीदिण्डिकाकृतिलेखकः ।
चद्रगुप्तसभामध्ये मेगास्थनीजसंज्ञकः ॥३१॥

बालोवाच

मौर्यवंशोज्ज्वलश्चंद्रश्चंद्रगुप्तमहीश्वरः ।
कथं प्राणान्परित्यज्य मर्त्यलोकाद्दिवंगतः ॥३२॥

पितोवाच

श्रवणोत्तरबेलाख्ये पुरे कर्णाटके स्थिते ।
व्रतेनासून्परित्यज्य चंद्रो लेभे परां गतिम् ॥३३॥

बालोवाच

कोऽभूत् राजेश्वरस्तत्र मगधे मौर्यपालिते ।
चंद्रास्ते चंद्रिकावच्च चंद्रस्यामृतवर्षिणी ॥३४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पितोवाच

चंद्रात्मजो महीपालः बिंदुसारमहामतिः ।
आजीवकानुयायी चामित्रघातः प्रतापवान् ॥३५॥

बिंदुसारस्य युवराड् ह्यशोकः शोकनाशनः ।
भारतस्य महान्सम्राट् पुराणेऽशोकवर्धनः ॥३६॥

बालोवाच

श्रुतं मयाप्यशोकस्य जीवनं परिवर्तितम् ।
समरेण कलिंगस्य कृपया ब्रूहि माम् पितः! ॥३७॥

पितोवांच

आत्मजे! मे प्रिये! शुभ्रे! शृण्वशोकस्य वर्णनम् ।
शस्त्रत्यागशिलालेखबौद्धधर्मादिकं तथा ॥३८॥

देवानां प्रियभूपालः मौर्यवंशदिवाकरः ।
येन धर्मप्रचाराय जीवनं स्वं समर्पितम् ॥३९॥

अभिषेकादष्टमेऽब्दे कालिंगे समरेऽद्भुते ।
शस्त्रत्यागः कृतो येन सोऽशोको धर्मसाधकः ॥४०॥

उपगुप्तेन बौद्धेन भिक्षुणा धर्मबुद्धिना ।
प्रदत्ता सौगती दीक्षा ह्यशोकाय महात्मने ॥४१॥

भिक्षूणां सन्निवासाय गुहा निर्मापिता पुरा ।
कर्जचोपारसूदामा तथा च विश्वझोपडी ॥४२॥

महेंद्रं संघमित्रां च प्रेषयामास सिंहलम् ।
बौद्धधर्मप्रचारायाशोको धरणिपालकः ॥४३॥

अशोकस्य शिलालेखाः प्रसिद्धा भूमिमण्डले ।
अर्माइग्ग्रीकखारोष्ठीब्राह्म्युत्कीर्णाश्चतुर्दश ॥४४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

बालोवाच

केनान्विष्टा अशोकस्य शिलालेखा धरातले ।
पठिता अथ ते केन विज्ञेनादौ पितर्वद ॥४५॥

पितोवाच

फैन्थेलरेणान्विष्टा ये शिलालेखाश्चतुर्दश ।
जेम्सप्रिंसेपवर्येण पठिताः प्रथमं हि ते ॥४६॥

अशोकस्य शिलालेखानां विषयवस्तु

आदौ पशुबलेर्निंदा चिकित्सा च द्वितीयके ।
तृतीये लेखे राजाज्ञा धर्मकर्मादिभिस्सह ॥४७॥

धर्मघोषश्चतुर्थे च पंचमे च नियुक्तयः ।
आत्मानुशासनं षष्ठे सप्तमे तीर्थवर्णनम् ॥४८॥

अष्टमेऽपि शिलालेखे यात्रातीर्थादिवर्णनम् ।
सदाचारस्तु नवमे दशमे स्वस्तिकामना ॥४९॥

एकादशे धर्मव्याख्या स्त्रीसम्मानश्च द्वादशे ।
त्रयोदशे शिलालेखे कलिंगे रणवर्णनम् ॥५०॥

धर्मज्ञानाय धर्मस्य संस्थापना तथान्तिमे ।
प्रेरणा लिखिता येन सोऽशोको धर्मपालकः ॥५१॥

बालोवाच

अंतिमो कोऽभवत्तत्र मौर्याणां कुलशेखरः ।
उत्तरे मौर्यजानां च केऽभवन्मगधेश्वराः ॥५२॥

पितोवाच

अंतिमो मौर्यवंशस्य शासकोऽभूद्बृहद्रथः ।
राज्यलोभाज्जघानैनं शुंगः सैन्यपतीश्वरः ॥५३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शुंगवंशः

शुंगवंशभवा वीराः क्षितीशा मगधेश्वराः ।
विजितक्षत्रियाः वीराः पुष्यमित्रसुरक्षिताः ॥५४॥

मिनांडरं पराजित्य राजसूयमनुष्ठितम् ।
पुष्यमित्रेण शुंगेन धर्मकार्येषु बुद्धिना ॥५५॥

अंतिमः शुंगवंशस्य देवभूतिः क्षितीश्वरः ।
कण्वेन वासुदेवेन राज्यलालसया हतः ॥५६॥

अभिजातस्य कण्वस्य भूमीशा जनपालकाः ।
नारायणः सुशर्माथो भूतिमित्रादिसंज्ञकाः ॥५७॥

बालोवाच

कण्वजानां सुसाम्राज्यं केन राज्ञापवारितम् ।

पितोवाच

सातवाहनशूरेण साम्राज्यं तद् विखण्डितम् ॥५८॥

सातवाहनराजेंद्रः शिमुकाख्यो महीपतिः ।
शासनाधिपतिस्तत्र मगधे ज्ञानपूरिते ॥५९॥

शिमुकः शातकर्णी च वाशिष्ठीपुत्रगौतमी ।
यज्ञश्रीः पुलमाव्येते सातवाहनभूमिपाः ॥६०॥

हालगुणाढ्यौ विद्वांसौ सातवाहनशासने ।
सूर्याचन्द्रमसावेतौ गैर्वाण्याः समुपासकौ ॥६१॥

एते मगधभूपालाः मगधोत्कर्षहेतवः ।
शासने मागधा येषां प्रसन्ना ज्ञानलोलुपाः ॥६२॥

बालोवाच

किमेत एव संपूर्णाः मागधीया नरेश्वराः ।
धर्मकर्मरताः वीराः कुलीना लोकरञ्जकाः ॥६३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पितोवाच

यद्यप्येते न संपूर्णाः मागधीया जनेश्वराः ।
तथापि मगधोत्कर्षे मुक्ताहारायिता हि ते ॥६४॥

बालोवाच

धन्योऽयं पृथिवीभागः भारतं भास्वरं सदा ।
धन्यो मगधदेशोऽयं कीर्तिर्यस्य महीतले ॥६५॥

मगधकीर्तिकथाभिरलंकृतं प्रथितमौर्यजशुंगजराजितम् ।
कनककांतिसुमेरुसमप्रभं जयतु राष्ट्रमिदं प्रियभारतम् ॥६६॥

॥ विमलकविकृतराजमणीये पूर्वमणिः संम्पन्ना ॥

अथोत्तरमणिः

बालोवाच

कस्यायं स्वर्णिमः कालः कनकोत्तमकांतिमान् ।
ज्ञातुमिच्छामि तत्सर्वं कंचनावधिवर्णनम् ॥६७॥

पितोवाच

कौशाम्ब्यामुत्तरे प्रांते तीर्थराजस्य संगमे ।
तृतीयायां शताब्द्यां च गुप्तवंशसमुद्भवः ॥६८॥

भारतीयेतिहासेऽस्मिन्स्वर्णकालेन मण्डितः ।
विद्याशिल्पकलादीनां गुप्तकालो महोदधिः ॥६९॥

श्रीगुप्ताख्यमहीपालः गुप्तानामादिमो नृपः ।
अधिकार्यभवत्तस्य युवराजो घटोत्कचः ॥७०॥

गुप्तवंशोद्भवश्चंद्रः लोकानां हृदयांगणे ।
महाराजाधिराजोऽसीत् द्युलोके मघवा यथा ॥७१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

महाराजाधिराजचंद्रगुप्तप्रथमस्योपाधयः

लिच्छिवीनां सुता यासीत्सर्वांगसुंदरी ।
चंद्रेण परिणीता सा पितृभिश्चाभिनंदिता ॥७२॥

गुप्तानां हि तृतीयोऽपि गुणीनामादिमो मतः ।
प्रजानां भालचंद्रोऽभूत् चंद्रश्चेन्द्रियनिग्रहः ॥७३॥

गुप्तसंवत्समारब्धः शत्रुमानश्च मर्दितः ।
साम्राज्यं वर्धितस्तेन चंद्रगुप्तेन मानिना ॥७४॥

चंद्रगुप्तसुतो धीमान्गुप्तानामग्रिमो रविः ।
अरिहन्ता पितेवासीद् गुणकर्मादिपालकः ॥७५॥

चंद्रगुप्तस्य बुद्धिमान् पुत्रो गुप्तवंशस्याग्रिमः सूर्यः ।

विक्रमांकः कविराजो याज्ञिको हरिसेवकः ।
विविधोपाधिवानासीत्सिंधुगुप्तमहीपतिः ॥७६॥

बालोवाच

चंद्रगुप्तस्य पुत्रोऽभूत्मुद्रो गुप्तशासकः ।
कोऽभूत्समुद्रपुत्रोऽयं विक्रमादित्यनामकः ॥७७॥

पितोवाच

विक्रमी वैभवी वीरो ज्ञानामृतपिपासितः ।
चंद्रगुप्तद्वितीयोऽभूत् विक्रमादित्यनामकः ॥७८॥

भारतीयेतिहासाभ्रे मित्रवद्भातिविक्रमः ।
मित्रमार्तजनानां योऽमित्रमासीच्च दुष्कृताम् ॥८०॥

शकान्विजित्ययुद्धेऽयं शकवर्षं समाचरत् ।
अद्यापि लोकतंत्रेऽस्मिन् राष्ट्रीयाब्दं यदुच्यते ॥८१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

बालोवाच

गुप्तवंशभवावीराः नानोपाधिसमन्विताः ।
चंद्रः समुद्रगुप्तश्चविक्रमादित्यसंज्ञकाः ॥८२॥

प्रसिद्धा किंवदंतीयं विक्रमादित्यशासने ।
विदुषां संग़मो जातो गंगायमुनयोरिव ॥८३॥

पितोवाच

द्वितीयाचंद्रवच्छुभ्रश्चंद्रगुप्तद्वितीयकः ।
उज्जैन्यां शासने यस्य विद्यादीनां च वैभवम् ॥८४॥

सभायामस्य चंद्रस्य कालिदासकवीश्वरः ।
पंचतंत्रप्रणेता च वैद्यो धन्वंतरिस्तथा ॥८५॥

चंद्रसभायाः विध्वर्कौ राशिशास्त्रविशारदौ ।
ब्रह्मदत्तवराहौ तावास्तां ध्वान्तविनाशकौ ॥८६॥

पुरग्रामादिगेहेषु वैभवस्य सुशासनम् ।
राज्यं संत्रासहीनञ्च चंद्रकांतिः समुज्ज्वला ॥८७॥

नालंदास्थापको गुप्तो कुमारो गुरुसेवकः ।
चंद्रजश्चंद्रिकायुक्तो वैरिध्वान्तविनाशकः ॥८८॥

प्रजानुरञ्जको राजा स्कंदः कुमारसंभवः ।
हूणाः पराजिताः येन तनुजे! शंभुपूजकाः ॥८९॥

पुरुगुप्तो विष्णुगुप्तो च बुधगुप्तादयो नृपाः ।
गुप्तानामग्रिमा आसञ्छासकाः जनपालकाः ॥९०॥

भानुगुप्तमहीपालो गुप्तानामन्तिमो नृपः ।
शताब्दिद्वयपर्यंतं गुप्तकालो हि भारते ॥९१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

बालोवाच

गौरवमार्यदेशस्य विद्याब्धिकृतमिज्जनम् ।
वीराणां वर्णनं ह्येतद् गुप्तानामैतिहासिम् ॥९२॥

अतीते स्वर्णकाले के क्षत्रियाः अभवन्नृपाः ।
के वंशाः क्व पुरस्तेषां कृपया ब्रूहि मे पिता ! ॥९३॥

पितोवाच

पुष्यभूतिवंशः

गुप्तावसानादुद्भूतःपुष्यभूतिः क्षितीश्वरः ।
स्थाण्वीश्वरःपुरो तस्ययुवराड् हर्षवर्द्धनः ॥९४॥

कादम्बरी रसैःसिक्तः भूपालो हर्षवर्द्धनः ।
देवभाषानुरागी च सौगतीनीतिपालकः ॥९५॥

नर्मदातीरसंभूते पुष्यभूतिकुले शुभे ।
एतावेव प्रसिद्धौ द्वौ राजानौ नीतिपालकौ ॥९६॥

बालोवाच

रमणीयं रसैः सिक्तमैतिहासिकवर्णनम् ।
गभीरं सारवच्चैव संक्षिप्तं ज्ञानवर्धकम् ॥९७॥

दक्षिणभारतीयराज्ञां वर्णनम्

उत्तरे भारते रम्ये प्रसिद्धाः धरणीश्वराः ।
बभूवुर्दक्षिणे भागे नृपाः के प्रथिताः पुरा ॥९८॥

पितोवाच

दक्षिणे भारते जाता बहवो राजभानवः ।
पल्लवचोलचालुक्यकुलकेतनभास्वराः ॥९९॥

पल्लववंशः

सिंहविष्णुर्महाराजो वैष्णवो धर्मपालकः ।
प्रथमः पल्लवीयोऽभूत्कांचीपुरनरेश्वरः ॥१००॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रविरिव भार विस्तत्र कविरेकः प्रजापतिः ।
यस्य काव्यसुधासिंधौ निमग्नो कांचिवल्लभः ॥१०१॥

द्वौ नृसिंहौ महेंद्रौ च परमेश्वरसंज्ञकः ।
राजानः पल्लवीयास्ते गुणलुब्धा विवेकिनः ॥१०२॥

आश्रयप्रद आसीद्यो दण्डिनो हि महाकवेः।
नन्दिवर्मान्तिमःकांचीराजाभूदपराजितः ॥१०३॥

राष्ट्रकूटवंशः

वर्णिके! वर्णवैविध्ये! सुविज्ञे! वर्णनोत्सुके! ।
वर्णयाम्यधुना वृत्तं राष्ट्रकूटमहीभुजाम् ॥१०४॥

शासनं राष्ट्रकूटानां दक्षिणे प्रथितं पुरा ।
ध्रुवः कृष्णश्च गोविंदोऽमोघेन्द्रश्च नृपाः स्मृताः ॥१०५॥

कृष्णेन राष्ट्रकूटेन प्रथमेन महीभुजा ।
निर्मितं मंदिरं शम्भोः कैलाशं सुंदरं परम् ॥१०६॥

बालोवाच

नमामि शंभुं हरमद्वितीयं नमामि गंगाधरविश्वरूपं ।
कृष्णार्चितं राष्ट्रकूटेशमीशं कैलाशवासमद्वयतुरीयम् ॥१०७॥

देवदेवस्य दासोऽयं राष्ट्रकूटक्षितीश्वरः ।
चालुक्यवंशजा वीराः किंकरा कस्य किं पुरम् ॥१०८॥

पितोवाच

चालुक्यवंशाः

चालुक्यकुलजातानां द्वे कुले धरणीतले ।
कल्याणी प्रथमं ज्ञेयं वातापी च द्वितीयकम् ॥१०९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कर्णाटके च कल्याणि शासनं वर्धितं महान् ।
वातापीनां च साम्राज्यं बीजापुरस्य सन्निधौ ॥११०॥

तृतीयोऽपि च वंशोऽभूत् प्रसिद्धो दक्षिणापथे ।
वेंगीचालुक्यनामायं प्राप्यते ह्यांध्रमण्डले ॥१११॥

वेंगिवातापिकल्याणिचालुक्यानां च भूमिपाः ।
संक्षिप्य वर्णयाम्यत्र चोलवंशजनेश्वरान् ॥११२॥

चालुक्यवंशः (कल्याणी)

तैलपविक्रमादित्यजयसिंहसोमेश्वराः ।
कल्याणीकुलसंभूता राजन्या धर्मपालकाः ॥११३॥

चालुक्यकुलसूर्यस्य विक्रमादित्यभूपतेः ।
सभामणिरिवावास्तां विज्ञानेश्वरविल्हणौ ॥११४॥

चालुक्यवंशः (वातापी)

स्थापितो जयसिंहेन पुलिकेन सुरक्षितः ।
चालुक्यानां च वातापी विक्रमेणाभिवर्धितः ॥११५॥

वेंगीचालुक्यवंशः

वेंगीचालुक्यजातेषु रत्नगर्भाधिराजसु ।
जयेन्द्रविजयाश्चैते बभूवुः प्रथिताः नृपाः ॥११६॥

चोलवंशः

तंजावूरपुरे भव्ये चोलानां शासनं बभौ ।
प्रथमो भूपतिस्तेषां विजयालयनामकः ॥११७॥

परांतकराजराजश्च राजेंद्रकुलतुंगकौ ।
चोलानामधिराजास्ते प्रसिद्धाः वसुधातले ॥११८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

बालोवाच

किमेत एवासन् भूपा अवाच्यां मेदिनीतले ।

पितोवाच

दक्षिणे भूमिभागेऽस्मिन्नन्ये काकतियादयः ॥११९॥

दक्षिणभारतीयाः अन्ये राजवंशाः–

यादववंशः

दक्षिणे देवगिर्यां च भिल्लमः प्रथमोऽभवत् ।
अंतिमो यादवे वंशे रामचंद्रमहीश्वरः ॥१२०॥

होयसलवंशः

होयसल्कुलसंभूतः विष्णुवर्धनक्षत्रियः ।
प्रथमो राजराजोऽभूदन्त्यो बल्लालसंज्ञकः ॥१२१॥

काकतीयवंशः

अवाचेः काकतीयानां बीटाद्यः स्थापको मतः ।
अमकोण्डपुरंतस्य रुद्रदेवोऽन्तिमो नृपः ॥१२२॥

गुर्जरप्रतिहारवंशः

मध्ये मालवराष्ट्रभूमिपटले भूमीश्वराः शासकाः
भास्वत्तुल्यप्रकाशकाः प्रतिहराः लोकैः सदा पूजिताः।
आसीदेषु हि नागभट्टसुभगो वंशस्य संस्थापकः
पालोऽनंग इनो भुवश्च मिहिरोवीरस्मृता गुर्जराः ॥१२३॥

बालोवाच

क्षत्रियाः छत्रिणो वीराः क्षात्रधर्मपरायणाः ।
भानुजाजलपूतास्ते राजपूतरणेश्वराः ॥१२४॥

के वंशाःक्व पुरस्तेषां वीराणां वैरिनाशिनाम् ।
वीरगाथांकिता कुत्र वीरभोग्या वसुंधरा ॥१२५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पितोवाच

इंद्रप्रस्थं समारभ्य मरुभूमिमिताः पुरा ।
भानुजायास्तटे तेषां वीरभोग्या वसुंधरा ॥१२६॥

राजपूतवंशाः

राठौरवंशजः वीरः चंद्रदेवमहामतिः ।
प्रथमो राजपुत्रोऽयमस्मिन्वंशे महीरुहे ॥१२६॥

जयचंदाख्यभूपालः राठौरेष्वंतिमोऽभवत् ।
रूपरेणुसमासिक्ता तस्य संयोगितात्मजा ॥१२७॥

चंदावरे रणक्षेत्रे वीराणां समरांगणे ।
यवनो हतवान् गोरी जयचंदं महीश्वरम् ॥१२८॥

बालोवाच

ऐतिह्ये राजपूतानां चौहानकुलजाः नृपाः ।
वीरतादिगुणोपेताः कस्मिन्राज्येऽभवन् पितः! ॥

पितोवाच

अजमेरपुराधीशाः देहलीशासकाश्च ते।
क्षत्रियाः शत्रुहंतार आसन्वचनपालकाः ॥१२९॥

चौहानवंशः

अहिच्छत्रस्य भर्तासौ वासुदेवनरेश्वरः ।
चौहानकुलबीजं च धर्मज्ञानप्रचारकः ।१३०॥

राष्ट्रभाषाकवेरादेराश्रयो धरणीसुतः ।
गौरीसंहारकः शूरः पृथिवीशासकः सदा ॥१३१॥

भारतेश्वरो देहलीशासनाधीशभूपतिः ।
प्रियः संयोगितापूज्यः पृथ्वीराजोऽवनीपतिः ॥१३२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

बालोवाच

भारो न बाधते राजन्यथा बाधति बाधते ।
वाक्येदं केन भूपेन संबद्धस्तस्य किं कुलम् ॥१३३।

पितोवाच

परमारकुलोत्पन्नो भोजराजो बुधप्रियः ।
ऊचे वाक्यं यथाशुद्धं तस्य त्वं शृणु वर्णनम् ॥१३४॥

परमारवंशः

परमारवंशस्य हि भूमिपाला कविभोजराजादिमहाकुलीनाः ।
श्रीहर्षदशरूपककारविज्ञौ वास्तामलौकिकविधुसूर्यनेत्रे ॥१३५॥

बालोवाच

वृत्तान्तं परमैतिहासिकमिमं सद्ज्ञानदं प्रेरकं
वीराणामभिजातनामसहितं श्रुत्वा च हर्षान्विताः।
दिव्येयं धरणी सदैव जयतात् सद्भावनादायिनी
हा दीप्तोऽत्र कथं विमर्दनकरः कश्मीरदावानलः ॥१४०॥

पितोवाच

विच्छेदकारिणः केचिद् शत्रुदेशसमर्थकाः ।
रक्तपातेन कश्मीरं दहन्ति नितरां खलाः ॥१३९॥

पाषाणक्षेपकाः धूर्ताः भारतान्नेन पोषिताः ।
विस्फोटकादिना नित्यं हन्ति भारतरक्षकान् ॥१३८॥

बालोवाच

दशेयमस्य राज्यस्य पुराकालेऽपि तादृशी?

पितोवाच

अस्यैतिहासबोधाय शृणोतु वचनं मम ॥१३७॥

कश्मीरवंशः

उदीच्यां सानुमान्तुंगो राजते धरणीधरः ।
रक्षको भारतस्यायं देवतात्मा हिमालयः ॥१२८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

हिमवत्प्रदेशे रमणीयक्षेत्रे
मुक्तामणीवास्ति कश्मीरदेशः ।
अभिन्नभागो हि प्रियभारतस्य
इममन्तरा भारतभालहीनः ॥१२९॥

स्वर्गवद् रमणीयेऽस्मिन्कश्मीरावनिमण्डले ।
कर्कोटाः प्रथमास्तेषां राजा दुर्लभवर्धनः ॥१३०॥

कर्कोटानां नृपश्रेष्ठः ललितादित्यभूपतिः ।
कर्कोटानन्तरं जाता उत्पला मेदिनीश्वराः ॥१३१॥

उत्पलान्समरे जित्वा लौहारकुलभूमिपः ।
संस्थाप्य स्वस्य साम्राज्यं रराज धरणेर्दिवि ॥१३२॥

श्रीहर्षः शासको विद्वान्लौहारकुलभूषकोः ।
कर्ता राजतरंगिण्याः सभा यस्य व्यराजत ॥१३३॥

जयसिंहमहाराजो ह्यन्त्यो लौहारवंशजः ।
राज्ये काव्यकलादीनां विद्यादीनां च वर्धकः ॥१३४॥

काव्यं राजमणीयं मे शृणुयात् यः समाहितः।
इतिहासगतो बोधः विमलस्तस्य जायते ॥१३५॥

पितृपक्षे द्वितीयायां परिधाविनि वत्सरे ।
भास्करे विमलेनेदं कृतं राजमणीयकम् ।१३६॥

॥ कविविमलकृतराजमणीये उत्तरमणिः सम्पन्ना ॥

सी-१०६, अग्रवाल हाट्स, राजनगर एक्स्टेंशन,
रिवर हाइट निकटः, गाजियाबाद (उत्तर प्रदेश)-२०१०१७
मो. : ९८१०७००९७८

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

[१० जुलाई, २०१६ दिनाङ्कितस्य 'द हितवाद' इति आंग्ल-दैनिकस्य "Insight" (अन्तःदृष्टिः) इति रविवासरीयां पूरणिकायां (Supplement) तत्रापि "Expressions" (अभिव्यक्तिः) इति स्तम्भे प्रकाशितायाः मदीयायाः "Virginian Woods" इति शीर्षकान्वितायाः आंग्ल-कविताया: स्वैरानुवादः प्रस्तूयतेऽत्र। –न.र.प.]

व्हर्जिनिया-विपिनानि

–पत्तरकिने नंदकिशोरः

काचवातायनस्य पारे पश्यामि विततानि व्हर्जिनिया-विपिनानि।
निष्पर्णास्तिष्ठन्ति पादपाः स्थितप्रज्ञाः स्थिरा इव॥१॥

हेमन्तो यदि आयाति वसन्तेन विलम्ब्यते कथम्।
"वासांसि जीर्णानि" हि सत्यमेतत् ख्यापयन्ति व्हर्जिनिया-वनानि॥२॥

व्हर्जिनिया-वनानि गहनानि निबिडानि तथा।
पाठयन्ति मनुजं, मुखरितं भवति आर्षमौनं कथम्॥३॥

संहरति यदा करान्, म्लानप्रभः स मरीचिमाली।
आव्रियते जगत् सर्वं विसर्पन्त्या कृष्णच्छायया॥४॥

व्याजृम्भमाणेनान्धतमसा तिष्ठति विपिनं वेपमानम्।
कम्पतेऽगम्यभीत्या किमिति कातरं मे हृदयम्॥५॥

६८/७, उज्ज्वल नगर,
वर्धा रोड, नागपुर-४४००२५
मो.: ९६२३१७६९५२

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

॥ श्री सरस्वत्यै नमः ॥

'विश्वभारत'-दर्शनम्

-रमाकान्तशुक्लः

वाणीञ्च शिवजौ नत्वा गजानन-षडाननौ।
कुर्वे शुक्लो रमाकान्तो 'विश्वभारत-दर्शनम्' ॥१॥

श्रीमान् नागफणिः शर्मा श्रुते भाग्यपुरेऽकरोत्।
करनारी[१] (२०२१) शवीयेऽब्दे 'विश्वभारत' सत्कृतिम् ॥२॥

महाकाव्यमिदं नूनं कीर्तिस्तम्भसमप्रभम्।
त्रिदिवेशसरस्वत्या विबुधस्मयकारकम् ॥३॥

जनवर्येकविंशेऽह्नि दूरवाणीपथैषमः।
महाकविमुखादेव महाकाव्यं श्रुतं मया ॥४॥

श्रुतिस्मृतिपुराणोक्तं स्वयं दृष्टं च गौरवम्।
विश्वस्य भारतस्याथ महाकविरवर्णयत् ॥५॥

नव्यैर्वृत्तैः पुराणैश्च भारत-प्रकृतेः कविः।
वर्णनानि यथायोग्यं श्रावयन्मां मुदं गतः ॥६॥

अथ वैद्युतमार्गेण महाकाव्य-लिपिर्मया।
लब्धा तां च पठित्वात्र स्वाभिप्रायो निवेद्यते ॥७॥

ब्रह्मश्रीमाडगुल्नागफणिशर्ममहात्मने।
'विश्वभारत'कर्त्रेऽहं व्याहराम्यभिनन्दनम् ॥८॥

द्विसहस्रावधान्यर्को ब्रह्मश्रीपदपूजितः।
डाक्टर् नागफणिः शर्मा कैर्न वन्द्यः शुचिस्मितः ॥९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

यो भाग्यनगरे श्रीमान् सरस्वत्यभिधे श्रुते।
अवधानमहापीठे कुलपत्यासनस्थितः ॥१०॥

सुवर्णकङ्कणोपेतं यदीयं करपङ्कजम् ।
शिष्येभ्य अशिषो दत्ते सुवर्णरचनाकृते ॥११॥

यस्यावधानसम्राजः प्रतापं वाङ्मयं सभा ।
अनुभूय मुदोपेता 'जय' पुष्पाणि वर्षति ॥१२॥

योऽष्टादशानां विद्यानां पारदृश्वा कवीश्वरः।
'विश्वभारत'मित्याख्यं महाकाव्यमरीरचत् ॥१३॥

अष्टादशसु कल्पेषु भारताम्बात्र नायिका।
विविधेषु स्वरूपेषु प्रत्यक्षमवलोक्यते ॥१४॥

गजकल्पे भारताम्बा गाणेशीरूपधारिणी ।
कश्यपादिमुनीन्द्रेभ्यो ददाति निजसंस्तवम् ॥१५॥

वृषभाख्ये द्वितीयेऽथो कल्पे भारतनामकः ।
शिष्यः पृच्छति प्रश्नं स्वं कश्यपाख्यं प्रजापतिम् ॥१६॥

"पर्वतानां कथं भूम्यां जातोत्पत्तिर्गुरो! वद ।"
प्रश्नं श्रुत्वागतस्तूर्णं कैलासं कश्यपस्तदा ॥१७॥

तेन साकं गता नैके मरीच्याद्या महर्षयः ।
भारताख्यश्च शिष्योऽपि कश्यपं सुखमन्वितः॥१८॥

नगोत्पतिः समैर्दृष्टा शिवलीलानुभावतः ।
भारताम्बा तदा दृष्टा वृषभेशीस्वरूपिणी ॥१९॥

कल्पेऽस्मिन् कविना सम्यक् कर्षकाणां तथा कृषेः ।
पर्वतानां नदीनाञ्च माहात्म्यमुपवर्णितम् ॥२०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कल्पवृक्षाभिधे कल्पे तृतीये भारताम्बिका ।
कल्पपादपरूपेण दृश्यतेऽभयदायिनी ॥२१॥

चतुर्थे कामधेन्वाख्ये कल्पे श्रीभारताम्बिका ।
कामधेनुस्वरूपेण दृश्यते कामदायिनी ॥२२॥

कश्यपो भारतं शिष्यं ब्रूते कल्पे चतुर्थके ।
गोमाहात्म्यं तथा नैकव्रतानां सत्फलं महत् ॥२३॥

पञ्चमे हंसकल्पेऽथो वसिष्ठो याति मानसम् ।
श्रीनारायणरूपञ्च हंसं पश्यति सादरम् ॥२४॥

भारताम्बाव्रतान्यष्टौ हंसो ब्रूते महामुनिम् ।
गर्भिणीनियमांश्चैव कश्यपोक्तान् दितिं प्रति ॥२५॥

हंसस्वरूपं बिभ्राणा भारताम्बात्र दृश्यते ।
उच्छ्वासनिःश्वासमयो हंसः प्राणस्वरूपभाक् ॥२६॥

षष्ठे कल्पे भारताम्बा पद्मिनीरूपिणी मता ।
मार्कण्डेयमुनेरत्र कथा प्राधान्यतः स्थिता ॥२७॥

सप्तमे मत्स्यकल्पे तु महाप्रलयसूचनम् ।
भारताम्बा मत्स्यरूपा गङ्गावतरणं तथा ॥२८॥

अष्टमे तीर्थकल्पे तु कश्यपेन महात्मना ।
भारताख्याय शिष्याय भारताम्बोपदिश्यते ॥२९॥

अस्मिन् कल्पे कश्यपेन यमुना च सरस्वती ।
नर्मदा चैव वर्ण्यन्ते कथाश्च विविधाः स्मृताः ॥३०॥

कूर्मकल्पे तु नवमे क्षीरसागरमन्थनम् ।
कूर्मरूपधरा चेह भारताम्बावलोक्यते ॥३१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पृथ्वीवृत्तैस्त्रिभी रम्यैर्जमदग्निमहर्षिणा ।
कूर्मरूपमहाविष्णोः स्तुतिरत्र विधीयते ॥३२॥

कूर्मकल्पे स्तुता नद्यो भक्तिभावितचेतसा ।
कविना येन हृष्टं स्यान्नदीमातृकभारतम् ॥३३॥

सिन्धुनामनदस्याथो वितस्ता-चन्द्रभागयोः ।
धुन्याः परुष्णिकायाश्च प्रशस्तिः कविना कृता ॥३४॥

विपाशायाः शतद्रोश्च सरय्व्याः सरितस्तथा ।
कौशिक्याश्च तरङ्गिण्याः प्रशस्तिः कविना कृता ॥३५॥

गण्डकी गौतमी गोदा कृष्णावेणी पिनाकिनी ।
तुङ्गभद्रा च कावेरी स्तूयन्ते कविना मुदा ॥३६॥

वराहकल्पे कविना चण्डीपूजाविधानकम् ।
वर्णयित्वा स्वकं ज्ञानं व्यक्तमागमसङ्गतम् ॥३७॥

अश्वकल्पे च कविना मनोयोगेन वर्णिताः ।
आदित्य ऋतवः सर्वे शृङ्गाराद्या रसास्तथा ॥३८॥

अश्वधाटीसुवृत्तेन द्वादशप्रासधारिणा ।
द्वादशात्मा स्तुतः सम्यक् कविनाश्वाख्यकल्पके ॥३९॥

द्वादशेऽथ मयूराख्ये कल्पे पाण्डित्यवैभवम् ।
कवेर्दृष्टिपथं याति प्रतिभाद्योतनं सताम् ॥४०

नारद-व्यास-भरता अन्ये च मुनिसत्तमाः ।
मन्दरं पर्वतं प्राप्य शास्त्राणां ज्ञानमावहन् ॥४१॥

आविरासीन्मयूराख्यो देवस्तत्र कलाचणः ।
तस्य केकारवे जातं समस्तं वाङ्मयं स्फुटम् ॥४२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

तस्य नृत्ये च सञ्जातो नाट्यवेदसमुद्भवः ।
भरताख्यं तथा नृत्यं प्रसिद्धमभवद्भुवि ॥४३॥

पाणिनेर्व्याकृतिश्चापि केकायामभवत्स्फुटा ।
मयूररूपिणी चास्ते भारताम्बात्र कल्पके ॥४४॥

मयूरकल्पे कविना नाट्यशास्त्रीयवैभवम् ।
'कूचिपूड्या'दिनृत्यानामितिहासश्च वर्ण्यते ॥४५॥

मयूरकल्पे कविना केकिनो नृत्यवर्णने ।
विविधानि प्रयुक्तानि च्छन्दांसि गतिमन्ति हि ॥४६॥

अस्मिन् कल्पे विशेषा ये प्रयुक्ता धातवो विदा ।
सूचयन्त्यस्य पाण्डित्यं शब्दशास्त्रस्य ते समे ॥४७॥

भूकल्पे शङ्कराचार्यः श्रीरामानुजदेशिकः ।
अनेके च महात्मानो वर्णिताः कविना विदा ॥४८॥

ज्योतिर्लिङ्ग-शक्तिपीठ-वैष्णवक्षेत्र-वर्णनम् ।
चतुर्दशे क्षेत्रकल्पे बौद्धजैनमतं तथा ॥४८॥

कविः पञ्चदशे कल्पे मृगेन्द्राख्ये ह्यवर्णयत् ।
धीरतग्रामवास्तव्य-कर्षक-क्षेत्र-सम्पदम् ॥४९॥

इहैव सिंहरूपेण भारताम्बावलोक्यते ।
याग्रे राष्ट्रपताकायां दर्शनं स्वं प्रदास्यति ॥५०॥

जनेन्द्रकल्पे श्री शर्मा गुरुः शिष्यान् प्रबोधयन् ।
'हिन्दु' शब्दस्य व्युत्पत्तिं कुरुते भारतस्य च ॥५१॥

श्रीमद्भागवते प्रोक्ताः कथा ब्रूते महाकविः ।
करोति नवखण्डस्य भारतस्य च वर्णनम् ॥५२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कविरष्टसु पद्येषु ब्रूते भारत-वैभवम् ।
पञ्चविंशतिपद्यैश्च भारतं विशिनष्टि सः ॥५३॥

अखण्डं दर्शयत्यत्र सिंहाकारधरं कविः ।
पूर्वं विभाजनादासीद् भारतं यन्महाबलम् ॥५४॥

संघस्याथ विचारेण प्रभावितमनाः कविः ।
वक्ति-"ते हिन्दवः सर्वे ये भारतनिवासिनः" ॥५५॥

पद्मावतीरूपधरा त्रिवर्णध्वजशोभिनी ।
भारताम्बा ददातीह स्वकीयं पुण्यदर्शनम् ॥५६॥

नरेन्द्रकल्पे श्रीशर्मा सरय्व्यास्तीरमास्थितः ।
शिष्यान् ब्रूते नरेन्द्राणां महनीयां परम्पराम् ॥५७॥

ऋजुत्वं सत्यसन्धत्वं मन्त्रदर्शनयोग्यता ।
एतैर्गुणैः परीतानां राज्ञां चर्चां करोति सः ॥५८॥

भक्तिशक्तिनिधानानां यशोभाजां महीभुजाम् ।
श्रीमद्भागवतोक्तानां कविश्चर्चामिहाकरोत् ॥५९॥

नभगस्याथ नाभाग-नरेन्द्रस्य महाकविः ।
अम्बरीषस्य मान्धातुः कल्पेऽस्मिंश्चरितं जगौ ॥६०॥

पुरुकुत्स-हरिश्चन्द्र-सगराणां महीभुजाम् ।
भगीरथनरेन्द्रस्य चरितं च कविर्जगौ ॥६१॥

गुरोर्गोः रक्षणे प्राणांस्त्यक्तुं सिद्धस्य सर्वथा ।
कविनात्र दिलीपस्य चरित्रमभिवर्णितम् ॥६२॥

दातृत्वस्य परां काष्ठां बिभ्राणस्य रघोः कविः ।
चरित्रं वर्णयत्यत्र लोकप्रेरकमद्भुतम् ॥६३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

धर्मावतारारामस्य पञ्चशार्दूलवृत्तकैः ।
वर्णयत्यत्र सुकविश्चरित्रं लोकरक्षकम् ॥६४॥

श्रीमत्परशुरामस्य पराक्रमसुपूरितम् ।
चरितं कविना प्रोक्तं कार्तवीर्यार्जुनस्य च ॥६५॥

नलस्य रन्तिदेवस्य पृथोश्च नहुषस्य च ।
ययातेश्च नरेन्द्रस्य चरितानि जगौ कविः ॥६६॥

विश्वभारतसिद्धिञ्चाखण्डभारतसंस्थितिम् ।
नरेन्द्रकल्पे कुरुते महाकविरयं यथा- ॥६७॥

"तद्विश्वभारतं नाम कथ्यते श्रूयतामिह ।
न च भौगोलिकव्याप्तिर्भारतस्य विश्वतः ॥

विश्वे भारतधर्मस्य व्याप्तिश्शान्तिपरायणा ।
या वेदे सूक्तिरेवं स्यात्तद्विश्वस्यैकभारतम् ॥

यत्कश्मीरशिरोभाग्यं हिमालयकिरीटकम् ।
त्रिविष्टपशिरोरत्नं ब्रह्मदेशोपगाणकम्"॥

(विश्वभारतम् / नरेन्द्रकल्पः / १८४-१८६)

"संवत्सरसहस्रात्प्राक् शक्तिपीठसमन्वितम् ।
यदासीद्भारतं तथ्यं तदेवाखण्डभारतम् ॥

(विश्वभारतम् / नरेन्द्रकल्पः / १८७)

भारतं भारतं कर्तुं जायन्ते हि नरोत्तमाः ।
गान्धी शिवा-सुभाषाद्या लक्ष्मी-भीमाटलादयः ॥६८॥

भारतस्य पताकायां धर्मचक्रस्वरूपिणी ।
भविष्यामीतिवादिन्या देव्या भवति दर्शनम् ॥६९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अष्टादशे भारताम्बा-कल्पे भवति सौख्यदा ।
'विश्वभारत' सञ्ज्ञस्य महाकाव्यस्य पूर्णता ॥७०॥

मेरुपर्वतसत्क्षेत्रे कश्मीरे शर्मदेशिकः ।
सर्वज्ञाख्यमहापीठे शिष्यान् बोधयति प्रियान् ॥७१॥

काव्याधिनेत्र्या भारत्या आविर्भावः प्रजायते ।
नायकस्य च धर्मस्य प्राकट्यं तत्र जायते ॥७२॥

मेलने च द्वयोर्जाते जातं सुखमयं जगत् ।
भारताम्बा पुनः सर्वान् रूपं दर्शयति स्वकम् ॥७३॥

भारताम्बातनौ दृश्या अभूवन् सुविभूतयः ।
कवयश्चावताराश्च देवा नद्यो नगा ग्रहाः ॥७४॥

आदिकविः श्रीवाल्मीकिर्व्यासः कविकुलाधिपः ।
कालिदासोऽथ दण्डी च बाणो गद्यकृतां वरः ॥७५॥

भवभूतिस्तथा माघो भारविश्च महाकविः ।
अश्वघोषः प्रसिद्धश्च महाकाव्यप्रदायकः ॥७६॥

मत्स्यकूर्मवराहाद्या अवताराः प्रभोः श्रुताः ।
आदिशङ्कर आचार्यो रामानुजगुरुस्तथा ॥७७॥

मध्वाचार्यस्तथा नैके वेदान्तस्योपदेशकाः ।
पीठाधीशाः प्रसिद्धा ये भक्ताः सत्कवयस्तथा ॥७८॥

अन्नमाचार्यसदृशा जयदेवनिभास्तथा।
लीलाशुकसमाः किञ्च बसवेश्वरसन्निभाः ॥७९॥

श्रीपुरन्दरदासाभा रामदासनिभास्तथा ।
वाग्गेयकारा येऽप्यन्ये त्यागराजादयः श्रुताः ॥८०॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नन्नयस्तिक्कनः श्रीमान् एराप्रेगडसत्कविः ।
श्रीनाथः पोतनो मान्यः पेद्दनो धूर्जटिस्तथा ॥८१॥

विलोमकाव्यकर्ता च रामकृष्णमहाकविः ।
तुलसी सूरदासश्च नारायणगुरुस्तथा ॥८२॥

रविदासस्तथान्ये च सन्तो भक्ताः कवीश्वराः ।
ते सर्वे तत्र दृश्यन्ते भारताम्बा-लसत्तनौ ॥८३॥

श्रीमान् परमहंसश्रीरामकृष्णो गुरूत्तमः ।
विवेकानन्दनामा च तस्य शिष्यो जगच्छुतः ॥८४॥

नामदेवोऽरविन्दश्च नानको गुरुसत्तमः ।
रामतीर्थो राघवेन्द्रः काव्यकण्ठस्तथैव च ॥८५॥

पतिव्रता वीरनार्यः कवयित्र्योऽधुनाभवाः ।
आधुनिकाश्च कवयः समाजस्य सुधारकाः ॥८६।

शिवा प्रतापो नेताजी भक्तसिंहादयस्तथा ।
नैकसंख्या महावीरा दृष्टास्तस्या तनौ तदा ॥८७॥

दिग्देवतास्तथा रागदेवताः पुष्पदेवताः ।
छन्दसां देवताः सर्वा ग्रहाश्च कुलपर्वताः ॥८८॥

नदीनां देवताः सर्वा भारताम्बातनौ स्थिताः ।
ऋषयो मन्त्रद्रष्टारः सर्वे दृश्यास्तथाभवन् ॥८९॥

स्थापना रामराज्यस्याभूत्सर्वजनशंप्रदा ।
यत्र सर्वेऽपि सुखिनो यत्र सर्वे निरामयाः ॥९०॥

सर्वे भद्राणि पश्यन्ति नास्ति कश्चिच्च दुःखभाक् ।
एतत्सर्वस्वरूपा श्री भारताम्बा प्रणम्यते ॥९१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सार्धत्रिंशतवृत्तेषु क्रतुभुग्वाग्विनिर्मिता ।
अतिसार्धद्विसाहस्री पद्यानामत्र शोभते ॥९२॥

गुरुः शर्मात्र वक्तास्ते श्रोता भारतनामकः।
कथोक्ता कविना सम्यग् द्वयोः संवादरूपिणी ॥९३॥

नायिका भारताम्बात्र नायको धर्मपूरुषः।
कालगत्या वियुक्तौ तौ जातौ मिलनहर्षितौ ॥९४॥

अतो विश्वकुटुम्बिन्याः सन्ततिस्तोषमागताः।
भारताम्बास्वरूपिण्या नायिकायाः सुहर्षिता ॥९५॥

इदं कथानकं रम्यं 'विश्वभारत' नामके।
शोभतेऽस्मिन् महाकाव्ये ब्रह्मश्रीशर्मणा कृते ॥९६॥

समन्वितं भवत्यत्र प्राक्तनं चाधुनातनम्।
भारतं कविकौशल्यात्सचेताः पश्यतात्स्वयम् ॥९७॥

कश्मीरादुद्भवं प्राप्य महाकाव्यकथानकम् ।
तत्रैव पूर्णतां प्राप्तं ब्रह्मश्रीकविकौशलात् ॥९८॥

शतषष्टिसहस्रैः श्रीव्यासः पद्यैर्व्यधाज्जयम् ।
शान्तनामरसोपेतं सरस्वत्यास्तटे यथा ॥९९॥

अवधानसरस्वत्याः पीठे तद्वत्तपश्चरन् ।
ब्रह्मश्रीः कृतवान् काव्यं 'विश्वभारत' सञ्ज्ञकम् ॥१००॥

मातृभक्तेस्तथा देशभक्तेः सम्यक् प्रबोधनम् ।
महाकाव्यतरोरस्य सरसं फलमिष्यते ॥१०१॥

पुरातनं भारतीयं गौरवं वर्णितं यथा ।
'विश्वभारत' सञ्ज्ञेऽस्मिन्महाकाव्ये तथा नवम् ॥१०२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पर्वताः सरितो वृक्षा गोधनं पक्षिणस्तथा ।
महात्मानो नरेन्द्राश्च सङ्गीतं साहिती कलाः ॥१०३॥

संस्कृतेर्वैभवं बौद्ध-जैन-सिक्ख-समन्वयः।
आदिशङ्कर आचार्यो रविदासः फुले तथा ॥१०४॥

अन्ये च विषयाः सम्यग् वर्णिता विश्वभारते ।
येनास्य कर्तुर्व्युत्पत्तिः स्फुटमेवावलोक्यते ॥१०५॥

वेदाः साङ्गाः पुराणानि स्मृतयश्चोपवेदकाः ।
आन्वीक्षिकी तथा वार्ता दण्डनीतिः कलाविधाः ॥१०६॥

रामायणं महाकाव्यं श्रीमद्भागवतं तथा ।
नाट्यशास्त्रं काव्यशास्त्रमितिहासस्तथैव च ॥१०७॥

विज्ञानाध्यात्मवाणिज्यान्यवधानकलास्तथा ।
ब्रह्मश्रीशर्मणा सम्यगभ्यस्ता नात्र संशयः ॥१०८॥

कालिदासस्य काव्यानि श्रीहर्षस्य च नैषधम् ।
अन्येषाञ्च कवीन्द्राणां रचनास्तन्मतिस्थिताः ॥१०८॥

"व्युत्पत्तावन्यहेतुत्वं प्रवृत्तावन्यहेतुता ।
शब्दाना[२]मिति विद्वद्भिः सिद्धान्तः प्रतिपादितः ॥१०९॥

व्युत्पत्तौ हिन्दुशब्दस्य हेतुरासीत्पुरा हि यः।
कालगत्यनुसारं सः प्रवृत्तौ परिवर्तितः ॥११०॥

वैदिक्यामपि भाषायां क्वचित्सस्य हकारता।
भारतीयोपभाषास्वप्यालोक्येयं स्थितिः क्वचित् ॥१११॥

ये सिन्धुनदतीरस्थाः पारस्यां हिन्दवो हि ते ।
सस्य स्थाने हकारः स्यात्पारस्यां हि क्वचित् क्वचित् ॥११२॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सत्यं वेदोपवेदेषु ब्राह्मणारण्यकेषु वा ।
'हिन्दु' शब्दो न दृश्योऽस्ति वेदान्तेषु स्मृतिष्वथो ॥११३॥

न भासः कालिदासो वा शूद्रको हर्ष एव वा ।
बाणो दण्डी सुबन्धुर्वा 'हिन्दु' शब्दं प्रयुक्तवान् ॥११४॥

'हिन्दु' शब्दप्रयोगोऽथो पुराणे कल्किनामके ।
दृश्यते यस्य समयः सहस्राब्दपुरातनः ॥११५॥

'हिन्द' शब्दः प्रयुक्तोऽस्ति भारतस्य कृते पुरा ।
देशवाचकरूपेण पह्लवीवाच्ययं स्थितः ॥११६॥

श्यामो वा क्रीतदासो वा मूर्तिपूजापरः प्रियः ।
'हिन्द'वासी 'हिन्दु'शब्दः कोशग्रन्थेषु लभ्यते ॥११७॥

अरबी-फ़ारसी-हिन्दी-ब्रजभाषावधीष्वपि ।
भाषासु दृश्यते नूनं 'हिन्दु' शब्दो मुहुर्मुहुः ॥११८॥

प्रायो विरुद्धता दृश्या 'हिन्दु'-'मुस्लिम' शब्दयोः ।
काफ़िरस्य च पर्यायो 'हिन्दु' शब्दः क्वचिन्मतः ॥११९॥

कैश्चिद्धि "हिन्दु"शब्दस्य प्रयोगो निन्दया कृतः।
काले गते पुनः कैश्चित्सगर्वं हिन्दुरुच्यते ॥१२०॥

"उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः" ॥१२१॥

अस्मिञ्छ्लोके प्रजाः सर्वा "भारती"पदशब्दिताः।
नानाकर्मपरा नानावर्णोपासनतत्पराः ॥१२२॥

भारतं प्रति ते सर्वे निष्ठावन्तोऽभवञ्जनाः।
भारतीसन्ततित्वेन प्रोक्ता ये तत्त्ववेदिभिः ॥१२३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वीकृतं संविधानेऽसि नाम देशस्य 'भारतम्'।
पर्यायत्वेन गृह्येते 'हिन्दुस्तानं' तथेण्डिया' ॥१२४॥

भारते ये समुत्पन्ना भारते ये निवासिनः।
भारतीया हि ते सर्वे कामं ते भिन्नबुद्धयः ॥१२५॥

यवनाः पारसीका वा तुरुष्का भारतास्तथा।
प्रत्यभिज्ञानवन्तस्ते देशे वासात्तथा जनेः ॥१२६॥

आस्तिका नास्तिकाः शैवाः शाक्ता वैष्णवमार्गगाः।
वैदिका आर्हता बौद्धा अङ्गा बङ्गाः कलिङ्गकाः ॥१२७॥

सर्वे परस्परं प्रीत्या निवसन्तोऽत्र भारते।
धर्मार्थकाममोक्षाणामकार्षुः साधनां शुभाम् ॥१२८॥

किन्त्विस्लामजनेः पश्चात्ते जना हिन्दवो मताः।
यैरिस्लाममतस्यासीन्नैवाङ्गीकरणं कृतम् ॥१२९॥

देशवाचक आसीद्यो 'हिन्दू'शब्दः पुरा हि सः।
धर्मवाची समुद्घुष्ट इस्लाममतमानिभिः ॥१३०॥

ये संस्कृतिं विश्ववारां भारतीयां सिषेविरे।
ते सर्वे 'हिन्दु'शब्देन प्रोक्ता वैदेशिकैंबुधैः ॥१३१॥

'हिन्दुस्तानं' मतो देशो 'भारता'ख्यो हि योऽभवत्।
'हिन्दुस्तानी'तथा 'हिन्दी' भारतीयार्थबोधकौ ॥१३२॥

हिन्दुस्तान्यथवा हिन्दी कदाचिन्मुस्लिमो भवेत्।
किन्त्वात्मने 'हिन्दु'शब्दं प्रयोक्तुं न स तत्परः ॥१३३॥

स्कन्धस्थितं यथा छागं श्वानं श्रुत्वास्य वाहकः।
तं श्वानमेव मन्वानोऽत्याक्षीद्भ्रान्तिपरीतधीः ॥१३४॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारतीयास्तथात्मानं हिन्दुमेव प्रचक्षिरे।
'हिन्दुस्तानं' च ते सर्वे 'भारतं'कथयन्ति हि ॥१३५॥

'हिन्दु'-'मुस्लिम'शब्दौ हि नासेते देशवाचिनौ।
तौ जातौ धर्मसम्बद्धौ विभक्तं येन भारतम् ॥१३६॥

हिन्दु-मुस्लिमयोर्धर्माधारितैः कलहैरिदम्।
भारतं तप्यते हन्त! सहस्राधिकवत्सरैः ॥१३७॥

एतस्यां हि स्थितौ कैश्चिद् हिन्दुशब्दाभिमानिभिः।
हिन्दुशब्दपुनर्व्याख्या क्रियते शतवत्सरैः ॥१३८॥

"हिंसया दूयते हिन्दु"रिति लक्षणकारिभिः।
प्रयत्नः क्रियते"हिन्दू"शब्दे गर्वदिधित्सया ॥१३९॥

अद्यत्वे सुधियः केचित्तत्पराश्चित्तयोगतः।
'हिन्दु'शब्दपुनर्व्याख्यां कर्तुं भूमण्डलेऽखिले ॥१४०॥

कालगत्या 'हिन्दु' शब्दो धर्मवाची प्रचारितः ।
शिवा वा गुरुगोविन्दो 'हिन्दुधर्म' पदं जगौ ॥१४१॥

यो भारतधर्मालम्बी न चेस्लामस्य पालकः ।
स वै वध्यो 'हिन्दु' नामा जन इस्लामधर्मिभिः ॥१४२॥

भारताख्यस्य देशस्य 'हिन्द' शब्दोऽस्ति वाचकः ।
भारतवर्षवासी च 'हिन्दी' शब्देन कथ्यते ॥१४३॥

'हिन्द' सागर 'जैहिन्दे' त्यादौ 'हिन्दः' प्रशस्तिभाक्।
भारतीयाः समे किन्तु नात्मानं हिन्दुमानिनः ॥१४४॥

'हिन्दु' शब्दप्रयोगे तु पुरा नासीत्सदाशयः ।
क्रीतदासस्य पर्यायः कोशग्रन्थेष्वयं मतः ॥१४५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

किन्तु कालान्तरे 'हिन्द' वासिभिर्मुस्लिमेतरैः ।
जनैरङ्गीकृतो 'हिन्दु' शब्दः स्वपरिचायकः ॥१४६॥

कैश्चित्सामान्यतयावहेलया सापमानं वा ।
कैश्चित्सगर्वमद्य प्रयुज्यते 'हिन्दु'रिति शब्दः ॥१४७॥

भारतवासी 'हिन्दु'र्भारतमूलोऽथवा हिन्दुः ।
विशिष्टजीवनपद्धतिपरिपालयिताऽथवः हिन्दुः ॥१४८॥

नो 'भारतीय' शब्दः कस्याप्युद्वेगजनकोऽस्ति ।
'हिन्दु' पदं पुनरास्ते नैकेषां क्षोभकारणमपि ॥१४९॥

हिन्दुमुस्लिमयोरैक्यं घोष्यते जननायकैः ।
एतेन सिद्ध्यतीदं यद् द्वावेतौ परिपन्थिनौ ॥१५०॥

धर्माधारितभेदोऽभूद् हिन्दुमुस्लिमशब्दयोः ।
अस्याधारेण हा हन्त! जातं देशविभाजनम् ॥१५१॥

भारते ये समुत्पन्ना भारते वा निवासिनः ।
प्रत्याययति तान् सर्वान् 'भारतीय' विशेषणम् ॥१५२॥

'हिन्दु' शब्दस्तथाद्यत्वे बहुसंख्यकमानवान् ।
भारतीयान् समाख्याति भारतार्पितचेतसः ॥१५३॥

गते वर्षसहस्रेऽयं शब्दो निन्दास्पदं नहि ।
नैकसंस्थाभिरद्यायं सगर्वं हिन्दुरुच्यते ॥१५४॥

तन्मतेनाद्य नास्तेऽयं 'हिन्दु' शब्दोऽपमानभाक् ।
भारतीयस्य पर्यायो 'हिन्दुः' सम्मानभाजनम् ॥१५५॥

हिन्दुः सद्गुणसम्पन्नो भारतीयोऽस्ति निश्चयः ।
न काफिरः क्रीतदासो नापमानास्पदं हि सः ॥१५६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कदाचिद् 'हिन्दु' शब्देन प्रोच्यते बहुसंख्यकः ।
जनो भारतदेशस्य सत्याहिंसादिपालकः ॥१५७॥

स्वाभिमानस्य गर्वस्य पवित्रत्वस्य भावनाम् ।
हिन्दुशब्दे समुन्मील्य संघटनं प्रवर्तते ॥१५८॥

शिवाजी च प्रतापश्च छत्रसालः प्रतापवान् ।
जना विवेकानन्दाद्याः हिन्द्वादर्शाश्च तन्मते ॥१५९॥

अथैकनीडे सञ्जाते विश्वे 'हिन्दु' पदार्थता ।
श्रीनागफणिना स्वीये महाकाव्ये विचार्यते ॥१६०॥

धर्मः सनातनो हिन्दुरिति निष्कर्षदायकः ।
'विश्वभारत'कर्ता श्रीशर्मा कविवरः सुधीः ॥१६१॥

अधस्तादत्र दीयन्ते केचिच्छ्लोकाः विदां कृते ।
'विश्वभारत'कारेण यत्र हिन्दुर्विवेच्यते ॥१६२॥

"यो वेदमार्गसंयाता यो यज्ञादिककर्मभाक् ।
यः स्नानदानशीलश्च स वै हिन्दुरिति स्मृतः ॥

सदाचाररतो यस्तु पञ्चयज्ञपरायणः ।
यो भारतनिवासी च स वै हिन्दुरिति स्मृतः ॥

संस्कृतं यो विजानाति येन चाद्रियते हि तत् ।
श्रद्धावान् मोक्षसंज्ञाने स वै हिन्दुरिति स्मृतः ॥

स्वधर्मनिरतः श्रीमान् अहिंसासत्यलक्षणः ।
परधर्मे न निन्दावान् स वै हिन्दुरिति स्मृतः ॥

पितामहाच्युतेशानसत्यज्ञानकृताङ्गुलिम् ।
नमस्कारं करोतीति स वै हिन्दुरिति स्मृतः ॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शिखायज्ञोपवीते च यो धत्ते कर्मनिष्ठितः ।
वाग्मी वन्दनशीलो यस्स वै हिन्दुरिति स्मृतः॥

यश्च रामकथाप्रीतः जये भागवते तथा ।
गायत्रीमानसो नित्यं स वै हिन्दुरिति स्मृतः ॥

यो गोरक्षकः श्रीमान् यो गोपोषणतत्परः ।
गोसेवामहितो धीमान् स वै हिन्दुरिति स्मृतः ॥

गङ्गां गीतां च गोविन्दं गोकुलं गुरुसन्निधिम् ।
सेवते मोदते यश्च स वै हिन्दुरिति स्मृतः ॥

मनोवाक्कायजं योगं यो जानाति करोति यः ।
इह चामुत्र संतीर्णस्स वै हिन्दुरितीर्यते ॥

हिन्दुत्वं न मतं जातिः न च देशविभागवृत् ।
यज्जीवनविधानं तत् शान्तिवर्तनलक्षणम्"॥

(विश्वभारतम् / जनेन्द्रकल्पः / १७३-१८३)

विश्वभारतनिर्माणमखण्डं भारतं तथा ।
स्थापनं रामराज्यस्य कवेर्लक्ष्यं प्रतीयते ॥१६३॥

भारताम्बा महादेवी प्रतिकल्पं विलोक्यते ।
नानारूपा महाकाव्ये महाकविसुकौशलात् ॥१६४॥

अलङ्कारप्रयोगेण नूत्नसन्दर्भकल्पनात् ।
विशिष्टधातुशब्दानां प्रयोगैश्छन्दसां तथा ॥१६५॥

भावपुष्ट्या तथानेकै रसानुगुणवर्णनैः ।
विविधैश्च नवैर्वृत्तैः कृतिरेषा महीयते ॥१६६॥

महोत्सवार्यावंशस्थजयानन्दादिनामभिः ।
प्रभावतीचन्द्रकान्ता-वसन्ततिलकादिभिः ॥१६७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चन्द्रशाला-चन्द्रलेखा-सुनन्दानामभिस्तथा ।
मणिकण्ठिसुनन्दोपमालिनीनामभिस्तथा ॥१६८॥

सुबोधिता-मन्दाक्रान्ता दीपमालाह्वयैस्तथा ।
जलोद्धतोर्ध्वगत्याथो मणिमध्यादिनामभिः ॥१६९॥

मयूरसारिणी-मत्ता-हंसक्रीडाभिधानकैः ।
सुन्दरोत्तरलेखादिसंज्ञकैर्वृत्तकैस्तथा ॥१७०॥

सुशोभितमिदं काव्यं विश्वभारतसंज्ञकम् ।
देववाण्याः समुत्कर्षं घोषयज्जयताच्चिरम् ॥१७१॥

प्रायेण नो प्रणीयन्ते महाकाव्यानि साम्प्रतम् ।
तत्तद्भाषासु लिख्यन्ते लघुकाव्यानि केवलम् ॥१७२॥

तथाप्यमरभारत्यां महाकाव्य-सुसर्जनम् ।
कवीनां तपसा नूनं भवत्यद्यापि हर्षदम् ॥१७३॥

हिमालयस्य सम्भूतिर्विलासश्च महाम्बुधेः ।
सृष्ट्यां भगवतो नूनं महदाश्चर्यकृद्यथा ॥१७४॥

विश्वभारतमित्याख्यं महाकाव्यं तथाद्भुतम् ।
महासरस्वतीदेवीकरुणेक्षितसम्भवम् ॥१७५॥

इयं सारस्वती सृष्टिरद्भुता विबुधप्रिया ।
महाकाव्यमिदं साक्षात्सूक्तिसागरसन्निभम् ॥१७६॥

कैलासगौरीशिखरं 'विश्वभारत' सञ्ज्ञकम् ।
महाकाव्यमिदं साक्षाज्जगन्त्रयशुभावहम् ॥१७७॥

वीप्सानुप्रासयमकाद्यलङ्कारैरलङ्कृतम् ।
'विश्वभारत' सत्काव्यं नो हरेत्कस्य मानसम् ॥१७८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उपमारूपकोत्प्रेक्षा-सन्देहादिविभूषणैः ।
सज्जितं मानसं कस्य न हरेद्विश्वभारतम् ॥१७९॥

रत्नाकरः सदुक्तीनां सूतिरात्मसमुन्नतेः ।
मञ्जूषा सद्विचाराणां नूनं श्रीविश्वभारतम् ॥१८०॥

बुद्धिप्रदा नीतिदात्र्यो "विश्वभारत"सूक्तयः ।
चित्तशुद्धिविधायिन्यः सर्वमङ्गलकारकाः ॥१८१॥

सुशीलाम्बा-तनौ जातो नागभूषणशर्मणः ।
जयताद्रेणुका-जानिः शर्मा नागफणिः कविः ॥१८२॥

अकरोद्यो महाकाव्यं "विश्वभारत"नामकम् ।
अवधानसरस्वत्या महापीठाश्रयस्थितः ॥१८३॥

कवित्वं भारतप्रेम कला-पाण्डित्य-वैभवम्।
विश्वबन्धुत्वभावञ्च सर्वं गृह्णन्त्वितो बुधाः ॥१८४॥

तपो मूर्तमिदं दिव्यं श्रीनागफणिशर्मणः ।
विश्वभारत-सत्काव्यं जगत्कल्याणदं जयेत् ॥१८५॥

कश्मीर - शारदा - पाद - पङ्केरुहलसत्प्रभम् ।
सर्वज्ञपीठं जयताद् 'विश्वभारत' सञ्ज्ञकम् ॥१८६॥

इत्याशास्ते रमाकान्तः शुक्लो वाणी-विहारतः ।
'विश्वादि' 'भारतान्तं' यो 'भाति मे भारतं' जगौ[३] ॥१८७॥

यन्मातृदेव-पितृदेव-कवीश्वरेण
पित्रोः कृतेऽर्पितमिदं परया हि भक्त्या ।
तद्विश्वभारतमनारतमस्तु विश्वे
सौख्यप्रदं सुकृतिनाञ्च महाकवीनाम् ॥१८८॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जयेन्नागफणिः शर्मा विद्वत्कमलभास्करः ।
सभाकुमुद्वतीहर्षप्रकर्षामृतदीधितिः ॥१८९॥

अवधानिबुधाद्रीणां मेरुर्मान्यो महीयसाम् ।
कलासाहित्यसङ्गीतविद्यानद्यर्णवो महान् ॥१९०॥

"अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शम्भुः" शर्मा नागफणिः कविः ॥१९१॥

"विश्वभारत"नामेदं महाकाव्यं जयेद्भुवि ।
जयेदस्य प्रणेताथो जयन्त्वस्य सचेतसः ॥१९२॥

नन्दन्तु पाठका अस्य नन्दन्तु च समीक्षकाः ।
नन्दन्तु शोधकर्तारो निर्देष्टारश्च देशिकाः ॥१९३॥

ये ध्वन्यङ्कनकर्तारो वाचकाश्च प्रचारकाः ।
दृश्याङ्कनविधातारस्ते जयन्तु समे बुधाः ॥१९४॥

विश्वबन्धुत्व-सद्भावं राष्ट्रप्रेम च सन्ततम् ।
पठतां शृण्वतां चित्ते दीपयेद्विश्वभारतम् ॥१९५॥

(रचना-तिथिः वसन्त-पञ्चमी २०७७ वि.सं., तदनुसारं १६.२.२०२१)

२५.२.२०२१तमे दिनाङ्के भाग्यनगरे (हैदराबादे) अवधान-सरस्वतीपीठे समायोजिते 'विश्वभारत' महाकाव्यस्याविष्करण- महोत्सवेऽस्या रचनायाः कानिचन पद्यानि मञ्चतः रचनाकारेण श्रावितानि।)

पादटिप्पण्यः

१. कटपयादिरीत्या संख्या प्रदत्ता

२. अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तत्वमन्यच्च प्रवृत्तिनिमित्तत्त्वम्।

३. एतत्पंक्तिलेखकस्य (रमाकान्तशुक्लस्य) भाति मे भारतम् इत्यस्य काव्यस्य प्रथमपद्यस्य आद्यपदं 'विश्व'मस्ति यथा **विश्वबन्धुत्वमुद्घोषयत्पावनम्** अन्तिमञ्च पदं 'भारतम्' इत्यस्ति यथा **मोदतां वर्धतां राजतां भारतम्।।**

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सदा वन्दनीया सभा रासभानाम्

-निरंजन मिश्रः

सदा वन्दनीया सभा रासभानां
सदा चार्चनीया विभा रासभानाम्।
भविष्यस्य भूतस्य वा नास्ति चिन्ता
स्थिता वर्तमाने सभा रासभानाम्॥१॥

वचो येन पीतं मदीयं श्रुतिभ्यां
सुधास्यन्दिनी तेन लब्धा धरायाम्।
स्वमानाच्च ये वञ्चिताः पण्डितास्ते
गतास्ते भविष्यन्ति नूनं सभायाम्॥२॥

न पश्यामि यां तां लिखामीह नैव
श्रुतौ केवलं वा वसामीह नैव।
विनिन्दन्ति ये तां सदा तर्कसंघै-
र्भवन्ति स्वयं ते तु नूनं सभायाम्॥३॥

इमे रासभा वन्दनीया न केषा-
मिमे निन्दनीया न वा कुत्र केषाम्।
न निन्दास्तुतिभ्यामहो बाधते या
कथं सा न वन्द्या सभा रासभानाम्॥४॥

वयं लेखका वाचकाः पाठका वा
हसन्तो मनस्येव मूकास्तथा वा।
स्तुतौ घोटकानां लिखन्तोऽपि काव्यं
भवामस्सभायां सदा रासभानाम्॥५॥

न जाने कदा पायिता का सुरा या
मनो मोदयत्येव तस्यां सभायाम्।
स्वयं कण्ठनालाद्विनिर्गच्छतीयं
सरागैव वाणी स्तुतौ रासभानाम्॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वसन्ते घने वा प्रचण्डातपे वा
गृहे वा वने वा मठे वा रणे वा।
इतो वा ततो वा न जाने कुतो वा
चलत्येव नित्यं सभा रासभानाम्॥७॥

न रोगो न शोको न चिन्ता न लज्जा
न वेर्ष्या न रागो न कुण्ठा न मानः।
समे सर्वभक्तास्समे सर्वमुक्ता-
स्सभायां विनम्रास्समे रासभानाम्॥८॥

इमे रासभाः के न जानन्ति लोके
विजानन्ति ये ते भवन्तीह शोके।
परं भूरिशो ज्ञानवन्तोऽपि मित्रै-
र्भ्रमन्तीह सेवाविधौ रासभानाम्॥९॥

न जाने हसिष्यन्ति के कर्मवीराः
करिष्यन्ति के रोदनं वा प्रवीराः।
परञ्चात्र जानामि सर्वे सुधीराः
पठित्वापि यास्यन्ति नूनं सभायाम्॥१०॥

न जाने वदिष्यन्ति के केऽत्र किं किं
लिखिष्यन्ति वा रक्तनेत्राश्च किं किम्।
परं तद्विमुक्तो वदामीह बन्धो
धरायां तु धन्या सभा रासभानाम्॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

हिमाचल-प्रदेशः

-आचार्य सुरेश शर्मा भारद्वाजः

भारतस्योत्तरे देवतात्मा दिशि
शैलराजोऽस्ति हैमाचलाख्यः स्थितः ।
अत्र देवाधिदेवाम्बिका-सन्निधौ
मानवा सन्ति सौम्या सतोधारिणः ॥१॥

उत्तरे यस्य चम्बा-पुरी शोभते
भासते पश्चिमे निर्मलं सोलनम् ।
दक्षिणस्यां स्थितं शीर्षमौरं तथा
प्राचि किन्नौर-संज्ञं स्थलं राजते ॥२॥

अत्र भूमौ शतद्रु-स्पिती-भानुजा-
व्यास-चिन्नाव-रावी-गिरी-संज्ञकाः ।
निर्मलाः निश्छलाः निम्नगाः निम्नगाः
वर्धयन्त्यस्य राज्यस्य शोभां सदा ॥३॥

नाहनोना-मनाली-कसौली-पियो-
व्यास-मण्डी-कुलूत-स्पिती-कांगडाः ।
घाट-हम्मीर-चम्बापुरी-श्यामला-
संज्ञकानि स्थलानि स्थितान्यत्र वै ॥४॥

यः प्रदेशस्तपःस्थानमत्रेर्मनोः
जामदग्नेर्निवासस्थलं पावनम् ।
व्यास-वासिष्ठ-माण्डव्य-पाराशर-
लोमशाद्यंघ्रिधूल्यान्वितो वर्तते ॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रेणुका-चिन्तपूर्णी-त्रिलोकेश्वरी-
शूलिनी-चण्डमुण्डा-सुहाटेश्वरी ।
ज्वालमाला-शिवा-भीमकाली-सती
सर्वतश्चात्र रक्षन्ति हैमाचलम् ॥६॥

देवदारुद्रुमास्तुंगशृंगाः नगाः
सप्रपातापगाः देवदेवालयाः ।
सेव-जम्बू-कपित्थाम्र-निम्बागमाः
नन्दयन्त्यट्टनायागतानां हृदः ॥७॥

सात्त्विकाः सज्जनाः धर्मकार्यान्विताः
पुण्यशीलाः कृषेः कर्मपारंगताः ।
भक्तिवन्तोऽत्र धीराः क्षमाशालिनः
पण्डिताः सन्ति हैमाचले ग्रामिणः ॥८॥

हैमवन्तोऽचलाः लम्बिताः निर्झराः
वन्यभूमिः सुधासारतोयापगाः ।
पुष्पिताः फल्लिताः सौरभेयाः द्रुमाः
वर्धयन्त्यस्य राज्यस्य शोभां सदा ॥९॥

मन्दिरे शंकरः पर्वते पार्वती
गोष्ठगेहेषु धेनुर्गृहेषु श्रिया ।
मानुषेषु श्रमो मानसेषु शमो
रामनाम मुखेष्वत्र राराजते ॥१०॥

कृष्णता कृष्टिकार्येषु चित्रेषु नो
लालिमा सेववृक्षेषु कोपेषु नो ।
वीरता देशरक्षासु निम्नेषु नो
नम्रता मानवेषु विभात्यत्र वै ॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वल्लिकायां हरिश्चुल्लिकायां हरि-
वन्यभूम्यां हरिः सस्यभूम्यां हरिः ।
कन्धरायां हरिर्वाटिकायां हरिः
प्रार्थनायां हरिश्चात्र वै राजते ॥१२॥

नातपोऽस्ति क्वचिच्च्यातपोऽस्ति क्वचिद-
प्रकाशः क्वचिच्च प्रकाशः क्वचित् ।
हैमशृंगाः क्वचिच्छैलशृंगाः क्वचि-
द्वैपरीत्यं विभात्यत्र हैमाचले ॥१३॥

मानवाः सन्ति नम्राः गुणैरद्भुतैः
पादपाः सन्ति नम्राः फलैर्मिष्टितैः ।
पर्वताः सन्ति नम्राः हिमाच्छादितै-
र्निर्झरा सन्ति नम्राश्च हैमाचले ॥१४॥

(हिमाचल-प्रदेश-पूर्ण-राज्यत्वस्य स्वर्णमय-सम्वत्सरस्य
हिमाचल-दिवसोपलक्ष्ये हिमाचल-प्रदेशस्य कृते समर्पितं काव्यमिदम्)

आचार्यः, साहित्य-विभागः
गोरक्षनाथ राजकीय संस्कृत महाविद्यालयः,
नाहन, हिमाचल प्रदेशः-१७३००१
मो. : ९४१८३१४३३०

(पाठकाः स्वविचारैः परामर्शैश्च कविं परिचाययितुं प्रार्थ्यन्ते।)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

एकं गज़लम्

–डॉ. महराजदीन पाण्डेयो 'विभाषः'

लिखामि किमु न लिखामीति मामकः कामः ।
न नेत्युदीर्य लसामीति मामकः कामः ॥

रदीफ़ काफ़ियेति सरूपानुसरवर्जम् ।
गजलमहं तु वयामीति मामकः कामः ॥

कविरतन्त्रोऽस्मि नावमम्बुधौ मरौ किंवा ।
क्वचित् प्रसह्य नयामीति मामकः कामः ॥

स नैकवारमागतो मदर्थमिति तत् किम् ।
प्रतिश्रुतोऽपि न यामीति मामकः कामः ॥

अपेक्षितोऽपि होलिकाक्षणोऽपि सुलभोऽपि ।
गलेऽरिणापि मिलामीति मामकः कामः ॥

विभाष कद्वद त्वमेव लौकिकं लिख पठ ।
दिवस्य चाटु रटामीति मामकः कामः ॥

सरूपः = काफ़िया
अनुसरः = रदीफ़

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi

Cuberta / New Volume (E) /
Lokesh Kumar Sharma (2) /
6. Dr. RAMA KANT SHUKLAJI
(Guruji) / Year 2021 /
New Kavyasangraha-2021 /
'अर्वाचीन हिन्दी काव्यसंग्रह (I)'
प्रथम खण्ड का राष्ट्रीय
वही
New Kavya Sangrah (Title
page)

PDF भी वही है

E / E Data Downloads / Downloads
current / Downloads current
from 2022 / Downloads
Parwachanasamkrit
Sangraha (F) pdf

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

काव्यप्रणेता महामहोपाध्यायः रमाकान्तशुक्लः

जन्मतिथिः २४-१२-१९४० ई.

जन्मस्थानम् खुर्जा (उ.प्र.)

पिता (स्व.) श्री ब्रह्मानन्द शुक्लः

माता श्रीमती प्रियम्बदा शुक्ला

शिक्षास्थले खुर्जास्थश्रीराधाकृष्ण - संस्कृतकालेजः, एन. आर.ई.सी.कालेजश्च।

शिक्षा एम.ए. (हिन्दी-संस्कृतयोः) पीएच.डी. (आगरा), साहित्याचार्यः

राष्ट्रपतिसम्मानप्रमाणपत्रेण पद्मश्री-सम्मानेन चालङ्कृतः संस्कृतविद्वान्।

प्रकाशिता ग्रन्थाः जैनाचार्य रविषेणकृत पद्मपुराण और तुलसीकृत रामचरितमानस (उ.प्र. शासनपुरस्कृतः), उत्तररामचरितप्रियम्वदाव्याख्या (सहलेखनम्)।

प्रकाशितानि काव्यानि भाति मे भारतम्, जय भारतभूमे (उ.प्र. संस्कृतअकादमी-पुरस्कृते काव्ये), भाति मौरीशसम् (काव्यम्), भारतजनताहम् (उ.प्र. संस्कृतसंस्थानस्य कालिदास-सम्मानेन पुरस्कृतं कवितासंकलनम्), सर्वशुक्ला (कवितासंकलनम्) सर्वशुक्लोत्तरा, आशाद्विशती, मम जननी, राजधानी-रचनाः (उप्रसंसं पुरस्कृत), प्राच्यविद्याधिवेशनम्।

नाट्यकृतयः पण्डितराजीयम् (उ.प्र. संस्कृत अकादमी-पुरस्कृतं ध्वनि-नाटकम्), अभिशापम् (उ.प्र. संस्कृत अकादमी-पुरस्कृतं ध्वनिनाटकम्), द्वयोरपि मञ्चप्रस्तुतिः नैकधा जाताः। पुरश्चरणकमलम्, नाट्यसप्तकम्, (दिल्लीसंस्कृतअकादम्या अखिलभारतीयमौलिकसाहित्यरचनापुरस्कारेण सम्मानितम्)।

सम्पादिता ग्रन्थाः संस्कृतसुधा, संस्कृगद्यगुच्छः, अर्वाचीनसंस्कृत-महाकाव्यविमर्शः (खण्डत्रयम्), अर्वाचीनसंस्कृत-साहित्य-परिचयः (खण्डद्वयम्), अर्वाचीनसंस्कृत-संग्रहः (खण्डत्रयम्), अर्वाचीनसंस्कृतम् (त्रैमासिकपत्रम्) १९७९ तः अद्यावधि (दिल्लीसंस्कृतअकादम्या अखिलभारतीय संस्कृतपत्रकारिता-सम्मानेन सभाजितम्), स्तुतिकुसुमाञ्जलिः। **अनूदितग्रन्थः** – अमीना (उपन्यासः)।

काव्यपाठः विदेशेषु मौरीशस-अमेरिका-इटली-यू.के. प्रभृतिषु देशेषु भारतवर्षस्य विविधराज्येषु च समायोजितेषु विविधसमारोहेषु किञ्च आकाशवाणी-दूरदर्शनयोः १९६३ तः अद्यावधि संस्कृतकाव्यपाठः कृतः। आकाशवाण्याः सर्वभाषा-कविसम्मेलने संस्कृतकविरूपेण अनुवादकर्तृकविरूपेण च सहभागिता कृता।

साम्प्रतिकवृत्तिः प्रधान-सम्पादकः - अर्वाचीनसंस्कृतम् (त्रैमासिकपत्रम्)

आवासः 'रमालयः' आर-६, वाणी विहारः, नयी दिल्ली-११००५९ (भारतम्)

दूरभाषः ०११-२८५६१८४६, ७०४२४३१६०८

ISBN - 978-81-85924-42-7

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi